## वाचस्पति-(पीएच.डी.) उपाधिकृते

## प्रस्तुतो महाशोधप्रबन्धः

**संशोधनविषयः**

# “बृहद्वृद्धयवनजातकानुसारेण द्वादशभावफल-विचारस्याभ्यासस्तौलनिकमध्ययनं च”


संशोधनकर्ता

**चेतन के. पंड्या**

उपाध्यापकः

विशारद–शास्त्री

आचार्य(ज्योतिषशास्त्रम्)पदव्यलङ्कृतः

बरोडा–संस्कृत–महाविद्यालयः

महाराजा–सयाजीराव–विश्वविद्यालयः,

वटपत्तनम्

मार्गदर्शकः

**प्रो. डॉ. मुकुन्द ला. वाडेकरः**

निर्देशकः प्राच्यविद्यामन्दिरम्,

महाराजा–सयाजीराव–विश्वविद्यालयः,

वटपत्तनम्


सत्यं शिवं सुन्दरम्

**वर्षम् २०१२**

# प्रतिज्ञापत्रम्

यवनाचार्याणां ज्योतिषशास्त्रे विशेषतो जातके होराशास्त्रे वा बहुमूल्यं प्रदानं वर्तते। बृहद्यवनजातकं मीनराजकृतं वृद्धयवनजातकं च –इति जातकविषयकं ग्रन्थद्वयं सम्प्राप्यते। तयोः द्वादशभावफलस्य विवरणं विस्तृतरूपेण प्राप्यते। तस्याध्ययनपूर्वकं विविधग्रन्थैः साकं तुलानाया मम महाशोधप्रबन्धस्य मुख्यो विषयः। तदर्थं द्वयोरनयोर्ग्रन्थयोः प्रकाशितग्रन्थानुसारेण सुसूक्ष्ममध्ययनं विधाय नैकजातकग्रन्थैः साकं तुलना मया प्रस्तुता ।

अत्र शपथपूर्वकमुद्घोष्यते यत्–अस्मिन् महाप्रबन्धे मया विविधानां प्रकाशितानां मूलभूतानां विविधभाषानुवादसहितानां तथा चाधारग्रन्थानां ग्रन्थकाराणां, पुस्तकानां लेखकानां कोशग्रन्थानां च प्रमाणभूतायाः सामग्र्याः सम्यक्तया विवेकबुद्ध्या सुयोग्यस्थानेषु समुपयोगः कृतः, तस्य यथास्थाने सन्दर्भग्रन्थसूच्यां टिप्पण्यां च ऋणनिर्देशः कृतोऽस्ति। तथापि महाप्रबन्धे सर्वं मम प्रतिपादनं, निष्कर्षा निर्णयाश्च सम्पूर्णतया मौलिकाः स्वकीयाश्च सन्ति। एतादृशमध्ययनं तुलना च केनाप्यद्यावधि न विहितेति मम संशोधनं नावीन्यपूर्णं ज्ञानवर्धकं चास्तीति सविनयं–हृदयपूर्वकं निवेद्यते ।

स्थानम्

वडोदरा

**चेतन कृष्णकान्त पंड्या**

(संशोधनकर्ता)

# Oriental Institute

**The Maharaja Sayajirao University of Baroda, Vadodara-390001**


## मार्गदर्शकप्रमाणपत्रम्

**शैक्षणिकवर्षम् २००७-२०१२**

इदं प्रमाणीक्रियते यत् **चेतन कृष्णकान्त पंड्या** द्वारा महाराजा–सयाजीराव–विश्वविद्यालयस्य वाचस्पति(पीएच.डी.) इत्युपाध्यवाप्तये प्रस्तुतोऽयं महाशोधनिबन्धः–

**"बृहद्वृद्धयवनजातकानुसारेण द्वादशभावफल-**
**विचारस्याभ्यासस्तौलनिकमध्ययनं च "**

तस्य मौलिकं स्वतन्त्रं च संशोधनमस्ति। तेन मम निर्देशन इदं संशोधनकार्यं निष्ठापूर्वकं कृतम्। महानिबन्धश्च प्रस्तुतः।

दिनाङ्कः– २९.१०.२०१२

स्थलम् – वडोदरा


मार्गदर्शक :

**प्रो.डॉ.मुकुन्द ला. वाडेकर**

निर्देशकः, प्राच्यविद्यामन्दिरम्,

महाराजा–सयाजिराव–विश्वविद्यालयः, वटोदरम्

वाचस्पतिनिर्देशकः संस्कृतमहाविद्यालयः,

म.स.विश्वविद्यालयः, वटपत्तनम् (गुजरात)

# प्राक्कथनम्

अध्ययनकालादेव ज्योतिषशास्त्रस्य विषये कापि मम मनीषाऽऽसीत्। अतो गुरुजनैर्ज्यैष्ठैः श्रेष्ठैश्चैतद्विषयेऽनुसंधानं कर्तुं, प्रायेणोत्साहवर्धनं वारं वारं कृतम् । फलतः १९९० ख्रिस्ताब्दतोऽध्ययनकालदारभ्याद्यावध्यनवरतरूपेण गङ्गाप्रवाहवच्च कार्यं प्रचलति। अयं हर्षस्य विषयो यत्कार्यमिदं पूर्णतामगात्। अनुसंधानकार्ये येषां महाभागानां जनानां गुरुजनानां सर्वेषां च यत् सहाय्यं प्रत्यक्षं परोक्षरूपेण च प्राप्तं तेषां कृते कार्तज्ञं ज्ञापयाम्यहम्।

प्रथमं हि ममेष्टपादानां प.पू.भगवतां श्रीरङ्गावधूतमहाराजानां कृपाप्रसादात् कार्यमिदं जातमेतदर्थं तेषां चरणयोः प्रणामाञ्जलिः। तथा संस्कृतमहाविद्यालयीया गुरुजना ज्येष्ठाः श्रेष्ठाश्च स्व. चन्द्रकान्त जोशी, श्री. राजेन्द्र व्यासः, डॉ. रामपाल शुक्लः, श्री. विजयभाई पुरोहितः- एते सर्वे मानार्हाः सन्ति। तेषामपि भूयो भूयो कार्तज्ञं स्मरामि।

पूर्वप्राचार्याः डॉ. एच. एम. पाण्डेयाः, श्री. योगेशभाई ओझा महोदयाः- एतेषामप्युपकारभारं स्मरामि। सम्प्रति ये प्राचार्यत्वेन विराजन्ते तेषां डॉ. रबीन्द्र कुमार पंडा महाभागानां सौहार्दं मार्गदर्शनं च संस्मरणीयं वर्तते।

ममाभीष्टमित्राणि सन्ति ते - प्रफुल्ल पुरोहिताः, दिगंबर काशीकर-महाभागाः,आनन्द पटवर्धनाः - इत्येते धन्यवादार्हाः । मम मार्गदर्शका ये सन्ति तेषां विषये वचनैर्यदि कार्तज्ञं स्मरेयं तत्तु लघुत्वायैव दृश्यते। अतो हि डॉ. मुकुन्द लालजी वाडेकरमहाभागाः, ये प्राच्यप्रतीच्योभयविद्याविशारदाः सन्ति, तेषां कृपाप्रसादेन समुचितमार्गदर्शनेन चैतदनुसंधानकार्यं मूर्तत्वं प्राप्तम्। कार्यस्यास्य पूर्णतायां मम पितरौ पुत्रौ च स्मरणीयौ सन्ति।

मम भार्या भारविमोचिनीत्युक्त्याधारेण गृहकार्यतः सर्वप्रकारेण मां विमुच्यै-तत्कार्यं सम्पन्नं भवेदेतदर्थं प्रयत्नं कृतवती। तस्मात् सापि साधुवादार्हास्ति। ।। इति शम्।।

यदत्र सौष्ठवं किञ्चित् तद्गुरोरेव मम न हि।

यदत्रासौष्ठवं किञ्चित तन्ममैव गुरोर्न हि।।

**चेतन के.पंड्या**

संशोधकः

संस्कृतमहाविद्यालयः

# विषयानुक्रमणिका


१ **प्रथमं प्रकरणम्-**

**भारतीयज्योतिषस्य स्वरूपम्**

ज्योतिषशास्त्रस्य व्याख्या, व्याप्तिः, महत्त्वम्, इतिहासः,वेदे रामायणे महाभारते पुराणे ज्योतिषं, त्रिस्कन्धज्योतिषपरिचयः, जातकताजिकग्रन्थानां परिचयः, वैदेशिकानां ज्योतिषविषये मतानि।

२ **द्वितीयं प्रकरणम्-**

**यवनस्य यवनजातकस्य च विषये विवरणम्-**

ज्योतिषसंहिताकारेषु यवनस्य विवेचनम्, यवनशब्दस्य स्पष्टीकरणम्, यवनसन्दर्भाः, तेषां विश्लेषणं, यवनग्रन्थाः, यवनस्य समयः, बृहद्यवन–जातकस्य परिचयः, विषयनिर्देशः, मीनराजकृतस्य वृद्धयवनजातकस्य परिचयः, विषयनिर्देशश्च।

३ **तृतीयं प्रकरणम्-**

**बृहद्यवनजातकानुसारेण द्वादशभावफलम्**

बृहद्यवनजातकस्य विविधाध्यायेषु समागतानां द्वादशभावविषयाणां विवेचनम्, प्रत्येकस्य विषयस्य स्पष्टीकरण

४ **चतुर्थं प्रकरणम्-**

**वृद्धयवनजातकानुसारेण द्वादशभावफलम्**

वृद्धयवनजातकस्य विविधाध्यायेषु समागतानां द्वादशभावविषयाणां विवेचनम्, प्रत्येकस्य विषयस्य स्पष्टीकरणं च ।

५ **पञ्चमं प्रकरणम्-**

**बृहद्यवनजातक - वृद्धयवनजातकयोर्द्वादशभावफलविचारस्य तुलना समीक्षा च**

बृहद्यवनजातकवृद्धयवनजातकयोर्द्वादशभावविचाराणां तुलनात्मकमध्ययनम् ।

बृहद्यवनजातकवृद्धयवनजातकयोर्द्वादशभावविचाराणामन्यैर्ग्रन्थैः साकं तुलना ।

६ **षष्ठं प्रकरणम्-**

**उपसंहारः**

उपसंहारः, समग्रस्य अध्ययनस्य फलम्, आधुनिककाले जातकस्योपयोगिता।

**परिशिष्टानि-**

१. **प्रथमं परिशिष्टम्**

बृहद्यवनजातकस्य द्वादशभावविवरणश्लोकाः

२. **द्वितीयं परिशिष्टम्**

वृद्धयवनजातकस्य द्वादशभावविवरणश्लोकाः

३. **तृतीयं परिशिष्टम्**

ज्योतिषशास्त्रीयग्रन्थेषूद्धृतानां यवनोक्तश्लोकानां सङ्ग्रहः।

४. **चतुर्थं परिशिष्टम्**

ग्रन्थोक्तपारिभाषिकशब्दानां सूचिः

५. **पञ्चमं परिशिष्टम्**

अध्ययनोपयुक्तानां ग्रन्थानां सूचिः

# संक्षेपसूची

| सं.नाम | ग्रन्थनाम |
|---|---|
| अभि.शाकु. | अभिज्ञानशाकुन्तलम् |
| अेन.सी.सी. | न्यू कॅटॅलोगोरस् कॅटलोगोरम् |
| ऋ.वे. | ऋग्वेदः |
| क.सं. | कश्यपसंहिता |
| काणे | हिस्ट्री ऑफ धर्मशास्त्र |
| तै.सं. | तैतिरीयसंहिता |
| दीक्षित | शं वा. दीक्षित, भारतीय ज्योतिष |
| पद्म.पु. | पद्मपुराणम् |
| पा.शि. | पाणिनिशिक्षा |
| प्रा.को. | प्राचीनकोश |
| बृ.जा.टी. | बृहज्जातकटीका |
| बृ.सं.टी. | बृहत्संहिताटीका |
| ब्र.पु. | ब्रह्माण्डपुराणम् |
| भा.पु. | भागवतपुराणम् |
| म.पु. | मस्त्यपुराणम् |
| म.स्मृ. | मनुस्मृतिः |
| महा.व. | महाभारतम्, वनपर्व |
| मी.श्लो.वा. | मीमांसाश्लोकवार्तिकम् |
| या.समृ. | याज्ञवल्क्यस्मृतिः |
| विक्रम. | विक्रमोर्वशीयम् |
| वि.पु. | विष्णुपुराणम् |
| वे.ज्यो. | वेदाङ्गज्योतिषम् |
| श.ब्रा. | शतपथब्राह्मणम् |

# अनुक्रमणिका


| क्रम. | विषयवस्तु | पृ.क्रमांक |
|---|---|---|
| १ | **प्रथमं प्रकरणम्–**<br>**भारतीयज्योतिषस्य स्वरूपम्** | ९–५९ |
| २ | **द्वितीयं प्रकरणम्–**<br>**यवनस्य यवनजातकस्य च विषये विवरणम्–** | ६०–१०७ |
| ३ | **तृतीयं प्रकरणम्–**<br>**बृहद्यवनजातकानुसारेण द्वादशभावफलम्** | १०८–२१० |
| ४ | **चतुर्थं प्रकरणम्–**<br>**वृद्धयवनजातकानुसारेण द्वादशभावफलम्** | २११–२८९ |
| ५ | **पञ्चमं प्रकरणम्–**<br>**बृहद्यवनजातक – वृद्धयवनजातकयोर्द्वादश-भावफलविचारस्य तुलना समीक्षा च** | २९०–३२० |
| ६ | **षष्ठं प्रकरणम्–**<br>**उपसंहारः** | ३२१–३३२ |
| ७ | **प्रथमं परिशिष्टम्**<br>बृहद्यवनजातकस्य द्वादशभावविवरणश्लोकाः | ३३३–४६५ |
| ८ | **द्वितीयं परिशिष्टम्**<br>वृद्धयवनजातकस्य द्वादशभावविवरणश्लोकाः | ४६६–५८८ |
| ९ | **तृतीयं परिशिष्टम्**<br>ज्योतिषशास्त्रीयग्रन्थेषूद्धृतानां यवनोक्तश्लोकानां सङ्ग्रहः। | ५८९–६०८ |
| १० | **चतुर्थं परिशिष्टम्**<br>ग्रन्थोक्तपारिभाषिकशब्दानां सूचिः | ६०९–६१२ |
| ११ | **पञ्चमं परिशिष्टम्**<br>अध्ययनोपयुक्तानां ग्रन्थानां सूचिः | ६१३–६२५ |

# प्रथमं प्रकरणम्

# भारतीयज्योतिषस्य स्वरूपम्

# प्रथमं प्रकरणम्

## भारतीयज्योतिषस्य स्वरूपम्

**प्रास्तविकम्-**

भारतीयानां कृते सर्वप्रथमा आद्या ग्रन्था वेदा वर्तन्ते। वेदेषु विविधप्रकारस्य ज्ञानं विज्ञानं च वर्तते-इत्यत्र नास्ति शङ्कालेशोऽपि। वेदानां सम्यग्ज्ञानार्थं वेदाङ्गानां प्रवृत्तिः। ज्योतिषं वेदाङ्गेष्वेकतम्। महर्षिर्याज्ञवल्क्यश्चतुर्दशविद्या-स्थानानामुल्लेखं करोति। यथा-

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।[१]

तानि परिगण्यन्ते यथा- ऋग्वेदः, यजुर्वेदः, सामवेदः,अथर्ववेदः-इति चत्वारो वेदाः, वेदाङ्गानि-

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव हि।। [२]

एतेषु पुराणशास्त्रं, न्यायशास्त्रं, मीमांसाशास्त्रं, धर्मशास्त्रम्- एते मिलित्वा चतुर्दश विद्यास्थानानि धर्मस्थानानि च भवन्ति। विष्णुपुराण आयुर्वेदः धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम्-इति चतुणामुपवेदानां समावेशनं कृत्वा विद्याना-मष्टादशत्वं प्रतिपाद्यते। यथा-

आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः।।[३]

---

१ याज्ञ.स्मृ. १.३

२ बृ.जा.टीका.१.१, Ạpte, V.S., The Practical Sanskrit-English Dictionary, p.887

इत्थं ज्योतिषं चतुर्दशविद्यास्थानेष्वष्टादशविद्यास्थानेषु तथा अष्ट वेदाङ्गेषु परिगण्यते। पाणिनिशिक्षायां वर्ण्यते यथा–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।।[४]

लगधस्य वेदाङ्गज्योतिषे वर्ण्यते यत् ज्योतिषं/गणितं वेदाङ्गेषु मूर्ध्नि संस्थितम्– महत्त्वपूर्णमङ्गं वर्तते –इति प्रतिपादितम्–

यथा शिखा मयूराणां नागानां मणयो यथा।

तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्।।[५]

शुक्लयजुर्वेदे (३०.१०) मन्त्रे प्रज्ञानाय नक्षत्रदर्शम्– इत्येवं प्रकारेण नक्षत्रविद्यायाः समुल्लेखो भवति। मुण्डकोपनिषदि (१.१.५) परा–अपराविद्याया विवरणं वर्तते। तत्रापरा –ऋग्वेदो यजुर्वेदो सामवेदो ऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। इत्यत्र षडङ्गेष्वपराविद्यात्वेन ज्योतिषस्योल्लेखो विद्यते। छान्दोग्योपनिषदि (७.१.२) नक्षत्रविद्यायाः स्पष्टो निर्देशः प्राप्यते। एतेन ज्योतिषस्य महत्त्वं प्राचीनत्वं च सिद्धं भवति।

ज्योतिषशास्त्रं नाम– ज्योतिः, तस्याश्च शास्त्रम्। ज्योतिःशब्देन सूर्य–चन्द्र–ग्रह–तारकादीनां ज्योतिःपिण्डानां ग्रहणं भवति। तेषां विषये यत् शास्त्रम्, यस्मिन् वैज्ञानिकरीत्या पद्धतिपुरःसरमध्ययनं भवति। शास्त्रं नाम शास्यते त्रायते च – इति शास्त्रम्। व्यवहारिदृष्ट्या कर्तव्याकर्तव्यं बोधयति, विधि–निषेधानां संग्रहं च करोति।

कर्तव्यमकर्तव्यं च नित्येन कृतकेन वा।

पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।।[६]

---

३ वि.पु.–३.६.२५,२६.

४ पा.शि.– ४१–४२

५ वे.ज्यो.–ऋग्वेदज्योतिषम् श्लोकः ४

ज्योतिर्नाम सूर्यादिकास्तेजोराशयः। सूर्यस्य चन्द्रस्य च प्रभावः समस्तसृष्ट्युपरि–मानवानां पशूनां वनस्पतीनां समुद्रादीनामुपरि भवतीत्यत्र नास्ति शङ्कालेशोऽपि। तेषां परिभ्रमणेनैव मानवीयं जीवनं, वर्षमानम्, अयनं, ऋतवः, मासाः, पक्षाः, अहोरात्रं, तिथिः, मुहूर्ताः, होरा – इत्यादिकं संभवति। अस्यैव शास्त्रीयो विचारो ज्योतिषशास्त्रे भवति। समस्तसृष्टेरुपरि प्रभावो न भवतीति कथं कोऽपि वक्तुं प्रभवेत्? एतासां विविधगणनानामुपर्याधारितस्य बहुविधयज्ञकालस्य समयनिर्धारणार्थं महर्षिभिरस्य शास्त्रस्योपयोगः प्रारब्धः। एवमिदं कालशास्त्रमपि वक्तुं शक्यते। विविधव्यवहारार्थं कालस्य विचारो नैय्यायिकानां– वैशेषिकानां पूर्वमेवाथर्ववेदमहर्षिभिः प्रस्तुतः कालस्य च महत्त्वं स्वसूक्ते प्रतिपादितम्। कथितं च यस्य कालस्य ज्ञानं भवति, यश्च तं वशीकर्तुं शक्नोति, यश्च तस्य सुव्यवस्थितं समुपयोगं कर्तुं जानाति, स जीवने यशस्वी भवति, योग्यसमये योग्यं कृत्वा। एवमिदं योग्यायोग्यकालनिर्धारकं मुहूर्तशास्त्रमपि भवति।

संसारस्य शुभाशुभविषयाणि केवलं नयनेन दृश्यन्ते, तथैव वेदविहितशुभाशुभ–कर्मणामुपादानमेवं त्यागः– अर्थात् कानि कर्माणि कदा कार्याणि एवं कदा न कार्याणि इत्यादि नेत्रस्य कार्यं ज्योतिषशास्त्रेणैव भवेत्। यथा नेत्रवान् जनो मार्गे स्थितकण्टकादीनि दृष्ट्वा स्वरक्षां कर्तुं शक्तः, तथैव ज्योतिषशास्त्रज्ञाता सम्पूर्णशुभाशुभकर्मसमयं ज्ञात्वा योग्यकालाचरणात् सुखभोक्ता भवेत्।

त्रिस्कन्धात्मकज्योतिषशास्त्रे जातकस्य द्वितीयस्कन्धस्यातीव महत्त्वम्। समस्त–जातकानां भाविबोधकं हितकारकं ज्ञानं यत्र स्थितं तज्जातकशब्देन ज्ञायते। अत्र ज्योतिषविषयेऽपि समस्तप्राणिनां हितकाम्यया विविधभावानां राशीणां मुहूर्तानां सम्यग्

६ मी.श्लो.वा. शब्दपरच्छेदः ४

ज्ञानं संगृहीतम्, तदेव होराशास्त्ररूपेणापि विद्वज्जना मन्यन्ते। ज्योतिषशास्त्रशब्दस्य मध्ये द्वयोः शब्दयोः प्रयोगो लभ्यते । अर्थात् नक्षत्रादिका ज्योतिः–तामधिकृत्यकृतं शास्त्रं ज्योतिषम् । साधारणपरिभाषारूपेण – "ज्योतिषं सूर्यादिग्रहाणां बोधकं शास्त्रम्"। ज्योतिषशास्त्रस्येतिहासः स्वरूपं वा ब्रह्माण्डोत्पत्या साकमेव दृश्यते। अस्मिन् ज्योतिषशास्त्रेऽन्तरिक्षे विद्यमानानां नानाविधज्योतिःपिण्डानां ज्ञानमध्ययनं वा भवति । अत आकाशे दृष्टानां चन्द्र–नक्षत्रादीनां ग्रहाणां च मूलोत्पत्तिः सूर्यादेव मन्यते। एवमाकाशमण्डले सूर्यस्य केवलमक्षिभ्यां ज्योतिर्दृश्यते, अत एव सम्भवतोऽस्य शास्त्रस्य नामकरणमपि ज्योतिःसम्बन्धितविषयाणां समावेशकारणेन ज्योतिषशास्त्रमित्युच्यते । अत एव कथ्यते प्रत्यक्षं ज्योतिषं शास्त्रम्। वयं वक्तुं शक्नुमो यत् सूर्यादिग्रहाणां ज्ञानं कालगणनेत्यादीनां बोधो ज्ञानं वा यस्मिन् शास्त्रे भवति, तदेव ज्योतिषशास्त्रम् । अत्र प्रधानतया ग्रहाः, नक्षत्राणि, धूमकेतुः–आदिज्योतिःपदार्थानां स्वरूपाणि, गत्यादिपरिभ्रमणं,कलादिः, ग्रहणस्थितिः इत्यादित आरभ्य समस्तनिरूपणं सिद्धान्तपक्षे खगोलनाम्ना ज्ञायते। एवं ग्रहाणां नक्षत्रादीनां स्थितिः, गोचरे भ्रमणादिप्रभावात् शुभाशुभफलं च वर्ण्यते–तत् फलज्योतिषम् । केषांचित् मुनीनां मतेन आकाशमण्डले स्थिता समस्तज्योतिःसम्बान्धितविविधविषयाणां समावेशकारणेन शास्त्रमिदं ज्योतिर्विद्या नाम्ना प्रसिद्धम् । यस्मिन् शास्त्रे चोपर्युक्त–विषयाणां विस्तृतं वर्णनं परिदृश्यते, तदेव ज्योतिषशास्त्रम् ।[७]

---

७ भारतीय ज्योतिष, नेमिचन्द्र शास्त्री, प्रथमः अध्यायः, पृ. १७

**ज्योतिषस्य त्रिविधत्वम्** -

सामान्यतया ज्योतिषस्य खगोलं (Astronomy) फलज्योतिषं च (Astrology)- इति विभागद्वयं वैदेशिकैः कल्प्येते। तथापि प्राचीनमहर्षीणां दृष्ट्या ज्योतिषस्य सिद्धान्तः (खगोल–गणितम्), होरा–जातकम् (फलज्योतिषम्), संहिता इति विभागत्रयं भवति। यथोक्तं वराहेण–

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्।

तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।।

– बृ.सं. १.९

भारतीयज्योतिषशास्त्रस्य स्कन्धत्रयं होरा – सिद्धान्तः– संहिता –इत्युच्यते । परन्तु कुत्रचित् स्थाने स्कन्धपञ्चकम् – होरा, सिद्धान्तः, संहिता, प्रपञ्चः(प्रश्नः), शाकुनश्चेति नाम्ना प्रसिद्धम्। केषांचन मतेन ज्योतिषस्य विशालस्य पञ्च स्कन्धान्तर्गतमेव वर्तमानयुगस्य मनोविज्ञानम् (Psychology),जीवविज्ञानम् (Biology),रसायनविज्ञानम्(Chemistry),चिकित्साशास्त्रम्(MedicalScience – इत्यादीनामुत्पत्तिश्च जायते ।[८] अस्य स्वरूपं स्कन्धपञ्चात्मकं दृष्टं यथा –

**१ होरा** -

वराहमिहिरेण होराशब्दस्य व्यत्पत्तिरहोरात्रशब्यस्य पूर्वापरवर्णलोपाद् भवति - इत्युक्तम्। तदेव जातकमित्यपि कथ्यते। ताजकम्–ताजिकमपि जातकस्यैव शाखाप्रभेदः। होरा–जातकम्–ताजिकम्–विषयस्य नैके ग्रन्थाः समुपलभ्यन्ते।

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।

कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति।।

– बृ.जा.१.३

---

८ उपर्युक्तम् पृ. १८

जातकस्य जन्मसमयेऽन्तरिक्षे ग्रहाणां स्थितिर्गत्यादिकं ज्ञात्वा चात्र शुभाशुभफलकथनं क्रियते । अस्मिन् विभागे जन्मपत्रिकाया द्वादशभावानां शुभाशुभफलं, तेषामुपस्थितग्रहाणां राश्यादीनां ज्ञानात् सविस्तरं प्रतिपाद्यते । होराशास्त्रकारैस्त्वत्र ग्रहाणां बलाबलं, ग्रहवर्गः, विंशोत्तरी –इत्यादिषु दशासु गोचरादिभ्रमणप्रभावात् फलकथननिर्देशाश्चोक्ताः । अत्र वराहाचार्यः, कल्याणवर्मा, पाराशरः, सिद्धसेनः, ढुण्ढिराजः, केशवादिकाः प्रधानाचार्याः ।[९]

## २ गणितं सिद्धान्तो वा -

अस्य विभागस्य परिभाषादिकं च प्रायेण विकसितं दृश्यते। अत्र त्रुट्याद्यारभ्य कल्पकालपर्यन्तं कालगणना, सौरचान्द्रमासादीनां भेदज्ञानं, ग्रहाणां गतिनिरूपणं, व्यक्ताव्यक्तगणितं प्रयोजनसहितं, त्रिप्रश्नाधिकारादिकं (दिक् – देश - कालादिकं), विविधजलयन्त्रादिकनिर्माणं, अक्षज्या, लम्बज्या, कुज्या, अक्षांशाः –रेखांशाः, अहर्गणसाधनविधिः, ग्रहानयनविधिः– इत्यादिकं परस्परपञ्चागनिर्माणादीनां ज्ञानं विस्तृतं प्राप्यते । उत्तरमध्यकाले त्वस्य प्रचारस्य प्रसारस्य च बहुलता कारणेनास्यापि भेदत्रयं मन्यन्ते जनाः । यथा = गणितीयसिद्धान्तः, तन्त्रं करणं च । सिद्धान्तविभागे तु सृष्टि–आरम्भकालादिष्टदिनपर्यन्तमहर्गणसाधनं भवति। तन्त्रे तु युगादित आरभ्य। परन्तु करणे च स्वकल्पितेष्टवर्षस्यैव स्वदिनेष्टदिनपर्यन्तमहर्गणसाधनं भवति।[१०] भास्कराचार्यः, लाटदेवः, लल्लाचार्यः, केशवदैवज्ञः, वराहादिका मुख्यतमाचार्या वर्तन्ते विभागेऽस्मिन्।

---

९ उपर्युक्तम् पृ. १९

१० उपर्युक्तम् पृ. १९-२०

## ३ संहिता-

संहिताविभागस्य बहु प्रचारः, प्रसारश्च नास्ति। अध्ययनमपि वराहमिहिरस्य बृहत्संहितां हित्वा अन्यासां न तथा भवति। यतो हि तत्र समग्रसमष्टेः, विश्वस्य च कल्याणार्थं विचाराः प्रस्तूयन्ते, प्रतिव्यक्ति-उपयुक्ता विचाराः स्वल्पा भवन्ति। संहिता नाम- सम्यग् हिता। विचाराणां विविधविषयाणां च साकल्येनात्र सम्यक्तया प्रतिपादनं भवति। अत्र प्रथमं ज्योतिषस्य महत्त्वं, नवग्रहाणां चारविचाराः, विविधसंस्काराणां मुहूर्तविचारः, उल्कापातः, भूकम्पः, अतिवृष्टिः- अनावष्टिः, अरिष्टानि, शकुनविचरः, शान्तयः, वास्तुशास्त्र- विचारः, सामुद्रिकलक्षणानि, वनस्पतिप्रयोगः । एवमत्र ज्योतिष-धर्मशास्त्र-वास्तु-इत्यादिविविधविषयानां संग्रहो विश्वकल्याणार्थं क्रियते।

प्रायेण सर्वे वराहमिहिरविरचितां बृहत्संहितामेव जानन्ति, पठन्ति च । किन्तु तस्य पूर्वं तत्पश्चादपि विविधमहर्षिभिः संहिताग्रन्थानां रचना कृता। महर्षिणां संहितानामानि यथा- बृहत्संहिता, नारदसंहिता, भद्रबाहुसंहिता, कश्यपसंहिता, वसिष्ठसंहिता, रावणसंहिता, लोमशसंहिता - इत्यादिका ग्रन्था अद्यत्वे समुपलभ्यन्ते।

अत्र भूशोधनं, दिक्शोधनं, गृहोपकरणं, इष्टिकाद्वारं, मेलापकः, गेहद्वारं, गृहप्रवेशः, माङ्गलिककृत्यानां शुभमुहूर्ताः, ग्रहचारः, उल्कापातः, भूकम्पः, वृक्षाणां विचारः, पुष्यस्नानादीनां विवेचनं सविस्तरं वर्तन्ते । केचित् जैनायार्चाणां मतेन जीवनोपयोगी आयुर्वेदस्य समावेशः संहितान्तर्गत एव भवेत्। [११]

११ उपर्युक्तम् पृ. २०

**४ प्रश्नशास्त्रं** –

शीघ्रफलकथने समर्थमिदं शास्त्रम् । पृच्छकस्य स्वरं श्रुत्वा तस्योत्तरं वा फलमत्रैव कथ्यते । अत्र सिद्धान्तत्रयं दृश्यते (१)प्रश्नाक्षरसिद्धान्तः, (२) प्रश्नलग्नसिद्धान्तः, (३)स्वरविज्ञानशास्त्रम् । केरलप्रश्नसंग्रहः. पृथयशोदैव–ज्ञस्य षट्पञ्चाशिका, केवलज्ञानप्रश्नचूडामणिः, चन्द्रोन्मीलनप्रश्नः– इत्यादिका ग्रन्थाः प्रसिद्धाः ।[१२]

**५ शकुनम्**–

अपरमस्य नाम निमित्तशास्त्रं प्राप्यते । पूर्वमध्यकालपर्यम्मस्य पृथक् स्थानं नासीत् । प्रारम्भकाले त्वस्य गणना संहितान्तर्गता चासीत् । परन्तु द्वादश्यां शताब्द्यां स्वतन्त्रग्रन्थाः प्राप्यन्ते । वसन्तराजशकुनं, अद्भुत–सागरादिका मुख्यतमा ग्रन्था दृश्यते।[१३]

**वेदेषु ज्योतिषम्**–

वेदा अनेकविषयोपबृंहिताः सन्ति । अनेनानुपातेन वेदग्रन्थेषु स्वाभाविकतया ज्योतिषविषयका उल्लेखा अत्र तत्र समुपलभ्यन्ते । तादृशं ज्ञानं वैदिक–कालिकज्योतिषमिति ख्यातिप्राप्तम् । वेदसाहित्ये वेदाङ्गसाहित्ये च सूर्य–चन्द्र–आकाश – उषा – तारका – रश्मि– नक्षत्र – ऋतु – मास – दिन – रात्रि – वायु – मेघादिविषयाणां वर्णमवश्यं प्राप्यते। तद्वर्णनं मनोहरं स्वाभाविकं चेतश्चमत्कृतिकारकं सुन्दरञ्चास्ति ।

---

१२ उपर्युक्तम् पृ. २०

१३ उपर्युक्तम् पृ. २१

सूर्यचन्द्रौ प्रतिदिनं नियमपूर्वकमुदयमस्तं च गच्छतः । वसन्तग्रीष्मादि–ऋतुचक्रं नियमपूर्वकं बद्धक्रमं सूर्यगत्यनुसारेण सततं परिवर्तते । एतत्सर्वं वयं दार्ढ्येन ज्योतिर्विदो जानन्ति तेषा कृते तस्मिन् विषये न कोऽपि चमत्कारो विद्यते । अतिप्राचीनसमये सामान्यजनाः प्रतिदिनं पर्वतपार्श्वत उदयमानं सूर्यबिम्बं तथा च सायं प्रतीच्यां दिशि समुद्रजले विलीयमानं तत्तेजोमण्डलं साश्चर्यं सकौतुकं सचमत्कारपुरपरिमण्डितञ्च विस्फारितनयनैः पश्यन्ति स्म । परेद्युः पुनस्तदेव रविमण्डलं तेनैव क्रमेण समुद्रं गच्छन्तं पश्यन्तस्ते पुनर्विस्मयसागरे निमज्जन्ति स्म। ज्यौतिषशास्त्रस्य सम्यगध्ययनेन कौतुक – चमत्कार– धूमो गगने विशालभावं गच्छन् विलीयते स्म । प्रारंभकाले वयं सर्वे यतो दृष्टवन्तः, अनुभवं कृतवन्तश्च । तेषां सर्वेषां संशोधनं कृत्वा सिद्धान्तरूपेण प्रस्थापितवन्तः ।

वैदिककालस्येतिहासं यदा वयं पश्यामस्तदा ज्योतिषशास्त्र–स्यानेकान्यङ्गानि तत्र द्रष्टुं शक्नुमः । यथा मास – ऋतु – अयन –वर्ष – ग्रह –ग्रहण – ग्रहकक्षा – नक्षत्र – विषुव – नक्षत्रलग्न – अहोरात्र इत्यादिकम्। वैदिकसाहित्ये धार्मिक–सिद्धान्तेन सह ज्योतिषसिद्धान्तानामपि प्रतिपादितमस्ति। यथा ऋग्वेदे संवत्सरं द्वादश चान्द्रमासेषु विभक्तमस्ति। तथा प्रत्येकतृतीयसंवत्सरे (वर्षे) चान्द्रस्यैवं सौरसंवत्सरस्य (वर्षस्य) समन्वयं कर्तुमधिकमासस्य मलमासस्य वा योजना कृतास्ति। ऋग्वेदे संवत्सरस्य (वर्षस्य) द्वादशमासाः, एवं ३६० दिनानि, आहत्य ७२० रात्रिः ३६०+३६० दिनानां वर्णनं प्राप्यते। पं शं. वा. दीक्षितमहोदयैरस्य विषये स्वग्रन्थे भारतीयज्योतिषे यद्विवरणं प्रदत्तं तस्यैवात्र साररूपं प्रदीयते। [१४]

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।

तस्मिन्त्साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः ।।

– ऋ. १, १६४,४८

[१४] भारतीय ज्योतिष, शं.वा.दीक्षित,पृ.१३–६९

तैत्तिरीयसंहितायां द्वादशमासानां नामानि यथा क्रमेण मधु– माधव– शुक्र – शुचि – नभस – नभस्य – इष – ऊर्ज – सहस – सहस्य – तपस् –तपस्यः सन्ति । तथैव संसर्पोऽधिमासस्य कृते एवमंहस्पतिः क्षयमासस्य द्योतको वर्तते।

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च
नभस्यश्चेषश्चोर्जश्च सहश्च ।
सहस्यश्य तपश्च तपस्यश्चोपयामगृहीतोऽसि
स ँ् सर्पोस्य ँ् हस्यत्याय त्वा।।

– तै. सं १. ४. १४

**ऋतुविचारः–**

तैत्तिरीयसंहितायामुक्तं यथा–

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू ।

– तै .सं. ४. ४. १

**यथा कोष्टकम् –**

| **मासः** | **ऋतुः** |
|---|---|
| मधुः– माधवः | वसन्तः |
| शुक्रः –शुचिः | ग्रीष्मः |
| नभः– नभस्यः | वर्षा |
| इषः– ऊर्जः | शरद् |
| सहः– सहस्यः | हेमन्तः |
| तपः– तपस्यः | शिशिरः |

उभयतो मुखमृतुपात्रं भवति को हि तद्वेद, यदृतूनां मुखम् ।

–तै. स. ६.५. ३.

ऋतुपात्रस्य मुखद्वयमस्ति, किन्तु मुखानां दिग्ज्ञानं कठिनं वर्तते। ऋतोर्मुख्याधारः सूर्यस्य गत्याधारेण भवति। प्रत्येकवर्षे सौरमासस्य तथा चान्द्रमासस्य प्रारम्भो भिन्न – भिन्न तिथ्यनुसारं भवति । अतः प्रत्येकवर्षे ऋतोः प्रारंभो भिन्न-भिन्नतिथिषु भवति ।

शतपथ-ब्राह्मणग्रन्थे ऋतुविषय उक्तं यथा-

प्रजापतेर्ह वै प्रजाः ससृजनास्य पर्वाणि विसस्र ँसुः स वै संवत्सर एव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः सन्धी पौर्णमासी चामावास्या चतुर्मुखानि।। स विस्रस्तैः पर्वभिः न शशाक स ँ हातुं तमेतैर्हविर्यज्ञैर्देवा अभिषज्यन्नग्निहोत्रेणैवाहो-रात्रयोः सन्धी तत्पर्वाभिषज्यंस्तत्समदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासीं चामावास्यां च तत्पर्वाभिषज्यं- स्तत्समदधुश्चातुर्मास्यैरेव चतुर्मुखानि तत्पर्वाभिषज्यंस्तत्समदधुः।

– श.ब्रा. १. ६. ३.

**अयनविचार : -**

ऋग्वेदेऽयनशब्दस्योल्लेखः प्राप्यते, परन्तु तस्य कोऽप्यर्थः स्पष्टो न भवति । शतपथब्राह्मणेऽप्ययनविषय उल्लेखः प्राप्यते। यथा-

वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद् हेमन्तः शिशिरस्ते पितरो . . .स (सूर्यः) यत्रोदगावर्तते । देवेषु तर्हि भवति । . . . यत्र दक्षिणावर्तते पितृषु तर्हि भवति।

– श.ब्रा. २. १. ३.

शिशिर–ऋतुतो ग्रीष्म–ऋतुपर्यन्तमुत्तरायणः। एवं वर्षा–ऋतुतो हेमन्त–ऋतुपर्यन्तं दक्षिणायनः। परन्तु समयान्तरे हेमन्त–ऋतोर्मध्यभागतो ग्रीष्म–ऋतोर्मध्यभागपर्यन्तमुत्तरायणो मन्यते । तैत्तिरीयसंहिताया अन्तर्गतेन 'तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेण' (तै. सं. ६. ५ .३)इति मन्त्रेण सिद्धं भवति, यत् षण्मासपर्यन्तमुत्तरायण एवं षण्मासपर्यन्तं दक्षिणायनो भवति। नारायणोपनिषद्युक्तम्–
य उदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं सलोकतामाप्नोति।

– नारा. उप. अनु. ८०

मैत्रायण्युपनिषदि उदगयनशब्दस्य बहुषु स्थानेषूपयागः कृतोऽस्ति । उदगयनशब्दस्य पर्यायवाची शब्दो देवयानः, देवलोकः। एवं दक्षिणायन– शब्दस्य पर्यायवाची शब्दः पितृयाणः, पितृलोकः – इति दृष्टिगोचरं भवति ।

**वर्षविचारः-**

गोपथब्राह्मणग्रन्थे वर्षशब्दस्य कृते हायनशब्दस्योपयोगो भवति । वाजसनेयि–संहितायां वर्षशब्दस्य कृते समाशब्दो भवति । एवं दिनानां संख्याकृते ३५४ अथवा ३६५दिनानि सन्ति वर्तते। ऋग्वेदस्य दशम मण्डले 'समानां मास आकृतिः(१०.८५.५)' इति मन्त्रे समाशब्दद्वारा वर्षशब्दस्य प्रतिपादनं वर्तते । शतपथ – ब्राह्मणग्रन्थानुसारेण यथा –

ऋतुभिर्हि संवत्सरः शक्नोति स्थातुम् ।

– श.ब्रा. २.२.३

'संवसन्ति ऋतवो यत्र' तात्पर्यं यत् यस्यां ऋतवो वसन्ति तद् वर्षं वा संवत्सरं कथ्यते ।

**युगविचारः-**

वैदिककाले युगशब्दस्यार्थ काल इति मन्यते । ऋग्वेदस्य पञ्चममण्डले त्रयसप्ततिसूक्त उक्तं यथा "नहुषा युगा मह्ना रजांसि दीयथः। (ऋ.५.७३.३)" अत्र युगशब्दस्यार्थः - यथा - 'युगोपलक्षितान् कालान् प्रसरादिसवनान् अहोरात्रादिकालान् वा' कृतोऽस्ति । ऋग्वेदस्य षष्ठमण्डले नवमसूक्ते 'युगे युगे विदध्यं (ऋ. ६.८.५)' इत्यत्र युगे - युगे शब्दस्यार्थः काले – काले - इति क्रियते । वाजसनेयिसंहितायां द्वादशेऽध्याय शताधिक एकादशमन्त्रे 'दैव्यं मानुषा युगा (१२.१११)' इत्यत्र सिद्धं भवति यत् तदानीं काले देवयुगमेवं मनुष्ययुगं द्वयं प्रचलितं भवति । ऋग्वेदे (ऋ. १०.९७. १) "या आषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा" इति मन्त्रे देवयुगमित्येव सिद्धं भवति ।

**नक्षत्रविचारः-**

वैदिककाले नक्षत्रगणना कृत्तिकात आरभ्य मन्यते । कारणं सम्पातबिन्दु-र्भरणीनक्षत्रस्य चतुर्थचरणे स्थितः स्यात् । अत एव कृत्तिकात् नक्षत्रगणनां कृतास्ति। केचन विद्वज्जनानां मतानुसारेण कृत्तिकानक्षत्रस्य प्रथमं चरणमेव सम्पातबिन्दुरासीत्। ऋग्वेदे वर्तमानप्रणाली –अनुसारं नक्षत्रचर्चा प्राप्यते यथा–

अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद् दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति।।

– ऋ. सं. १.२४.१०

अस्मिन्मन्त्रे रात्रिसमये नक्षत्रप्रकाश एवं दिने नक्षत्रप्रकाशाभावस्य निरूपणं वर्तते ।

वाजनावती सूर्यस्य योषा चित्रा मघा राय ईशे वसूनाम् ।

– ऋ. सं. ७. ७. ५.

अस्मिन मन्त्रे चित्रानक्षत्रस्य तथा मघानक्षत्रस्योल्लेखः प्राप्यते । अथर्ववेदे कृत्तिकादि –अष्टविंशतिनक्षत्राणां वर्णनं प्राप्यते यथा –

तद्यथा–

चित्रणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि ।

अष्टाविंश सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम्।।१ ।।

सुहवमग्रे कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा।

पुनर्वसू सूनृता चारु पुष्यो भानुराश्लेषा अयनं मघा मे।।२ ।।

पुण्यं पूर्वा फल्गुन्यौ चात्र हस्तश्चित्रा शिवा स्वाति सुखो मे अस्तु।

राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमरिष्ट मूलम्।।३ ।।

अन्नं पूर्वा रासतां मे अषाढा ऊर्जं देव्युत्तरा आ वहन्तु।

अभिजिन्मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम्।।४।।

आ मे महच्छतभिषग्वरीय आ मे द्वया प्रोष्ठपदा सुशर्म।

आ रेवती चाश्वयुजौ भगं म आ मे रयिं भरण्य आ वहन्तु।।५ ।।

–अथर्ववेदः १९.७.१–५

मम गुरुचरणैः प्रो. मुकुन्द वाडेकरमहोदयैः स्वलेखे वेदेषु ज्योतिषं–खगोलं फलज्यातिषं च –इत्यस्मिन् विषये सम्यक्प्रतिपादितं तस्यैवात्रसंक्षेपः प्रस्तुतः।

**खगोलशास्त्रम्**–

मोनियर–विलियम्स्–महोदयो लिखति यत्–अरबीजनैर्हिन्दूनां सकाशादेव बीज–गणितस्य ज्ञानं संप्राप्तम्। बीजगणित–भूमिति–शास्त्रयोः शोधो हिन्दूनामेवास्ति, तयोश्च तैः खगोलस्य संशोधनस्य कृते समुपयोगः कृतः। तत्खगोलज्ञानमेव तेषामेव वरिवर्ति। कोलब्रूकमहाभागोऽपि सुस्पष्टं निर्दिशति यत् –बीजगणितस्य खगोलसंशोधनस्य कृते

तथैव भूमितिप्रमेयाणां विषये समुपयोगः कर्तुं शक्यते–इति हिन्दूनां भारतीयानां संशोधनम्। तदुपयोगस्तैर्यथा कृतः स त्वद्यावधि प्रशंसाया विषयः। हन्स स्लीपर महानुभावेन १९०८ ख्रिस्ताब्दे ग्रहतारादि–दर्शनयन्त्रस्य निर्माणं कृतम्। तत्पूर्वमस्माकं महर्षिभिस्तेषां दूरदृष्ट्या आर्षदृष्ट्या चानेकानि संशोधनानि खगोलशास्त्रे कृतानि प्रशंसार्हाणि सन्ति।

पृथिवी सूर्यं परिभ्रमति– इति सिद्धान्तं संस्थाप्य कॉपर्निकस्महोदयेन टोलेमी–महाभागस्य पूर्वसिद्धान्तस्य खण्डनं कृतम्। महर्षिभिर्मन्त्रेऽपि पृथिवी वर्तुलाकारा, सूर्यं प्रदक्षिणीकरोति–इति प्रस्थापितमिति विदुषां मतम्–

आयं गौः पृश्निरक्रमीद्सन्मातरं पुरः।
पितरं च प्रयन्त्सः।। – शु. यजु. ३.९

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः।
पृच्छामि त्वा वृष्णोरश्वस्य रेतः पृच्छामि वाचः परमं व्योम।।
इयं वेदिः परो ऽअन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम।।

– ऋग्वेदः १.१९४.३४

महर्षिणात्र शब्दब्रह्मणः परमव्योम्ना सह सम्बन्धः प्रदर्शितः। सूर्यस्य स्वप्रकाशित्वं चन्द्रमसश्च परप्रकाशित्वं निर्दिष्टं मन्त्रे , नक्षत्राणां च समुल्लेखः कृतः,तद्यथा–

सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य
नक्षत्राण्यप्सरसो भेकुरयो नाम।

– शु.यजु. १८.४०

अत्राह गोरमत्वत नाम त्वष्टुरपीच्यम्।
इत्था चन्द्रमसो गृहे।।

– ऋग्वेदः १.८४.१५

सूर्यस्य रथे सप्त अश्वा भवन्ति। ते च सूर्यरथं वहन्ति।आधुनिककाले सूर्यरश्मिषु सप्तैव वर्णाः सन्ति। तदेव वैज्ञानिकं तथ्यं सूचितमिति सप्ताश्वैः कथयितुं शक्यते।

सप्त युञ्जन्ति रथमेकचक्रम्।

एको अश्वो वहति सप्त नाम।।

– ऋग्वेदः १.१६४.२

विद्वांसो मन्यन्ते यत् – निम्नलिखितमन्त्रे ऋग्वेदे सप्त ग्रहाणामप्यस्पष्टं समुल्लेखो संसूच्यते।

अस्य वामस्य पलितस्य होतु– स्तस्य भ्राता मध्यमो अस्त्यश्वः।

तृतीयो भ्राता घृतपृष्ठो अस्या–त्रापश्यं विश्पतिं सप्त पुत्रम्।।

– ऋग्वेदः १.१६४. १

वर्षस्य द्वादशमासाः,अहोरात्रस्य ७२० अर्थात् ३६० दिनानि भवन्ति। इदं तत्त्वं निम्नमन्त्र ऐतरेयब्राह्मणे च सुस्पष्टतया निर्दिष्टमस्ति। तद्यथा–

द्वादशारं न हि तज्जराय ववर्ति चक्रं परिद्यामृतस्य।

आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि(७२०) विंशतिश्च तस्थुः।।

–ऋग्वेदः १.१६४.११

त्रीणि शतानि षष्टिश्च संवत्सरस्याहानि।

– ऐ.ब्रा. ५.२.७

शुक्लयजुर्वेदेऽधिमासस्यांहस्पतिरूपेण मलिम्लुचशब्देन च गणनं परिदृश्यते। षड् –ऋतूनां, ऋत्वनुसारं मासानां नामोल्लेखोऽपि शुक्लयजुर्वेदे प्राप्यते। सप्तविंशतिनक्षत्राणामपि समुल्लेखो शब्दान्तरेण दरीदृश्यते।

अँहस्पतये नमः।

–शु.यजु. २२.३१, ७.३०

मलिम्लुचाय नमः।

–शु.यजु. २२.३०

वातो वा मनो वा गन्धर्वा:सप्तविंशतिः।

– शु.यजु. ९.७

मधुश्च माधवश्च वासन्तिकावृतू.... इषश्चोर्जश्च .... इत्यादिः।

–शु.यजु. १३.२५

आधुनिको वैज्ञानिको लिखति– वैदिकैः ४३८३ वर्षेभ्यः पूर्वं यद् दिनानां गणनं कृतमस्ति, तत् केसिनी–मेयर– आदीनां गणनयैकेनापि निमिषेण न भिन्नमस्ति। एतादृशी सूक्ष्मता सुयोग्यता च दिनगणनायां प्राचीनभारतीयानामासीत्।

अथर्ववेदे विशेषतः सूक्तद्वये (१९.५३.१–१० तथा १९.५४.१–९) कालस्य विशिष्टो महिमा वर्णितो दरीदृश्यते। कालोऽश्वरूपेणात्र वर्णितः। तस्याश्वस्य सप्त रश्मयः सन्ति। स सहस्राक्षोऽजरः (नाम जरारहितः,सदा युवा) भूरिरेताः सामर्थ्यवान् वर्तते। तस्य सर्वाणि भुवनानि चक्ररूपाणि सन्ति, तथा वा विपश्चितः कवयस्तमारोहणं कर्तुं शक्नुवन्ति। कालः–अश्वः, सप्तरश्मिः, सहस्राक्षः,अजरः, भूरिरेताः। विपश्चित् – सारथिः, विश्वानि भुवनानि–चक्राणि,समग्रं विश्वं –रथरूपम्- एतस्यायमर्थः- कालाश्वयुक्तं विश्वरथं सारथिरूपेण विपश्चिदारुह्य सर्वत्र भ्रमणं कर्तुं शक्नोति। कालत्रयातीतः, कालत्रयाभिज्ञः, सर्वदर्शी, भवितुं शक्नोति।

कालो अश्वः वहति सप्तरश्मिःसहस्राक्षो अजरो भूरिरेताः।

तमारोहन्ति कवयो विपश्चित–स्तस्य चक्रा भुवनानि विश्वा।। १९.५३.१

अथर्ववेदे नक्षत्रविषयकं सूक्तद्वयमपि वर्तते(१९.७ तथा १९.८)। सूक्तयोरेतयोः २७ नक्षत्राणां तथा अष्टाविंशतितमस्याभिजिन्नक्षत्रस्य स्पष्टतयोल्लेखः संप्राप्यते। तत्रोक्तं यथा –अभिजिन्मे रासतां पुण्यमेव (१९.७.४) तथा –अष्टाविंशानि शिवानि(१९.८.२)। तुर्मिशं –अनिष्ट-निवारणार्थं श्रेष्ठबुद्धेरपेक्षया कामनया च महर्षिर्नक्षत्राणां स्तुतिं प्रार्थनां विदधाति। नक्षत्राणि विभिन्नरूपैर्विचित्रवर्णैश्च द्युलोके विभान्ति। तानि सरीसृपाणि विनाश-रहितानि च सन्ति। तेषां गणनाप्रारम्भः कृत्तिकानक्षत्रान्निर्दिष्टः,न त्वश्विनी-नक्षत्रात्। सर्वेषां नक्षत्राणां फलान्यपि तत्र पृथक्तया निर्दिष्टानि। द्युलोके, अन्तरिक्षे, पृथिव्यां, समुद्रे, पर्वते, दिक्षु दृश्यमानानां विविधानां २८ नक्षत्राणां योगक्षेमप्राप्तये कल्याणार्थं च प्रार्थना १९ काण्डे सूक्ते मन्त्रेषु संदृश्यते। शान्तिसूक्ते (१९.९.७) पृथिव्यन्तरिक्षयोरुत्पातानामुल्लेखेन साकं प्रथम-वारमेव ग्रहाणां निर्देशः स्पष्टतया विद्यते - उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा ग्रहाः। उल्कापातस्य भूमिकम्पस्य धूमकेतोरपि ज्ञानं महर्षिणामासी-दिति सुस्पष्टं वक्तुं शक्यते । यथा-

शं नो भूमिर्वेपमाना शमुल्का निर्हतं च यत्।

नक्षत्रमुल्काभिहतं शमस्तु।

-शमुल्का इत्यादिः(१९.९.८-९)।

राहुग्रहस्योल्लेखेन सहितः सर्वग्रहाणां निर्देशः प्रथमवारमेव प्रायेणाथर्ववेदे दरीदृश्यते, धूमकेतोश्चापि तत्र मन्त्रे समुल्लेखः। तद्यथा-

शंनो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा।

शंनो मृत्युर्धूमकेतुः। ।( १९.९.१०)

एवमथर्ववेदेऽभिजित्सहितानां २८ नक्षत्राणां, राहुसहितानां ग्रहाणां, भूकम्पनस्य, उल्कापातस्य, धूमकेतोश्च तत्र तत्र मन्त्रेषु निर्देशा महर्षीणां खगोलशास्त्रस्य प्रगाढं विशिष्टं च ज्ञानं प्रकटीकुर्वन्तीति तत्र न काप्याशङ्का।[15]

**फलज्योतिषम्-**

खगोलशास्त्रवत् फलज्योतिषमपि प्राचीनं शास्त्रं विद्यते। ग्रहाणां नक्षत्राणां स्थानादीनां विचारेण भावि सुखदु:खानां कथनमनेन क्रियते। शुक्लयजुर्वेदे मन्त्र एकस्मिन् फलज्योतिषस्य प्रायेण प्राचीनतममुल्लेखं विद्वांसो मन्यन्ते। शुक्लयजुर्वेदः ३०.१० अत्रेदं सिद्धं भवति यत्र तस्मिन्समये नक्षत्रदर्शनं नक्षत्रद्वारा ज्योतिषं वा, प्रश्नविद्या, गणकविद्या च प्रचलितासीत्। मुण्डकोपनिषदि परापराविद्ययोर्वर्णनप्रसङ्गे ज्योतिषशास्त्रस्य निर्देशो वर्तते । छान्दोग्योपनिद्यपि नक्षत्रविद्याया समुल्लेखो स्पष्टतया प्राप्यते, स यथा–छान्दोग्योपनिषत्–७.१.२।

कार्यं शोभने नक्षत्रे कृतं सफलतां प्राप्नोति, अयं मुहूर्तशास्त्रविषयको विचारो वैदिकसाहित्येऽपि विविधस्थानेषु दरीदृश्यते।अथर्ववेदस्य नक्षत्रसूक्ते(१९.७) विविधानामभिजित्सहितानां नक्षत्राणां शुभाशुभफलस्य वर्णनं मन्त्रेषु दरीदृश्यते।तत्र नक्षत्राणां समुल्लेखस्य प्रारम्भ: कृत्तिकानक्षत्रेणैव भवितीति विशेषतो निर्देशमर्हति।

तैत्तिरीयब्राह्मणे कृषिकर्मप्रारम्भ: मैत्रनक्षत्रे नाम अनुराधानक्षत्रे कथितः,स यथा–मैत्रेण कृषन्ते(१.८.४.२)। पारस्करगृह्यसूत्रेऽपि –पुण्याहे लाङ्गलयोजनम्– इति प्रतिपादितम्। तैत्तिरीयब्राह्मणे (१.५.२.१ तथा ३.१.२.८) पुण्यनक्षत्राणां पापनक्षत्राणां च निर्देशो भवति। तैत्तिरीयब्राह्मणे स्वातीनक्षत्रोपरि कन्यादानस्य महत्त्वं प्रतिपादयता कथितं यत्– यां कामयेत दुहितरं निष्ठ्यायां दद्यात्, प्रियैव भवति, न

१५ देवसायुज्यम् अङ्कः १२, पृ.२–३, अङ्कः १३ पृ.

पुनरागच्छति(१.५.२)। यः कश्चिन्महत्त्वमिच्छति, तस्य कृते बृहदारण्यके महत्त्वपूर्णः प्रयोगो निर्दिष्टः। स यथा-

स य कामयेत महत्प्राप्नुयामितयुदगयन आपूर्यमाणपक्षे पुण्याहे द्वादश्यामुपसद्व्रती भूत्वा पुंसा नक्षत्रेण मन्थं सन्नीय जुहोति (६.३.१)।

पुंनक्षत्राणि-श्रवण-पुष्य-हस्त-पुनर्वसु-अभिजित्-पूर्वाभाद्रपदा-अनुराधा-अश्विनी-इत्येतानि सन्तीति गर्गाचार्याणां मतमत्रोल्लेखनीयम्।

वेदकाले यद्यपि नक्षत्रज्योतिषस्य महत्त्वमतीव दृष्टिगोचरं भवति, तथापि फलज्योतिषस्य मूलरूपं वेदेषु निहितमिति निश्चयेन वक्तुं शक्यते।[१६]

**वेदाङ्गज्योतिषम्-**

ऋग्वेद-यजुर्वेद-अथर्ववेद-इति वेदत्रयाणां त्रयो वेदाङ्गज्योतिषग्रन्थाः- ऋग्वेदज्योतिषम्, यजुर्वेदज्योतिषम्, अथर्ववेदज्योतिषम्- इत्युपलभ्यन्ते। ऋग्वेदज्योतिषे ३६ श्लोकाः सन्ति। यजुर्वेदज्योतिषे ४४(अथवा केषांचन मतेन ४९) श्लोका विद्यन्ते। ऋग्वेदज्योतिषस्य यजुर्वेदज्योतिषस्य च ३० श्लोकाः समानाः। १३ श्लोका भिन्ना;।वेदाङ्गज्योतिषस्योपरि सोमाकरस्य टीका समुपलभ्यते। ऋग्वेदज्योतिषस्य यजुर्वेदज्योतिषस्य च प्रणेता लगधो महर्षिर्वर्तते। अथर्ववेदज्योतिषे १६२ श्लोकाः सप्त प्रकरणानि च सन्ति। तत्र ब्रह्मा-काश्यपयोः संवादरूपेण खगोलस्य फलज्योतिषस्य च विवरणं वर्तते। तथा पञ्चाङ्गस्य तिथि-वार-नक्षत्र-योग-करण-एतेषां विवेचनं विद्यते।

प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।।

-ऋ.ज्यो.३

[16] देवसायुज्यम् अङ्कः १४ पृ. २

स्वरार्कमेके सोमार्कौ यदा साकं सवासवौ।

स्यात्तदादि युगं माघस्तपः शुक्लो दिनन्त्यजः।।

–ऋ.ज्यो.५

लगधप्रणीतं प्रस्तुतं ज्योतिषशास्त्रमतीव प्राचीनं वर्तते। तत्रैकस्मिन् श्लोके कथितं यत् सूर्यचन्द्रयोः स्थितिर्यदा धनिष्ठानक्षत्रे भवति, तदा माघशुक्ल–प्रतिपद्दिवसे उत्तरायणस्य प्रारंभो भवति। ज्योतिषाचार्येण शं. वा. दीक्षित–महोदयेनास्य समयः ख्रिस्ताब्दपूर्वं १४००वर्षाणि मन्यते। अन्ये विद्वांसः ख्रिस्ताब्दं १२०० मन्यन्ते। अत्यन्तं प्राचीनोऽयं ग्रथः स्वल्पोऽपि महत्त्वपूर्णः प्राचीनतम उपलब्धभ्यमानो ज्योतिषग्रन्थो वर्तते।

पञ्चसंवत्सरमययुगाध्यक्षम्–इति यद् ब्रह्मयज्ञे प्रतिदिनमुच्यते स तु ऋग्वेदस्य यजुर्वेदस्य च वेदाङ्गज्योतिषस्य प्रथमः श्लोकः। स इत्थं वर्तते –

पञ्चसंवत्सरमययुगाध्यक्षं प्रजापतिम्।

दिन–ऋतु–अयन–मासाङ्गं प्रणम्य शिरसा शुचिम्।।

–ऋ.ज्यो.१

यज्ञानुष्ठानार्थं योग्यस्य समयस्य निर्धारणं वेदाङ्गज्योतिषस्य मुख्यं प्रयोजनम्। शास्त्रशुद्धगणिताधारेण समयनिर्धारणं भवति स्म। अत एव गणितं मूर्धनि स्थितमिति कथ्यते।

ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः।

संमतं ब्राह्मणेन्द्राणां यज्ञकालार्थसिद्धये।।

–ऋ.ज्यो.२

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्।।

–य.ज्यो.३

माघशुक्लप्रतिपद्दिवसे उत्तरायणं तथा श्रावणमासे दक्षिणायनं भवति। अयनद्वयं, षड् ऋतवः, द्वादशमासाः, अधिक तथा क्षयमासः, २७ नक्षत्राणि, पर्वद्वयं, सौर–चान्द्र–सावन–नाक्षत्र–मासाः तथा सौरवर्षं एतेषां सुक्ष्मगणिताधारेण सुव्यवस्थितं वर्णनं श्लोकेषु वर्तते। ३० मुहूर्तात्मको दिवसाः, पञ्चवर्षात्मकं युगं, सार्धद्वय वर्षानन्तरमाधिकमासः कृत्तिकानक्षत्रात् नक्षत्रगणना प्रारंभः यज्ञकर्म सिद्धये विविधनक्षत्राणां देवतानां वर्णनमपि प्राप्यते।

१ कृत्तिका–अग्निः, २ रोहिणी–प्रजापतिः,३ मृगः–सोमः, ४ आर्द्रा–रुद्रः, ५ पुनर्वसुः–अदितिः, ६ पुष्यः–बृहस्पतिः, ७ आश्लेषा–सर्पः, ८ मघा–पितृदेवः, ९पूर्वाफाल्गुनी–भगः, १० उत्तराफाल्गुनी–अर्यमाः, ११ हस्त–सूर्यः, १२ चित्रा–त्वष्टाः,१३ स्वाती–वायुः,१४ विशाखा–इन्द्राग्नीः, १५ अनुराधा – मित्रः, १६ ज्येष्ठा–इन्द्रः, १७ मूल–निर्ऋतिः, १८ पूर्वाषाढा–जलः, १९ उत्तराषाढा–विश्वेदेवः, २० श्रवण–विष्णुः, २१ धनिष्ठा–वसुदेवः, २२ शततारा–वरुणः, २३ पूर्वाभाद्रपदा–अहिर्बध्न्यः २४ उत्तराभाद्रपदा–अजैकपाद्ः, २५ रेवती–पूषादेवः, २६ अश्विनी–अश्विनौ, २७ भरणी–यमः।

इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणाम्।
दिनर्त्वयनमासानां व्याख्यानं लगधोऽब्रवीत्।।

– ऋ.ज्यो.४३

**इतिहासपुराणेषु ज्योतिषम्–**

इतिहासपुराणेषु ज्योतिषमिति बहुविस्तृतोऽयं विषयः। तथापि केवलं दिङ्मात्रमत्र प्रस्तूयते विचारार्थम्। रामायणं महाभारतं चैतावार्षौ महाकाव्यौ । रामायणे प्रसङ्गानुरूपं ज्योतिषविषयकं विवरणं दरीदृश्यते। रामायणे बालकाण्डे रामस्य

जन्मसमयस्य ग्रहस्थितिविषयकाः श्लोकाः प्राप्यन्ते।[१७] यद्यपि ते श्लोका समीक्षितावृत्यां मुख्यभागे न सन्ति, तथापि परम्परायां तेषां समावेशो भवति। अयोध्याकाण्डेऽपि सुमहूर्तसंदर्भे फलादेशसम्बद्धो विचारः प्रस्तुतो भवति।[१८] महाभारते तु नैकेषु स्थानेषु खगोलविषयकाः संदर्भाः समुपलभ्यन्ते। तेषु ग्रह-नक्षत्र-युग-ग्रहणादिप्रतिपादकाः श्लोका वर्तन्ते। मार्गशीर्षे मासे वर्षारम्भो भवतीति ज्ञायते। पं. शं. वा. दीक्षितमहोदयैरस्य विशेषेण विश्लेषणं स्वकीये ग्रन्थे विहितम्।[१९] पुराणविषये पं. बलदेव उपाध्यायाः प्रमाणम्। तैर्निर्दिष्टं[२०] यत् - पुराणेषु ज्योतिषविषया अप्यत्र तत्र विन्यस्यन्ते। भूगोलेन साकं सम्वलितं खगोलमपि नैकेषु पुराणेषु स्थानं प्राप्नोति। यथा- श्रीमद्भागवते पञ्चमे स्कन्धे (अ. १६-२५)। अस्यैवानुकरणं देवीभागवते-ऽष्टमस्कन्धे(अ. ५-अ.२०) भवति। गरुडपुराणेऽध्यायपञ्चके (अ. ५९-अ.६४) फलित-ज्योतिषविषयस्य मुख्यतया विवरणं प्राप्यते। नक्षत्रदेवताकथनम्, योगिनी-स्थितिनिर्णयः, सिद्धियोगः, दशाविवरणम्, दशाफलम्, यात्रायां शुभाशुभम्, राशिपरिमाणम्,विभिन्नलग्नेषु विवाहफलम् - इत्यादीनां विषयाणां विवरणमत्र दृश्यते। नारदीयपुराणे (१. ५५-५६) नक्षत्रकल्पे नक्षत्रविषयकं वर्णनं तथा अ. ५४ मध्ये गणितस्य विवरणं वर्तते। अग्निपुराणस्य बहुष्वध्यायेषु (यथा अ. १२१) शुभा-शुभविवेकविषयकं वर्णनमुपलभ्यते। विष्णुपुराणे (२.७-१२) भूगोलेन साकं खगोल-वर्णनमतीव समीचीनतया प्रस्तूयते। विषयेऽस्मिन् स्वतन्त्रः प्रबन्धो भवितुमर्हति।

---

१७ ततश्च द्वादशे मासि चैत्रे नावमिके तिथौ।
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु।।
ग्रहेषु कर्कटके लग्ने वाक्पताविन्दुना सह।
कौसल्याजनयद्रामं दिव्यलक्षणसंयुतम्।। बा.का. १९. ८-९, प्रक्षेपक्रमांकः ५०६

१८ आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः।
प्रायेण हि निमित्तानामीदृशानां समुद्भवे।।
राजा वा मृत्युमाप्नोति घोरां वापदमृच्छति।। अयो. ४.१८-१९

१९ भारतीय ज्योतिष, पृ.१०७-१२७

२० पुराणविमर्श, पृ.३१३

**जातकग्रन्थानां परिचयः-**

बहवो जातकग्रन्थाः साम्प्रतं समुपलभ्यन्ते। तेषां यथाशक्यं परिचयः मूलग्रन्था-नवलोक्य प्रदीयते। केषांचनोल्लेखो वर्णनं च पं. शं वा. दीक्षितमहोदयैः[२१] प्रदत्तमनुसर्यते। न्यु कॅटलोगस् कॅटलोगोरम्-[२२]मध्ये बहूनां प्रकाशिताम-प्रकाशितानां केवलं ज्ञातानां जातकग्रन्थानां सूचिः प्राप्यते। सर्वेषां जातक-ग्रन्थानामत्र संग्रहो विधीयते। तेषु प्राचीनतमो ग्रन्थो बृहज्जातकम्। किन्तु वराहमिहिरात् पूर्वमपि जातकस्य विचारो बहुभिमहर्षिर्भिः कृत इति वराह-मिहिरेणैव स्वकीयग्रन्थ उपसंहाराध्याये लिखितम्।[२३]तद् यथा -

आदित्यदासतनयस्तदवाप्तबोधः
कापित्थके सवितृलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्य सम्य-
ग्घोरां वराहमिहिरो रुचिरां चकार ।।

-बृ.जा उपसंहाराध्यायः२८.९

पृथुविरचितमन्यैः शास्त्रमेतत्समस्तं
तदनु लघु मयेदं तत्प्रदेशार्थमेव।
कृतमिह हि समर्थ धीविषाणामलत्वे
मम यदिह यदुक्तं सज्जनैः क्षम्यतां तत्।।।।

-बृ.जा उपसंहाराध्यायः२८.७

---

२१ शं.वा. दीक्षितः, भारतीय ज्योतिषशास्त्र(मराठी) पृष्ठक्र.४८१ तः ४९१
२२ न्यु. कॅटलोगस् कॅटलोगोरम् खं. ७, पृ.२११-२३१

२३ दीक्षितः पृ.४८१ ।

वराहमिहिरेण स्वयं सत्य–मय–यवन–मणित्थ–जीवशर्मा, विष्णुगुप्त–इत्यादी–नामाचार्याणामुल्लेखः कृतः। प्रायेणैतेषां जातकग्रन्था वराहमिहिररात् पूर्वकाल आसन्। भट्टोत्पलेनापि गार्गी–बादरायण–याज्ञवल्क्य–माण्डव्य– इत्यादीनां वचनानि समुद्धृतानि सन्ति। तत्र गार्गी– इत्यस्य बहूनि वचनानि सन्ति।

**१ बृहज्जातकम्** –

वराहमिहिरस्यायं जातकग्रन्थः । तत्राष्टाविंशतिरध्यायाः सन्ति। वराह–मिहिरेणायं ग्रन्थः प्रायेण ख्रिस्ताब्दस्य ५०८ समये लिखितः। भट्टोत्पलस्य विस्तृतव्याख्यया सहितश्छंदोबद्धग्रन्थ उपलभ्यते। बलभद्र–महीदास–महीधर–सुबोधिनी–इत्यादीनां टीकाग्रन्था बृहज्जात–कस्योपरि वर्तन्ते[२४]। फलज्योतिषविषये महत्त्वपूर्णोऽयं ग्रन्थः। तत्र प्रत्येकाध्यायस्य विषया निम्नलिखिताः सन्ति। १.राशिप्रभेदः, २.ग्रह–योनिप्रभेदः, ३.वियोनिजन्म, ४.निषेकः, ५.जन्मविधिः, ६.अरिष्टः, ७.आयुर्दायः, ८.दशान्तर्दशा, ९.अष्टकवर्गः, १०.कर्माजीवः, ११.राजयोगः, १२.नाभसयोगः, १३.चन्द्रयोगः, १४.द्विग्रहयोगः, १५.प्रव्रज्यायोगः, १६.ऋक्षशीलम् १७.चन्द्रराशिशीलम्, १८.राशि–शीलम्, १९.दृष्टिफलम्, २०.भावः, २१.आश्रययोगः, २२.प्रकीर्णम्, २३.अनिष्टम्, २४.स्त्रीजातकम्, २५.निर्याणम्, २६.नष्टजातकम्, २७.द्रेष्काणम्, २८.उपसंहारः।

**२ यवनजातकम्** –

यवनजातकनामको यवनानां प्रसिद्धो जातकग्रन्थो ज्ञायते। तत्र स्फुजिध्वजकृतं यवनजातकं तथा मीनराजकृतं वृद्धयवनजातकम् इति ग्रन्थद्वयमद्यत्वे वर्तते। बृहद्यवनजातकमपि प्रसिद्धं वर्तते। अस्य विषयेऽधिकं विवरणं द्वितीयप्रकरणे प्रदीयते।

---

२४ उपर्युक्तम् पृ. ४८६

### ३ जातकालङ्कारः-

गणेशविरचितोऽयं बहुप्रसिद्धो जातकग्रन्थः। गणेशस्य पितामहः काह्नजी भारद्वाजगोत्रोन्नो ब्राह्मणो गुर्जराधिपतिसभायां ललामभूतः। तस्य द्वौ पुत्रौ सूर्यदासगोपालस्तथा रामकृष्णः। तत्र गोपालपुत्रेण गणेशेनायं ग्रन्थो ब्रध्नपुरे १५३५ शककाले विरचितः। तत्र षडध्यायाः सन्ति। गणेशस्य गुरुः शिवदासः। ग्रन्थोपरि शुक्लोपाह्वस्य कृष्णपुत्रस्य हरभानोः टीका वर्तते। [२५]

### ४ फलदीपिका-

मन्त्रेश्वरविरचितोऽयं जातकग्रन्थः। तस्य यवावस्थाया नाम मार्कण्डेय-भट्टाद्रिः। दक्षिणभारते नम्बूदरी ब्राह्मणकुले जन्म। केचन तस्य जन्म तमिलप्रान्तस्य शालवीटीस्थानस्य मन्यन्ते। अपरे तस्य जन्मभूमिं केरलप्रान्ते विचारयन्ति। सुकुन्तलाम्बा-देव्या भक्तः। तस्य समयं केचन खिस्ताब्दस्य त्रयोदशशताब्दीं षोडशशताब्दीं वा मन्यन्ते। छन्दोबद्धोऽयं २८ अध्यायात्मको ग्रन्थः।[२६]

### ५ सारावली -

कल्याणवर्मनामकेन विदुषा विरोचितोऽयं श्लोकबद्धो जातकग्रन्थः। तत्र नैकेषां ग्रन्थानां सारमुद्धृत्य विरचितस्तेन। कल्याणवर्मा स्वपरिचयं देवग्रामनगरवास्तव्यो व्याघ्रपदीश्वरत्वेन ददाति। ग्रन्थेऽस्मिन् ५४ अध्यायाः सन्ति। भट्टोत्पलेनास्य नैके श्लोका उद्धृताः। अत एव स भट्टोत्पलपूर्वकालीनः। प्रायेणास्य समयः खिस्ताब्दस्य ५७७/५७८ भवति।

---

२५ उपर्युक्तम् पृ. ४८७

२६ फलदीपिका- मन्त्रेश्वरविरचिता, भावार्थबोधिनीहिन्दीसहिता,गोपेशकुमार ओझा, मोतीलाल बनारसीदास, दिल्ही,२००४ भूमिका पृ.३

**६ मानसागरी-**

जैनमतानुसारिणा केनापि विदुषा ख्रिस्ताब्दस्य १८४३ समये द्वितीयबहदुरशाहमुगलसाम्राज्ये विरचितः पूर्वतनविविधजातकग्रन्थ-श्लोकसंग्रहरूपः। तत्र पञ्चाध्यायेषु विविधफलज्योतिषविषयाणां संकलनं वर्तते। यवनजातकविचाराणामपि तत्र संग्रहो दृश्यते।

**७ लघुजातकम्-**

वराहमिहिरविरचितोऽयं लघुजातकनामको ग्रन्थश्छन्दोबद्धः। तत्र षोडशाध्यायाः १८२ आर्याछन्दःश्लोकाः । षोडशाध्यायेषु विविधा विषयाः सन्ति। राशिः- ग्रहबलं- ग्रहमैत्री- ग्रहस्वरूपं- आधानं- सूतिका- अरिष्टं-अरिष्टभङ्गः-आर्युदायः- दशान्तरर्दशा-अष्टकवर्गः-प्रकीर्णम्- (क)राशि-फलनिरूपणम्, (ब)आश्रययोगनिरूपणम् -नाभसयोगः- स्त्रीजातकम्-निर्याणः-नष्टजातकम्। तस्योपरि भट्टोत्प-लस्य टीका समुपलभ्यते।

**८ जातकतत्त्वम्-**

**पं.दीक्षितमहोदयैरस्योल्लेखः कृतः।**

**९ जातकपद्धतिः-**

श्रीपतिविरचितः। पं.दीक्षितमहोदयैरस्योल्लेखः कृतः।

**१० जातकपारिजातः-**

जातकपारिजातनामको विस्तृतो ग्रन्थो भारद्वाजगोत्रोत्पन्नेन श्रीवेङ्काटाद्रि-दैवज्ञसुतेन श्रीवैद्यनाथेन निर्मितः। प्रायेणास्य ग्रन्थरचनाकालः १३४७ शकाब्दसमीपे सम्भाव्यते।

नत्वा गर्गपराशरदिरचितं सङ्गृह्य होराफलं वक्ष्ये ।
जातकपारिजातमखिलज्योतिर्विदां प्रीतये।

– जा.पा.१.१

सङ्गृह्य सारावलिमुख्यतन्त्रं करोम्यं जातकपारिजातम्।

–जा.पा.१.२.

तत्र छन्दोबद्धेऽस्मिन्ग्रन्थेऽष्टादशाध्याया: सन्ति। अध्यायानामानि यथा – राशिशीलाध्याय:, ग्रहनामस्वरूपगुणभेदाध्याय:, वियोनिजन्माध्याय:, अरिष्टाध्याय:, आयुर्दायाध्याय:, जातकभङ्गाध्याय:, राजयोगाध्याय:, द्वि-आदिग्रहयोगाध्याय:, मान्द्यब्दादिफलाध्याय:, अष्टकवर्गाध्याय:, प्रथमद्वितीय-भावफलाध्याय:, तृतीयचतुर्थभावफलाध्याय:, पञ्चमषष्ठ-भावफलाध्याय:, सप्तमाष्टमनवमभावफलाध्याय:, दशमैकादशद्वादश-भावफलाध्याय:, स्त्रीजात-काध्याय:, कालचक्रदशाध्याय:, दशाफलाध्याय:।

## ११ जातकाभरणम्-

ढुण्ढिराजकृतो जातकाभरणं ग्रन्थो बहुप्रसिद्ध:। तस्य समय: शाके १४६० वर्तते। अस्मिन् क्रमेण फलविवरणं वर्तते, अत एव दैवज्ञाना-मुपयुक्त:।[२७] ढुण्ढिराजदैवज्ञो नृसिंहपुत्रो ज्ञानराजशिष्यश्च। [२८]

## १२ जातकक्रोडपत्रम्-[२९]

## १३ गौरीजातकम्-

शं. वा. दीक्षितमहोदयै: स्वग्रन्थेऽस्योल्लेख: कृत:(पृ.३८१)। ७८ अनुष्टुप्छन्दो निबद्धोऽयं गौरीजातकग्रन्थ:। जातकविषयस्यास्मिन् ग्रन्थे प्रथमादिभावदृष्ट्या वर्णनं न क्रियते, किन्तु सूर्यादिग्रहाणां चन्द्रत: प्रथमादिस्थाने स्थिते सति फलं वर्णितम्। अत्र चन्द्रस्य महत्वं न तु द्वादशभावानाम्।

२७ शं. वा. दीक्षित:, भारतीय ज्योतिषशास्त्र(मराठी), पृ. ४८६-४८७

२८ न्यु. कॅटलोगस् कॅटलोगोरम् खं. ७, पृ.२२७

२९ उपर्युक्तम्

ग्रन्थेऽस्मिन् चन्द्रतो राहोः स्थितेरपि फलं वर्णितम्। किन्तु केतोः फलं न वर्णितम्। ग्रन्थस्य प्रारम्भे मङ्गलं वर्तते यथा–

प्रणम्य गौरीसंश्लिष्टपदाम्बुजयुगं तथा।

विघ्नेशपादाब्जयुगं गौरीजातकमुच्यते।।१ ।।

**१४ कालजातकम्** – [३०]

**१५ जातककल्पलता–**

**१६ जातकपद्धतिः–**

केशवविरचिता जातकपद्धतिः केशवी, केशवीजातव इत्यपि ज्ञायते। केशवदैवज्ञेन कमलाकरदैवज्ञपुत्रेण अनन्तदैवज्ञस्य पित्रा विरचिता । केवलं ४२ श्लोकानामयं स्वल्पो ग्रन्थो बहुप्रसिद्धः। तस्योपरि केशवस्य स्वोपज्ञा टीका तथा विश्वनाथस्योदाहरणं नारायणस्य दिवाकरस्य तथा सप्तान्ये टीकाग्रन्था वर्तन्ते। [३१]

**१७ जातकपद्धतिः** –

नीलकण्ठी[३२] – नीलकण्ठविरचिता जातकपद्धतिः षष्ठीश्लोकात्मिका। तस्या मिथिलाप्रदेशे बहुप्रचारो वर्तते– इति गणकतरङ्गिणीकारानां मतम्।

**१८ जातकपद्धतिः** –

दिवाकरविरचितस्यास्य ग्रन्थस्य पं. दीक्षितमहाभागैरुल्लेखः कृतः।[३३] मद्रासससूच्यां विवरणमपि प्राप्यते। जन्मपद्धतिः, दिवाकरीपद्धतिर्वा कथ्यते।

---

३० दीक्षितः पृ.४८१

३१ दीक्षितः, पृ .४८६

३२ दीक्षितः पृ. २७५

३३ दीक्षितः, पृ .४८६

सप्ताध्यायात्मको जातकग्रन्थः कृष्णस्य प्रपौत्रेण नृसिंहस्य पुत्रेण दिवाकरेण रचितः। चतुर्भाषिणी, स्वोपज्ञटीका-उदाहरणमथवा गणिततत्त्वचिन्तामणिस्तथा रङ्गनाथकृता - इति ग्रन्थस्योपरि व्याख्यात्रयं वर्तते।[३४]

अनन्तविरचिता जातकपद्धतिरपि शाके १४८० समयस्य ग्रन्थः।[३५]

### १९ जातकमार्गपद्मम्-

दिवाकरविरचितोऽयं जातकग्रन्थः। गोलग्रामस्थविद्वत्कुलोत्पन्नस्य नृसिंहस्य पुत्रः । तस्य जन्म शाके १५२८समये जात;। तस्य पितृव्यः शिवः। तस्य सकाशे तेनाध्ययनं कृतम् । शाके १५४७ मध्ये तस्य १९ वयसि जातकमार्गपद्मनामको जातकग्रन्थो विरचितः। तस्यैव पद्मजातकमित्यपरं नाम।[३६] दिवाकरस्य पद्मजातकं नामको ग्रन्थः १०४ पद्यात्मकः १५४७ शकवर्षस्य वर्तते।[३७]

### २० जातकमुक्तावलिः-

शिवदासकृताया जातकमुक्तावल्याः समुल्लेखः केशवीयजातकपद्धत्या विश्वनाथकृतटीकायां वर्तते। [३८]

### २१ जातकसारः-

जातकसारग्रन्थनृहरिविरचितः। ग्रन्थारम्भे लिखितं यत् वशिष्ठः,गर्गः, अत्रिः, पराशरः, वराहमिहिरः, लल्लः-इत्यादिभिर्होराशास्त्रं विरचितं, किन्तु क्रमेण फलस्य निरूपणं न कृतम्। अतो जन्मपत्रकायां क्रमशः फलनिरूपणकरणे सारावलि-होराप्रदीप-जन्मप्रदीप- इत्यादिग्रन्थाधारेण ग्रन्थसहायेनास्य ग्रन्थस्य निर्माणं कृतम्। [३९]

---

३४ न्यु. कॅकलोगस् कॅटलोगोरम् खं. ७, पृ. २१९

३५ दीक्षितः, पृ. ४८७

३६ दीक्षतः पृ. २८७

३७ दीक्षितः, पृ. ४८७

३८ दीक्षितः, पृ. ४८७

३९ दीक्षितः पृ. २५५

**२२ जातकोत्तमः-**

**२३ जैमिनिसूत्रम् -**

जैमिनिसूत्रं नामकः स्वल्पः सूत्रात्मको गद्यजातकग्रन्थो बहुप्रसिद्धो वर्तते। तस्योपरि नैकानि व्याख्यानानि समुपलभ्यन्ते। तत्र रिफ्फ –आर– इत्यादयो यवनशब्दास्तत्र वर्तन्ते। वराहमिहिरेण भट्टोत्पलेन चास्योल्लेखो न कृतः। मलबारप्रदेशेऽस्य बहु प्रचलनमस्ति। ग्रन्थेऽस्मिन् चत्वारोऽध्यायाः, प्रत्येकाध्याये चत्वारः पादाः, प्रत्येकपादे सूत्राणि च सन्ति। सूत्ररूपेण जातकविषयकज्ञानार्थमत्यन्तमुपयुक्तो वर्तते ।

**२४ समुद्रजातकम्-**

शं. वा. दीक्षितमहोदयैः स्वग्रन्थेऽस्योल्लेखः कृतः।[४०] होरास्कन्ध– निरूपणं नामके वीरसिंहराज्ञा कारिते रामपुत्रेण विश्वनाथपण्डितेन विरचिते ग्रन्थेऽस्योल्लेखो वर्तते।

**२५ लघुपाराशरी -**

अयं पराशरनाम्ना प्रथितः षडाध्यायात्मको श्लोकबद्धः स्वल्पो जातकग्रन्थः। तत्र षडध्यायाः सन्ति। तेषां नामानि यथा – संकल्पाध्यायः, संज्ञाध्यायः, योगाध्यायः, आयुर्दायाध्ययः, दशाफलाध्यायः, मिश्रफलाध्याय इति। अस्यैव ग्रन्थस्य  उडुदायप्रदीप इत्यपरं नाम वर्तते।

वयं पाराशरीं होरामनुसृत्य यथामति।
उडुदायप्रदीपाख्यं कुर्मो दैवविदां मुदे।।

–लघुपाराशरी १.२

---

४० दीक्षितः,पृ. ४८७

**२६ मध्यमपाराशरी -**

पराशरप्रणीतो मध्यमपाराशरीनामकः स्वल्पो जातकविषयको ग्रन्थः। स चाष्टप्रकराणात्मको वर्तते। राजयोगः, धनप्रदयोगः, दारिद्र्ययोगः, शुभदशाफलम्, अशुभदशाफलं, कारकदशाफलं, नक्षत्रदशाफलं, द्वादशभावफलम्- इति विषयास्तत्र वर्णिताः सन्ति।

पराशरमुनिं नत्वा तस्य होरां निरीक्ष्य च ।

वक्ष्येऽप्युडुदशामार्गं पूर्वशास्त्रानुसारतः।।

-मध्यमपाराशरी १.१.

**२७ कालचक्रजातकम् अथवा कालजातकम्-**

शं. वा. दीक्षितमहोदयैः स्वग्रन्थेऽस्योल्लेखः कृतः।[४१]

**२८ भृगुसंहिता-**

अत्यन्तं लोकप्रियोऽयं ग्रन्थः। भृगुप्रणीतोऽयमित्यार्षः। किन्तु वराह-मिहिरेण भट्टोत्पलेनास्योल्लेखो न कृतः। सर्वेषां जनानां जन्मकुण्डली तत्र प्राप्यते। तत्रत्यः फलादेशोऽपि प्रायेण विश्वासार्हो वर्तते- इति केषांचन मतम्।

**२९ नाडीग्रन्थाः-**

दक्षिणभारते बहुप्रसिद्धा एते ग्रन्थाः। एतासु भूत-वर्तमान-भविष्यत्-कालस्य मनुजानां जन्मपत्रिका प्राप्यते। सत्याचार्यविरचितो ध्रुवनाडी-ग्रन्थः सर्वोत्तम इति पं. दीक्षितानां मतम्। तैः स्वयं पञ्च नाडीग्रन्था वीक्षिताः। अपरे च पञ्च तैः श्रुताः। नाडीग्रन्थेषु प्रत्येकस्य मनुजस्य निरयनस्पष्टग्रहा वर्तन्ते। नाडीग्रन्थानां ग्रहस्थितिगणनातीव सूक्ष्मा वर्तते।

---

४१ दीक्षितः,पृ.३८१

**३० केरलमतम्–**

जातकग्रन्थेषु केरलमतं नामकं मतं वर्तते, तत्तु सर्वैर्भिन्नमिति ज्ञायते। नैके ग्रन्थाः केरलमतस्य वर्तन्ते।[४२]

**३१ बृहत्पाराशरहोराशास्त्रम् –**

पराशरसस्य नाम्ना त्रयो ग्रन्था वर्तन्ते। तेषु लघुपाराशरी–मध्यम–पाराशर्योर्विचारः पूर्वं कृतः। बृहत्पाराशरीग्रन्थो नामानुरूपं विशालो बृहत्कायो वर्तते। पराशरकृतोऽयं बृहत्पाराशरीग्रन्थो जातकविषयकः प्राचीनतम इति विद्वांसो मन्यन्ते । ग्रन्थेऽस्मिन बहवो विषया विलक्षणाश्चमत्कारिणश्च सन्ति। इदमेकमेव पठितमधिकं चेत् जातक–शास्त्रस्य सर्वविषयाणां ज्ञानं छात्राणां भवेदेतादृशो सर्वसंग्रहको ग्रन्थः। तत्र पूर्वभाग उत्तरभागेति भागद्वयं ९८ अध्यायाः च सन्ति। तत्र विविधदशाफलवर्णनं विशिष्टम्।

**३२ नारदीयजातकम्–**

महर्षिनारदविरचितम्। चौखम्बाद्वारा प्रकाशितम्। अभय कात्यायनकृतया अभया हिन्दीटीकया समेतं प्राप्यते।

**३३ उत्तरकालामृतम्–**

कालिदासविरचितम्। हिन्दीव्याख्याकारः जगन्नाथ भसीनः, रंजन पब्लिकेशन्स, नई दिल्ली–द्वारा प्रकाशितम्।

**३४ षट्पञ्चाशिका–**

वराहमिहिरपुत्रेण पृथुयशसा विरचितोऽयं जातकग्रन्थो बहुप्रचलितोऽस्ति। भट्टोत्पलस्य टीका ग्रन्थस्योपर्युपलभ्यते।[४३]

---

४२ दीक्षितः, पृ. ४८८

प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा।

प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्यशसा।।

– षट्पञ्चाशिका १.१

दैवज्ञपृथुयशोविरचिता षट्पञ्चाशिकाग्रन्थः सप्ताध्यायेषु विभक्तः। नामानुसारं तत्र षट्पञ्चाशत् श्लोकाः सन्ति। प्रथमाध्याये होराविचारः, द्वितीयाध्याये गमनागमनविचारः, तृतीयाध्याये जयपराजयविचारः, चतुर्थाध्याये शुभाशुभविचारः, पञ्चमाध्याये प्रवासचिन्ता, षष्ठाध्याये नष्टद्रव्यविचारः, सप्तमाध्याये मिश्रविचारः प्राप्यते।

**३५ लल्लः-**

लल्लस्य जातकविषयाणि वचनानि प्राप्यन्ते। मीनराजजातके नृहरिकृते जातकसारे चास्य वचनमुपलभ्यते। [४४]नन्दीग्रामस्थेन केशवेन(शके १४१८) विरचितायां जातकपद्धतिटीकायां श्रीधरपद्धतिः, रामकृष्णपद्धतिः, वल्लयुपद्धतिः,होरामकरन्द;लघु–पद्धतिः, दामोधरः, केशवमिश्रः– इति ग्रन्थ–ग्रन्थकाराणामुल्लेखः प्राप्यते। एतेऽपि जातकविषयमधिकृत्य ग्रन्थानि व्यरचन्।[४५]

**३६ भावनिर्णयः-**

विद्यारण्यविरचितोऽयं भावनिर्णयो जातकविषयकः स्वल्पो ग्रन्थः।

**३७ पद्धतिभूषणम्-**

अयं जातकग्रन्थो जलदग्रामवासिना ऋग्वेदीयेन रुद्रभटात्मजेन सोमदैवज्ञेन विरचितः। अस्य समयः शकसंवत् १५५९ वर्तते। अस्योपरि दिनकरस्य टीकोपलभ्यते।[४६]

---

४३ दीक्षितः, पृ.४८६

४४ दीक्षितः, पृ. ४८६

४५ तदेव, पृ.४८६

४६ तदेव पृ.४८७

**३८ होरारत्नम्-**

अयं ग्रन्थो दामोदरसुतेन बलभद्रेण विरचित:। अस्य समय: प्रायेण शके १५७७ वर्तते।

**३९ होराकौस्तुभम्-**

नरहरिसुतेन गोविन्देन विरचितोऽयं ग्रन्थ: प्रायेण १६०० शककालीन:।[४७]

**४० होरासारसुधानिधि:**- नारायणकृतो जातकग्रन्थ: १६३० शककालीन:।[४८]

**४१ नरजातकव्याख्या**-अयं जातकग्रन्थोऽपि नारायणविरचित: १६३० कालीन:।[४९]

**४२ प्रश्नमाणिक्यमाला-**

परमानन्देन पाठकेन विरचितो जातकग्रन्थ:। तस्य चत्वारो भागा:। सारस्वतब्राह्मण: परमानन्द: काशीनगरस्य बलवन्तसिंहराज्ञो मुख्यो गणक: प्रायेण १८७० शककालीन:।[५०]

**४३ पद्धतिचन्द्रिका**- राघवकृतोऽयं जातकग्रन्थ:।

**४४ हायनरत्नम्** -अयं दामोदरसुतेन बलभद्रेण विरचितस्ताजिकग्रन्थ:। तस्मिन् लिखितं यत्- यवनाचार्येण पारसीकभाहया प्रणीतं ज्योति:शास्त्रैकदेशरूपं वार्षिका-दिनानाविधफलादेशफलकशास्त्रं ताजिकशब्दवाच्यं तदनन्तरभूतै: समर-सिंहादिभि:....ब्राह्मणैस्तदेव शास्त्रं संसस्कृतशब्दोपनिबद्धं ताजिक-शब्दवाच्यम्। ताजिकशाखा यवनेभ्य: स्वीकृता।[५१]

---

४७ तदेव पृ. ४८७

४८ तदेव पृ.४८७

४९ तदेव पृ.४८७

५० तदेव ४८९

५१ तदेव पृ ४९०

**४५ होरास्कन्धनिरूपणम्-**

होरास्कन्धनिरूपणं नामको जातकग्रन्थो वीरसिंहराज्ञा कारितः, रामपुत्रेण विश्वनाथपण्डितेन विरचितो विस्तृतो ग्रन्थः। स च वीरसिंहोदय-जाकतखण्डम्- इति नाम्नापि ज्ञायते। तस्मिन् होराप्रदीपस्य समुद्र-जातकग्रन्थस्य चोल्लेखो वर्तते। जातकाभरणादुद्धरणानि प्रदत्तान्यतः स जातकाभरणानन्तकालीनः प्रायेण १५०० शकवर्षस्य वर्तते।[५२]

**४६ जातककर्मपद्धतिः**-जातकपद्धतिर्वा - वासुदेवपुत्रेण म्हालगिना विरचिता।[५३]

**४७ जातककर्मपद्धतिः-**

जातकपद्धतिर्वा श्रीपतिपद्धतिर्वा-अष्टप्रकरणात्मकः श्रीपतिभट्टविरचितो ग्रन्थः। स नागदेवस्य पुत्रः, काश्यपगोत्रीयस्य केशवस्य प्रपौत्रः। नैकानि व्याख्यानानि ग्रन्थोपरि लभ्यन्ते। श्रीपतिविरचिताया जातकपद्धतेरुल्लेखं दीक्षितमहोदया अपि कुर्वन्ति।[५४]

**४८ जातककलानिधिः**- कलाविलासेषु विभक्तः । कामाक्षीदेव्या भक्तः। प्रारम्भे तां स्तौति।

**४९ जातककलानिधिः**- नृसिंहाचार्येण दीक्षितेन विरचितः।

**५० जातककल्पलता**- अनामिकेन, गणेशेन मथुरानाथ-शुक्लेन च रचिता।

**५१ जातककल्पवल्ली** – वामनपुत्रेण अलवेश्वरेण अष्ट-अध्यायनिबद्धा।

**५२ जातककल्लोलः**- लक्ष्मणपुत्रेण रघुनन्दनेन रचितो द्वादशाध्यात्मकः।

**५३ जातककामधेनुः**- कामधेनुपद्धतिर्वा, कामधेनुजातकं वा- जयरामभट्टेन विरचितम्।

---

५२ तदेव पृ.४८७

५३ इतःपरं परिचयः,आधारार्थम्- अेन. सी. सी. खं. ७, के. कुंजुन्नी राजा, १९७३, पृ.२११-२३१

५४ दीक्षितः पृ. ४८६

५४ **जातककौमुदी** – अच्युतानन्दशर्मणा विरचिता।

५५ **जातककौस्तुभम्**– ढुण्ढिराजविरचितम्।

५६ **जातककौस्तुभम्**– बालकृष्णविरचितम्।

५७ **जातकक्रमः**–

५८ **जातकचन्द्रिका**– यज्ञनारायणविरचिता।

५९ **जातकचन्द्रिका**–बृहज्जातकोपरि परमेश्वरविरचिताया विश्वार्थदीपिनीव्याख्याया अपरं नामधेयम्।

६० **जातकचन्द्रिका** – ज्योतिःसंहिताधारेण। नैकानि व्याख्यानान्युपलभ्यन्ते।

६१ **बृहज्जातकचन्द्रिका**– रामशङ्करदेवविरचिता।

६२ **जातकचन्द्रिका**– वराहमिहिरप्रणीता।

६३ **जातकचन्द्रिका**– यज्ञनारायणपुत्रेण भूगोलवेंकटेशेन विरचिता। उदुदायप्रदीप इत्यपरनामा।

६४ **जातकचन्द्रिका** – वृद्धपराशरप्रणीता।

६५ **जातकचन्द्रिका**– शंकरवैदिकविरचिता।

६६ **जातकचिन्तामणिः**– आलुरिवंशजेन एकाम्रदैवज्ञेन विरचितः।

६७ **जातकचिन्तामणिः**– काशीस्थसंस्कृतविद्यालयशिक्षकेण लक्ष्मीपतिना विरचितः।

६८ **जातकचिन्तामणिः**– परशुरामविरचितव्याख्यया समेतः।

६९ **जातकजालः**– अड्यारग्रन्थागारे ज्योतिषग्रन्थः।

७० **जातकजीवनम्**– जातकजीविका– इत्यपरं नाम। व्याख्यापि प्राप्यते।

७१ **जातकजीवनम्**– रामचन्द्रसुधानिधिविरचितम्।

७२ **जातकतत्त्वम्**- रेवाशंकरपाठकस्य पुत्रेण उदुम्बरमहादेवेन विरचितम्।

७३ **जातकतत्त्वपञ्चाशिका**- श्रीपतिना रचिता।

७४ **जातकतन्त्रम्**- गणेशदैवज्ञरचितम्। हरिभवनस्य व्याख्या वर्तते।

७५ **जातकतरङ्गिणी**- रामदयालुविरचिता।

७६ **जातकतिलकम्**- २५ प्रकरणात्मकं नृसिंहपुत्रेण कमलाकरेण प्रणीतम्।

७७ **जातकदर्पणम्**- माधवदैवज्ञरचितः।

७८ **जातकदर्पणम्**- शूलपतिपुत्रेण प्राणधरस्य पौत्रेण गङ्गाधरपुत्र्याः पुत्रेण वसन्तेन विरचितः।

७९ **जातकदशाध्यायः**- दशाध्यायो वा।

८० **जातकदशाप्रकरणम्**- रामचन्द्र-पुरुषोत्तम-बलिगविरचितः।

८१ **जातकदशाफलम्**-

८२ **जातकदीधितिः**- दामोदररचितः।

८३ **जातजदीपः**-

८४ **जातकदीपकः**- लौहित्यवर सेन-इत्यनेन रचितः २५ प्रकरणयुतः।

८५ **जातकनिर्णयः**-

८६ **जातकरहस्यम् अथवा जातकनिर्णयः**-

८७ **जातकनिर्णयः**- रामसिंहरचितः।

८८ **जातकपत्रकाविवरणम्**-वामनरचितम्

८९ **जातकपद्धतिः अथवा जातककर्मपद्धतिः**-

९० **जातकपद्धतिः**- कौशिकवीरभट्टविरचिता।

९१ **जातकपद्धतिः**- जयदेवभट्टविरचिता।

९२ **जातकपद्धतिः**- ढुण्ढिराजविरचिता।

९३ **जातकपद्धतिः**-

मालवावास्तव्येन रामचन्द्रस्य प्रभाकरापरनाम्नः पुत्रेण धर्मेश्वरेण विरचिता। तत्र शतं श्लोकास्तथा षडध्यायाः सन्ति।

-एन.सी.सी. पृ.२१९

९४ **जातकपद्धतिः**- नीलकण्ठविरचिता रत्नावल्यपरनामा। दामोदरस्य व्याख्या तदुपरि वर्तते।

९५ **जातकपद्धतिः**- केरलप्रान्तस्य वटश्रेणीवास्तव्येन परमेश्वरेण रचिता। व्याख्यानद्वयं -एकमनामिकमपरं च बाल(प्र)बोधिनी नामकं चोपलभ्यते।

-एन.सी.सी. पृ. २२०

९६ **जातकपद्धतिः**- बलभद्रविरचिता।

९७ **जातकपद्धतिः**-महेश्वरविरचिता।

९८ **जातकपद्धतिः**- माखनलाल त्रिवेदीविरचिता।

९९ **जातकपद्धतिः**-मुकुन्दविरचिता डाहीलक्ष्मी, नडियादमध्ये हस्तलिखितं वर्तते।

१०० **जातकपद्धतिः**- विदग्धशिरोमण्यपरनामा सप्ताध्यायात्मका महामहोपाध्यायेन राघवानन्द- चक्रवर्तिशर्मणा विरचिता।

१०१ **जातकपद्धतिः**- रामकृष्णविरचिता रामकृष्णपद्धत्यपरनामा।

१०२ **जातकपद्धतिः**- १५९० ख्रिस्ताब्दे विश्वनाथेन विरचिता।

१०३ **जातकपद्धतिः**- मन्त्रिभट्टपुत्रेण विश्वनाथेन रचिता।

१०४ **जातकपद्धतिः**- श्रीधररचिता। बलभद्रस्य उदाहरणव्याख्या प्राप्यते।

१०५ **जातकपद्धतिकल्पवल्ली**- बूबाशर्मणः पुत्रेण विठ्ठलेन रचिता।

१०६ **जातककलपवल्यूदाहरणम्**- (केवलं गणितभागः)बूबाशर्मणः पुत्रेण विठ्ठलेन रचिता।

**१०७ जातकपद्धतिगणितप्रकाशिका**- कुमाररचिता।

**१०८ जातकपद्धतिः**-केशवविरचिता रत्नटीका ।

**१०९ जातकपद्धतिलिखनक्रमः**-

**११० जातकपद्मकोशःअथवा ताजिकपद्मकोशः।**

**१११ जातकपरिपाटी**-

**११२ जातकपरिपाटीसंग्रहः**-

**११३ जातकपराशरी**-पराशरकृता- पाराशरीसूत्रम्-इत्यपरनामा।

**११४ जातकपारिजातः**-

भारद्वाजगोत्रीयेण वेंकटाद्रिपुत्रेण वैद्यनाथेन सारावल्याधारेण विरचितः। तत्र अष्टादशप्रकरणानि सन्ति। नैकवारं प्रकाशितः।

**११५ जातकपीठिका**-

**११६ जातकप्रकरणम्**- स्वल्पो ग्रन्थः।

**११७ जातकफलम्**-

**११८ जातकफलनिर्णयः**-

**११९ जातकफलविचारः**-

**१२० जातकपलविशेषनिरूपणम्**-

**१२१ जातकबोधिनी**- सकलेश्वरविरचिता।

**१२२ जातकभागः**-

**१२३ जातकभावः**- विठ्ठलदैवज्ञपुत्रेण रघुवीरेण रचितः।

**१२४ जातकभावफलम्** -

**१२५ जातकभावसंग्रहः**-

**१२६ जातकभावसुधामञ्जरी**-

**१२७ जातकभावाध्यायः–**

**१२८ जातकभास्करः–**

**१२९ जातकभूषणम्–**

**१३० जातकभूषणम्–** गणपतिविरचितम्।

**१३१ जातकभूषणम्–** शम्भूनाथभट्टरचितः।

**१३२ जातकमञ्जरी–** मौद्गल्यगोत्रीयेण नागनाथपुत्रेण नृसिंहसूरिणा विरचिता। तत्राष्टादश प्रकरणानि सन्ति।

**१३३ जातकमञ्जरी–** शिवसहायविरचिता।

**१३४ जातकमार्गपद्मम् अथवा जातकपद्धतिप्रकाशः–**

१५४७ शकसमये दिवाकरेण एकोनविंशतिवर्षीयेण रचिता।

**१३५ जातकमार्तण्डः–** प्राणकृष्णेन विरचितः।

**१३६ जातकमुकुटः–** वासुदेवरचितः।

**१३७ जातकमुक्तावलिः–अथवा मुक्तावलिपद्धतिः–**

शिवज्योतिर्विद्भिरचिता। शिवदासेन वा विरचिता।

**१३८ जातकयोगफलग्रन्थः–**

**१३९ जातकयोगरत्नशतकम्–**

**१४० जातकयोगामृतम्–** वसिष्ठस्य दैवज्ञविलासग्रन्थं निर्दिशति।

**१४१ जातकयोगार्णवः–** विष्णुयामलतः अथवा अप्पयपुत्रेण भूगोल–वेंकटेश्वरेण विरचितः।

**१४२ जातकयोगावलिः–** अथवा त्रिंशद्योगावलिः–श्रीवत्सगोत्रीयेण नीलकण्ठपुत्रेण नरसिंह–नृसिंहसूरिणा विरचिता। सर्वार्थचिन्तामणिं लक्ष्मीपतिं च निर्दिशति।

**१४३ जातकयोगावली-**

**१४४ जातकरत्नमाला**- नरहरिरचिता।

**१४५ जातकरत्नाकरः**- नैकव्याख्यासहितः।

१४६ **जातकरहस्यम्**-जातकालङ्कारग्रन्थे गणेशदैवज्ञेन स्वकीयव्याख्याने निर्दिष्टम्।

**१४५ जातकलक्षणम्**- कालेश्वरविरचितम्।

**१४५ जातकलग्नफलम्-**

**१४६ जातकवर्त्म**- परमेश्वरकृतम्।

**१४७ जातकवर्षपद्धतिः**- नित्यानन्दशिष्येण वाल्मीकिना रचितः।

**१४८ जातकवल्लभः**-रघुनन्दनेन तथापरो रघुनाथपण्डितेन च रचितः।

**१४९ जातकविचारः**

**१५० जातकविवरणम्**- महीधरविरचितम्। विद्यारण्यकविरचितं च।

**१५१ जातकविषयः-**

**१५२ जातकशास्त्रम्**- शुक्राचार्यविरचितम्। सत्याचार्यविरचितस्यान्यस्य निर्देशः केशवदैवज्ञ- विरचितायां जातकपद्धतिव्याख्यायां वर्तते।

**१५३ जातकशिरोमणिः**- नरसिंहशास्त्रिणा रचितः। अन्यो महादेव-पाठकेन विरचितश्च।

**१५४ जातकशेखरः**-भोपालपुत्रेण नागपालशिष्येण सहजपालेन रचितः।

**१५५ जातकशेखरादिसंग्रहः-**

**१५६ जातकश्रीः अथवा जातकालंकारश्रीः**- गणेशदैवज्ञकृत-जातकालंकारटीका हरिभानुशुक्लविरचिता।

**१५७ जातकश्लोकाः-**

**१५८ जातकषट्कप्रकणिका-**

**१५९ जातकसंप्रदायप्रदीपः**- कुमारपुत्रेण कोट्याणपुत्रेण वा अमरानन्देन योगिना वा योगीश्वरेण वा रचितः। वराहमिहिरस्य बृहज्जातकोपरि टीकायां तस्यैव व्याख्याने समुल्लेखः।

**१६० जातकसंस्कारः**- उमामहेश्वरसंवादरूपः।

**१६१ जातकसंहिता**-

**१६२ जातकसंक्षेपः**- कमलनयनविरचितः।

**१६३ जातकसंग्रहः**- परमेश्वरशिष्येण विरचितः। मलबारस्थविदुषा अष्ट-प्रकरणैर्विरचितश्च। दामोदरेण रामसिंहेन तथा लक्ष्मणदासेन नवनिधिरामेण च संकलितः।

**१६४ जातकसंग्रहश्लोकाः**-

**१६५ जातकसरणिः**-

**१६६ जातकसरली** -

**१६७ जातकसरसी**- वराहमिहिररचिता।

**१६८ जातकसर्वस्वम्**- अष्टकवर्गः।

**१६९ जातकसर्वस्वसंग्रहः**- जम्बूनाथविरचितः। टीकापि प्राप्यते।

**१७० जातकसर्वार्थचिन्तामणिः**- वेङ्कटेशविरचितः।

**१७१ जातकसारः**-जातकालंकारव्याख्यायां गणेशेन(ख्रि.१६१४) तथा ज्योतिर्निबन्ध-सर्वस्वे शिवदासेन निर्दिष्टः।

**१७२ जातकसारः**- जातकदीपः, जातकदीपिका, जातकसारदीपः, इत्यपरनामानि। नृसिंह-पण्डितेन नृहरिपण्डितेन वा ढुण्ढिराजपुत्रेण (जातकाभरणकर्ता) विरचितः। समयः ख्रिस्ताब्दस्य १४७१-१५७१।

**१७३ जातकसारपद्धतिः**–

**१७४ जातकसारवचनम्** –

**१७५ जातकसारसंग्रहः** – नामका नैके ग्रन्थाः।

**१७६ जातकसारावलिः** – विष्णुविरचिता तथा शंभुदेवविरचिता।

**१७७ जातकसिंहः**–

**१७८ जातकसिद्धान्तः** – कालानिलविरचितः।

**१७९ जातकसिद्धान्तदशाफलानि** – विश्वमित्रविरचितानि ।

**१८० जातकसिद्धान्तसारः** –

**१८१ जातकसुधाकरः** – सामुद्रिकशास्त्राधारेणरचितः। दु:खभंजनविरचितश्च।

**१८२ जातकसुधानिधिः**–

**१८३ जातकस्कन्धः** – देवकेरले केरलज्योतिषे वा अच्युतेन निर्दिष्टः। २००० ग्रन्थसंख्यात्म–कोऽयं ग्रन्थः । अच्यतगुरुणा बृहस्पतिना रचितः। देवकेरलं तस्य साररूपोग्रन्थः।

**१८४ जातकादेशः**– जातकादेशमार्गो वा पुतुमनसोमयाजिना रचितः। दामोदरदैवज्ञेन रचितश्च।

**१८५ जातकादेशरत्नम्** – पुरुषोत्तमेन प्रश्नायनव्याख्यायां निर्दिष्टः।

**१८६ जातकाध्यायः**–

**१८७ जातकानीतिमार्गः**–चतुर्दशखण्डविभक्तः केरलदेशीयः जन्मपत्रिकानिर्माण–विषयको ग्रन्थः।

**१८८ जातकाभरणम्** – रामचन्द्रविरचितम्। समयः ख्रि.१७४७–१८०७।

**१८९ जातकाभरणम्** – वराहमिहिरविरचितम्।

१९० **जातकाभिधानम्** – सिंहमल्लविरचितम्।

१९१ **जातकामृतम्** – जातकालंकारव्याख्यायां गणेशदैवज्ञेन (ख्रि.१६१४)निर्दिष्टः। आदिशर्मणः प्रकाशव्याख्या प्राप्यते ।

१९२ **जातकामृतप्रकरणम्** – पं. दत्तारामेण विरचितम् ।

१९३ **जातकारिष्टम्** –

१९४ **जातकार्णवः**–प्रदीपिकाव्याख्या प्राप्यते। सोमसिद्धान्तानुसारेण च लिखितः।

१९५ **जातकार्णवः** – ढुण्ढिराजकृतः, – महादेव शर्मा रचितश्च। वराहमिहिर–विरचितोऽन्यः। सायणाचार्यरचितोऽपरश्च ।

१९६ **जातकार्णवदीपिका** – वेङ्कटयज्वन्विरचिता।

१९७ **जातकालंकारः**– सूर्यदेवयज्वन्विरचिता व्याख्या। जातककर्मपद्धत्यां श्रीपतिना निर्दिष्टः।

१९८ **जातकालंकारः** – भट्टोजिदीक्षितविरचितः।

१९९ **जातकेन्दुः** – अनिरुद्धद्विवेदीविरचितः।

२०० **जातकोत्तमः** – परशुरामप्रतापे निर्दिष्टः।

**२०१ भावप्रकाशः**–

जीवनाथदैवज्ञविरचितः। तत्रैकादशाध्यायेषु भावफलस्य विवरणं प्राप्यते। तत्र प्रत्येकाध्यायस्य विषयाः सन्ति – १.संज्ञा, २.भावफलमं, ३. भावपदार्थः, ४. ग्रहपदार्थः, ५. भावविचारः, ६. योगाः, ७. स्त्रीजातकं, ८. दशाफलं, ९. अन्तर्दशा, १०. प्रत्यन्तर्दशा. ११. ग्रहदानानि।

## २०२ सर्वार्थचिन्तामणिः -

पं. व्यङ्कशर्मविरचितः सर्वार्थचिन्तामणिर्नामको जातकविषयस्य ग्रन्थः। तत्राष्टादशाध्यायाः सन्ति। प्रथमेऽध्याये संज्ञानिरूपणं, द्वितीये-ऽध्याये लग्नफ्-फलवर्णनं, तृतीयेऽध्याये धनभावफलनिरूपणं, चतुर्थे-ऽध्याये तृतीयचतुर्थ-भावनिरूमणं, पञ्चमेऽध्याये पञ्चमषष्ठभावनिरूपणं, षष्ठेऽध्याये सप्तमभाव-फलविचारः, सप्तमऽध्याये अष्टमनवमभाव-निरूपणं, अष्टमेऽध्याये दशमैका-दशद्वादशभावनिरूपणं, नवमेभावे राजयोगजातभङ्गादिनिरूपणं, दशमेऽध्याये-ऽरिष्टयोगः, एकादशेऽध्यायेऽ-रिष्टभङ्गयोगः, द्वादशेऽध्याये मध्यमायुर्योगः, त्रयोदशेऽध्याये दीप्ताद्य-वस्था, चतुर्दशेऽध्याये भौमबुधदशाफलनिरूपणं, पञ्चदशेऽध्याये गुर्वा-दिसंज्ञन्तदशाफलनिरूपणं, षोडशेऽध्याये राहुकेत्वादि-दशान्तर्दशाफलं, सप्तदशेऽध्याये प्रकीर्णफलं, अष्टादशेऽध्याये ग्रन्थोपसंहारः।

## २०३ चमत्कारचिन्तामणिः -

अयं नारायणभट्टविरचितो जातकग्रन्थः। तत्र द्वादशभावफलं नवग्रहाणां दृष्ट्या विविधाध्यायेषु वर्णितम्। यथा रवेर्द्वादशभावेषु स्थिते किं फलम्? एवं प्रत्येकग्रहस्य प्रत्येकभावे स्थिते फलं प्रतिपादितम्। विशेषो यद् राहुकेत्वोरपि द्वादशभावेषु फलं निर्दिष्टम्। स्वल्पोऽयं ग्रन्थो महत्त्वपूर्णश्छन्दोबद्धश्च ।

## २०४ भावकुतूहलम् -

जीवनाथदैवज्ञविरचतः जातकग्रन्थः। तत्र सप्तदशाध्यायाः सन्ति। तत्र विविधाध्यायेषु संज्ञा, ग्रहवर्णनं, राशिवर्णनं, विविधयागेवर्णनं, सामुद्रिकविचारः, अवस्थाविचार, द्वादशभावविचारः, दशान्त-र्दशाविचारः - एते विषयाश्छन्दो-बद्धश्लोकैः प्रतिपादिताः।

**२०५ भावफलाध्याय: -**

लोमशसंहितान्तर्गतो भावफलाध्याय: स्वतन्त्र ग्रन्थरूपेण प्रकाशितो वर्तते। तत्र ८८ अनुष्टप्श्लोकै: प्रत्येकभावस्य भावेशस्यैव विचारं प्रतिपाद्य फलं निर्दिश्यते।

**२०६ बृहत्स्त्रीजातकम्- एवं नारीजातकम्-**

हिन्दीव्याख्याकार:- अभय कात्यायन:, चौखम्बा सुरभारती प्रकाशनम्, वाराणसीद्वारा प्रकाशितं प्राप्यते।

**२०७ मणित्थजातकम्-**

अथवा पद्मकोश: अथवा ताजिकपद्मकोश:-गोवर्धन भट्टविरचित:।[५५]

**२०८ मणित्थजातकम्-**

अथवा मणित्थताजिकम् अथवा हायनफलम्- मणित्थाचार्यविरचित:- अप्रकाशित:। हस्तलिखितेषु प्राप्यते।[५६]

**२०९ स्वल्पजातकम्-**

बृहज्जातकटीकायां भट्टोत्पलेनास्य ग्रन्थस्य नैकवारं समुल्लेख: कृत:। तथा च तस्मादुद्धरणानि प्रदत्तानि सन्ति।

ताजिकम्, ताजकम् -ताजिकमिति जातकस्यैवैका शाखा। जन्मकालीनस्य ये सूर्यस्यांशा वर्तन्ते तथैव संख्याका: प्रतिवर्षं सौरमानेन भवन्ति। मनुष्यस्य यल्लग्नं ग्रहस्थितिर्वा भवेत्, तदनुसारेण तस्य वार्षिकं सुखदु:खादिकस्य भावि कथनं ताजिकं कथ्यते। [५७] अस्यापि बहवो ग्रन्था उपलभ्यन्ते। केषांचन परिचय: पं दीक्षितमहोदयानां ग्रन्थाधारेणात्र प्रदीयते।[५८]

---

५५ अेन.सी.सी.,खं.१८, पृ. ५९

५६ तदेव पृ ५९

५७ दीक्षित:पृ. ४८९

५८ दीक्षित: पृ.४९०-९१

**२१० ताजिकभूषणपद्धतिः** -

पार्थपरस्थेन ढुण्ढिराजात्मकेन गणेशेन विरचिता प्रायेण १४८० शककालीना। तत्र कथितं गर्गाद्यैर्यवनैश्च रोमकमुखैः सत्यादिभिः कीर्तितम्। शास्त्रं ताजिकसंज्ञकम्। एतेनेयं कल्पना पद्धतिर्वास्माभिर्यवनेभ्यो गृहीता।

**२११ दैवज्ञालंकृतिः**-तेजोसिंहविरचितस्ताजिकग्रन्थः १३०० ख्रिस्ताब्दकालीनः।

**२१७ ताजिकतन्त्रसारः** - समरसिंहस्यायं ग्रन्थः १३५६ शकपूर्वकालीनः।

**२१८ ताजिकपद्धतिः**-नन्दग्रामस्थेन केशवेन रचितः। मल्लारेर्विश्वनाथस्य च टीका प्राप्यते।

**२१९ ताजकसारः** - १४४५ शककालीनो हरिभट्टविरचितो ग्रन्थः।

**२२० ताजकालङ्कारः** -ज्ञानराजपुत्रस्य सूर्यस्य ग्रन्थः।

**२२१ ताजिकनीलकण्ठी**-

नीलकण्ठदैवज्ञविरचितः १५०९शककालीनो ग्रन्थः। तस्योपरि तस्य पुत्रस्य गोविन्दस्य( शकम् १५४४) रसाला नाम्नी, ग्रन्थकारस्य नप्तोर्माधवस्य (शकम् १५५५), तथा विश्वनाथस्य टीका समुपलभ्यते।

**२२२ ताजिककौस्तुभम्**-

तापीतीरस्थेन तस्या उद्गारतटे प्रकाशाग्रामवास्तव्येन याज्ञवल्क्य-गोत्रोत्पन्नेन बालकृष्णेन विरचितोऽयं ग्रन्थः १५७१ शककालीनः। बालकृष्णस्य पित्रादिकानां नामानि यादव-रामकृष्ण-नारायण-राम-एतानि सन्ति।

**२२३ ताजिकसुधानिधिः**-नारायणकृतस्ताजिकसुधानिधिनामको विस्तृतो ग्रन्थः १६६० शककालीनः।

न्यू [५९]कॅटलोगस् केटलोगोरम्–मध्ये निम्नलिखितानां ताजिकग्रन्थानां सूचिर्वर्णनं च प्राप्यते। तस्यैव केवलं समुल्लेखोऽत्र विधीयते। ते ग्रन्था यथा –

१.ताजिकम् २. ताजिकनीलकण्ठी ३. ताजिककल्पलता ४. ताजिक–केशवी ५. ताजिककौमुदी ६. ताजिककौस्तभम् ७. ताजिकग्रन्थः ८. ताजिकचन्द्रिका ९. ताजिकचन्द्रिकाविनोदः १०. ताजिकचिन्तामणिः ११. ताजिकज्योतिरमणी १२. ताजिकतत्त्वम् १३. ताजिकतन्त्रम् १४. ताजिकतन्त्रदीपः १५. ताजिकतन्त्रसारः १६. ताजिकतिलकम् १७. ताजिकदर्पणम् १८. ताजिकदिवाकरः १९ ताजिकदीपकः २०. ताजिकपद्धतिः २१. ताजिकपद्धतिः २२. ताजिकपद्मकोशः २३. ताजिकप्रश्नकरणम् २४. ताजिकप्रश्नतन्त्रम् २५. ताजिकफलतन्त्रम् २६. ताजिकभावविचारः २७. ताजिकभावाध्यायः २८. ताजिकभूषणम् २९. ताजिकमणिः ३०. ताजिकमणित्थम् ३१. ताजिकमुक्तावली ३२. ताजिकमूलम् ३३. ताजिकयोगसुधानिधिः ३४. ताजिककरत्नम् ३५. ताजिकरत्नजातकम् ३६. ताजिकरत्नमाला ३७. ताजिकरत्नाकरः ३८. ताजिकवर्षतन्त्रम् ३९. ताजिकवर्षपत्रफलम् ४०. ताजिकवामनः ४१. ताजिकवारिधिः ४२. ताजिकविद्योतनम् ४३. ताजिकविवेचनम् ४४. ताजिकवैष्णवम् ४५. ताजिकशरच्चन्द्रोदयः ४६. ताजिकशास्त्रम् ४७. ताजिकसङ्ग्रहः ४८. ताजिकसारः ४९. ताजिकसारसहम् ५०. ताजिकसारसुधानिधिः ५१. ताजिकसारिणी ५२. ताजिकसारोद्धारः ५३. ताजिकसिद्धान्तः ५४. ताजिकसुधानिधिः ५५. ताजिकहायनरत्नम् ५६. ताजिकहिल्लाजः ५७. ताजिकाभरणम् ५८. ताजिकारिष्टविचारः ५९. ताजिकालङ्कारः ६०. ताजिकोक्तवर्षपद्धतिः

---

५९ अेन.सी.सी. खण्डः ८. पृ. १३७–१४३.

**भारतीयज्योतिषस्य प्राचीनताया विषये वैदेशिकानां मतानि–**

भारतीयज्योतिषस्य प्राचीनताया मौलिकतया विषये न केवलं भारतीया विचारं कुर्वन्ति, अपि तु वैदेशिकविद्वांसोऽपि मुक्तकण्ठेन प्रशंसां कुर्वन्ति। अत्र तेषां मतानि प्रस्तौमि –

(१) **अलबरुनी महोदयेनोक्तम्**– " ज्योतिषशास्त्रे हिन्दुजनाः सम्पूर्णे विश्वे (संसारे) अग्रेसराः । मया नेकासु भाषास्वङ्कक्रमो दृष्टः, परन्त्वत्र अष्टादशसंख्यापर्यन्तं संख्यानां नामानि दृश्यन्ते। द्वितीये केऽपि स्थाने न। यत्र अन्तिमसंख्याया नाम परार्ध प्राप्यते ।

(२) **एकः फ्रांसीसी यात्री टरवीनियर महोदयो वदति**– भारतं भारतीय–ज्योतिषज्ञाने प्राचीनकालादेव निपुणम् ।

(३) **प्रो. मैक्सूलर महाशयेन स्पष्टशब्देन लिखितं यत्**– भारतीयानामन्तरिक्षमण्डलस्य तथा च नक्षत्रमण्डलस्य ज्ञानार्थमन्य–देशानामानृण्यं नास्ति, अपि तु भारतीया मूल –आविष्कारका एव ।

(४) फ्रान्सीसी पर्यटकः फ्राक्वीस वर्नियरेणापि भारतीयज्योतिष–स्याध्ययनेनोक्तम् यत् "भारतीयाः स्वगणनाद्वारैव चन्द्रग्रहणस्य, सूर्यग्रहणस्य च शतप्रतिशतं सत्यां भविष्यवाणीं कुर्वन्ति, अतस्तेषां ज्योतिषं प्राचीनं मौलिकं च।

(५) वर्जेश महोदयस्तु ज्योतिषस्य प्रभावात् सूर्यसिद्धान्तनामकस्य प्रसिद्ध–ग्रन्थस्योपरि आङ्ग्लभाषायां टीकामपि लिखितवान् । तत्रैव परिशिष्टे निर्दिष्टं भारतीयज्योतिषं टोलेमीमहोदयस्य सिद्धान्तं नाश्रितवत् । कारणमिदं यत् ख्रिस्ताब्दात् पूर्वकाल एव ज्योतिषस्य पर्याप्तं ज्ञानं भारतीयानामासीत् ।

(६) **डॉ. थीबो महोदयेनानेकानि पुस्तकानि पठित्वा स्वविचारः प्रस्तूयते –** भारतदेश एव रेखागणितस्य मूलसिद्धान्तानां प्रथमाविष्कारकर्ता ।

(७) **डॉ. मार्गन महोदयेन स्वीकृतं यत्** - भारतीयानां गणितमेवं ज्योतिषं च पाश्चात्यदेशस्य कस्यापि गणितस्य ज्योतिषस्य वापेक्षया महत्तमम् ।

(८) **विश्वविख्यातो विद्वान् लियाङ्गचिचावमहोदयो लिखति यत्–** वर्तमानसमयपर्यन्तं यदान्ये हस्तपादादिक्रियाणामनभिज्ञा आसन्, तदैवा–वामुभयभ्रातारौ (भारतचीनदेशौ) मानवसम्बन्धितसमस्यानां प्रश्नानां समाधानं ज्योतिषविज्ञानद्वारा निराकरणे समथावास्ताम् ।

अत एव पूर्वोक्तोद्धरणतः सुस्पष्टं जायते– यद् ज्योतिषशास्त्रोस्योद्भवस्थानं भारत एव । लोकमान्यतिलकमहोदयेनापि स्वकीय ओरायननामकाख्ये ग्रन्थे भारतीयानां नक्षत्रविद्याप्रवीणताविषये निष्कर्षो दीयते।[६०]

**उपसंहारः–**

अस्मिन् प्रस्तावनारूपप्रथमे प्रकरणे भारतीयज्योतिषस्य स्वरूपं प्रतिपादितम्। ज्योतिषशास्त्रस्य व्याख्या, व्याप्तिः, महत्त्वम्, इतिहासः, वेदे रामायणे महाभारते पुराणे ज्योतिषं, त्रिस्कन्धज्योतिषपरिचयः, जातकताजिकग्रन्थानां परिचयः, वैदेशिकानां ज्योतिषविषये मतानि– एते विषया वर्णिताः।

---

६० भारतीय ज्योतिष, नेमिचन्द्र शास्त्री, प्रथमः अध्यायः,पृ. २४–२६

# द्वितीयं प्रकरणम्

# यवनस्य यवनजातकस्य च विषये विवरणम्

## द्वितीयं प्रकरणम्

## यवनस्य यवनजातकस्य च विषये विवरणम्

बृहद्यवनवृद्धयवनजातकयोरध्ययनात्पूर्वं यवनविषयिणी चर्चात्र प्रस्तूयते। यवनः, यवनेश्वरः,यवना इति रूपेण यस्य निर्देशो वराहमिहिरादिभिः कृतः। ते के यवनाः ? यवनशब्दस्य स्पष्टीकरणपूर्वकं तेषां जातकशास्त्रे प्रदानं कृतं वर्तते। तेषां के ग्रन्था उपलभ्यन्ते। कानि तेषामद्धरणानि सन्ति। तेषु के विचारा दरीदृश्यन्ते। इत्थं यवनज्योतिषविषयस्य यथोपलब्धस्य साहित्यस्य समुद्धरणानां च संकलनमत्र क्रियते।

**यवनो ज्योतिषशास्त्रप्रवर्तकः-**

नारदसंहितायामष्टादश ज्योतिषशास्त्रप्रवर्तकानां निर्देशो वर्तते। तेषु यवनस्य समुल्लेखो निर्देशो दृश्यते। यथोक्तं नारदेन-

ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः पौलत्स्यलोमशौ।
मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः।।
च्यवनो यवनो गर्गः कश्यपश्च पराशरः।
अष्टादशैते गम्भीरा ज्योतिःशास्त्रप्रवर्तकाः।।[६१]

पराशरेणाप्यष्टादश ज्योतिःशास्त्रप्रवर्तका निर्दिष्टाः। तेष्वपि यवनस्य निर्देशो वर्तते।

विश्वशङ् नारदो व्यासो वसिष्ठोऽत्रिः पराशरः।
लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः।।
पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः।
गर्गो मरीचिरित्येते ज्ञेया ज्योतिःप्रवर्तकाः।।[६२]

[६१] ना.सं. १.२-३

कश्यपमहर्षिणापि स्वसंहितायामष्टादशज्योतिःशास्त्रप्रवर्तका गणिताः। तत्रापि यवनस्योल्लेखोऽष्टादशज्योतिषशास्त्रप्रवर्तकेषु भवत्येव।

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।
रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशैवैते ज्योतिःशास्त्रप्रवर्तकाः।।३।।[६३]

एताभिर्ज्योतिषशास्त्रप्रवर्तकसूचीभिः स्पष्टं भवति यत् नारद–पराशर–कश्यपा–दिभिर्यवनस्य सबहुमानं स्वीकारः कृतः। अग्रे स्पष्टं भविष्यति यद् वराहमिहिर–कल्याणवर्म–भट्टोत्पलादिभिरपि यवनमतानां सबहुमानं समुल्लेखो विहितः।

**यवनशब्दार्थः-**

इन्द्र–वरुण–भव–शर्व–रुद्र–मृड–हिम–अरण्य–यव–यवन–मातुल–आचार्याणा–मानुक् इति पाणिनिसूत्रे(४.१.४९) यवनस्य स्पष्टतया समुल्लेखो वर्तते– स प्राचीनतम इति मन्ये। कात्यायनेनापि पाणिनिसूत्रस्य वार्तिके यवनाद् लिप्यां, यवनानां लिपिः – यवनानी (यवन–आनुक्–ङीप्) इति स्पष्टीकरणं कृतम्।

प्रा. वामन शिवराम आपटे महोदयाः[६४] स्वकीयशब्दकोशे यवनविषये लिखन्ति- (यु–युच्),१ ग्रीकजनः , तथा आयोनियनजनः २ कोऽपि वैदेशिकः, म्लेच्छो वा। मनु. १०.४४ (अधुनायं शब्दः मोहम्मदियानामथवा युरोपीयजनानां कृते प्रयुज्यते।) - 1 A Greek and Ionian, 2 Any foreigner or barbarian Ms. 10.44 ( the word is apllied at present to a Mahomedan or a Europian also).

---

[६२] नेमिचंद,भारतीय–ज्योतिषशास्त्र पृ.६६

[६३] क.सं.–१.२–३,संपादनम्– दीपक आरम्भडिया

[६४] Apte, V.S., The Practical Sanskrit-English Dictionary, p. 782

यवनिका - curtain, वितानमित्यर्थे प्रयुज्यते। तथा च यवानानी शब्दस्यार्थो यवनानां लिपिः-इति भवति। तत्रैव निम्नलिखिता-न्युदाहरणानि यवनशब्दप्रयोगविषये प्रदीयन्ते। यवनीनवनीतकोमलाङ्गी - जग., यवनीमुखपद्मानां सेहे मधुमदं न सः-रघु. ४.६१- एष बाणासनहस्ताभिर्य-वनीभिः परिवृत्त इत एवागच्छति प्रियवयस्यः- स.२ प्रविश्य शार्ङ्गहस्ता यवनी-स. ६, प्रविश्य चापहस्ता यवनी- व. ५

आपटे महोदयैः प्रदत्तेषु संदभेषु द्वे संदर्भे महत्त्वपूर्णे भवतः । मनुस्मृति-समयेऽपि (१००-३०० ख्रिस्ताब्दे) यवनशब्दप्रयोगो जातिवाचक-त्वेन प्राप्यते। मनुस्मृति-अनुसारेण दस्यूनां समुदाये तेषामन्तर्भावो भवति। ते श्लोका यथा-

पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः।।
मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः।।[६५]

यवनशब्दः कालिदासेन प्रयुक्तः, अत एव प्राचीनो वर्तते। कालिदाससमयेऽपि (४०० ख्रिस्ताब्दपूर्वं) यवनशब्दः प्रसिद्धो वर्तते। कालिदासेनापि यवन-शब्दप्रयोगः कृतो निम्नलिखितश्लोके रघुवंशे[६६]-

यवनीमुखपद्मानां सेहे मधुमदं न सः।
बालातपमिवाब्जानामकालजलदोदयः।।

कालिदासस्य विक्रमोर्वशीयं तथा अभिज्ञानशाकुन्तलं नाटके यवनीपात्ररूपेण वर्तते। सा तु राज्ञः सेविका तस्य बाणासनादिकं वहन्ती दृश्यते। यथा अभिज्ञान-शाकुन्तले बह्वीनां यावनीसेविकानां निर्देशः -

---

[६५] म.स्मृ. १०.४४-४५

[६६] रघुवंशम्-४.६१

एष बाणासनहस्ताभिर्यवनीभिर्वनपुष्पमालाधारिणीभिः परिवृत्त इत एवागच्छति प्रियवयस्यः– अभि.शाकु. अङ्कः२ [६७]

प्रविश्य शार्ङ्गहस्ता यवनी – भर्तः, एतद्धहस्तावापसहितं शरासनम् । – अभि.शाकु. अङ्कः६ [६८]

प्रविश्य चापहस्ता यवनी–भर्तः, एतद्धहस्तावापसहितं शरासनम्।–विक्रम. ५ [६९]

जगन्नाथपण्डितस्य यावनीप्रेमविषयिणी कथा बहुप्रसिद्धा वर्तते। तस्य विषये श्लोकः प्रवर्तते, यत् –

यवनीनवनीतकोमलाङ्गी शयनीये यदि लभ्यते कदाचित्।

अवनीतलमेव साधु मन्ये न वनी माधवनी विलासहेतु ।।

पं. सिद्धेश्वरशास्त्री चित्राव महोदयैः केचन पौराणिक संदर्भा यवनविषयका निर्दिष्टाः।[७०] १) कृष्णेन निहताः कश्चिद् राजा (महा.व.१२.३३)कालयवनः। २) हैहैयराज्ञः वयस्यः। सगरेण तस्य पराभव कृतः, किन्तु स वसिष्ठं शरणं गतः तेन तस्मै स्वल्प दण्डः केवलं मस्तकक्षौरकर्म दीयते । (पद्म.उ.२०) ३) भविष्यभागवतवायुमत्स्य– ब्रह्माण्डादिपुराणानां मतेन अयमेकः राजवंशः ४) एका संकरजातिः। क्षत्रियशूद्रयोः संमिश्रणेन संजायते।

अष्टादश पुराणानां शिरोमणिग्रन्थे भागवतेऽपि यवनेश्वर–यवनशब्दस्य प्रयोगो दृश्यते–

किंरातहूणान्ध्रपुलिन्द–अभोरकड़का यवना खसादयः।

येऽन्ये च पापा यदुपाश्रयाश्रया शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः।।

–भा.पु. २.४.१८

---

[६७] देवधरसंस्करणम् खण्डः १ पृ.४२

[६८] देवधरसंस्करणम् खण्डः १ पृ.२०४

[६९] देवधरसंस्करणम् खण्डः१ पृ.१३२

[७०] प्रा.को. पृ.४६७

पां. वा. काणेमहोदया लिखन्ति[७१]– प्रो. अे. के. नाराइनमहोदयेन स्वकीये इन्डोग्रीकग्रन्थे यवन–योनविषये परिशिष्टे विवेचनं कृतम्। यवनो नाम आयोनियनः। तेन प्रदर्शितं यत् कर्णपवणि  यवनानां सर्वज्ञत्वेन शूरवीरत्वेन म्लेच्छभिन्नत्वेन विवेचनं प्राप्यते।

युगपुराणे वर्ण्यते यत् यवनाः पञ्चराज्ञां पुष्पपुरे नियुक्तिं करिष्यन्ति। ते च यवना मध्यदेशे बहुकालपर्यन्तं न स्थास्यन्तीति।[७२]

मत्स्यपुराणे अनु–यदु–द्रुह्यु–तुर्वसु–पूरु–एतेषां वर्णनप्रसङ्गे यवनानां समुल्लेखः प्राप्यते। तुर्वसोर्यवना जाता इति तत्र प्रतिपाद्यते।

> यदोस्तु जाता यदवस्तुर्वसोर्यवनाः सुताः।
> द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः।
> पूरोस्तु पौरवो वंशो यत्र जातस्तु पार्थिवः।।

–म.पु. अ. ३४.३०

शब्दकल्पद्रुमे लिखितं यौति मिश्रीभवतीति जातिविशेषः। एतद्विषये ब्रह्माण्डपुराणे स्पष्टतया विवेच्यते [७३]यत्–

> भविष्यन्तीह यवना धर्मतः कामतोऽर्थतः।
> तैविमिश्रा जनपदा आर्या म्लेच्छाश्च सर्वशः।
> विपर्ययेण वर्तन्ते जनयिष्यन्ति वै प्रजाः।।

– ब्र.पु. अ. ३९

---

[७१]काणे– खण्डः ५, भागः २, पृ. ८२९,संदर्भः १३४८फ

[७२] उपर्युक्तम् – खण्डः ५, भागः २, पृ. ८२८

[७३] श.क. खं.४,पृ.२४–२५

विष्णुपुराणे कृष्णचरित्संदर्भे कालयवनस्य विवरणं प्राप्यते, तत्र कालयवनस्य यवनत्वेन यवनेश्वरेश्वस्य यवनेशस्य चोल्लेखो विवर्णितः। तत्र यवनशब्दो नैकवारं प्रयुज्यते।

सभाजयामास च तं यवनेशो ह्यनात्मजः।

तं कालयवनं नाम राज्ये स्वे यवनेश्वरः।

अभिषिच्य वनं यातो वजाग्रकठिनोरसम्।।

– वि.पु. ५.२३

**यवनः, बृहद्यवनः, वृद्धयवनः, स्फुजिध्वजः**

यवनो ज्योतिषशास्त्रप्रवर्तकत्वेन महर्षिभिर्विविधसंहितासु समुल्लिख्यते। अनेक–स्थानेषु यवनेश्वरत्वेनापि तस्योल्लेखः प्राप्यते। यवना ऊचुः– इति बहुवचना–त्मकः प्रयोगोऽपि प्राप्यते। यवनानां बहवः शब्दा वराहमिहिरपूर्वकाल एव ज्योतिषशास्त्रे स्वीकृताः प्रचलिताश्चासन्। वराहमिहिरेण सत्येन बादरायणेन च यवनसिद्धान्ताना–मुल्लेखा आदरेण सहितं कृताः। यवनेश्वरस्तथोत्पलविषये काणेमहोदयैर्लिखिते स्वकीये लेखे[७४] यवनराज्ञा स्फुजिध्वजेन लिखितस्य चतुःसहस्रश्लोकपरिमाणस्य फलज्योतिषस्य यवनजातकस्य तथान्यस्य यवना–धिपतेर्मीनराजकृतस्यानेकसहस्र–प्रवृद्धस्य वृद्धयवनजातकस्य समुल्लेखः कृतः। महोदया पुनरपि स्फुजिध्वजस्य यवनजातकस्य तथा मीनराजकृतस्य वृद्धय–वनजातकस्य साम्यं दर्शयन्ति– यथा–ग्रन्थद्वयेषु कथितं यत् सूर्यस्य स्वगृहता सिंहराशौ तथा चन्द्रस्य कर्कराशौ प्रदत्ता। एतैरन्या राशयः–यथा सूर्येण कन्या–तुला–वृश्चिक–धन–मकर–राशयः, तथा चन्द्रेण मिथुन–वृषभ–मेष–मीन–कुम्भ–राशयः– क्रमेण बुध–शुक्र–गुरु–शनि–ग्रहेभ्यः प्रदत्ताः। अतस्तेषां द्विरा–शीणां स्वामित्वं न चन्द्रसूर्ययोर्भवति।[७५] स्फुजिध्वजेन

---

[74] Kane P.V., Journal of Asiatic Society, Bombay, Vol. 30, pp. 1-8

[75] Kane P.V., Hist. of Dharmashastra, Vol. V, part I, p. 576

यवनजातके मीनराजेन वृद्धयवनजातके मानसागरीग्रन्थे च यवनानां सिद्धान्तानां संग्रहो दृश्यते। भट्टो–त्पलटीकायां सारावल्यां च बहुसंख्याका यवनश्लोकाः संप्राप्यन्ते। तेषां संग्रहो मया तृतीये परिशिष्टे प्रदीयते।

**१ बृहत्संहितायां यवनः-**

भारतीयसंस्कृतवाङ्मये ज्योतिषशास्त्रस्येतिहासो यवनाचार्याणां प्रदानस्य विवरणेन विना त्वपूर्णः। अस्माकं भारतीयमुनीनां परम्परा वर्तते, यत् त ऋषिवत् पूज्या ग्रन्थकर्तारो ज्योतिषशास्त्रप्रवर्तकाश्चान्। वराहाचार्यस्य मतेन फलितज्योतिषे यवनानां महत्त्वम् । वराहसंहितायां यवनाचार्याणां ज्ञानगरिमाया वराहमिहिरो भारतीयज्योतिषस्य समं समादरं करोति ।

श्लोको यथा–

म्लेच्छा हि यवनास्तेषु सम्यक शास्त्रमिदं स्मृतम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्देवविद्द्विजः।।

– बृ.सं. अ.२.१४

तेषां ग्रन्थानां महत्त्वं प्राधानिकता च ज्योतिषग्रन्थेषु समुल्लिखित–श्लोकादीनां प्रमाणेन दृश्यते । पं. दीक्षितमहोदयानां मतेन –अयं गर्गस्य श्लोको वराहेण गृहीतः।यवनेष्वपीदं शास्त्रं सुष्ठु वर्तते–इत्येव सिद्ध्यति, नाधिकम्। अस्य संबन्धः केवलं जातकेन सह वर्तते। संहिताशाखया सह यवनानां न कोऽपि संबन्धः। जातकशास्त्रमस्माभिर्यवनेभ्य एव गृहीतमिति न सिद्धं भवति[७६]। म.म.पां.वा. काणे महोदयाः[७७] स्वकीये धर्मशास्त्रस्येतिहासग्रंथे यवन–विषये लिखन्ति। वराहमिहिरो नैकवारं यवनानां मतानि निर्दशति। कुत्रचित् स तेभ्यो मतेभ्यः स्वकीयं भिन्नत्वं प्रर्दशयति।

[७६] दीक्षितः, पृ. ५१८

[77] Kane , Vol. V, part I, p. 563

२ **बृहज्जातके यवनः-**

बृहज्जातके निम्नलिखितश्लोके मयमणित्थशक्तिभिः साकं यवनाचार्यस्य निर्देशः प्राप्यते- यथा

मययवनमणीत्थशक्तिपूर्वैर्दिवसकरादिषु वत्सराः प्रदिष्टाः ।
नवतिथिविषयाश्विभूतरुद्रदशसहिता दशभिः स्वतुङ्गभेषु।।

-बृ.जा.७.१

अत्र भट्टोत्पलटीकायां व्याख्यायते यत् - यवना म्लेच्छजातीया होराविदः। तैः दिवसकरादिषु ग्रहेषु वत्सराः परमायुःप्रमाणाब्दाः प्रदिष्टाः।

एकं द्वौ नवविंशतिधृतिकृती पञ्चाशदेषां क्रमा-
च्चन्द्रारेन्दुजशुक्रजीवदिनकृद्दैवाकरीणां समाः।
स्वैः स्वैः पुष्टफला निसर्गजनितैः पक्तिर्दशायाः क्रमा-
दन्ते लग्नदशा शुभेति यवना नेच्छन्ति केचित्तथा।।

-बृ.जा.८.९

अन्ते लग्नदशा शुभा- इति यवनानां मतं किन्तु केचन तां दशां शुभाशुभां मन्यन्ते। यवनमतानुसारेण विंशत्यधिकाद्वर्षशतादूर्ध्वं यदि कस्यचिदायुषः कालो भवति, तदा स कालः सर्व एव लग्नस्य नैसर्गिको भवति। तस्मिन् काले पुराणयवनानां मतेन लग्नदशा शोभना भवति- इति भट्टोत्पलः।

प्राहुर्यवनाः स्वतुङ्गैः क्रूरैः क्रूरमतिर्महीपतिः।
क्रूरैस्तु न जीवशर्मणः पक्षे क्षित्यधिपः प्रजायते।।

-बृ.जा.११.१

अत्र वराहमिहिरो राजयोगविषये यवनानां मतं स्वाभिमतं दर्शयति। क्रूरग्रहा उच्चस्थाने स्थिताः, तदा जातको राजा न भवति, किन्तु राज्ञा तुल्यो धनवान् भवति।

नवदिग्वसवस्त्रिकाग्निवेदैगुणिता द्वित्रिचतुर्विकल्पजाः स्युः।

यवनैस्त्रिगुणा हि षट्शती सा कथिता विस्तरतोऽत्र तत्समासः।।

–बृ.जा.१२.१

अत्र नाभसयोगविचारे वराहमिहिरेण यवनाचार्याणां मतं प्रदर्शितम्। यवनैस्त्रिगुणा षटशतीयोगा(१८००) कथिताः।

बृहज्जातकग्रन्थे ३६ यावनीशब्दाः– अर्थात् ग्रीकशब्दाः प्रयुज्यन्ते– एवं वेबरमहोदयः कर्नमहोदयश्च वदति।[७८] ते शब्दा यथा–

अ.१ श्लो.८ क्रिय, तावुरि, जितुम, कुलीर, लेय, पाथेन, जूक, कौर्प्य, तौक्षिक, अकोकेर, हृद्रोग, इत्थम्– इति द्वादशराशीनां संज्ञाः। अ.१ श्लो.९– होरा, द्रेष्काण, श्लो. १५ रिफ्फ, श्लो.१६ द्यून,श्लो.१७ केन्द्र, श्लो.१८ पणफर. अपक्लिम, हिबुक, यामित्र, त्रिकोण, मेषूरण, श्लोक.२० वेशि, अ.२ श्लो.२ हेलि(सूर्यः), हिम्न–हेम्न(चन्द्रः), आर(मङ्गलः), कोण(शनिः), श्लो.३ आस्फुजित(शुक्रः), अ.१३ श्लो.३ सुनफा–अनफा–दुरधरा,केमद्रुम, अ.७ श्लो.१० लिप्ता(कला), ज्यौ , द्युत् –दी।

क्रियताबुरिजितुमकुलिरलेयपाथोनजूककौर्प्याख्या।

तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्।।

–बृ.जा. १.८

[७८] दीक्षितः पृ. ५१८

## ३ लघुजातके यवनः-

लघुजातके वराहमिहिरो वेशिस्थानविषये यवनानां मतं प्रदर्शयति, यत् ते सूर्याद् द्वितीयमृक्षं - स्थानं वेशिस्थानं कथयन्ति।

सूर्याद् द्वितीयमृक्षं वेशिस्थानं प्रकीर्तितं यवनैः।
तच्चेष्टाग्रहयुक्तं जन्मनि चेष्टासु च विलग्नम्।।

-ल.जा.१२.६

## ४ योगयात्रायां यवनः-

विविधग्रहाणां समुत्पत्तिस्थानानि विविधग्रन्थेषु वराहमिहिरकृत-योग-यात्रायां (३.१९-२०)सारावल्यां (७.१४-१५)तथा मीनराजकृत-वृद्धयवनजातके (२.९-१०)निर्दिश्यन्ते।

तथापि मीनराजकृत-वृद्धयवनजातके सहस्त्ररश्मिर्यवनेषु जाता-इति वर्ण्यते। तद्यथा-

सहस्त्ररश्मिर्यवनेषु जातो विभावरिशस्तु तथा कलिङ्गे।
अवन्तिदेशोद्भव एव भौमः कौशाम्बिकेयो हिमरश्मिपुत्रः।।९।।
सिन्धौ प्रजतस्त्रिदशेशमन्त्री जनान्त्यभूर्भोजकटे भृगोश्च।
सौराष्ट्रजस्तीक्ष्णकरस्य पुत्रो राहुर्महाबर्बरसंभवश्च।।१०।।

तत्र वराहमिहिरकृत-योगयात्रायां चन्द्रस्य समुत्पत्तिर्यवनेषु जाता-इति कथ्यते। यथा-

अङ्गेषु सूर्यो यवनेषु चन्द्रो भौमो ह्यवन्त्यां मगधेषु सौम्यः।
सिन्धौ गुरुर्भोजकटेषु शुक्रः सौरः सुराष्ट्रे विषये बभूव।।
म्लेच्छेषु केतुश्च तमः कलिङ्गे जातो यतोऽतः परिपीडितास्ते।
स्वजन्मदेशान् परिपीडयन्ति ततोऽभियोज्याः क्षितिपेन देशाः।।

-योगयात्रा ३.१९-२०

## ३ बृहत्संहिताया भट्टोत्पलटीकायां यवनः-

बृहत्संहिताया भट्टोत्पलस्य टीकायां बहून्यद्धरणानि विविधसंदर्भेषु विविधाध्ययेषु यवनस्य मतप्रदर्शकाणि समुपलभ्यन्ते । तानि निम्नलिखितानि सन्ति।

बृहत्संहिता( २.३२ )टीकायां भट्टोत्पलः पूर्वाचार्यपरम्परां स्पष्टीकरोति। सूर्यः,मयः, विष्णुः, वशिष्टः, सोमः, पराशरः,यवनाः- इति परम्परा प्रदर्शिता।

यद्दानवेन्द्राय मयाय सूर्यः शास्त्रं ददौ सम्प्रणताय पूर्वम् ।
विष्णोर्वसिष्ठश्च महर्षिमुख्यो ज्ञानामृतं यत्परमाससाद ।।
पराशरश्चाप्यदिगम्य सोमाद् गुह्यं सूराणां परमाद्भुतं यत् ।
प्रकाशयाञ्चक्रुरनुक्रमेण महर्द्धिसन्तो यवनेषु तत्ते ।।

-बृ. सं. टी. २.३२

यवनेश्वरेण प्रथमं ग्रहस्वभावानुरूपं तद्वर्षे दिने, मासे, ऋतुषु, फलं भवतीति सामान्यतया उक्त्वा दिवाकरस्याब्दे यत् फलं भवति तद्वर्णितम्। यथा-

अब्दाश्रयं लक्षणमीरितं यद् ग्रहस्वभावप्रभवं जनानाम् ।
तदेव तन्मासदिनर्तषूक्तं तदीश्वरस्थानविकल्पितं च ।।
दिवाकराब्दे रणविग्रहोग्रक्षितीश्वरस्तीव्रविषज्वराग्निः ।
अवर्षशुष्कद्रुमशुष्कसस्यप्रचण्डवह्न्युग्रविषाक्षिरोगाः ।।

-बृ. सं. टी. १९.१-३

चन्द्रवर्षफलं यवनेश्वरमतेन यथा-

सम्पन्नसस्यक्षुपशष्पशालिप्ररूढगुल्मो बहुवर्षधारः ।
रत्नौषधिस्नेहपटुप्रसेकश्चान्द्रो रतिस्त्रीसुखवर्धनोऽब्दः ।।

-बृ. सं. टी.१९.४-६

भौमवर्षफलं यवनेश्वरमतेन यथा–

रणप्रचण्डः क्षितिपोऽल्पसस्यो विशुष्कवारिद्रुमशष्पशीर्णः ।

अङ्गारकाब्दः प्रचुरोरगाग्निरातङ्कचौर्यक्षुदवृष्टिदृष्टः ।

–बृ. सं. टी.१९.७–९

ग्रहवर्षफलाध्याये बुधस्य वर्षफलं यवनेश्वरमतेन निर्दिश्यते टीकायाम्।

सन्धानदानप्रयतः क्षितीशः स्वाध्यायतीर्थाध्वरभीर्द्विजौघः ।

निराधिरुङ्मध्यमसस्यवर्षो बौधः सुहृत्स्नेहविवर्धनोऽब्दः।।

–बृ. सं. टी.१९.११

बृहस्पतिवर्षफलं यवनेश्वरमतेन यथा–

सुवर्षयज्ञोत्सवसम्प्रदानो नीरुग्व्यथो धर्मपरोऽवनीशः ।

स्फीतानुतानैर्बहुसस्यकर्मा गुरोः स्वकर्मप्रयतप्रजोऽब्दः।।

–बृ.सं.टी.१९.१३–१५

शुक्रवर्षफलं यवनेश्वरमतेन यथा–

पर्याप्तसौख्यस्फुटसस्यमेघाः प्ररूढवल्लीवरशष्पपुष्पः ।

कामप्रकामः क्षितिपो मुदाढ्यः शौक्रोऽङ्गनाहर्षवसुप्रदोऽब्दः।।

–बृ.सं.टी.१९.१६–१८

शनैश्चरवर्षफलं यवनेश्वरमतेन यथा–

तुष्टाल्पवर्षः प्रबलानिलाग्निर्विपन्नसस्यश्चलितक्षितीशः ।

मृत्युक्षुधातङ्कभयोपजुष्टः शनैश्चरोऽब्दः पशुशूद्रगोघ्नः ।।

–बृ. सं. टी.१९.१९–२१

यवनेश्वरमतेन गृहप्रवेशविषये शुभकालो निम्नलिखितश्लोके सम्प्राप्यते।

लग्नेषु जीवैन्दवभार्गवेषु पश्यत्सु चैतेषु गृहर्क्षमंशम् ।
राशावथो वा विचरे गृहस्थे गृहांशयोर्वा भृगुनन्दनेन्द्वोः ।।
जलाशये वा गृहमागतेंऽशे गृहे स्वनाथाश्रितलक्षिते वा ।
चन्द्रे शुभस्थे च शुभानि विन्द्याद्वास्तुप्रवेशादिनिवेशनानि ।।

– बृ. सं. टी. ९८.१६

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतः सूर्यस्य द्वादशस्थानेषु स्थिते गोचरफलं वर्णयति।

हृद्रोगशोकाध्वविवाहदैन्यक्रोधक्षयव्याधिभयार्त्तिदोषान् ।
स्थाने शशाङ्कस्य रविः करोति व्यर्थश्रमोद्वेगमपि द्वितीये ।।
तृतीयसंस्थो धनमानधर्मस्थानासनप्रीतिसुखप्रदिऽर्कः ।।
चतुर्थगस्तु क्षतजप्रवृत्तिर्ज्वरामयो भेदविवादकारी ।।
नृपावमर्दात्मजबन्धुशोकव्याधिप्रदः पञ्चमसंस्थितोऽर्कः ।
आरोग्यसौख्यारिविनाशहर्षख्यातिक्रियासिद्धिकरश्च षष्टः ।।
जामित्रसंस्थो रुधिरप्रवृत्तिज्वरक्लमाजीर्णविषाध्वकारी।
सूर्योऽष्टमे स्त्रीसुतबन्धुदुःखव्याधिप्रदोपद्रवमृत्युकृत् स्यात् ।।
दैन्यस्थितिभ्रंशगुरुस्वबन्धुप्रद्वेषकृत् स्यान्नवमाश्रितोऽर्कः ।
मेषूरणस्थो द्विचतुष्पदस्त्रिहिरण्यरौप्याम्बरलाभकर्ता ।।
एकादशे स्थानयशःप्रहर्षमिष्टाशनारोग्यसुखप्रदोऽर्कः ।
स्थाने निरुक्तं शशिनो विधिज्ञैः क्रियाफलाघातकृदन्त्यराशौ ।।

–बृ. सं. टी.१०४.७

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतश्चन्द्रस्य द्वादशस्थानेषु स्थिते गोचरफलं वर्णयति।

स्वस्थानगो भोजनगन्धमाल्यनारीसुहृद्वस्त्रप्रदः खलु स्यात् ।
चन्द्रो द्वितीयर्क्षगतस्तु तस्माद् बहुव्ययायासविवादकारी ।।
तृतीयगो वस्त्रहिरण्ययोषित्सुहृद्यशोभोजनदो हिमांशुः ।
स्वबन्धुपीडाधननाशजानि कुर्वीत दुःखानि चतुर्थसंस्थः ।।
धनक्षयाजीर्णरुगध्वदैन्यविक्षोभकृत् पञ्चमगः शशाङ्कः ।
शत्रुक्षयारोग्यसुखार्थसिद्धिं स्निग्धागमप्रीतिकरश्च षष्ठः ।।
जामित्रगः स्त्रीजनबन्धुशय्याहिरण्यभोज्याम्बरदः शशाङ्कः ।
क्षुद्व्याधिचिन्ताकलहार्थनाशो मृत्यक्षयोपद्रवदोऽष्टमस्थः ।।
धनक्षयारिव्ययमानभङ्गरोगादिकारी नवमः शशाङ्कः ।
मेषूरणस्थो बहुमानहर्षचेष्टाफलौदार्यविरोधकारी ।।
एकादशः स्निग्धविवाहशय्यास्त्रीभोजनप्राप्तिसुखार्थकारी ।
निशाकरो द्वादशगस्तु दैन्यमालस्यमीर्ष्यापचयं च कुर्यात् ।।

–बृ. सं. टी. १०४.१०

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतः भौमस्य द्वादश–स्थानेषु स्थिते गोचरफलं वर्णयति।

नृपानलव्यालविशाग्निशस्त्रव्याध्यर्थनाशी क्षयभङ्गकारी।
भौमः शशिस्थानगतो द्वितीये त्वनर्थसूयामिषवञ्चनाकृत्।।
ऐश्वर्यमानद्युतिहर्षकारी तृतीयसंस्थोऽन्नसुवर्णदश्च।
चतुर्थगस्तूदररुग्जरासृक्प्रवृतिर्निर्वेदकरो धराजः।।

सुतार्थनाशक्षतवैरमोषव्याधिप्रदः पञ्चमराशिसंस्थः।
षष्ठे कुजेऽरिक्षयमानहर्षप्रख्यापनारोग्यसमृद्धिकारी।।
जामित्रसंस्थो धनमित्रनाशक्लेशोदराक्ष्यामयरोगकृत् स्यात्।
भौमेऽष्टमे रुग्विषशत्रुशस्त्रक्षतक्षयोपद्रवदैन्यकारी।।
शस्त्रक्षताक्षेमसुवर्णनाशखेदाध्वकारी नवमो महीजः।
मेषूरणे व्याध्यदिशस्त्रचौरव्रणार्तिकृत् सिद्धिकरश्च पश्चात्।।
मानात्मजाज्ञाक्षितिताम्रहेमद्युतिप्रदो रुद्रपदेऽरिजिच्च।
स्त्रीविग्रहोद्वेजनपादरोगस्वजनावभङ्गश्रमदः कुजोऽन्त्ये।।

–बृ.सं.टी.१०४.१८

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतो बुधस्य द्वादशस्थानेषु स्थिते गोचरफलं वर्णयति।

स्थाने शशाङ्कस्य शशाङ्कसूनुः सौभाग्यविद्यामतिमानहर्ता।
द्वितीयसंस्थस्त्वपवादशोकस्वैरक्रियामन्वतिदैन्यकारी।।
तृतीयगो बन्धुविरोधरोधव्यापत्तिकर्ता द्रविणस्य सौम्यः।
चतुर्थगो मानगुणप्रशंसाप्रमोदयोषिदवद्धनलाभकारी।।
नैष्ठान्यमुद्वेगमनर्थचर्यां कुर्याद् बुधः पञ्चमगोऽरतं च ।
षष्ठे विवृद्धिं मनसः प्रहर्षमुत्साहलाभोपचयं करोति।।
जामित्रगश्चान्द्रिरनिष्टमार्गसन्तापदैन्याद्रुचिरोधकारी।
स्यादष्टमस्थो विविधोपकारी बुद्धिप्रसादस्थितिसौख्यकर्ता।।
भङ्गापवादाध्वपरिश्रमान्तारायापकारी नवमर्क्षसंस्थः।
क्रियाप्रसिद्धिं दशमेऽर्थलाभं विस्रब्धमानं च बुधो ददाति।
एकादशे मानचतुष्पदस्त्रीचित्तार्थसौभाग्यविनोदकर्ता।
बुधोऽन्त्यराशौ विचरंश्च कुर्यादुद्वेजनं कार्यपरिश्रमं च।।

–बृ.सं.टी.१०४.२४

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतो बृहस्पतेर्द्वादशस्थानेषु स्थिते गोचरफलं वर्णयति।

मोहार्थनाशस्थितमानभङ्गग्रामाध्वरुग्जातिविरोधवैरान्।
गुरुः शशिस्थानगतः करोति स्थानात्मजाज्ञाधनदो द्वितीये।।
गुरुस्तृतीये स्वजनार्थनाशक्रियाबधाध्वश्रमवञ्चनाकृत्।
विमानसेष्टापचयापवादबन्धुक्षयोद्वेगकारश्चतुर्थे।।
भृत्याम्बरस्थानसुवर्णमानपुत्रप्रदःपञ्चमगोऽरिजिच्च।
षष्ठे गुरुर्बन्धुविवादवैरत्रासप्रचेष्टाफलहानिकारी।।
जामित्रगः स्त्रीवसनान्नपानसौमुख्यसुस्फीतकलाध्वकर्ता।
जीवोऽष्टमस्थो वधभङ्गबन्धव्याधिश्रमानार्थविवादकारी।।
करोति जीवो नवमे सुतस्त्रीभूस्थानमानार्थसमृद्धिमग्र्याम्।
मेषूरणस्थोऽक्षिरुगिष्टहानिश्लेष्मामयायाससुतान्तकारी।।
एकादशेभूभवनात्मजस्त्रीहिरण्यधान्याम्बरवाहनानाम्।
धता गुरुर्द्वादशगोऽथ चन्द्राद्विदेशचर्याश्रमशोककारी।।

–बृ.सं.टी.१०४.३१

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतो शुक्रस्य द्वादशस्थानेषु स्थिते गोचरफलं वर्णयति।

हिरण्यनारीरजतार्थविद्यासुताम्बरस्थानचतुष्पदानाम् ।
लाभं शशिस्थानमुपेत्य शुक्रः कुर्याद् द्वितीये तु वराङ्गनाप्तिम् ।।
मित्रान्नवस्त्रात्मजमानहर्षस्थानाङ्गनारोग्यकरस्तृतीये ।
शुक्रश्चतुर्थे धनपत्निपुत्रमित्रेष्टभाज्याम्बरगन्धदः स्यात् ।।

सुहृत्सुतोद्भूतिगुणप्रवृत्तिख्यातिप्रदः पञ्चमगोऽर्थदश्च ।
षष्ठे भृगुर्दैन्यविवादरोगद्वेषोद्भवान् मानवधांश्च कुर्यात् ।।
जामित्रसंस्थो भृगुजस्तृषाध्वस्त्रीहेतुकोद्वेगकुमित्रदः स्यात् ।
स्त्रीसौख्यविख्यापनमानहर्षप्रियागमाच्छादनदोऽष्टमस्थः ।।
सुहृद्गुरुस्त्रीधनधर्मविद्यायशोगुणाप्तिं नवमर्क्षसंस्थः ।
करोति शुक्रो दशमे सबन्धुसम्प्रीतिचेष्टाफलमानविघ्नान् ।।
एकादशे स्त्रीशयनान्नपानभूषारतिस्वेदगृहार्थकारी ।
भृग्वात्मजो द्वादशगस्तु चन्द्राद् भोग्यप्रदो वस्त्रविनाशकृच्च ।।

–बृ. सं. टी.१०४.३८

ग्रहगोचरफलविवरणे भट्टोत्पलो यवनेश्वरस्य मतेन चन्द्रतः शनैश्चरस्य द्वादशस्थानेषु स्थिते गोचरफलं वर्णयति।

बन्धाध्वशस्त्रानिलरुग्विषार्तिं विडम्बनस्त्रीसुतवित्तनाशम्।
स्थाने विधत्ते शशिनोऽर्कपुत्रस्ततो व्ययायासकरो द्वितीये।।
तृतीयगोऽरिक्षयमानहर्षसौभाग्यबह्वागमदोऽर्कसूनुः।
चतुर्थगो बन्धुवधावमानच्छायाविधाताध्वभयार्तिकारी।।
स्थितिक्रियारम्भसुतार्थनाशस्वबन्धुविद्वेषविवादकारी।
शनैश्चरः पञ्चमगोऽथ षष्ठे शत्रुक्षयामोदसुतार्थदाता।।
छायाविधातश्रमगुह्यरोगस्त्रीमित्रनाशाध्वकृदर्कसूनुः।
जामित्रसंस्थोऽष्टमगोऽथ शोकक्षुद्बन्धुभृत्यव्यसनार्तिकारी।।
व्याध्यध्ववैरश्रमवित्तनाशक्षुत्क्लेशदः स्यान्नवमर्क्षसंस्थः।
ऐश्वर्यचेष्टाफलसञ्चयघ्नो मेषूरणे व्याध्यपकीर्त्तिकृच्च।।
यशःपरस्त्रीधनभृत्यलाभक्रियासमृद्धिस्थितिमानदस्तु।
एकादशे द्वादशगस्तु चेष्टानैपुण्यकीर्तिद्युतिमानहर्ता।।

–बृ.सं. टी.१०४.४५

यवनेश्वरमतेन शत्रुक्षेत्रस्था नीचगृहस्था: सूर्यप्रविष्टा निर्बलग्रहा: शुभफलं न प्रददति। अनिष्टफलं वर्धयन्ति ।

द्विड्वेश्मगा नीचगृहस्थिता वा दुर्मार्गगा: सूर्यमनुप्रविष्टा:।

उक्तानि निघ्नन्ति शुभानि चैते फलान्यनिष्टान्यभिवर्धयन्ति।।

–बृ.सं. टी. १०४.५३

रविदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

नृपप्रतिष्ठायुधयुद्धयोधहेमाग्निगोमूत्रभिषक्प्रयोगान् ।

रवेर्दिने वन्यमृगार्दनादि प्रशस्यते द्विड्भयकृच्च कर्म।।

– बृ.सं. टी.१०४.६०

चन्द्रदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

स्त्रीसङ्गमालङ्करणाम्बरस्त्रगतिक्रियाहर्षसुखाश्रयांश्च।

कुर्वीत चन्द्रस्य दिने प्रदानयज्ञोत्सवान् रत्नरसार्जनं च।

– बृ.सं.टी.१०४.६०

भौमदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

वधावरोधावृतडिम्बभेदा: स्तेयादिशस्त्रादिविषप्रयोगा:।

दिने कुजस्य ध्वजिनीनिवेशा: कार्या: सुवर्णाजपशुक्रियाश्च।।

– बृ.सं.टी.१०४.६०

बुधदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

स्वाध्यायसेवालिपिलेख्यशिल्पव्यायाममनैपुण्यकलाविशेषा:।

इष्टिक्रिया: काञ्चनधातुयुक्तिवाग्युक्तिसन्धिप्रभुता बुधेऽह्नि।।

– बृ.सं.टी.१०४.६०

बृहस्पतिदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

दिने गुरोर्धार्मिकपौष्टिकेज्याबाध्याभिधेयक्रतुमुण्डनादि ।

क्रियाश्रिता धर्मसुवर्णवस्त्रदेहाश्रयाश्वाश्वरथाश्रयाश्च।।

– बृ.सं. टी.१०४.६२

शुक्रदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

गान्धर्वविद्यामणिरत्नगन्धगोभूमिशय्याम्बरभूषणानाम्।

स्त्रीपण्यकोशोत्सवनन्दनानां क्रियाविधिः शुक्रदिने प्रशस्तः।।

– बृ.सं.टी.१४.६

शनैश्चरदिने किं कर्तव्यं तस्य विषये यवनेश्वरमतं भट्टोत्पलो दर्शयति।

विषाश्मशस्त्रत्रपुसीसलोहप्राकारबन्धावृतमारणानि ।

सर्वं च पापात्मकमर्कजाह्नि कार्पासवप्रव्रजितानि चेष्टम् ।

–बृ.सं. टी.१०४.६३

**४ बृहज्जातकस्य भट्टोत्पलटीकायां यवनः–**

भट्टोत्पलः स्वटीकायां यवनेश्वरमतानुसारेण शुभाशुभदशाफलं ज्ञात्वा चाशुभफलनिवारणार्थं शान्त्यादिभिरुपशमं प्रदर्शयति।

यद्यद्विधानं नियतं प्रजानां ग्रहर्क्षयोगप्रभवं प्रसूतौ ।

भाग्यानि तानीत्यभिशब्दयन्ति वार्तानियोगेति दशा नराणाम्।।

तदप्यभिक्षैर्द्विविधं निरुक्तं स्थिराख्यमौत्पातिकसंज्ञितं च।

कालक्रमाज्जातकनिश्चितं यत्क्रमोपसर्पि स्थिरमुच्यते तत्।

सप्तग्रहाणां प्रथितानि यानि स्थानानि जन्मप्रभावानि सद्भिः।

तेभ्यः फलं चारग्रहक्रमस्था दद्युर्यदोत्पादकसंक्षितं तत्।

–बृ.जा.टी १.३

भट्टोत्पलो यवनेश्वरमतेन नक्षत्राणां राशिषु विभाजनं प्रतिपादयति।

द्वे द्वे सपादे  भवनं गते ।

–बृ.जा.टी १.४

मत्स्यौ घटी नृमिथुनं सगदं सवीणंचापी नरोऽश्वजघनो मकरो मृगास्यः ।
तौली ससस्यदहना प्लवगा च कन्याशेषा स्वनाम सदृशा खचराश्च सर्वे ।।

–बृ.जा. १.५

बृहज्जातकस्युपर्युक्तस्य श्लोकस्य भट्टोत्पलव्याख्यायामुद्धृता द्वादश–श्लोकास्तेनैव रूपेण मीनराजजातके ( अ. १श्लोकाः ४–१५) दृश्यन्ते। एतेषु श्लोकेषु द्वादशराशीणां स्वरूपं यवनेश्वरमतानुसारेण प्रस्तूयते। ते श्लोकाः यथा–

आद्यः स्मृतो मेषसमानमूर्तिः कालस्य मूर्द्धा गदितः पुराणैः ।
सोऽजाविका सञ्चरकन्दराद्रिस्तेनग्निधात्वाकररत्नभूमिः ।।१।।
वृषाकृतिस्तु प्रथितो द्वितीयः स वक्त्रकण्ठायतनं विधातुः ।
वनाद्रिसानुद्विपगोकुलानां कृषीवलानामधिवासभूमिः ।।२।।
वीणागदाभृन्मिथुनं तृतीयः प्रजापतेः स्कन्धभुजासदेशे ।
प्रनर्तको गायनशिल्पस्त्रीक्रीडारतिर्द्यूतविहारभूमिः ।। ३ ।।
कर्की कलिराकृतरम्बुसंस्थो वक्षःप्रदेशे विहितश्च धातुः ।
केदारवापीपुलिनानि तस्य देवाङ्गनारम्यविहारभूमिः ।। ४ ।।
सिंहश्च शैले हृदयप्रदेशे प्रजापतेः पञ्चममाहुराद्याः ।
तस्याटवीदुर्गगुहावनाद्रिव्याधावनीदुर्गवनप्रदेशाः ।। ५।।
प्रदीपिकां गृह्य करेण कन्या नौस्था जले षष्ठमिति ब्रुवन्ति ।
कालार्थधीरं जठरं विधातुः सशाड्वला स्त्री रतिशिल्पभूमिः।। ६।।

वीथ्यां तुला पण्यधरो मनुष्यः स्थितः स नाभीकटिबस्तिदेशेः ।

शुक्लार्थवीत्यापणपट्टनाध्वसार्थाधिवासोन्नतसस्यभूमिः ।। ७ ।।

श्वभ्रोऽष्टमो वृश्चिकविग्रहस्तु प्रोक्तः प्रभोर्मेढ्रगुदप्रदेशे ।

गुहाविलश्वभ्रविषाश्मगुप्तिर्वल्मीककीटाजगराहिभूमिः ।। ८ ।।

धन्वी मनुष्यो हयपश्चिमार्धस्तमाहुरुरूभुवनप्रणेतुः ।

समस्थितव्यस्तसमस्तवाजिसुरास्त्रभृद्यज्ञरथाश्वभूमिः ।। ९ ।।

मृगार्द्धपूर्वो मकरोऽम्बुगार्धो जानुप्रदेशे तनुशन्ति धातुः ।

नदीवनारण्यसरोद्र्यमूपश्वभ्राधिवासो दशमः प्रदिष्टः ।। १० ।।

स्कन्धे तु रिक्तः पुरुषस्य कुम्भो जङ्घे तमेकादशमाहुरार्याः ।

शुष्कोदकाधारकुशस्य पक्षी स्त्रीशौण्डिको द्यूतनिवासभूमिः ।।११।।

जले तु मीनद्वयमन्त्यराशिः कालस्य वादौ विहितौ वरिष्ठौ ।

स पुण्यदेवद्विजतीर्थभूमिर्नदीसमुद्राम्बुचयाधिवासः ।। १२ ।।

– बृ.जा.टी १.५(१–१२)

बृ.जा. (१.१२ ) टीकायामुत्पलो यवनेश्वरस्य श्लोकैकं निर्दिशति, य श्लोकः स्फुजिध्वजस्य यवनजातकग्रन्थे प्राप्यते।[७९] स्फुजिध्वजस्य यवनजातकग्रन्थे द्वादशराशीणां चतुर्दशहोराविषये सविस्तरं काव्यमयं वर्णनमष्टचत्वारिंशत्–श्लोकेषु वर्तते। तत्रान्ते वर्ण्यते– एतास्तु होरा यवनार्निरुक्ताश्चित्तासमुद्भूतिगुणाश्रयार्थाः। अत्र द्रष्टव्यं बृहज्जातकस्य यवनजातकस्य च श्लोकपादः समानः। यथा– द्रेष्काणसंज्ञामपि वर्णयन्ति स्वद्वादशैकादशराशिपानाम्–बृ.जा.१.१२, स्वद्वादशैकादशरा–शिपानां द्रेष्क्राणसंज्ञाः क्रमशस्त्रयोऽत्र–इति यवनः।

---

[७९] Kane , Vol. V, part I – पृ. ५८०,संदर्भः ८६५

केचित्तु होरां प्रथमां भपस्य (बृ.जा.१.१२)–इत्यस्य व्याख्यायां भट्टोत्पलः केचिदित्यस्य विषये यवनस्य मतं समुद्धरति। तद्यथा–

आद्या तु होरा भवनस्य पत्युरेकादशक्षेत्रपतेर्द्वितीया।

स्वद्वादशैकादशराशिपानां द्रेष्काणसंज्ञाः क्रमशस्त्रयोऽत्र।

– बृ.जा.टी. १.१२

राशितृतीयभागा द्रेष्काणसंज्ञा इति व्याख्या यवनानां वर्तते।[८०]एवमेव नैकेषु स्थानेषु स्वटीकायां विविधविषयचर्चायां यवनानां मतानि श्लोकरूपेण वारं वारं समुद्धरति। ते श्लोका यथा–

स्वोच्चेषु सर्वान्परिगृह्य भागांस्तिष्ठत्सु सर्वेषु बलाधिकेषु।

लग्ने शुभे पूर्णवपुष्मतान्दौ त्रैलोक्यराज्याधिपतिः प्रसूते।।

– बृ.जा.टी. १.१३

सूर्यस्य भागे दशमे तृतीये चन्द्रस्य जीवस्य तु पञ्चमेंऽशे।

सौरस्य विंशे त्वधिसप्तके तु विद्याद्भृगोः पञ्चदशे बुधस्य ।

भौमस्य विंशेऽष्टयुते परोच्चं विंशल्लवे सूर्यसुतस्य तूच्चम्।।

–बृ.जा.टी. १.१३

स्वोच्चात्तु जामित्रमुशन्ति नीचं त्रिंशल्लवो यच्च समानसंख्या।।

–बृ.जा.टी. १.१३

बृ.जा. (१.१३ ) टीकायामुत्पलो यवनेश्वरस्य श्लोकान् निर्दिशति, ये श्लोकाः कैश्चित् परिवर्तनैः साकं स्फुजिध्वजस्य यवनजातकग्रन्थे प्राप्यन्ते।[८१]

बृ.जा.१.१४ व्याख्यायामपि श्लोकैक उत्पलेनोद्धृतो यस्मिन् वर्गोत्तम–विषये यवनेश्वरमतं वर्णितं–तद् यथा–

---

[८०] उपर्युक्तम् – पृ. ५८३,संदर्भः ८६९अ

[८१] उपर्युक्तम् – पृ. ५७७,संदर्भः ८६२

स्वे स्वे गृहेषु स्वगृहांशका ये वर्गोत्तमास्ते यवनैर्निरुक्ताः।

–बृ.जा.टी. १.१४

श्लोकोऽयं स्फुजिध्वजस्य यवनजातकग्रन्थे प्राप्यते।[८२]

षष्ठं द्वितीयं दशमं च राशिमेकादशं चोपचयर्क्षमाहुः।

होरागृहस्थानशशाङ्कभेभ्यः शेषाणि चैभ्योऽपचयात्मकानि।

– बृ.जा.टी १.१५

व्याख्यायामपि लोकद्वयमुत्पलेनोद्धृतं यस्मिन् यवनेश्वरस्य मतं ग्रहाणां मित्रामित्रताविषयकं प्रस्तूयते । श्लोकौ यवनजातके प्राप्यन्ते–इति म.म. काणे महोदया लिखन्ति।[८३]

आद्यन्तराशेरुदयप्रमाणं द्वौ द्वौ मुहूर्तौ नियतं प्रदिष्टौ ।

क्रमोत्क्रमाभ्यामधिपञ्चमं स्याच्च क्रार्द्धयोविद्धयुदयप्रमाणं ।।

– बृ.जा.टी १.१९

सत्त्वाधिका भास्करभौमजीवा भृग्वात्मजो राजसिकः शशि च ।

शनैश्चरस्तामसिको बुधस्तु संयोगताऽस्माल्लभते विशेषान्।।

देवा ग्रहाणां जलवह्निविष्णुप्रजापतिस्कन्दमहेन्द्रदेवो।

चन्द्रार्कचान्द्र्यर्कजभौमजीवशुक्रांश्च यज्ञेषु यजेत शश्वत्।।

– बृ.जा.टी. २.५

मासे तु शुक्लप्रतिपत्प्रवृत्तेराद्ये शशी मध्यबलो दशाहे ।

श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान्सदैव ।।

– बृ.जा.टी. २.५

[८२] उपर्युक्तम् – पृ. ५८४,संदर्भः ८७०

[८३] उपर्युक्तम् – पृ. ५८६,संदर्भः ८७१

क्रूरग्रहोऽर्कः कुजसूर्यजौ च पापौ शुभाः शुक्रशशाङ्कजीवाः।

सौम्यस्तु सौम्यो व्यतिमिश्रितोऽन्यैर्वर्गैस्तु तुल्यप्रकृतित्वमेति।।

– बृ.जा.टी. २.५

म.म. काणे महोदया लिखन्ति यत् – बृ.जा. २.५ श्लोकस्योपरि भट्टोत्पलः स्वव्याख्यायां यवनेश्वरस्य श्लोकद्वयमुद्धरति। यवनेश्वरमतेन चन्द्रः कदाप्यशुभो न भवति। एतौ श्लोकौ नेपालप्रासादस्थहस्त–लिखितसंग्रहे विद्यमाने स्फुजिध्वजलिखिते यवनजातके प्राप्येते।[८४]

पूर्वापरभागगतैः शुभाशुभैरलिनि कर्कटे लग्ने ।

जातस्य शिशोर्मरणं सद्यः कथयन्ति यवनेन्द्राः।।

–बृ.जा.टी २.७

द्वौ पश्चिमौ षष्ठमथ द्वितीयं संस्थानराशेः परिहृत्य राशिम्।

शेषान्ग्रहः पश्यति सर्वकालमिष्टेषु चैषां विहिता दृगिष्टा।।

– बृ.जा.टी २.१३

रवेर्गुरुर्मित्रमतोऽथान्ये गुरोस्तु भौमं परिहृत्य सर्वे।

चान्द्रेरनर्का भृगुनन्दनस्य त्वर्केन्दुवर्जं सुहृदः प्रदिष्टाः।।

भौमस्य शुक्रः शशिजश्च मित्रे इन्दोर्बुधं देवगुरुं च विद्यात्।

सौरस्य मित्राण्यकुजेन्दुसूर्याः शेषान्रिपून्विद्धि नृणां च तद्वत्।।

– बृ.जा.टी. २.१५

मूलत्रिकोणाद्धनधर्मबन्धुपुत्रव्ययस्थानगता ग्रहेन्द्राः।

तत्कालमेते सुहृदो भवन्ति स्वोच्चे च यो यस्य विकृष्टवीर्यः।।

–बृ.जा.टी २.१८

---

[84] Kane, Vol. V, part I, p. 573

मासे तु शुक्ले प्रतिपत्प्रवृत्तेः पूर्वे शशी मध्यबलो दशाहे ।

श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान्सदैव ।

– बृ.जा.टी. २.२१

बृ.जा. २.२१ टीकायामुत्पलोद्धृतयवनेश्वरस्य श्लोकः[८५] स्फुजिध्वजस्य यवनजातकग्रन्थे प्राप्यते।

जारजातविषये यवनेश्वरमतं भट्टोत्पलः प्रस्तौति।

आजीवभागेऽप्यनवीक्षिते वा जीवेन चन्द्रेऽथ विलग्नभे वा ।

जातं परोद्भूतमिति ब्रुवन्ति वाच्यो जनेनाथ बलावलोकात्।।

– बृ.जा.टी ५.६

यवनेश्वरमतेन तमिस्रे जातो निम्नलिखितयोगे भवति।

सौरांशकस्थे शशिनि प्रलग्ने जले जलाख्यांशकमाश्रिते।

स्वांशस्थिते केन्द्रगतेऽर्कजे वा जातस्तमिस्रे यदि नार्कदृष्टः।

– बृ.जा.टी ५.१७

सूतिकागृहविषये यवनेश्वरमतं यथा–

संवर्धता चन्द्रमसोपलिप्तम्।।

– बृ.जा.टी ५.१९

लग्नात् शशिनोऽष्टमस्थे षष्ठे वा शुभाशुभग्रहैर्वीक्षिते आयुःफलमाह यवनेश्वरः।

लग्नाच्छसिनैधनङ्गेऽशुभर्क्षे षष्ठोऽथवा पापनिरीक्षितश्च।

सर्वायुराहन्ति शुभैर्विमिश्रैस्तदीक्षितोऽब्दाष्टकमर्धकं वा ।।

–बृ.जा.६.६

[८५] उपर्युक्तम् – पृ. ५८८,संदर्भः ८७३

परमोच्चगताः षडग्रहाः परमोच्चफलं ददतीति यवनेश्वरमतम्।

षड्राजराजर्द्धिबलोपकर्षप्रदानमानेष्वभिजातशक्तिः।

– बृ.जा.टी ७.८

मृत्युयोगविषये यवनमतमाह भट्टोत्पलः।

षष्ठाष्टमस्थोऽशुभदस्त्वरौद्रः पापैः सुहृत्स्थानगतश्च दृष्टः।

स्वान्तर्दशायां प्रकरोति मृत्युं पाशाध्वबन्धादिपरिक्षयाद्वा।।

– बृ.जा.टी ७.८

यवनेश्वरमतेन चन्द्रलग्नयोर्होराविषये जातके वा तुल्यत्वं ज्ञेयम्।

मूर्तिञ्च होरां शशिनं च विद्यात्।।

– बृ.जा.टी ७.८

यवनेश्वरमतेन यस्मिन् राशौ ग्रहो वर्तते, तस्य नवांशकानुसारेण आयुर्भवति।

आयूंषि राश्यंशकराशियोगात्।।

– बृ.जा.टी ७.९

निसर्गदशानुसारं फलं यवनेश्वरमतेन भट्टोत्पलो वर्णयति।

स्तन्योपभोगः शशिनो वयः स्वं भौमस्य विद्याद्दशनानुजन्म।

बौधं तु शिक्षाप्रदकालमाहुरामैथुनेच्छाकुलितप्रवृत्ति।।

शौक्रं युवत्वं विधिपूर्वदृष्टमामध्यमाद्देवगुरोर्वदन्ति।

रवेर्वयोऽर्द्धात्परमन्यदस्मात्सौरेर्जरा दुर्भगकालमाहुः।।

– बृ.जा.टी.८.९

श्रेष्ठा दशा स्वे वयसि ग्रहस्य ।।

– बृ.जा.टी ८.९

भट्टोत्पलः स्वटीकायामष्टवर्गविषये यवनेश्वरस्य विविधमतान्याह।

फलाष्टवर्गे शुभपापलक्षे समानकल्पावफलौ प्रदिष्टौ ।

ज्यायांस्तु यस्तस्य फलं विचार्य यात्राविधाने च समुद्भवे च ।।

– बृ.जा.टी ९.८

स्वनीचारिगृहोपगोऽन्यर्जितोऽरिदृष्टोऽल्पतनुर्विवर्णः।

सुतावभुज्जन्मपतौ बलस्थे स जन्मगो वन्ध्यफलो निरुक्तः।।

ईषत्सुहृत्स्वोच्चभृदिष्टो मित्रर्क्षजन्मोपचये बलीयान्।

यो जातकोऽभूत्स तु जन्मसंस्थो दद्याच्छुभं नत्वशुभोऽप्यनिष्टम्।।

– बृ.जा.टी ९.८

स्ववर्गसंस्था बलिनो विशेषाद्ग्रहा यथोद्दिष्टफलप्रदाः स्युः।

नीचे जिताश्चारिगृहेऽल्पवीर्यास्ते घ्नन्त्यनिष्टेष्टफलप्रवृत्तिम्।।

– बृ.जा.टी ९.८

अर्काद् विविधस्थानस्थिते चन्द्रे यवनेश्वरमतेन फलान्याह भट्टोत्पलः।

मूर्खान्दरिद्रांश्चपलान् विशीलांश्चन्द्रः प्रसूतेऽर्कचतुष्टयस्थः।।

– बृ.जा.टी १३.१

कुर्याद्द्वितीये धनिनां प्रसूतिमापोक्लिमस्थे कुलजाग्रजानाम्।।

– बृ.जा.टी १३.१

स्वांशे शशी भार्गवदृष्टमूर्तिर्निशीश्वरोत्पत्तिकरः प्रदिष्टः।

तदुत्तमोद्भूतिकरः स तु स्याद्दृष्टो दिवा देवपुरोहितेन।।

– बृ.जा.टी १३.१

लग्नेशः केन्द्रे बलवान् गुरुर्वा तदा वयःकालफलप्रदः – यौवने सुखप्रदः– भवतीति यवनेश्वरमतं भट्टोत्पल उद्धरति।

जन्माधिपो लग्नपतिश्च येषां चतुष्टये स्याद्बलवान् गुरुर्वा।

चतुर्षु होरादिषु सङ्गतः स्याच्चतुर्वयःकालफलप्रदः स्यात्।।

–बृ.जा.टी २२.५

मीनांशके मेषांशके मकरांशके वा चन्द्र इष्टेक्षितः कण्डूविकारिणं पापेक्षितः कुष्ठविकारिणं च करोतीति यवनेश्वरमतं भट्टोत्पलः प्रस्तौति।

मीनांशके मेषमृगांशके वा चन्द्रस्थितोऽत्रैव हि पापदृष्टः ।

किलासकुष्ठादिविनष्टदेहमिष्टेक्षितः कण्डूविकरिणं च ।।

–बृ.जा.टी. २३.९

नष्टजातकाध्याये गुरुविषयकं श्लोकमेकं यवनेश्वरस्य भट्टोत्पलः प्रस्तौति।

द्रेष्काणलग्नक्रमतस्तु राशौ गुरुर्विलग्नादित्रिकोणगोऽभूत्।

समुद्गते तद्भवनक्रमेण स्वाचारभादब्दगतिं प्रगण्यात्।।

–बृ.जा.टी २६.२

**राजमार्तण्डे यवनः–**

पां.वा. काणेमहोदया निर्दिशन्ति यत् –राजमार्तण्डग्रन्थे चौलकर्ममुहूर्त–विषये विवेचनं वर्तते। तत्र यवनानां विचारो निर्दिष्टो यत् चौलकर्म उत्तरायणे शुभप्रदं वर्तते। उत्तरवर्त्मनि सवितुश्चूडाकरणं जगुः शुभं यवनाः। राजमार्तण्डः। यवनैरपि वैदिकसंस्कारविषये विचारः कृत इत्येनन ज्ञायते।[८६]

[८६] उपर्युक्तम् – पृ. ६०६ तथा संदर्भः ९११

**सारावल्यां यवनः-**

सारावल्यां कल्याणवर्मणा नैकवारं यवनमतान्युद्धृतानि। तानि यथा-

भवनाधिपदिङ्नाम प्लव इति यवनैः प्रयत्नतः कथितः ।
तत्प्लवगो विनिहन्यादचिरेण महीपतिः शत्रून् ।।

-सारावली ३.३९

यवनमतानुसारेण या दिग्राशिस्वामिनो वर्तते, सा प्लव इति कथ्यते। सारावल्यामपि चन्द्रबलस्य यवनमतस्य निर्देशः सूच्यते निम्नश्लोके-

शुक्लप्रतिपद्दशके मध्यबलः कीर्त्यते यवनवृद्धैः।
श्रेष्ठो द्वितीयदशके स्वल्पबलश्चन्द्रमास्तृतीये च ।।

-सारावली ५.१६

शुक्लप्रतिपदमारभ्य दशमीपर्यन्तं चन्द्रो यवनदृष्ट्या मध्यबली वर्तते।

दिवसे मातापितरौ शुक्ररवी शशिशनी निशायां च ।
मातृभगिनीपितृव्यौ विपर्ययात् कीर्तितौ यवनैः ।।

-सारावली ८.२७

यवनमतेन यदि दिवसे गर्भाधानं तदा शुक्रसूर्यौ मातापितरौ तथा रात्रौ चन्द्रशनी मातापितरौ भवतः। एवमेव रात्रौ शुक्रसूर्यौ मातृभगिनी-पितृव्यौ तथा दिवसे चन्द्रशनी मातृभगिनीपितृव्यौ भवतः।

वृश्चिककुलीरलग्ने सौरे चन्द्रेक्षिते त्ववटे ।
भवति प्रसवः स्त्रीणां वदन्ति यवनाः सह मणित्थैः ।।

-सारावली ९.८

मणित्थस्य यवनस्य च मतं यद् वृश्चिके कर्के च लग्ने शनिना चन्द्रेण च दृष्टे सति स्त्रीणां प्रसवस्त्ववटे भवति।

तीव्रफलराजयोगा यवनाद्यैर्ये विनिर्मितास्तेषु ।
जायन्ते खलु कुलजा रिष्टं तेषु प्रसूतानाम् ।।

– सारावली १०.११

यवनमतेन यवनादिभिरुत्कृष्टफला राजयोगाः कथिताः, किन्तु तेषु प्रसूतानामरिष्टमपि भवति।

यवनाचार्यैर्वृद्धैर्द्विग्रहयोगेषु यत्फलं प्रोक्तम् ।
तदहमपहाय मत्सरमधुना वक्ष्ये विशेषेण ।।

–सारावली १५.१

कल्याणवर्मणा द्विग्रहयोगाणां फलं यवनाचार्यमतानुसारेण प्रतिपादितम्।

यवनाद्यैर्विस्तरतः कथिता योगास्तु नाभसा नाम्ना ।
अष्टादशशतगुणितास्तेषां द्वात्रिंशदिह वक्ष्ये ।।

– सारावली २१.१

यवनैः १८०० प्रकारका नाभसयोगाः कथिताः। कल्याणवर्मा तेषां केवलं ३२ प्रकाराणां वर्णनं करोति।

यवनेन्द्रदर्शनाद्यैः कथितं तदिहात्र सर्वमेव मया ।
किन्तु स्फुटं न सर्वं स्पष्टं सारस्वतं चिन्त्यम् ।।

–सारावली ५१.१६

नष्टजातकविषये यवनाद्यैर्यत् कथितं तस्य संग्रहः कल्याणवर्मणा कृतः।

**अद्भुतसागरः-**

बल्लालसेनविरचितोऽयं ग्रन्थः ११६८ ख्रिस्ताब्दस्य प्राचीनो वर्तते। तस्मिन् ग्रन्थे विविधावर्तेषु यवनाचार्यस्योद्धरणानि संप्राप्यन्ते। एतेषां संग्रहो मया कृतः। समग्रतया ४० संख्याका एते श्लोका विविधान् विषयान् प्रतिपादयन्ति। तत्र यवनेश्वरमतेन रव्यादिग्रहाणां स्वामिकानि स्पष्टयता प्रतिपादितानि। प्रत्येकग्रहस्य वर्षफलमपि प्रतिपादितम्। तथा च विविध-द्रव्याणां मेषादिद्वादशराशीणां स्वामित्वमपि निरूपितं यवनेश्वरस्य मतानु-सारेण। तद्विवेचनं यथा-

**१. रविस्वामिकान्याह यवनेश्वरः**

नृपाटवीशैलसुवर्णताम्रसिंहानलव्यालविषौर्णिकानाम्।
हिंसोग्रवाग्द्रव्यवदुष्णरूक्षद्रव्याकराणां प्रभुरुच्यतेऽर्कः।।

-अ.सा. पृ.१९

**२. चन्द्रस्वामिकान्याह यवनेश्वरः-**

स्त्रीचित्तनिद्रारतिभक्ष्यपेयःशीतद्रवस्वादुरसौषधीनाम्।
स्रग्वस्त्रभूषामणिमौक्तिकानां प्रभुः शशाङ्को लवणाम्बुजानाम्।।

- अ.सा. पृ. ५२

**३. मङ्गलस्वामिकान्याह यवनेश्वरः-**

चमूनृपस्तेन हुताशवृत्तिविषाग्निशस्त्रक्षतजक्षितीनाम्।
प्रवालधात्वाकरपुष्पजातिचामीकराणां क्षितिसूनुरीशः।।

- अ.सा. पृ. १६२

**४. बुधस्वामिकान्याह यवनेश्वरः-**

नानागुणद्रव्यविकल्पयुक्तिनैपुण्यशिल्पश्रुतिवेसराणाम्।
माहात्म्यमन्त्रार्थविदाब्दिकानां प्रभुर्बुधश्चैत्यवनस्पतीनाम्।।

- अ.सा. पृ. १७५

**५. बृहस्पतिस्वामिकान्याह यवनेश्वरः-**

माङ्गल्यधर्मद्विजवेदयज्ञधान्याकरस्थानगुणात्मजानाम्।

सुवर्णयानासनपौष्टिकानां प्रभुर्गुरुर्मन्त्रिमहत्तराणाम्।।

– अ.सा. पृ. १८७

**६. भार्गवस्वामिकान्याह-**

वज्रादिरत्नाकरगोसुतस्त्रीविवादगन्धाम्बरभूषणानाम्।

सौभाग्यसौख्यश्रुतिसञ्चयानां प्रभुर्निधीनां धनिनां च शुक्रः।।

– अ.सा. पृ. २१४

**७. शनैश्चरस्वामिकान्याह यवनेश्वरः-**

आनर्त्तवाहाहतवृद्धनीचपुंस्त्वोनसत्त्वालसदीक्षितानाम्।

विद्धान्नदासाञ्जनसीसलौहकाष्ठायसानां प्रभुरर्कसूनुः।।

– अ.सा. पृ. २३६

**८. रविवर्षफलं - यवनेश्वरः-**

दिवाकराब्दे रणविग्रहोग्रपृथ्वीश्वरस्तीव्रविषज्वराग्निः।

अवर्षशुष्कक्षयशस्यसङ्घः प्रचण्डवह्न्युग्रशिरोऽक्षिरोगाः।।

– अ.सा. पृ. ३७६

**९ चन्द्रवर्षफलं - यवनेश्वरः-**

सम्पन्नशस्याक्षुपशस्यशालिप्ररूढगुल्मो बहुवर्षवारिः।

रसौषधिस्नेहपटुप्रसेकश्चान्द्रो रतिस्त्रीबलवर्धनोऽब्दः।।

– अ.सा. पृ. ३७७

**१० भौमवर्षफलं - यवनेश्वरः-**

रणप्रचण्डः क्षितरल्पशस्या विशुष्कवारिद्रुमशस्यवीरुत्।

अङ्गारकाब्दः प्रचुरोरगाग्निरातङ्कचौर्यक्षुदवृष्टिदृष्टः।।

- अ.सा. पृ. ३७८

**११ बुधवर्षफलं - यवनेश्वरः-**

सन्धानदानप्रयतः क्षितीशः स्वाध्यायतीर्थानुरतिर्द्विजौघः।

निराधिरुत्पादितशस्यवर्षो बौधः सुहृत्स्नेहविवर्धनोऽब्दः।।

- अ.सा. पृ. ३७९

**१२ बृहस्पतिवर्षफलं - यवनेश्वरः-**

सुवर्षयज्ञोत्सवसम्प्रदानो नीरुग्व्यथो धर्मपरोऽवनीशः।

स्फीतानुपानैर्बहुशस्यकर्ता गुरोश्च धर्मप्रयतप्रजोऽब्दः।।

- अ.सा. पृ. ३८१

**१३ शुक्रवर्षफलं - यवनेश्वरः-**

पर्याप्तशस्यस्फुटकृष्णमेघाः प्ररूढवल्लीनवशस्यपुष्पाः।

कामः प्रकामः क्षितिपैरथाढ्यः शौक्रोऽङ्गनाहर्षवसुप्रदोऽब्दः।।

- अ.सा. पृ. ३८२

**१४ शनैश्चरवर्षफलं - यवनेश्वरः-**

दुष्टाल्पवर्षः प्रबलानिलोऽपि विपन्नशस्यश्चलितक्षितीशः।

मृत्युक्षुधातङ्कभयोपसृष्टः शनैश्चराब्दः पशुशूद्रगोघ्नः।।

- अ.सा. पृ. ३८३

**१५ वर्षाधिपफलं यवनेश्वरः-**

अब्दाश्रयं लक्षणमीरितं यद्ग्रहस्वभावप्रभवं जनानाम्।

तदेव तन्मासदिनर्त्तुयुक्तं तदीश्वरस्थानविकल्पितं च।।

- अ.सा. पृ. ३८४

**१६ निम्नद्रव्याणां स्वामी मेषः- यवनेश्वरः**

भूमेः कृषेः शस्यसुवर्णताम्रधात्वग्निजन्याहवसम्भ्रमाणाम्।

गजाश्वबालव्यजनातपत्रशक्तिध्वजस्तेनचमूपतीनाम्।।

- अ.सा. पृ. ४५२

आजाविकातीक्ष्णकरद्रुमादित्वक्पत्रदग्धप्रहतक्षतानाम्।

मनःशिलागैरिकरक्तयुक्तिद्रव्याधिकारो विहितोऽजराशिः।।

- अ.सा. पृ. ४५२

**१७ निम्नद्रव्याणां स्वामी वृषः- यवनेश्वरः**

क्रीडाविहारस्त्रगपत्यनारीविद्यारतोद्यानसभाप्रपानाम्।

सर्पिर्दधिक्षीररसस्य पुष्पमन्थानगोलाङ्गुलकर्षकाणाम्।।

- अ.सा. पृ. ४५३

युगाक्षशय्याशकटाक्षचक्रगन्धक्षताम्भोमहिषर्षभाणाम्।

सौभाग्यरत्नाम्बरदण्डकानां प्रभुर्वृषः कोषगृहाश्रमाणाम्।।

- अ.सा. पृ. ४५३

**१८ निम्नद्रव्याणां स्वामी मिथुनः- यवनेश्वरः**

पुंस्त्रीरतिद्यूतविहारशिल्पगन्धर्वगीतस्मितवादितानि।

व्यायामचित्रायुधलेख्यपांशुसंवादसम्मन्त्रितपुस्तकानि।।

- अ.सा. पृ. ४५३

द्वन्द्वार्थयोगो मिथुनौषधादिज्ञानोपदेशव्यवहाराधीराः।

नैपुण्यवैकारिकदम्भजीवा राशेस्तृतीयस्य नटाः सधूर्ताः।।

–अ.सा. पृ. ४५३

**१९ निम्नद्रव्याणां स्वामी कर्कः – यवनेश्वरः**

नारीतरस्विश्रुतवृद्धिविप्राः सरांसि वाप्यः कुमुदोत्पलानि।

द्रव्यानि शीतानि मृदुद्रवाणि स्वादूनि सञ्जीवनहर्षणानि ।

– अ.सा. पृ. ४५४

नक्राः समण्डूककुलीरकूर्माः शाकानि पुष्पाणि च वारिजानि ।

फेनाः सकुन्ताः जलजीविनश्च राशेश्चतुर्थस्य परिग्रहाः स्युः।।

– अ.सा. पृ. ४५४

**२० निम्नद्रव्याणां स्वामी सिंहः– यवनेश्वरः**

शैलाटवीशृङ्गविषास्थिकाष्ठत्वङ्मांसरोमाजिनतान्तवानाम्।

आरण्यजानां नखदन्तिशृङ्गिकुरङ्गरूक्षोक्षुरसौषधीनाम्।।

– अ.सा. पृ. ४५५

व्याधेष्टकृद्विप्रनृमुख्यभूभृन्मूर्च्छाग्निशस्त्रौर्णिककाञ्चनानाम्।

ऋत्विग्भिषङ्मन्त्रभृदुद्धतानां सिंहो निरुक्तो विभुरोजसां च ।

– अ.सा. पृ. ४५५

**२१ निम्नद्रव्याणां स्वामी कन्या– यवनेश्वरः**

कन्यारतिप्रायिकसङ्गताग्निवनप्रलम्बिद्रवभूमिभूपाः।

मुखेषु रागाञ्जनगात्रभूषाः स्त्रीक्रीडनादर्शसमुद्भवानि।।

– अ.सा. पृ. ४५५

प्रदीपिकानौगिरिकोत्तरीयस्त्रीशिल्पकाव्यश्रुतिपार्थलेखाः।

विरागवासोमणिगन्धधूपाः संस्थानगीतादिकलाश्च षष्ठे।।

– अ.सा. पृ. ४५५

**२२ निम्नद्रव्याणां स्वामी तुला– यवनेश्वरः**

तुलादिमानापणपाथवीथीहिरण्यरत्नाम्बरमौक्तिकानाम्।

उद्घोषकोद्देशिकसार्थमुख्यहारादिनैर्याणिकसूतिकानाम्।।

– अ.सा. पृ.४५६

विवादधूर्त्तानृतदम्भजीवपौण्याध्वकर्त्तृश्रुतिपण्डितानाम्।

षाड्गुण्यसेवादिकचातुराणां तुलाधरः सम्पठितोऽधिकारे।।

– अ.सा. पृ.४५६

**२३ निम्नद्रव्याणां स्वामी वृश्चिकः– यवनेश्वरः**

श्वित्राग्निवल्मीकविषाग्निशस्त्रप्रणष्टदष्टक्षतजाहतानि।

शरीसृपावृश्चिकचक्रगोधासर्पादयो नक्तविहारिणोऽन्ये।।

– अ.सा. पृ. ४५६

विहारिपापौहतप्रदुष्टदीनार्त्तभग्नास्त्रविगर्हितानि।

मांसोत्करावस्थितगुह्यभाण्डसाङ्गायुधास्त्रादि च वृश्चिके तु।।

– अ.सा. पृ.४५७

**२४ निम्नद्रव्याणां स्वामी धनुः– यवनेश्वरः**

हयद्विपाः शाकुनचक्रवाकवर्मास्त्रयोधायुधयन्त्रशाणाः।

वेदाङ्गमन्त्रक्रतुहव्यभाण्डवेदान्तिकाचार्यमुनिक्रियाश्च।।

– अ.सा. पृ. ४५७

ज्ञानोपदेशागमवाग्वरिष्ठकाव्यस्मृतिव्याकृतिमङ्गलार्थाः।

राष्ट्राण्यमात्यापुरमन्त्रिपौराः सुगन्धिनो यच्च सुगन्धि सत्त्वम्।।

– अ.सा. पृ. ४५७

**२५ निम्नद्रव्याणां स्वामी मकरः- यवनेश्वरः-**

वन्या मृगा मन्त्रबलेक्षुपादानलद्विजाश्च क्रिमिशैवलाद्याः।

दंष्ट्राविशिष्टा मकरादयोऽन्ये ससीसलोहायसधातुधान्याः।।

– अ.सा. पृ. ४५८

कुशस्यधान्यानि सकाञ्चनानि वल्लीद्रुमादीनि च सेकजानि।

वैराणि जीवा मृगपक्षिनिम्ना मृगाश्रये यच्च जलाधिवासे।।

– अ.सा. पृ.४५८

**२६ निम्नद्रव्याणां स्वामी कुम्भः- यवनेश्वरः**

तडागकूपप्रतिरोधबन्धसम्प्रेक्ष्यचीनश्लथलोहिताङ्गाः।

कुशस्यलोहायसकृष्णमांसश्वपाकचौरान्तरबद्धवृद्धाः।।

– अ.सा. पृ. ४५८

नपुंसकानौकाकृतिका जलोत्था विचित्रपुष्पाणि फलानि हंसाः।

सुरासवाद्यम्बुचरा बकाद्या वटादयः कुम्भभृदाश्रयाः स्युः ।।

– अ.सा. पृ. ४५८

**२७ निम्नद्रव्याणां स्वामी मीनः- यवनेश्वरः**

गम्भीरतोयोदधितीर्थतीरनौपोतवाहास्तिमिमीनशङ्खाः।

नारी सरोगा जलजोपजीवी स्नानाम्बरस्नेहसदर्पणानि।।

– अ.सा. पृ. ४५९

यज्ञा द्विजेष्टा मणिशुक्तिरत्नप्रवालहेमादिविभूषणानि।

पुराणवेदव्रतनीतिधर्मद्रव्याणि मीनद्वयसंश्रयाणि।।

– अ.सा. पृ. ४५९

द्रव्याण्यनेकाकृतिलक्षणानि ग्राह्याणि राशिप्रभवैर्विकारैः।।

– अ.सा. पृ. ४५९

**यवनाचार्यः-**

यवनाचार्यविषये पं. शं. वा. दीक्षितमहोदया इत्थं वर्णयन्ति।[८७] वराहमिहिरेण यवनाचार्यस्योल्लेखः कृतः। बृहज्जातकस्य टीकायां (अ.७.श्लो.९) भट्टोत्पलः प्रतिपादयति यत्- यवनेश्वरः स्फुजिध्वजेन शककालारम्भानन्तरम-परं शास्त्रं निर्मितम्। तत्पूर्वस्य यवनाचार्यस्य मतानि वराहमिहिरेण निवेदितानि। तस्य यवनाचार्यस्य ग्रन्थोऽस्माभिर्न दृष्टः। स्फुजिध्वजकृतो दृष्टः। तेन स्वकीय-ग्रन्थे -यवना ऊचुः- इति निगदितम्। एतेन सिद्ध्यति यद् यवनाचार्यग्रन्थो भट्टोत्पलसमये नोपलब्धः। वराहमिहिरस्य पूर्वकाले यवनस्यैको ग्रन्थः, यवना वा जातकग्रन्थकारा नैके समभवन्। ते ग्रन्थकाराः शककालपूर्वमभूवन्निति भट्टोत्पलस्य वचनं वर्तते। पं. दीक्षितमहोदया मन्यन्ते यद् वराहस्य समये यवनस्यैक एव ग्रन्थः स्यात्, किन्तु तस्य वचनानुराारिणो यवना बहवः स्युः। अत यवना इति बहवचनान्तप्रयोगो दृश्यते-इति संभाव्यते। भट्टोत्पलेन स्फुजि-ध्वजायैव यवनेश्वरशब्दः प्रयुक्तः। तेनोद्धृतानि यवन-वाक्यानि तस्यैव संस्कृत-ग्रन्थतो वर्तन्ते। मीनराजजातकनामक एको ग्रन्थो-ऽधुनोपलभ्यते। स एव ग्रन्थो वृद्धयवनजातकनाम्ना यवनजातकनाम्ना वा प्रसिद्धः।

[८७] दीक्षितः शं.वा.,भारतीय ज्योतिषशास्त्राचा इतिहास, पृ. ४८५

ग्रन्थारम्भे वर्णितं यत् पूर्वमुनिना मयेन यदेकलक्षविस्तृतं होराशास्त्रं कथितं तदेव मीनराजेन अष्ट-सहस्त्रमितं कृतम्। भट्टोत्पलेन राशिस्वरूपविषयका द्वादशश्लोका यवनेश्वरस्य नाम्ना समुद्धृता:(बृ.जा. अ. १ श्लो. ५ भट्टोत्पलटीका)। ते श्लोका मीनराज-जातके प्राप्यन्ते। परन्तु यवनेश्वरस्य उत्पलेनोद्धृता बहव: श्लोका मीनराज-जातके न प्राप्यन्ते। पं. दीक्षिता निर्णयं कुर्वन्ति यत्- स्फूजिध्वजस्य ग्रन्थो मीनराजस्य जातकम्- एतौ भिन्नौ ग्रन्थौ। तथा च वराहोद्धरणानि तृतीयस्य वराहपूर्वकालीनस्य यवनस्य स्युः। पूर्वग्रन्थस्य संक्षेपो विस्तारो वा भूत्वानन्तर-ग्रन्थानां प्रादुर्भाव:, कदाचित् त्रीणि मतानि समानानि स्युः।

मीनराजजातके लल्लस्योल्लेखो वर्तते। लल्लस्तु प्राचीनो ज्योतिषप्रवर्तक:। सारवलिनामकस्य ग्रन्थस्य कर्ता कल्याणवर्मा वटेश्वरो वा ८२१ शके लिखिते स्वकीये ग्रन्थे लिखति यत् तेन वराहमिहिर-यवन-नरेन्दादिकृतग्रन्थानां सारसंग्रह: कृत:। [८८] यवनेश्वर-वराहयोर्मध्ये उत्पलभट्टेन नैके मतभेदा: प्रदर्शिता: सन्ति।[८९] यवना नाद्या जातककारा इति दीक्षितमहोदयानां मतम्।[९०] अल्बेरुनिरपि स्वग्रन्थेन यवनस्योल्लेखं ज्योतिषशास्त्रप्रवतकत्वेन करोति।[९१]

**यवनानां ज्योतिषम् -**

**काल:**

यवनानां समय: प्रायेण १४६-१४७ ई. पू. गण्यते। यतो हि तस्मिन्नेव समये यवनाचार्याणां प्रसिद्धसिद्धान्तज्योतिषी हिपार्कस आसीत्। एवं च रोमकसिद्धान्ते तु

[८८] उपर्युक्तम् पृ. ४८६

[८९] पृ.५१८

[९०] पृ. ५१८

[९१] सचौ-खं.१ पृ.१५८

यवनसिद्धान्तस्यात्यधिकाः श्लोकाः परिवर्तनं विनैव दृश्यन्ते । प्रो. हिटने महोदयेन लिखितं यद् भारतदेशे यवनदैवज्ञानां ज्ञानं हिपार्कसस्यान्ते एवं टालेमी दैवज्ञस्य प्रथमं एव आसीत् ।[९२] प्रो. हजारी प्रसाद द्विवेदीमहोदयैर्यवनानां प्रभावस्य स्वमुक्तकण्ठेन प्रशंसितं यद् यवनैर्होराशास्त्रस्य तथा प्रश्नशास्त्रस्य ज्योतिर्विद्यायाः प्रचारोऽस्मिन् देशे कृतः। [९३]

**बृहद्यवनजातकम्-**

बृहद्यवनजातकम्-नामको यवनविरचितो श्लोकबद्धो जातकग्रन्थ उपलभ्यते। स हिन्दी-अनुवादसहितः प्रकाशितः प्राप्यते। अस्मिन् ग्रन्थे द्वादशाध्यायेषु तनु-धन-सहज-सुख-सुत-रिपु-जाया-मृत्यु-धर्म-पराक्रम-लाभ-व्ययादिद्वादश-भावानां विस्तृतं विवेचन- मुपलभ्यते। प्रत्येकभावे विलोकनीयानि प्रथमं वर्णितानि। अनन्तरं तत्स्थाने स्थितस्य सूर्यादिग्रहस्य फलं सुस्पष्टं विवृतम्। प्रत्येकभावस्याधिपतिभावेशो वा वर्तते। स भावेशो कुत्र स्थितस्तदनुसारि तस्य फलं विवेचितम्। प्रत्येकभावे सूर्यादीनां शुभाशुभग्रहाणां दृष्टेरपि विचारो यवनेन विवर्णितः। प्रायेण सर्वेषु भावेषु विशिष्टा विचारा वर्षसंख्या च प्रतिपादिता। इत्थं वर्णनमिदमतीव व्यवस्थापरिपूर्णं विचारगर्भं च दृश्यते। जातकफलादेशाध्येतृ णामत्यन्तं समुपयुक्तं सुरुचिपूर्णं च वर्तते। प्रत्येका-ध्यायस्य विषयाः, श्लोकसंख्या च निम्नलिखिता वर्तते।

---

[९२] वृ.य.जा. भूमिका

[९३] बृ.जा. प्रस्तावना पृ. ५९

## १. प्रथमोऽध्यायः – तनुभावफलम्

| | विषयः | श्लोकाः |
|---|---|---|
| १. | लग्नफलम् | १२ |
| २. | ग्रहफलम् | ०९ |
| ३. | तनुभवनेशफलम् | १२ |
| ४. | दृष्टिफलम् | ०८ |
| ५. | विचारफलम् | २१ |
| **१.** | **द्वितीयाध्यायः** | |

## २. द्वितीयोऽध्यायः – धनभावफलम्

| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | धनभावे लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | धनभवनेशफलम् | १२ |
| ५. | धनभावे दृष्टिफलम् | ०८ |
| ६. | धनभावे ग्रहाणां वर्षसंख्या | ०१ |
| ७. | विचारः | ०७ |

## ३. तृतीयोऽध्यायः– सहजभावफलम्

| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | सहजभवनेशफलम् | १२ |
| ५. | दृष्टिफलम् | ०८ |
| ६. | सहजभावे वर्षसंख्या | ०१ |
| ७. | विचारः | १२ |

## ४. चतुर्थोऽध्यायः – सुखभवनफलम्


| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | सुखभावे लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | सुखभवनेशफलम् | १२ |
| ५. | सुखभावे ग्रहदृष्टिफलम् | ०८ |
| ६. | ग्रहवर्षसंख्या | ०१ |
| ७. | विचारः | ०६ |


## ५. पञ्चमोऽध्यायः – सुतभवनफलम्


| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | सुभवनेशफलम् | १२ |
| ५. | दृष्टिफलम् | ०८ |
| ६. | वर्षसंख्या | ०१ |
| ७. | विचारः | २३ |


## ६. षष्ठोऽध्यायः – रिपुभवनफलम्


| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | रिपुभवनेशफलम् | १२ |

| | | |
|---|---|---|
| ५. | ग्रहदृष्टिफलम् | ०८ |
| ६. | ग्रहवर्षसंख्या | ०१ |
| ७. | विचार: | ०३ |

**७. सप्तमोऽध्याय: - जायाभवनफलम्**

| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | रिपुभवनेशफलम् | १२ |
| ५. | ग्रहदृष्टिफलम् | ०८ |
| ६. | ग्रहवर्षसंख्या | ०१ |
| ७. | विचार: | १८ |

**८. अष्टमोऽध्याय: - मृत्युभवनफलम्**

| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | रिपुभवनेशफलम् | १२ |
| ५. | ग्रहदृष्टिफलम् | ०८ |
| ६. | ग्रहवर्षसंख्या | ०१ |
| ७. | विचार: | ०३ |

## ९. नवमोऽध्यायः – भाग्यभावभवनफलम्


| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | रिपुभवनेशफलम् | १२ |
| ५. | ग्रहदृष्टिफलम् | ०८ |
| ६. | ग्रहवर्षसंख्या | ०१ |
| ७. | विचारः | ०६ |


## १०. दशमोऽध्यायः – दशमभवनफलम्


| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |
| ४. | रिपुभवनेशफलम् | १२ |
| ५. | ग्रहदृष्टिफलम् | ०८ |
| ६. | ग्रहवर्षसंख्या | ०१ |
| ७. | विचारः | १५ |


## ११. एकादशोऽध्यायः – एकदशभवनफलम्


| | | |
|---|---|---|
| १. | तत्र विलोकनीयानि | ०१ |
| २. | लग्नफलम् | १२ |
| ३. | ग्रहफलम् | ०९ |

४. रिपुभवनेशफलम् १२

५. ग्रहदृष्टिफलम् ०८

६. ग्रहवर्षसंख्या ०१

७. विचारः ०७

**१२. द्वादशोऽध्यायः - द्वादशभवनफलम्**

१. तत्र विलोकनीयानि ०१

२. लग्नफलम् १२

३. ग्रहफलम् ०९

४. रिपुभवनेशफलम् १२

५. ग्रहदृष्टिफलम् ०७

६. ग्रहवर्षसंख्या ०१

७. विचारः ०२

**मीनराजविरचितं वृद्धयवनजातकम्-**

मीनराजस्य प्रस्तुतग्रन्थो प्राचीन एवं विस्तृतश्च वतते । तस्मिन् सत्य-गग-पाराशराचार्यादीनां मतेनानेकेषु स्थानेषु वर्णनं प्राप्यते । अस्य हस्तलिखिताधारेण प्रथमं प्रकाशनं प्राच्यविद्यामंदिरम्, महाराजा सयाजीव विश्वविद्यालयः, वडोदरा-संस्थाया गायकवाड प्राच्यविद्या मालायां यु. अेस्. अे स्थितस्य ब्राउन विश्वविद्यालयस्य डॉ डेविड पिंगरी संपादितः प्रथमं प्रकाशितः। तस्यैव मूलस्योपयोगं कृत्वा प्रणवाख्यहिन्दीव्याख्यासहितं डॉ. सुरेशचन्द्र मिश्रेण भागद्वयेषु रंजन पब्लिकेशन्स-नवदिल्हीद्वारा प्रकाशितः।

**मीनराजस्य समयः स्थानं च -**

मीनराजस्य कर्मभूमिविषये स्थानविषये वा सुरेशचन्द्र मिश्रमहोदया स्वभूमिकायां स्वविचारान् प्रस्तौति। मीनराजाचार्यो उष्ट्र-गर्दभविषये नैकेषु श्लोकेषु सविशेषं लिखति। खरोष्ट्रसंबंधिनीं तस्य सचेष्टतां दृष्ट्वा विदुषां मतं यत् स पश्चिमभारतस्य विशेषतः सौराष्ट्र-मारवाड- कच्छ-इत्यादीनां निवासी वा तत्र प्रदेशे कार्यरतः स्यात्। उपर्युक्तं मतं प्रो. सिंल्वा लेवी एवं च मोतीचन्द्र महोदयस्य वर्तते । ग्रहाणामाधिपत्यविषये भूगोलवर्णने च मीनराजः सूर्यस्याधिपत्यं यवनदेशोपरि कथयति, यो भारतदेशस्य प्रश्चिमत एव। केचिद् विद्वांस उपर्युक्तभौगोलिकविषयकवर्णनस्य रुद्रदाम्नो दिग्विजयमार्गेण सह संयोज्यते। अत एव मीनराजस्य कालश्चतुर्थशताब्द्याः प्रारम्भिकेषु २०-२५ वर्षेषु गण्यते। तथा च सौराष्ट-गुर्जर- वर्तमानराजस्थानप्रदेशस्य कश्चित् स्थाने मन्यते।[९४]

**वृद्धयवनजातकस्य विषयाः।**

१.राशिप्रभेदः, २.ग्रहयोनिभेदः, ३.आधानम्, ४.जन्म, ५.आर्युदायः, ६.दशा, ७.अन्तर्दशा, ८.अष्टकवर्गफलम्, ९.सूर्यदृष्टिफलम्, १०.चन्द्रदृष्टिफलम्, ११.मङ्गलदृष्टिफलम् , १२.बुधदृष्टिफलम्, १३.गुरुदृष्टिफलम्, १४.शुक्रदृष्टि-फलम्, १५.शनिदृष्टिफलम्, १६.ग्रहभावफलम्, १७.सूर्यवर्गफलम्, १८.चन्द्र-वर्गफलम्, १९.भौमवर्गफलम्, २०.बुध- वर्गफलम्, २१.गुरुवर्गफलम्, २२.शुक्रवर्गफलम्, २३.शनिवर्गफलम्, २४.लग्नवर्गफलम्, २५लग्नस्थग्रह-फलम्, २६.धनभावफलम्, २७.सहजभावफलम्, २८.सुखभावफलम्, २९.पञ्चमभावफलम्, ३०.रिपुभावफलम्, ३१.सप्तमभावफलम्, ३२.मृत्युभावफलम् ३३.धर्मभावफलम्, ३४.कर्मभावफलम्,

[९४] मिश्र सुरेशचन्द्रः, वृद्धयवनजातकम्-भागः १, भूमिका पृ.९

३५.लाभभाव–फलम्, ३६.व्ययभावफलम्, ३७भावेशफलम्, ३८.भावगतराशिफलम्, ३९.अनफायोगफलम्, ४०.सुनफाफलम्। ४१.दुरुधरायोग:, ४२.लग्नाश्रय–योग:, ४३.धनाश्रययोग:, ४४.सहजाश्रययोग:, ४५.सुखाश्रययोग:, ४६.पुत्राश्रययोग:, ४७.रोगाश्रययोग:, ४८.कलत्राश्रययोग:, ४९.मृत्युभावा–श्रययोग:, ५०.भाग्याश्रययोग:, ५१.कर्माश्रययोग:, ५२.लाभाश्रययोग:, ५३.व्ययभावाश्रययोग:, ५४.संख्यायोग:, ५५.वज्रादियोग:, ५६.रश्मिाचिन्ता, ५७.राजयोग:, ५८.नक्षत्रफलम्, ५९.लग्नफलम्, ६०.चन्द्रराशिगुण:, ६१.नक्षत्रफलगुण:, ६२.भावफलम्, ६३.राजयोग:, ६४.मृत्युज्ञानम्, ६५.अनिष्टसूचनम्, ६६.शुभस्वप्नम्, ६७.मिश्रकम्, ६८.काकरुतम्, ६९.श्यामाचेष्टितम्, ७०.श्वाचेष्टितम्, ७१.गोचेष्टितम् संग्रह:,आत्मकथनम् ।

द्वादशभावविषये २५ अध्यायत: ३६ पर्यन्तं तथा ३७ तमेऽध्याये भावेशफलम्, ३८तमेऽध्याये भावगतराशिफलम् –इति १४ अध्याया मम संशोधनस्य संदर्भे महत्त्वपूर्णा: सन्ति। तेषामध्यानुसारं विषया: श्लोकसंख्या च निम्नलिखिता वर्तते।

| **अध्याय:** | **विषय:** | **श्लोकसंख्या** |
|---|---|---|
| २५. | लग्नस्थग्रहफलम् | २८ |
| २६. | धनभावफलम् | ३१ |
| २७. | सहजभावफलम् | ३० |
| २८. | सुखभावफलम् | ३० |
| २९. | पञ्चमभावफलम् | २८ |
| ३०. | रिपुभावफलम् | २९ |
| ३१. | सप्तमभावफलम् | २८ |

| | | |
|---|---|---|
| ३२. | मृत्युभावफलम् | २८ |
| ३३. | धर्मभावफलम् | २७ |
| ३४. | कर्मभावफलम् | २८ |
| ३५. | लाभभावफलम् | २८ |
| ३६. | व्ययभावफलम् | २८ |
| ३७ | भावेशफलम् | १४४ |
| ३८. | भावगतराशिफलम् | १४५ |



**उपसंहारः-**

अस्मिन् द्वितीये प्रकरणे ज्योतिषसंहिताकारेषु यवनस्य विवेचनम्, यवनशब्दस्य स्पष्टीकरणम्, यवनसन्दर्भाः, तेषां विश्लेषणं, यवनग्रन्थाः, यवनस्य समयः, बृहद्य-वनजातकस्य परिचयः, विषयनिर्देशः, मीनराजकृतस्य वृद्धयवनजातकस्य परिचयः, विषयनिर्देशश्च-एते विषयाः प्रतिपादिताः।

# तृतीयं प्रकरणम्

# बृहद्यवनजातकानुसारेण द्वादशभावफलम्

# तृतीयं प्रकरणम्

# बृहद्यवनजातकानुसारेण द्वादशभावफलम्

## सामान्यं विवरणम्-

द्वादशभावेषु –प्रत्येकभावः कीदृशो दृश्यते, अथवा द्वादशभावेषु ग्रहभवनेश–सहितफलानि –द्वादशभावानामाधिपत्यस्य फलं लिख्यते। तत्रादौ तनुभुवनम् –तत्पश्चात् तन्वादिद्वादशभावाः। अमुकाख्यम् ,अमुकदैवम् , अमुकग्रहयु–तम्, अमुकग्रहावलोकितं फलं कथ्यते।

## तत्र विलोकनीयानि

द्वादशभावानां ग्रहसम्बन्धिफलम्, एवं भुवनस्य स्वामिनः फलं लिख्यते। प्रथमं तनुभवः स्यात्। तस्य देवता , ग्रहयोगः, ग्रहदृष्टिर्वा योगद्वारा कथ्यते। [९५]

१) रूपं वर्णस्य निर्णयश्चिह्नानि जातिः,अवस्था, प्रमाणं, सुखदुःखं, साहसम्, एतस्य सर्वस्य तनुभावाद् विचारः करणीयः। रूपम् अर्थात् शरीरलावण्यम्, सुन्दरता, वर्णविनिर्णयः, अर्थात् शरीरस्य वर्णः(कृष्णवर्णः, वा गौरवर्णः) चिह्नम् –शरीरे किमपि चिह्नं भवेत्। जातिः – लग्ने तनुभावे या राशिः वा ग्रहो वर्तते, तस्य ग्रह–राशि–अनुसारं जातिर्ज्ञातव्या। अवस्थाप्रमाणम् – जातकस्य वयःप्रमाणं, शरीरस्यैवं स्वभावे सुखदुःखं प्राप्यते ।

---

१बृ.य. जा.१.१

# १. लग्नभावफलम्

**मेषराशिः**

यदि जातकस्य जन्मलग्ने प्रथमभावे वा मेषराशिः स्यात्, तदा स जातकः पित्तप्रकृतिः पित्तेन रोगी भवति। यथा – स्वजनादपमानं प्राप्यते, दुष्टजनानां वियोगः, दुष्टजनस्तस्य समीपे नागच्छति, स्वजनत एवं स्नेहीजनैः सह कलह उत्पन्नो भवति। मनसि दुःखं प्राप्नोति। शस्त्रद्वारा घात आघातो वा भवेत्। कस्माच्चित् कारणाद् धनक्षयो भवति।[९६]

**वृषभराशिः**

यदि प्रथमभावे वृषभराशिः स्यात् , तदा जातकः श्वेतवर्णः– अर्थात् शरीरस्यवर्णः श्वेतो वर्तते। शरीरं स्निग्धं, कोमलमेवं सुन्दरं दृश्यते । कफप्रकृतिः, अर्थात् कफद्वारोत्पन्नरोगेण पीडां प्राप्नोति। उग्रस्वभाववान, कृतघ्नः, कस्यापुपकारस्मरणं न करोति। मन्दबुद्धियुक्तः, स्थिरतायुक्तः,– स्वकीये निर्णये स्थिरो न जायते। अन्यद्वारा पराजितः, एवं स्त्रियो भृत्यो भवेत्। स्त्रीणां सेवां करोति।[९७]

**मिथुनराशिः**

जातकस्य जन्मसमये लग्ने मिथुनराशि; स्यात्, तदा पुरुषो भवेद् गौरवर्णयुक्तः। यदि स्त्री तदा धनस्य चिन्तां करोति। धनचिन्तावशात् शरीरे व्याधिरुत्पन्ना भवेत्। स सम्यग्दूतः, प्रसन्नचित्तो भवेत्। मधुरभाषी, प्रियवचनं वदति, नम्रः, विवेकयुक्तः, शीलयुक्तः, समृद्धिवान् ,योग्य एवं चतुरो भवति।[९८]

---

[९६] बृ.य. जा.१.२.१

[९७] बृ.य. जा.१.२.२

[९८]बृ.य. जा.१.२.३

**कर्कराशिः**

जातकस्य जन्मसमये प्रथमभावे यदि कर्कराशिः स्थिता, तदा जातकः श्वेतवर्णयुक्तः, पित्तप्रकृतिः, तन्वातीवपुष्टः स्यात्। वाचालः, प्रगल्भः, जलक्रीडाप्रियः, जले स्नानमधिकं प्रियम्, बुद्धिमान्, पवित्रः, धर्मक्षेत्रे कार्ये वा आस्थावान्, धर्मं प्रत्यधिकरुचिर्वर्तते। क्षमावान्, कस्यचिदुपरि द्वेषं न करोति, एवं सुखी भवेत्।[९९]

**सिंहराशिः**

यदि जातकस्य जन्मकुण्डल्यां लग्नभावे सिंहराशिर्भवति, तदा स जातकः पाण्डुतनुः कृशशरीरः, पित्तरोगेण वा कफरोगेण पीडितो भवति। भोजनेऽरण्यचरपशूनां मांसमतीव प्रियं वर्तते। स्वभावे अतीवोग्रः, क्रूरः, एवं तीक्ष्णो भवति, चतुरः, शूरवीरस्तथा वाक्चतुरो भवति।[१००]

**कन्याराशिः**

यदि प्रथमभावे कन्याराशिः स्यात्, तदा जातकः कफपित्तप्रकृतिः – शरीरे कफस्यैवं पित्तस्य प्रभावोऽधिकः स्यात्। सुखी, तेजस्वी, कान्तिमान्, श्लेष्मविकारपीडितः, स्त्रिया वियोगो भवेत्। भीरुः, आत्मविश्वासहीनः, मायावी, स्वकीयमतमन्योपरि प्रस्थापयति। कामोपपीडिताङ्गयुक्तो भवति।[१०१]

**तुलाराशिः**

जातकस्य जन्मलग्ने तुलाराशिः स्यात्, तदा श्लेष्मयुक्तः, सत्यवादी, सत्यवचनस्य पालनं करोति, पुण्यप्रियः, सत्कर्मरतः, राजद्वारा मानं प्राप्नोति, देवतानामर्चने तत्परः, सुरस्याधिकमर्चनं करोति, एवं समर्थो भवति।[१०२]

---

[९९] बृ.य. जा.१.२.४

[१००] बृ.य. जा.१.२.५

[१०१] बृ.य. जा.१.२.६

[१०२] बृ.य. जा.१.२.७

**वृश्चिकराशिः**

लग्ने यदि वृश्चिकराशिः स्यात्, तदा स जातकोऽतिक्रोधी भवति, असत्यवादी, सत्यवचनं न भाषते। नृपद्वारा पूजितो गुणवान्, शास्त्रकथानुरक्तः, धर्मवादी वा धर्मस्याचरणं करोति। नित्यं स्वशत्रोर्हानिर्वा नाशं करोति।[१०३]

**धनराशिः**

यदि जातकस्य प्रथमभावे धनराशिः भवेत्, तदा राज्ययुक्तः, येन–केन प्रकारेण राज्यसंबन्धो भवेत्, स्वकीयकार्ये प्रधृष्टः, चतुरः, द्विजदेवानां भक्तः, तुरङ्गयुक्तः, अधिकमित्रयुक्तः, अश्वस्य जङ्घातुल्यो भवेत्।[१०४]

**मकरराशिः**

यदि जन्मलग्ने मकरराशिः स्यात्, तदा स जातकः संतोषी, उग्रस्वभावयुक्तः, भीरुः, भयभीतः, सदा पापरतः, पापयुक्तकर्मकरः, धूर्तः, कफवातपीडितः, दीर्घगात्रयुक्तः, सदृढशरीरयुक्तः परवञ्चकश्च स्यात्।[१०५]

**कुम्भराशिः**

यदि प्रथमभावे कुम्भराशिः स्यात्, तदा स जातकः स्थिरस्वभावयुक्तः, निर्णयतटस्थतायुक्तः, अधिकवाचालः, वाताधिकः, परद्रव्यहरणचतुरः, स्निग्धशत्रुः, स्त्रीवर्गस्य प्रियः, स्निग्धानुरक्तः, कुटुम्बप्रियो भवति।[१०६]

---

[१०३] बृ.य. जा.१.२.८

[१०४] बृ.य. जा.१.२.९

[१०५] बृ.य. जा.१.२.१०

[१०६] बृ.य. जा.१.२.११

**मीनराशिः**

यदि प्रथमभावे मीनराशिः स्यात्, तदा स जातकः पापरतः, (पापकर्मे रतः)धनी, धनाढ्यः, सदृढः, एवं सुन्दरवदनयुक्तः, श्रेष्ठपण्डितः, स्थूलशरीरयुक्तः, प्रचण्डस्वभावः, शरीरेऽधिकपित्तं स्यात्, एवं कीर्तिवान् भवेत्।[१०७]

**<u>प्रथमभावे सूर्यादिग्रहाणां फलम् ।</u>**

**सूर्यः**

यदि लग्नभावे सूर्यः स्यात्, तदाल्पकेशयुक्तः, कार्यकरण आलसयुक्तः, (प्रमादी) क्रोधयुक्तः, शरीरे प्रचण्ड–उन्नतः, अभिमानयुक्तः, नेत्ररोगी , कृश एवं कर्कशतनुयुक्तः, शूरः, अक्षमी, दयारहितो भवेत्। यदि प्रथमभावे सूर्यः कर्कराशिस्थः स्यात्, तदा जातकः फुल्लाक्षो भवेत्। यदि सूर्यो मेषराशिस्थितस्तदा, स्थितिहरः, निशान्धो भवेत्। यदि सूर्यस्तुलाराशि–स्थितस्तदा, दरिद्री तथा पुत्रहीनो भवेत्।[१०८]

**चन्द्रः**

प्रथमभावे यदि चन्द्रः स्थितश्चन्द्रो यदि कर्क–वृष–मेषराशिस्थितस्तदा चतुरः, रूपवान्,धनयुक्तो भवेत्। यदि चन्द्रः कर्क–वृष–मेषराशितोऽन्यराशिषु स्थितस्तदा उन्मत्तः, बधिरः, नीचः, विकलाङ्गः, मूकः, एवं हीनशरीरयुक्तो भवेत्।[१०९]

---

[१०७] बृ.य. जा.१.२.१२

[१०८] बृ.य. जा.१.३.१

[१०९] बृ.य. जा.१.३.२

**भौमः**

यदि भौमः प्रथमभावे स्थितस्तदा, मतिमध्ये महाभ्रमो जायते। शरीरे क्षतयुतः, एवं सः पुरुषोऽतिसाहसवान् भवेत्। जीवनेऽतियात्रालाभं, गमनागमनं प्राप्यते।[११०]

**बुधः**

यदि लग्नस्थाने बुधः स्यात्, तदा शान्तः, सुशीलः, विनीतः, उदारः, सदाचार–युक्त;, धैर्यवान्, विद्वान्, अनेककलासु प्राज्ञः, अनेककलानिपुणः, एवं बहुपुत्रयुक्तो भवेत्।[१११]

**गुरुः**

प्रथमभावे बृहस्पतिर्यदि स्यात्, तदा स जातको विद्यावान्, राज्ञामभिमतः, राज्ञां प्रियः, अतिबुद्धिमान्, कृतज्ञः, अत्युदारः, एवं सुन्दरतनुयुक्तो भवेत्।[११२]

**शुक्रः**

लग्नस्थाने यदि शुक्रः स्यात्, तदा सः पुरुषो बहुकलाकुशलः, निर्मलोक्तिवान्, सुन्दरस्त्रिया सह कामसुखानुभवयुक्तः, अवनिनायकः, मान–धनयुक्तो भवेत्।[११३]

**शनैश्चरः**

यदि लग्नस्थान उच्चो वा स्वमूलत्रिकोणस्थः शनैश्चरः स्थितः, तदा स जातको देशपुराधिपतिर्भवेत्। यदि प्रथमभावेऽन्या कापि राशिर्मध्ये स्थिता तदा स जातको रोगी तथा दारिद्री भवेत्।[११४]

---

[११०] बृ.य. जा.१.३.३
[१११] बृ.य. जा.१.३.४
[११२] बृ.य. जा.१.३.५
[११३] बृ.य. जा.१.३.६

**राहुः**

प्रथमभावे यदि राहुः स्यात्, तदा सः पुरुषो दुष्टमतिः, दुष्टस्वभावयुक्तः, स्वजनवञ्चकः, शीर्षपीडायुक्तः, कामरसे लोलुपः, एवं वादे-विवादे विजयी तथा रोगी भवेत्।[११५]

**केतुः**

यदि प्रथमभावे केतुः स्थितः, तदा सदा क्लेशकर्ता, रोगयुक्तः,भोगाद् भयभीतः, एवं व्यग्रतातः पीडां प्राप्नोति। कलत्रादितश्चिन्तां महोद्वेगं शरीरे व्याधिं तथा स्वकीयमातुलतः पीडामनुभवति।[११६]

**अथ तनुभवनेशफलम्**

यदि लग्नेशो लग्नभावे स्थितो वा सप्तमभावे स्थितस्तदा स जातको रोगरहितः, दीर्घायुर्भवेत्। अतिबलवान् स्यात्। तदा राज्ञः कुलमन्त्री, सुखविलासयुतः, एवं धनयुक्तो भवेत् ।[११७] यदि लग्नाधिपतिर्धनस्थानस्थः स्यात्, तदा धनयुतः, विस्तारयुक्तः, दीर्घशरीरवान्, दीर्घायुः, मन्त्रयुक्तः, कुटुम्बं विविधधर्मयुक्तं कुरुते।[११८] यदि तनुपतिस्तृतीयभावे स्थितः, तदा भ्रातुर्वृद्धिं करोति। यदि लग्नेशो मित्रग्रहयुतो भवेत्, तदा पराक्रमं करोति । यदि तनुपतिर्बलहीनः स्यात्, तदा पवित्रतां तथा लग्नेशः शुभग्रहदृष्टस्तदा शुभवचनं वदेत्।[११९] तनुपतिश्च-तुर्थभावस्थः, तदा सुखकर्ता, मनुष्यजनानपि विविधभक्ष्यमेवं विलासयुक्तं करिष्यति। स नृपाणां मध्ये पूजनीयो भवेत्,

---

[११४] बृ.य. जा.१.३.७
[११५] बृ.य. जा.१.३.८
[११६] बृ.य. जा.१.३.९
[११७] बृ.य. जा.१.४.१
[११८] बृ.य. जा.१.४.२
[११९] बृ.य. जा.१.४.३

मातृसुखं प्राप्नोति, गजरथाश्वानां सुखमेवमुत्तमभोजनं प्राप्नोति।[१२०] लग्नेशो यदि पञ्चमस्थाने स्थितः स्यात्, तदा विनययुतः, एवं धर्मयुक्तः, दीर्घजीवी पुत्रो जायते, यथा यैर्ग्रहैः सह युतस्तथा फलं वदेत्, उत्तमस्वरयुक्तः, शुभकर्मरत एवं गानकलायां निपुणः, निरतो भवेत्।[१२१] यदि लग्नेशः षष्ठस्थाने भवेत्, तदा शत्रुयुक्तः स्यात्, आयुष्यवान्, पुत्रस्यैवं मातुलस्य सुखं प्राप्नोति, विविधप्रकारेण धनयुक्तस्तथापि स कृपणो भवेत्।[१२२] यदि प्रथमेशः सप्तमभावे स्थितस्तदा जातकेन स्त्रियो धनस्य च सुखं प्राप्यते। शुभशील एवं विलासयुक्तो विनयवान्, सकलरूपवान् सदा भवति।[१२३] यदि लग्नाधिपतिरष्टमभावे स्थितस्तदा तस्य जातकस्य मृत्युं करोति, अथवा स जातको मृत्युतुल्यपीडामनुभविष्यति, स मनुष्यः कृपण एवं धनवञ्चको भवेत्। यद्यष्टमस्थाने लग्नेशस्योपरि वा शुभग्रहस्य दृष्टिः स्यात्, तदा मानव उपुर्युक्त एवं सुधीर्भवेत्।[१२४] यदि प्रथमेशो धर्मस्थाने स्थितः, तदा तपस्वी, सहजमित्र-युक्तः, पर्यटकः; सुखशीलः, यशस्वी, राज्ञां पूज्यः, मनुष्याणां मध्ये प्रतिष्ठितो जायते।[१२५] यदि लग्नेशः कर्मस्थाने स्थितः, तदा मातापित्रोः सुखं, नृपद्वारा सन्मानं, सकलभोगस्य सुखं, तथा शुभकर्मस्य कर्ता गुरुपूजको भवेत्।[१२६] लग्नाधिपतिर्यदि लाभस्थानस्थः स्यात्, तदा स जातको दीर्घायुर्भवेत्, यदि तनुपतिः शुभभावसमन्वितः स्यात्, तदा गजाश्वधनादिसुखं राजद्वारा प्राप्यते,

---

[१२०] बृ.य. जा.१.४.४
[१२१] बृ.य. जा.१.४.५
[१२२] बृ.य. जा.१.४.६
[१२३] बृ.य. जा.१.४.७
[१२४] बृ.य. जा.१.४.८
[१२५] बृ.य. जा.१.४.९
[१२६] बृ.य. जा.१.४.१०

विविधप्रकारेण कीर्तिमान् विवेकी विचारवान् भवेत्।[१२७] प्रथमेशो द्वादशभावे स्थितः, तदा जातकः कटुभाषी, दुष्टाणां सह समागमकारी, दाहयुक्तो घृणी भवेत्, व्ययकरः स्वभावतः परदेशगामी, सहोदरस्यैवं गोत्रस्य जनैः शत्रुयुक्तः स्यात्।[१२८]

**दृष्टिफलम्**

यदि प्रथमभावोपरि सूर्यस्य दृष्टिः, तदा स जातको देश–विदेशे भ्रमणं करोति । सुकृतं भाग्यफलं लभेत्। सुकृतस्य क्षयोऽपि वर्तते, गृहसम्बन्धी सुखमेवं पीडां प्राप्नोति।[१२९] यदि चन्द्रः प्रथमभावोपरि दृष्टिं करोति, तदा तस्य जातकस्य शरीरे विकलता भवेत् । एवं मार्गगमने सरलता, सुकलामेवं क्रयवृत्तिं च लभेत्।[१३०] यदि लग्नं भौमद्वारा दृष्टं भवेत्, तदा पित्तप्रकोप एवं ग्रहणीरोगः, चरणयोरेवं नेत्राणां विकलता। यदि जीवितो भवेत्, तदा तस्य पुरुषस्य पुत्रादिर्नष्टं जायते।[१३१] यदि बुधः प्रथमस्थाने दृश्यते, तदा वाणिज्यक्षेत्रे राजकुले वा पुरुषस्योन्नतिर्जायते । स्वजनानां सुखं, कन्यारत्नं लभ्यते । एवं चिरायुःसंतानो भवेत्।[१३२]यदि बृहस्पतिर्लग्नस्थानं पश्येत्, तदा स जातको गृहसम्बन्धिसुखी, एवं भाग्यवान् भवेत् । ग्रहैर्युक्तो बलवान् ग्रहो भवेत्, तदा स व्ययकर एवं चिरायुर्भवेत्।[१३३] यदि लग्नस्थाने शुक्रस्य पूर्णा दृष्टिर्भवेत्, तदा जातक उत्तमतनुयुक्तः, नानार्थस्य संभोगः, सौदर्ययुक्तस्त्रीसुखवान् तथा

---

[१२७] बृ.य. जा.१.४.११
[१२८] बृ.य. जा.१.४.१२
[१२९] बृ.य. जा.१.५.१
[१३०] बृ.य. जा.१.५.२
[१३१] बृ.य. जा.१.५.३
[१३२] बृ.य. जा.१.५.४
[१३३] बृ.य. जा.१.५.५

निश्चयेण भाग्यवान् भवेत्।[१३४] यदि देहस्थाने शनैश्चरो दृश्येत् , तदा जातकः शरीरेण सुखी न भवेत्। अतिवातकारणात् पीडितो वातरोगी भवेत्, गुणाधिको न स्यात्, एवं आलयकर्ता (गृहकर्ता) भवेत्।[१३५]

**तनुग्रहवर्षसंख्याफलम्**

अधुना तनुस्थानस्याधारतो ग्रहाणां संख्याफलं कथ्यते। चन्द्रः सप्तविंशतिवर्षा–वस्थायां सुखकर्ता स्यात्। सूर्यस्य पञ्चदशवर्षाणि पीडा भवेत्, भौमः पञ्चवर्षा–रिष्टकारकः, बुधो दशवर्षं कीर्तिं ददाति, बृहस्पतिरष्टवर्षं सन्तानकारकः, शुक्रः सप्तवर्षाणि स्त्रीसुखमेवं शनश्चैरः, राहुः पञ्चवर्षमरिष्टकारको भवेत्।[१३६]

**विचारः**

यदि प्रथमस्थाने सर्वग्रहाणां दृष्टिः स्यात्, तदा लीलायुक्तो बलवान् एवं कुले राज्ञो भवेत्, दीर्घायुः, भयरहितः, एवं शत्रोः कुलस्य नाशं करोति, शत्रुविजयी भवेत्।[१३७] यस्य जन्मकाले लग्नस्थाने त्रयो ग्रहाः सौम्यग्रहाः स्थिताः, स जातको नम्रतायुक्तो, विनीतो विनयी नृपो भवेत्। एवं यदि त्रयः पापग्रहास्तनु–स्थाने स्थिताः, तदा दुःखदारिद्रशोकयुक्त एवं नित्यं नितान्तं बहुभक्षको भवेत्।[१३८] लग्नात् सप्तमे षष्ठेऽष्टमस्थाने वा यदि शुभग्रहः स्थित एवं पापग्रहै रहितो वा दृष्टिरहितः स्यात्, तदा स जातको मन्त्री, दण्डपतिः, क्षेत्राधिपतिः, भूपतिः, बहुस्त्रीणां पतिः, दीर्घायुः, रोगहीनः, भयरहितः, सौदर्यसौख्य–समन्वितः, सच्छीलवान्, उत्तमशीलयुक्तः, नित्यं सदा प्रसन्नो

[१३४] बृ.य. जा.१.५.६
[१३५] बृ.य. जा.१.५.७
[१३६] बृ.य. जा.१.५.८
[१३७] बृ.य. जा.१.६.१
[१३८] बृ.य. जा.१.६.२

वर्तते। एवं यवनेश्वरः कथयति।[१३९] यदि मेषे चन्द्रः, कुम्भे शनैश्चरः, धनुषि सूर्यः, मकरे शुक्रः, तदा स जातकः कदापि परधनस्योपभोगं न करोति, अपि तु स्वकीय–बाहुबलेनोपार्जित–धनस्य भोगं करोति।[१४०] यदि प्रथम–चतुर्थ–सप्तम–दशमस्थाने पापग्रहाः स्थिताः, तथा धनस्थानेऽपि पापग्रहः स्थितः, तदा स जातको महादरिद्रो भवति तथा च स्वजनानां कृते भयंकरो भवति।[१४१]बृहस्पतिः पञ्चमे लग्नस्थाने वा स्थितः, दशमभावस्थो यदि चन्द्रमाः स्यात्, तदा जातकस्तपस्वी, जितेन्द्रिय एवं राजसबुद्धियुक्तः स्यात्।[१४२] कन्यास्थो वा तुलास्थो यदि बृहस्पतिः, मेषस्थो वा वृषभस्थो यदि शुक्रः, बुधो यदि वृश्चिके स्थित एवं शुभग्रहद्वारा यदि दृष्टो भवेत्, तदा जातकः कुले श्रेष्ठः, विचारे चतुरः, औदर्ययुक्तः, सौम्यः, नित्यानन्दी, सदा प्रसन्नचित्तः, गुणैः श्रेष्ठः, गुणवान्, निष्ठावान्, एवं धनवान् भवेत् ।[१४३] यदि षष्ठमभावे शनैश्चरसहितो बुध एवं भौमः स्थितस्तदा स पुरुषो महाचोरो विशेषतः कुकर्मस्य सामर्थ्यविधेः परान्नग्रहणकर्ता, एवं कुगुणयुक्तः, अवगुणयुक्तो भवेत् ।[१४४] यदि जातकस्य जन्मकाले कर्कस्थः शनैश्चरः, मकरस्थः भौमः तदा चौर्यप्रसंगोद्भवे दण्डः जायते, एवं शाखादिनां द्वारा दण्डं अवश्यं प्राप्यते।[१४५] जातकस्य जन्मकाले कुम्भ–मीन–धनुस्थाने पापग्रहो यदि स्यात्, तदात्यन्तं कुचेष्टिः, कुकर्मी, एवं निश्चयेन तस्य मृत्युर्वज्रघातद्वारा भवेत्।[१४६]यस्य जन्मकालेऽष्टमभावे शुभग्रह–स्थितस्तथा शुभग्रहस्य

[१३९] बृ.य. जा.१.६.३
[१४०] बृ.य. जा.१.६.४
[१४१] बृ.य. जा.१.६.५
[१४२] बृ.य. जा.१.६.६
[१४३] बृ.य. जा.१.६.७
[१४४] बृ.य. जा.१.६.८
[१४५] बृ.य. जा.१.६.९
[१४६] बृ.य. जा.१.६.१०

दृष्टिर्भवेत्, तदा स जातकोऽनेकतीर्थानां दर्शनकर्ता, एवं स श्रेष्ठः सौम्ययुक्तो भवेत् ।[१४७] यदि लग्नस्थाने बुधस्य द्रेष्काणस्थः केन्द्र–स्थानस्थश्चन्द्रमा यदि पश्येत्, तदा स जातको यदि राजकुले जायते ,तथापि नीचकर्मा, एवमधमो वर्तते ।[१४८] यदि सूर्य एवं शनैश्चरो द्वितीयस्थाने, दशम–स्थाने चन्द्रमा एवं भौमः सप्तमस्थाने स्थितस्तदा मनुष्यो हीनकलेवरो भवेत्।[१४९] यदि पापग्रहस्यान्तराले चन्द्रः सप्तमस्थानस्थो यदि शनैश्चरस्तदा जातकस्य शरीरं श्वास–क्षय–प्लीहा– गुल्मरोगादिभिर्व्याकुलमेवं पीडितं भवेत्।[१५०] यदि चन्द्रः सूर्यस्य नवांशे स्थितः, सूर्यः चन्द्रस्य नवांशे स्थितः,तदा मनुष्योऽवश्यं लक्ष्मीविहीनो भवेत् ।[१५१] यदि व्ययस्थाने चन्द्रः, षष्ठस्थाने सूर्यः, अष्टमस्थाने शनैश्चरः स्थितः, तदा जातकः शरीरेऽधिकवातप्रकृतिकारणात् तेजविहीननेत्रो भवेत्।[१५२] यदि शुक्रो भौमो वा धनस्थाने व्ययस्थाने वा स्थितः, तदा जातकः कर्णरोगी भवेत्, एवं यदि चन्द्रः स्थितस्तदा नेत्ररोगी भवेत्। इत्थं मुनीन्द्रेण कथ्यते।[१५३] यदि लग्नस्थाने सूर्य–राहु–भौमा एवं शनैश्चरः स्थितः, तदा जातकस्य शरीरं कृशं स्यात्। रुधिरे पाण्डुरोगः, परतापदायक एवं शुभग्रहो यद्यपि भवेत् , अपि तु रोगं करोति।[१५४] पापग्रहस्य राशिर्यदि लग्ने स्यात् , एवं तन्मध्ये बृहस्पतिरेवं चन्द्रः स्यात् , तदा शिर आघात एवं शरीरे वातशूलं भवेत्। तथैव जठराग्निरधिकं बली न भवेत्।[१५५]

---

[१४७] बृ.य. जा.१.६.११
[१४८] बृ.य. जा.१.६.१२
[१४९] बृ.य. जा.१.६.१३
[१५०] बृ.य. जा.१.६.१४
[१५१] बृ.य. जा.१.६.१५
[१५२] बृ.य. जा.१.६.१६
[१५३] बृ.य. जा.१.६.१७
[१५४] बृ.य. जा.१.६.१८
[१५५] बृ.य. जा.१.६.१९

यदि प्रथमस्थाने बृहस्पतिः, चन्द्रः, बुधः स्थितः, तदा शरीरमधिकं पुष्टं, कान्तिमद् भवति तथा रोगो वा व्याधिर्नोद्भवेत्। यदि प्रथमस्थाने क्रूरः पापग्रहो वा स्यात्, तदा कृशताकरस्तापकरश्च भवति।[१५६] एषां योगानां विषये मुनीन्द्राः कथयन्ति, यो ग्रहो बलवान्, तस्य फलं ग्रहस्य पाककाले वा तस्य महादशायाम्, अन्तर्दशायां वा प्रत्यन्तरदशानुसारेण कथ्यते।[१५७]

## २. द्वितीयं धनभवनम्

अमुकाख्यममुकग्रहेण तदधिपतिना युक्तम्, अमुकग्रहैर्विलोकितं, स्वस्वामिनां दृष्टिर्वा योगो वा भावफलं कथयति। सुवर्णादिधातूनां क्रय-विक्रयः, सुवर्ण-रत्नादीनां कोशेऽपि संग्रहः -एतत् सर्वं धनस्थाने विचारणीयमेवं सुधीजना मन्यन्ते।[१५८] यदि मेषराशिर्धनस्थाने भवेत्, तदा जातको धनेन परिपूर्णः, अनेकसंतानयुक्तो भवति, अधिकं भाग्यवान्, अधिककुटुम्बयुक्तः, चतुष्प-दाढ्यः, विद्वानेवं गाढपण्डितोऽपि भवति।[१५९] धनभावे यदि वृषभराशिः स्यात्, तदा कृषिप्रयत्नेन सदैव धनप्राप्तिर्वा धनोपार्जनं करोति। एवं अनाघातः, चतुष्पदानां प्राप्तिः, हिरण्यमणिमुक्तैरर्थं प्राप्नोति।[१६०] धनभुवने मिथुनराशिः स्थिता, तदा जातकेन धनं प्राप्यते, स्त्रीसंततियुतः, अधिकरजतकनकादियुक्तः, बहुदयावान् प्रीतिमांश्च भवति।[१६१] धनस्थाने कर्कराशिः स्यात्, तदा जातको नित्यं वृक्षाणां द्वारा धनोपार्जनं करोति। एवं जायात इष्टभोजनं प्राप्यते, सुखोपभोगं करोति। नीतिसंयुतः सुतानां प्रीतिकरो भवति।[१६२] धनस्थाने यदि सिंह-

[१५६] बृ.य. जा.१.६.२०
[१५७] बृ.य. जा.१.६.२१
[१५८] बृ.य. जा.२.१.१
[१५९] बृ.य. जा.२.२.१
[१६०] बृ.य. जा.२.२.२
[१६१] बृ.य. जा.२.२.३
[१६२] बृ.य. जा.२.२.४

राशिर्भवति, तदा जातकोऽपारधनस्य प्राप्तिं करोति, सर्वोपर्युपकारं करोति, स्व–पराक्रमेण नित्यं धनोपार्जनं करोति।[१६३] कन्याराशिर्धनस्था स्यात्, तदा नृपाद् धनं प्राप्यते।हिरण्य–रजत–मणि–मुक्ता–गज–अश्वादीनां नानाविधं वित्तं प्राप्नोति।[१६४] धनस्थाने तुलाराशिर्भवेत्, तदा बहुपुण्यादधिकं धनं लभते। पाषाणजं मृण्मय उत्पन्नं वा भूमित उत्पन्नवस्तुत एवं कर्मद्वारोपलब्धान्नतो धनं प्राप्तं करोति।[१६५] वृश्चिकराशिर्धनस्थाने स्यात्, तदा स जातकः स्वधर्मशीलः, परस्त्रीगामी, कामी, विलासी, स्त्रीष्वासक्तः, विचित्रवाक्यवेत्ता, नित्यं विचित्रवचनस्य स उपयोगं करोति, देवद्विजानां भक्तो भवति।[१६६] धनस्थाने यदि धनुराशिस्तदा धनुर्बा–णादिकार्याद् धनं प्राप्यते। एवं चतुष्पदाढ्यो नानाप्रकारयशोवान्, धर्मयुद्धो–द्भवानेकप्रकारेण धनी भवति।[१६७] मकरराशिर्यदि धनभुवने स्यात्, तदा प्रपञ्ची, खलो धूर्त एवं विविधोपायैर्धनं प्राप्नोति, स्वेच्छातो नृपान् प्रसन्नं करोति, कृषिक्रियया तथा विदेशतो धनं प्राप्तं करोति।[१६८] यदि धनस्थाने कुम्भराशिर्भवेत्, तदा स जातकः फलात् पुष्पादेवं जलोत्पन्नवस्तुतो धनोपार्जनं करोति, साधु–जनानां कृते भोजनकार्यं करोति । महाजनानां परोपकारं च करोति ।[१६९] यदि धनस्थाने मीनराशिः स्यात्, तदा स जातको नियमोपवासादितः पूजापाठाद् धनं प्राप्तं करोति, स्वविद्याप्रभावाद् वा निधिलाभाद् धनं प्राप्यते। माता–पितृद्वारा सञ्चितद्रव्यं प्राप्यते ।[१७०]

---

[१६३] बृ.य. जा.२.२.५
[१६४] बृ.य. जा.२.२.६
[१६५] बृ.य. जा.२.२.७
[१६६] बृ.य. जा.२.२.८
[१६७] बृ.य. जा.२.२.९
[१६८] बृ.य. जा.२.२.१०
[१६९] बृ.य. जा.२.२.११
[१७०] बृ.य. जा.२.२.१२

**धनभुवने ग्रहफलम्**

धनस्थाने यदि सूर्यः स्यात् तदा जातको धन–पुत्र–उद्यमवाहनरहितः, हतबुद्धि–युक्तः, सुजनात् मित्रतां न प्राप्यते । परगृहे निवासं करोति ।[१७१] यदि द्वितीय–स्थाने पूर्णचन्द्रमाः स्थितः, तदा स जातकः सुख–पुत्र–द्रव्ययुक्तः, धनवान्, सुखी, विनम्रः, विनयी भवति। यदि धनस्थाने क्षीणचद्रमाः स्यात्, तदा स्व–खलितवाणीयुतः, निर्धनः, अल्पबुद्धियुक्तः स्यात्।चन्द्रस्य न्यूनाधिकत्वेन फलमपि न्यूनाधिकं भवेत्।[१७२]धनस्थाने यदि भौमः स्यात्, तदा जातको धनहीनः, कुत्सितजनाश्रयं करोति, बुद्धिहीनः, कृपारहितः, मनुष्यणां विरोधी भवति।[१७३] यदि बुधो धनस्थाने स्थितः, तदा जातक उत्तमशीलयुक्तः, विमल–शीलवान्, गुरुवत्सलः, गुरुजनानां प्रीतिं प्राप्नोति, स्वकौशल्येनाधिकं विविधं च सुखं प्राप्तं करोति, विपुलकान्तिवान्, उन्नतियुक्तो भवति।[१७४] बृहस्पतिर्यदि द्वितीयस्थानस्थो भवति, स मनुष्यः श्रेष्ठः, विद्यावान्, गुणवान्, यशस्वी, वैरत्यागी, नित्यमत्यन्तगम्भीरस्वभावयुक्तः, त्यागी, सुशीलः, सर्वत्र वन्द्यः, एवं धनवान् भवति।[१७५] धनस्थाने यदि शुक्रः, तदा स जातक उत्तमभोजनं, उत्तम–अन्नपानादिकृते सर्वथात्यन्तमनुरक्तो भवति। उत्तमवस्त्राभूषणयुक्तः, धनाढ्यः, श्रेष्ठवाहनाढ्य एवं विचित्रविद्यावान् भवति।[१७६] यदि धनस्थाने शनैश्चरः स्यात्, तदा जातको व्यसनाभिभूतः

[१७१] बृ.य. जा.२.३.१
[१७२] बृ.य. जा.२.३.२
[१७३] बृ.य. जा.२.३.३
[१७४] बृ.य. जा.२.३.४
[१७५] बृ.य. जा.२.३.५
[१७६] बृ.य. जा.२.३.६

साधुभिः सज्जनैश्च परित्यक्तः, पश्चाद् देशान्तरे वाहनसुखं राज्यमान्यतां लोके जने बहुमानं प्राप्नोति।[१७७] यदि राहुर्द्वितीयस्थाने भवति, तदा स पुरुषो मुखरोऽतिभावयुक्तः स्वयमेव स्वधनस्य नाशं करोति। मित्रस्य किमपि वचनं वा कथनं न मन्यते।[१७८] द्वितीयस्थाने यदि केतुः स्यात्, तदा स पुरुषो धनधान्यस्य नाशं कुटुम्बे विरोधं प्राप्नोति। नृपाद् धनस्य चिन्ता। मुखे निरन्तररोग उद्भवति। यदि केतुः स्वराश्यां वा शुभग्रह-राशिमध्ये स्थितः, तदा सुखं प्राप्नोति।[१७९]

**धनभवनेशफलम्**

यदि धनेशः प्रथमस्थाने स्थितः स्यात्, तदा स मनुष्यो धनवान्, व्यापार-वृत्तियुक्तः;, कृपणः, अतिभोगी, सुखी भवेत्। तथा नृपद्वारा मानं प्राप्यते । सत्कर्मरतः। तस्य भार्याया नेत्रमतिसुन्दरं भवति।[१८०] यदि द्वितीयेशो धनस्थाने स्यात्, तदा स मनुष्यो धनवान्, लाभवान्, मन्त्री, कुटुम्बयुक्तः, मणिरत्नभोगी, विभूषितः, भोगी, एवं जितेन्द्रियो भवति।[१८१] यदि तृतीयस्थाने धनेशो भवेत्, तदा जातकः खलः, उद्वेगयुक्तः, भ्रातृसुखविहीनो भवति। यदि तृतीयस्थाने धनेशेन सह सूर्योऽपि भवेत्, तदा भ्रातृणां सह वैरं करोति । यदि मङ्गलस्तदा चौरस्तथा यदि शनैश्चरः स्यात्, तदा बन्धुहीनो भवेत्।[१८२] यदि द्वितीये-शश्चतुर्थस्थाने स्यात्, तदा सः पुरुषो धनवान्, मातागुरुजनानां द्रव्यं प्राप्नोति। तेजस्वी, आयुष्यवान्, दीर्घायुर्भवति। यदि धनेशश्चतुर्थस्थाने

---

[१७७] बृ.य. जा.२.३.७
[१७८] बृ.य. जा.२.३.८
[१७९] बृ.य. जा.२.३.९
[१८०] बृ.य. जा.२.४.१
[१८१] बृ.य. जा.२.४.२
[१८२] बृ.य. जा.२.४.३

सौम्यग्रहयुक्तः, तदा इदं फलं लभते। यदि चतुर्थस्थाने धनेशः क्रूरो वा पापग्रहो भवेत्, तदा स जातको दरिद्री, धनहीनः, दुःखी, अनेकरोगयुक्तो भवति।[१८३] यदि धनाधिपः पञ्चमस्थाने स्यात्, तदा जातकः सुतानां, पुत्राणां सौख्यं तथा तद्द्वारा लाभं तथा सर्वसुखं प्राप्नोति। यदि पञ्चमस्थाने धनेशः शुभग्रहयुतः स्यात्, तदा उदार एवं यदि क्रूरेण वा पापग्रहेण युतो भवेत्, तदा सन्तानदुःखी दुष्टसन्तानो जायते।[१८४] यदि द्रव्याधिपः षष्ठगृहे स्यात्, शुभग्रहैर्युतो वा दृष्टः स्यात्, तदा स जातकः शत्रोर्नाशं करोति। सदा सर्वथा धनसञ्चयी भवेत् । एवं यदि द्वितीयेशः क्रूरेण वा पापग्रहेण युतो वा दृष्टो भवेत्, तदा दरिद्री, बहुशत्रुयुक्तः, तथा खलो भवति।[१८५] यदि विवाहस्थाने धनाधिपो भवेत्, तदा जातको रूपवान्, चिन्तान्वितः, संग्रहणीरोगयुक्तः, तथा धनवान् भवति। सदा भार्यया सह विलासे युतः, पुत्रवान् भवति । यदि धनेशः क्रूरग्रहयुतो भवेत्, तदा पुत्रहीनो भवति।[१८६] यदि द्वितीयेशो मृत्युस्थाने गतः, तदाल्पकलही, स्वदेहस्य घातं करोति, स आत्मघाती भवति । स्वमुत्पन्नं कृत्वोपभोगं करोति। भोगवान्, रूपवान्, धनसंपन्नो भावयुतो भवति।[१८७] यदि धनेशो भाग्यस्थाने सौम्यग्रहेण वा शुभग्रहयुतः स्यात्, तदा स जातको दाता, प्रसिद्धः, भाग्यवान्, बलवान् व्रती च भवेत्। सदा पुण्ये प्रीतिवान् भवति । यदि धनेशः क्रूरग्रहयुतः स्यात्, तदा हीनः, दरिद्री, कृपणो भवति ।[१८८] यदि धनेशो कर्मस्थाने स्थितः स्यात्, तदा स जातको राज्यनृपद्वारा मानं प्राप्तं करोति । सुरूपवान् यशस्वी भवति । माता-पितृभक्तः, भोगी भवेत्। यदि धनेशो

[१८३] बृ.य. जा.२.४.४
[१८४] बृ.य. जा.२.४.५
[१८५] बृ.य. जा.२.४.६
[१८६] बृ.य. जा.२.४.७
[१८७] बृ.य. जा.२.४.८
[१८८] बृ.य. जा.२.४.९

दुष्टग्रहैर्युतः स्यात् , तदा मातापितृद्रोही भवेत्।[189] धनेशो यद्येकादशभावे स्यात्, तदा स पुरुषो लक्ष्मीपतिर्धनवान् भवति। राजमन्त्री, व्यवहारे निपुणः, चतुरः, व्यवहारदक्षः, व्यापारयुक्तः, यशस्वी, लाभवान्, भोग्यपरः सुखयुक्तो भवेत् ।[190] यदि द्रव्येशो व्ययस्थाने स्थितः स्यात्, तदा जातको विदेशगमनं करोति। दुष्टात्मा, द्रव्याधिपः, पापरतः, जडात्मा, कापालिको म्लेच्छजनानां संगतिं करोति । क्रूरः, अतिचौरो बलवान् भवेत् ।[191]

**धनभावे दृष्टिफलम्**

धनगृहं यदि सूर्यः पश्यति, तदा पितृधनं प्राप्तं भवति। एवं स योगः पितृनाशकः स्यात्। स्वपराक्रमेणाजीविकां करोति। चतुष्पदात्सुखी, एवं गृहे पीडायुक्तः भवति। ।।१।।[192] चन्द्रो धनस्थाने दृश्यते, तदा उत्तमम्, अतुलम्, कौटुम्बिकसुखं प्राप्यते। स्ववंशस्य वृद्धिं करोति। शरीरे पीडा भवति । अष्टमे वर्षे जलमथवा लोहतो भयं भवेत्।।२।।[193] कुटुम्बगृहं यदि भौमः पश्येत्, तदा कौटुम्बिकसौख्यं न प्राप्यते। दिन–प्रतिदिने द्रव्यस्य व्यय एवं द्रव्यं न्यूनं भवेत्। गुद एवमुदरे व्याधिस्तथा पीडा भवति।।३।।[194] यदि द्वितीयस्थाने बुधः पश्येत्, तदा मनुष्यः सदा धनेन सुखान्वितः, भाग्यवान्, दीर्घायुः, सकलसुखः, सम्पूर्णभोगविलासयुक्तो भवति।।४।।[195] बृहस्पतिर्द्वितीयस्थानं यदि पश्येत्, तदाधिकधनसञ्चयी, अतिभाग्यवान्, स्वजनानां कृते पूर्णसुखं करोति।।५।।[196] यदि धनस्थाने शुक्रो दृष्टिं करोति, तदा प्रतिदिनं धनसुखस्य वृद्धिर्भवति। स

[189] बृ.य. जा.२.४.१०
[190] बृ.य. जा.२.४.११
[191] बृ.य. जा.२.४.१२
[192] बृ.य. जा.२.५.१
[193] बृ.य. जा.२.५.२
[194] बृ.य. जा.२.५.३
[195] बृ.य. जा.२.५.४
[196] बृ.य. जा.२.५.५

जातकः स्वकुटुम्बस्य सुखस्य कृत अधिकोत्साही भवेत्। स निरन्तरं श्रमी भवति । स्वजनस्य तथा स्वहितकारिजनस्य शत्रोर्नाशं करोति ।।६।।[१९७] द्वितीय स्थाने यदि शनैश्चरो यदि दृष्टिं करोति, तदा धनस्य नाशं करोति। स्वजनेन कौटुम्बिकजनेन सह च शत्रुतां करोति। त्रयोदशे वर्षे जलाद् वायुतो कष्टं भयं भवेत्।।७।।[१९८] धनस्थानं यदि राहुः पश्यति, तदा तेन जातकेन कुटुम्बात्सुखं न प्राप्तं भवति। अथवा स कुटुम्बसौख्यं न करोति। अष्टमवर्षे मृत्युर्वा चतुर्दशवर्षे भयं भवति। केतोरपि फलमेवमेव भवति।।८।।[१९९]

**धनभावे ग्रहाणां वर्षसंख्या**

सूर्यस्य दशा सप्तदशवर्षाणि हानिकारकी भवति। चन्द्रस्य दशा सप्तविंशति–वर्षाणि भवति, सा धनकारिणी भवति। भौमस्य नव वर्षाणि भवन्ति। तदा दु:खमेवं रुधिरविकारो भवति। बुधस्य षट्त्रिंशद्वर्षाणि। तदा धनलाभः स्यात्। बृहस्पतेः सप्तविंशतिवर्षाणि भवन्ति । तदा राजतो सन्मानः प्राप्यते। शुक्रस्य षष्टिवर्षाणि स्युः। तदा लक्ष्मीप्राप्तिर्भवति। [२००]

**विचारः**

सूर्यमङ्गलशनैश्चरा यदि धनस्थानं पश्यन्ति, तदा जातको धनहीनो भवेत्। यदि क्षीणचन्द्रमाः पश्यति, तदावश्यं धनहीनत्वं भवेत्।।१।।[२०१] यदि धनस्थाने भौमस्तथा चन्द्रः स्यात्, अथवा चन्द्र एवं शनैश्चरः स्यात्, अथवा शनैश्चरो धनस्थाने स्थितो बुधं पश्यति, तदा धनवृद्धिं स करोति।।२।।[२०२]

---

[१९७] बृ.य. जा.२.५.६

[१९८] बृ.य. जा.२.५.७

[१९९] बृ.य. जा.२.५.८

[२००] बृ.य. जा.२.६.१

[२०१] बृ.य. जा.२.७.१

[२०२] बृ.य. जा.२.७.२

यदि धनस्थानं सूर्य एवं शनैश्चरः पश्यति, तदा निश्चयेन धनप्राप्तिर्भवति। तथा यदि धनभावे शुभग्रहः स्थितः स्यात्, तदा नानाप्रकारेण धनप्राप्ति-र्भवेत्।।३।।[२०३] यदि बृहस्पतिर्धनस्थाने स्थितः, सौम्यग्रहो यदि तं पश्यति, तदा धनप्राप्तिर्भवति। यदि धनस्थाने बुधः स्यात्, तं शुभग्रहाः पश्यन्ति, तदा धनहानिर्भवति।।४।।[२०४] यदि धनस्थाने क्षीणचन्द्रमाः स्यात्, तस्योपरि बुधस्य दृष्टिर्भवेत्, तदा पूर्वसञ्चितधनस्य नाशो भवति, एवं नवीनवित्तप्रतिबन्धनं भवति।।५।।[२०५] धनस्थाने यदि शुक्रः स्यात्, एवं बुधेन दृश्यते, तदा धन-प्रााप्तिर्भवेत्। यदि शुक्रं शुभग्रहा पश्यन्ति, तदा धनस्यातीवप्रााप्ति-र्भवेत्।।६।।[२०६] धनस्थाने पापग्रहाणां दृष्टिरधिका भवेत्, अधिकधनहानिर्भवति, तथा सौम्यग्रहाणां दृष्टिरधिका भवेत्, तदा अधिकधनप्राप्तिर्भवति।।७।।[२०७]

## ३. तृतीयभावं सहजम्

सहजेन तृतीयस्थानमुच्यते, अस्यार्थस्तृतीयस्थानं पराक्रमस्थानं सहजस्थानं च भवति। को ग्रहो सहजस्थाने,कस्तस्य स्वामी, वा कस्य शुभाशुभग्रहस्य तत्र दृष्टिर्भवति, एतत् सर्वं विचारणीयम्। तृतीयस्थाने सहोदरः, दासवर्गः, पराक्रमः, उपजीविका, जनविचारः, एतत् सर्वं विचारयितुं शक्यते।।१।।[२०८] यदि तृतीय-स्थाने मेषराशिः स्यात्, तदा स मनुष्यो द्विजस्य मित्रं, परोपकारे चतुरः, पवित्रः, विद्यावान्, नृपेन पूजितो भवति।।१।।[२०९]

---

[२०३] बृ.य. जा.२.७.३
[२०४] बृ.य. जा.२.७.४
[२०५] बृ.य. जा.२.७.५
[२०६] बृ.य. जा.२.७.६
[२०७] बृ.य. जा.२.७.७
[२०८] बृ.य. जा.३.१.१
[२०९]बृ.य. जा.३.२.१

वृषभराशिस्तृतीयस्थाने स्यात्, तदा स मनुष्यो नरोत्तमः, नृपः, अतिप्रतापी, शूरवीरः, कविः, दानी, ब्राह्मण एवं धनरक्षको भवेत्।।२।।[२१०] तृतीयस्थाने यदि मिथुनराशिः स्यात्, तदा स जातकः सुन्दरयानयुक्तः, स्त्रीवर्गस्य प्रियः, सर्वप्रकारेणोदारः, चेष्टावान्, कुलाधिकः, नृपाणां पूज्यत्तमो भवति।।३।।[२११] सहजभावे यदि कर्कराशिः स्यात्, तदोत्तमसद्गुणयुक्तः, कृषिकर्मकर्ता, धर्म–कथायामनुरुक्तः, सदा शीलवान्, अतिमहत्प्रतिष्ठायुक्तः, मित्रं भवति।।४।।[२१२] तृतीयस्थाने यदि सिंहराशिः स्यात्, तदा स मनुष्यः शूद्रः, परधनस्य लुब्धकः, पापकथायामनुरक्तः, सदा स्वार्थे तत्परः, मनुष्ये निन्दितः, कुमित्रं भवति।।५।।[२१३] कन्याराशिर्यदि सहोदरस्थाने पराक्रमस्थाने वा भवेत्, तदा शास्त्रानुरक्त एवं शीलवान् जातको भवति। नानाविधबहुमित्रयुक्तः, अल्पकोप–युक्तः, अतिथिप्रियः, देवतानामेवं गुरुजनानां भक्तो भवेत् ।।६।।[२१४] तृतीय–स्थाने यदि तुलाराशिः स्यात्, तदा स मनुष्यः पापी मनुष्येण सह मित्रतां करोति। स त्यागी, बालकानां कथानुरक्तः, दासपुत्रधनयुक्तश्च भवेत् ।।७।।[२१५] यदि सहजभावे वृश्चिकराशिः स्यात्, तदा पापयुक्तो नरेन्द्रेण, म्लेच्छेन, कृतघ्नेन, कलहप्रियेण, निर्लज्जेन, तथा रौद्रस्वभावयुक्तेन मनुष्येण सह मित्रतां करोति ।।८।।[२१६] धनराशिर्यदि सहजभावे स्यात्, तदा स मनुष्यः शूरेण, राजसेवकेन, धनवता,धर्मात्मना, प्रसन्नचित्तः, कृपावान्, एवं विद्वाज्जनेन

---

[२१०] बृ.य. जा.३.२.२
[२११] बृ.य. जा.३.२.३
[२१२] बृ.य. जा.३.२.४
[२१३] बृ.य. जा.३.२.५
[२१४] बृ.य. जा.३.२.६
[२१५] बृ.य. जा.३.२.७
[२१६] बृ.य. जा.३.२.८

सह मित्रतां करोति।।९।।[२१७] सहजभावे यदि मकरराशिः स्यात्, तदा निरन्तरसौख्यवान्, स मित्रदेवगुरुप्रेमी, महाधनवान्, पंडितोऽप्रमेयो भवेत्।।१०।।[२१८] तृतीयस्थाने यदि कुम्भराशिः स्यात्, तदा जातकस्य मैत्री व्रतज्ञैः, बहुकीर्तियुक्तैः, क्षमावतैः, सत्यवादिभिः, सुशीलैः, गीतप्रियैः, साधु-सज्जनैः सह भवति, एवं खलैस्तथा दुर्जनमनुष्यैः सहापि मित्रता भवति।।११।।[२१९] यदि मीनराशिस्तृतीयस्थाने स्यात्, तदा स जातको बहु-वित्तयुक्तः, धनवान्, पुत्रवान् , पुण्यवान्, तथा धनयुक्तः, अतिथिप्रियः, सर्वजनानां मङ्गलदायको भवति।।१२।।[२२०]

**ग्रहफलम्**

यदि भातृस्थाने सूर्यः स्थितः स्यात् ,तदा जातको मधुरभाषी, धनवाहनयुक्तः, सत्कर्मी, अनुचरान्वितः, अल्पभातृयुक्तः, एवं बलवान् भवति। ।।१।।[२२१] यदि पराक्रमस्थाने चन्द्रः स्यात्, तदा जातको हिंसकः, गर्वान्वितः, कृपणः, अल्पबुद्धियुक्तः, बन्धुजनानामाश्रयदाता, दयामयरहितो भवति।।२।।[२२२] यदि सहोदरस्थाने मङ्गलो भवति, तदा जातको नृपस्य प्रसन्नताद्वारा उत्तमसुखं प्राप्नोति। कथानुरक्तः एवमुत्तमपराक्रमी, धनवान् भवति किन्तु स भातृसुखं न प्राप्नोति।।३।।[२२३] यदि सहोदरस्थाने बुधः स्यात्, तदा जातकः साहसी, परिवारजनयुक्तः, चित्तशुद्धिरहितः, सौख्यरहितः, चतुरः,

---

[२१७] बृ.य. जा.३.२.९
[२१८] बृ.य. जा.३.२.१०
[२१९] बृ.य. जा.३.२.११
[२२०] बृ.य. जा.३.२.१२
[२२१] बृ.य. जा.३.३.१
[२२२] बृ.य. जा.३.३.२
[२२३] बृ.य. जा.३.३.३

हितकारी, हितकर्ता च भवति।।४।।[224] बृहस्पतिर्यदि तृतीयभावे स्थितः स्यात्, तदा सौजन्य-हीनः, कृपणः, कृतघ्नः, स्त्रीपुत्रेषु प्रीतिरहितः, एवं मन्दाग्निरोगयुक्तः, बलहीनो भवेत्।।५।।[225] यदि तृतीयस्थाने शुक्रो भवेत्, तदा कौटुम्बिकप्रीतिवान्, स्त्री-पुरुषैर्नतः, स्वजनबन्धुविबन्धतां प्राप्तः, सदैव शीघ्रगतिः, विक्रमी एवं पराक्रमी भवेत्।।६।।[226] यदि तृतीयस्थाने शनैश्चरो भवति, तदा स जातको राजमान्यः, शुभवाहनयुक्तः, ग्रामाधिपतिः, बहुपराक्रमशाली, एवं भूरिजनानां पालको भवति।।७।।[227] राहुर्यदि तृतीयस्थाने भवेत्, तदा स गजकेसरीतोऽधिकबलवान्, प्रतापी, जगतः सहोदरो भवति। तथापि प्रतापेऽपि भाग्यं कुतः? यदि केतुर्भवति।।८।।[228] यदि तृतीयस्थाने केतुर्भवति, तदा शत्रुनाशः, विवादः, धनलाभः, मित्रपक्षाद् भयं, बाहुपीडा, सदैव भय एवं मनुष्यद्वारा उद्वेगं प्राप्नोति।।९।।[229]

**सहजभवनेशफलम्**

यदि तृतीयेशो लग्नस्थाने स्थितः, तदा स जातकः स्त्रीस्वादलंपटः, स्वजनभेदयुतः, सेवकः, मित्रैः कटुकरो भवति, एवं पण्डितो भवति।।१।।[230] यदि क्रूरसहजाधिपतिर्धनस्थाने स्थितः, तदा स भिक्षुकः, धनरहितः, अल्पजीवी, बन्धुविरोधी स्यात्। एतत् क्रूरग्रहस्य फलम्। किन्तु यदि

---

[224] बृ.य. जा.३.३.४
[225] बृ.य. जा.३.३.५
[226] बृ.य. जा.३.३.६
[227] बृ.य. जा.३.३.७
[228] बृ.य. जा.३.३.८
[229] बृ.य. जा.३.३.९
[230] बृ.य. जा.३.४.१

सौम्यग्रहोऽधिपतिर्भवति, तदा स जातक ईश्वरो भवति।।२।।[२३१] यदि तृतीयेशस्तृतीयस्थाने भवति, तदा स मनुष्यो नृपमन्त्री, मित्रतायां कुशलः, गुरुपूजने तत्परः, नृपद्वारा परमलाभवान् भवेत्।।३।।[२३२] यदि तृतीयाधिपतिः सुखस्थाने भवेत्, तदा पितुः कृते मोदहर्षकरः, तथा तेषामुदयकरश्च। मात्रा सह वैरं करोति, यदि पापग्रहस्तृतीयाधिपतिः स्यात्, तथा पितृधनस्य भोगकर्ता भवति।।४।।[२३३] यदि तृतीयेशः पञ्चमस्थाने भवति, तदा बहुबान्धवैर्युतः, पुत्रसहोदरपालकः, धनी तथा सुखी भवेत्। विषयभोगी, परकार्यकर्ता, क्षमावान्, ललितमूर्तिः, चिरंजीवी च जायते।।५।।[२३४] यदि तृतीयाधिपतिः शत्रुस्थाने स्थाने स्थितः, तदा नेत्ररोगी, रिपुवान्, सहजसज्जनैः सह दुष्टतां करोति, क्रयविक्रययुक्तः, रोगेण पीडितो भवति।।६।।[२३५] सप्तमे च यदा सहजेशः, तदा स्त्रीवैरी, अल्पपराक्रमी, सुभगसुन्दरा च तस्य स्त्री स्यात्। पापग्रहैर्युवतीरतो भवति।।७।।[२३६] सहजापतिर्यदाष्टमे स्यात्, तदा जातको क्रोधी भवति। खलग्रहैः सहोदरमित्रजनै रहितो भवति। यदा शुभग्रहैः शुभधनयुक्त एवं स्वयमेव प्रचुररोगी च भवति।।८।।[२३७] नवमस्थिते च सहजेशे जातको भ्रातृवर्गे रतः, परन्तु वनाश्रयी, बालयुतः, पराक्रमी, शुभमतिभवति। शुभग्रहैः फलमिदं वर्तते। पापग्रहैः पूर्वोक्तफलस्य विपरीतं ज्ञेयम्।।९।।[२३८] दशमे च यदा

---

[२३१] बृ.य. जा.३.४.२
[२३२] बृ.य. जा.३.४.३
[२३३] बृ.य. जा.३.४.४
[२३४] बृ.य. जा.३.४.५
[२३५] बृ.य. जा.३.४.६
[२३६] बृ.य. जा.३.४.७
[२३७] बृ.य. जा.३.४.८
[२३८] बृ.य. जा.३.४.९

सहजेशः, तदा नृपात्सुखी, पितृजनकुलवृद्धजनाश्रयदाता, बहुसुभाग्ययुतः, नयनोत्सवः, मित्रयुतः, बलवान् (शूरः), शुचिश्च स जातको भवेत्।।१०।।[२३९] सहजाधिपतिग्रहो यद्येकादशभावे स्थितो भवेत्, तदा जातकः शुभलाभपराक्रमी, सुतबन्धुभिरन्वितः, राजमान्यः, विजयी, बहुभोगयुतः, तथा चतुरश्च भवति।।११।।[२४०] व्ययगते च तृतीयेशे, जातको व्ययी, शुचिः, अल्प–पराक्रमी, शुभसमागमे शुभं भवति, परन्तु यदि खलग्रहाः स्युः, तदा मातुरेवं नृपतो भयं भवति।।१२।।[२४१]

**दृष्टिफलम्**

**सूर्यदृष्टिफलम्**

तृतीयभावोपरि भानोर्दृष्टिः स्यात्, तदा सहोदराणां सुखं विनश्यति, पराक्रमेऽभिभवः, एवं स्वभाग्ये नृपाद् भयमत्र न संशयः ।।१।।[२४२]

**चन्द्रदृष्टिफलम्**

चन्द्रविलोकिते सहजभावे जातको भगिनीजन्मकरः, न पराक्रमकर्ता, प्रारम्भे पूर्वधनेन सुखं तथा धनवृद्धिः, पश्चात्सकलार्थदो भवति।।२।।[२४३]

**भौमदृष्टिफलम्**

तृतीयभावे यदा कुजस्य दृष्टिः; तदा पराक्रमे सिद्धिः, देशान्तर एवं राजगृहे च मान्यः, एवं सहोदराणां विनाशकृच्च जायते।।३।।[२४४]

---

२३९ बृ.य. जा.३.४.१०
२४० बृ.य. जा.३.४.११
२४१ बृ.य. जा.३.४.१२
२४२ बृ.य. जा.३.५.१
२४३ बृ.य. जा.३.५.२
२४४ बृ.य. जा.३.५.३

**बुधदृष्टिफलम्**

बुधे वीक्षिते सहजे जातकः सहजसौख्ययुतः, वणिक्कर्मे रतः, चतुरः, उद्यमी तथा तीर्थकरश्च भवति।।४।।[२४५]

**गुरुदृष्टिफलम्**

बृहस्पतिर्यदि तृतीयस्थानं पश्यति, तदा सहजसुखयुतः, पितृधनप्राप्तकर्ता, पितृरहितः, गर्वितः, स्वजनबन्धुरतः, तथा कीर्तिमान्श्च भवति।।५।।[२४६]

**शुक्रदृष्टिफलम्**

तृतीयभावोपरि यदा भृगोर्दृष्टिः, तदा स जातकः सहजभावस्य सम्पूर्णसुखं प्राप्नोति, एवं पुष्टियुतः, कन्योत्पन्नकर्ता, विदेशगतस्तथा नृपपूजितो भवति।।६।।[२४७]

**शनैश्चरदृष्टिफलम्**

पराक्रमोपरि मन्दो दृष्टिं करोति, तदा बहुपराक्रमी, बलवांश्च भवति, अपि च सहजपक्षस्य सौख्यविनाशकः, विपाकदशायामिदं फलं न लभ्यते।।७।।[२४८]

**राहुदृष्टिफलम्**

राहुनिरीक्षिते तृतीयभावे पराक्रमात्सिद्धिं प्राप्नोति, नानार्थसौख्यं, बहुपुत्रदुःखं, चौर–अग्नि–सर्प–नृपाद् भयं न भवति।।८।।[२४९]

---

[२४५] बृ.य. जा.३.५.४
[२४६] बृ.य. जा.३.५.५
[२४७] बृ.य. जा.३.५.६
[२४८] बृ.य. जा.३.५.७
[२४९] बृ.य. जा.३.५.८

**सहजभावे वर्षसंख्या**

सूर्यो विंशतिवर्षपर्यन्तं सुखं करोति, चन्द्रस्त्रीणि वर्षाणि सुखं करोति,भौमः त्रयोदश वर्षाणि किञ्चित् कष्टकरो भवति, बुधो द्वादशे वर्षे वित्तप्राप्तिं करोति, गुरुर्विंशतिवर्षमध्ये मित्रप्राप्तिं कारयति, शुक्रश्च विंशति वर्षपर्यन्तं तीर्थयात्रां प्रकरोति।।१।।[२५०]

**विचारः**

सहजेशः पापग्रहाणां समेतः पापालये स्थितो वा प्रतिलोकितश्च भवेत्, तदा सहजसुखप्राप्तिर्न भवति, तथा पूर्वोक्तस्थितेर्विपरीतावस्थायां सुखं प्राप्नोति।।२।।[२५१] नवांशकग्रहो यदा सहजस्थाने स्थितः, तथा चन्द्र-भौमौ पश्यतः, तदा ग्रहसंख्यानुसारमेव भ्रातृ-भगिन्यो भवन्ति वा दृष्ट्यनुसारं तदेव फलं वदेत्।।३।।[२५२] यदा भौमः शनैश्चरोपरि दृष्टिं करोति,तदा तनुजा नश्यन्ति, एवं गुरु-शुक्रयोः दृष्टिः स्यात्, तदा कुशलतां जानीयात्।।४।।[२५३] सौम्यग्रहेण तथा भौमेन मन्दोपरि दृष्टिर्भवति, तदा सहजानां दृष्टिरुत्तमा, एवं चन्द्रवर्गे भौमस्य दृष्टिः स्यात्, तदा सहोदरा रोगग्रसिता भवन्ति।।५।।[२५४] पुण्यस्थाने यदा सूर्यो वा सूर्यः स्वगृही भवेत्, तदा तस्य जातकस्यानुजानां जीवनविषये सन्देहो भवति। कदाचिदेको भवति, तदा स चिरंजीवी (दीर्घायुः) भूपतिस-दृशश्च भवति।।६।।[२५५] निशाकरो यदा पापयुक्त एवं सहजभावे स्यात्, तदा

[२५०] बृ.य.जा.३.६.१
[२५१] बृ.य.जा.३.७.२
[२५२] बृ.य.जा.३.७.३
[२५३] बृ.य.जा.३.७.४
[२५४] बृ.य.जा.३.७.५
[२५५] बृ.य.जा.३.७.६

योगमिदं भ्रातृनाशकं ज्ञेयम्। यदि शुभग्रहः न पश्यति।।७।।[२५६] सहजभावे यदि खलग्रहाः शुभग्रहैर्युक्ता वा दृष्टास्तदा तस्य जातकस्य बान्धवा वा सहोदरा न भवन्ति। तथा बहुप्रकारेणाग्रजानां पक्षात् विघातयुक्तो भवति।।८।।[२५७] यदा सहजभावः स्वस्वामिना शुभग्रहैर्युक्तो वा दृष्टस्तदा स ज्येष्ठसहोदरस्य सौख्य-भाग्भवति। तथा च स्वस्वामिना युक्तो भवेत्, परन्तु शुभग्रहाणां दृष्टिर्न स्यात्, तदा सहोदरैः कृतं सुखं न प्राप्यते।।९।।[२५८] यदि खलाः प्रबलाः स्युः, एवं तृतीयभावः पापग्रहाणां मध्ये स्थितः, तथा पापग्रहयुक्तो वा दृष्टस्तदाग्रजस्य नाशक एवमनुजानामपि सुखं न प्राप्यते, ज्येष्ठसुखं भवति।।१०।।[२५९] प्रथमो-त्पन्नपुत्रस्य सूर्यो नाशकरो भवति, पश्चादुत्पन्नलघुजातकस्य कृते शनैश्चरो घातकः, लघुबालकस्य हन्ता भौमः,बहवः खलाः स्युः,तदा शुक्रेण सन्त-तिपीडितो भवति।।११।।[२६०]सूर्यो राहुश्च भ्रातृनाशकरो भवति, चन्द्रयुक्तः तदा भगिनीसुखं भवति, षष्ठे भावे शनैश्चरभौमराहवः स्युः, तदा भ्रातृनाशका भवन्ति। तथा गुरुणा सहितेऽप्युप-र्युक्तं फलं प्राप्यते।।१२।।[२६१]

## ४. चतुर्थे सुखभवनम्

चतुर्थभवनस्य विवरणमिदं प्रस्तौमि- अमुकग्रहः,अमुकदेवः, स्वस्वामिना वान्यैः शुभाशुभग्रहैर्युक्तो वा दृष्टो वा न, तस्य निर्णयं करोति।

---

२५६ बृ.य. जा.३.७.७

२५७ बृ.य. जा.३.७.८

२५८ बृ.य. जा.३.७.९

२५९ बृ.य. जा.३.७.१०

२६० बृ.य. जा.३.७.११

२६१ बृ.य. जा.३.७.१२

**तत्र विलोकनीयानि।**

सुहृद्गृहाद् ग्रामः, चतुष्पदः, क्षेत्रम्, उद्यम इत्यादयश्चतुर्थभावाद् विचार–णीयम्। शुभग्रहैर्दृष्टे वा शुभयोगो भवेत्, तदा तेषां वृद्धिर्भवति।[२६२]

सुखस्थाने मेषलग्नं स्थितम्, तदा चतुष्पदानां लाभ एवं स जातकः स्त्रीविलासी च भवति, विचित्रभोगैः प्रचुरान्नैपानैः, पराक्रमोपार्जितसर्वभोगैः सुखं प्राप्यते।।१।।[२६३] सुखस्थे वृषलग्ने सुखप्राप्तिर्भवति, अतिमान्यता, एवं धनं प्राप्यते। शौर्येण, भूपालसेवया, विप्रोपचारैर्धनं प्राप्तं करोति। नियमव्रतनिरतः स भवति, एभिः कृत्यैर्धनं मिलति।।२।।[२६४] सुखस्थे यदि मिथुनराशिस्तदा स जातकः स्त्रीणां सुखं लभते। जलस्यावगाहनं, वनसेवां, प्रभूतपुष्पाम्बरं तथा सेवकांश्च प्राप्नोति।।३।।[२६५] सुखस्थाने यदि कुलीरराशिर्भवति, तदा स मनुष्यः स्वरूपवान्, सुभगः सुशीलश्च भवति, स्त्रीसम्मतः, सर्वगुणसंपन्नो विद्याविनीतो जनवल्लभश्च भवति।।४।।[२६६] कुण्डल्याश्चतुर्थभावे सिंहलग्नं स्यात्, तदा मनुष्येण सुखं न प्राप्यते, स मनुष्यः क्रोधी भवति, कन्याप्रसूतिः, कुटिलप्रसंगः, तथा शीलविवर्जितश्च भवति।।५।।[२६७] कन्याराशिर्यदि सुखस्थाने भवति, तदा कुमित्रसंगः, दुर्मतिरेवमेतैर्धनाश्रयः,पिशुनी (पैशून्यप्रसंगैः लाभः) चौरः, युद्धेन मोहनकर्मरतश्च भवति।।६।।[२६८] यस्य चतुर्थभावे तुलाराशिर्भवति, शुभकर्मणि दक्षः, विद्याविनीतः, सततं सुखी, प्रसन्नचित्तः,वैभवयुक्तो भवति।।७।।[२६९]

---

[२६२] बृ.य. जा.४.१.

[२६३] बृ.य. जा.४.२.१

[२६४] बृ.य. जा.४.२.२

[२६५] बृ.य. जा.४.२.३

[२६६] बृ.य. जा.४.२.४

[२६७] बृ.य. जा.४.२.५

[२६८]बृ.य. जा.४.२.६

[२६९] बृ.य. जा.४.२.७

चतुर्थे स्थानेऽलौ जातकस्तीक्ष्णस्वभाव:, परभीतियुक्त:, प्रभूतसेवी, वीर्यहीन:, चतुर:, पररक्षित:, गुणविहीनश्च भवति।।८।।[२७०] धनलग्नं यदि चतुर्थभावे स्थितम्, तदा जातक: सुखी, युद्धे प्रसन्नचित्त:, कीर्तिमान्, हरिसेवाविचक्षण:, सद्भावसम्पन्नश्च भवति।।९।।[२७१] मकरलग्नं यदि सुखस्थाने भवति, तदा स मनुष्य: सुखभोगी, तापनिविष्ट:, उद्यानवापीतटसंगमेन, मित्रोपचारेण, सुरत–प्राधान्येन च सुखं प्राप्यते।।१०।।[२७२] सुखस्थाने यदि कुंभराशिर्भवति, तदा स जातक: स्त्रीष्वनेकसौख्यं प्राप्तं करोति। मिष्टान्नप्रेमी, फलशाकपत्रभोजी, विदग्धवाक्य:, कटुसहायकारी भवति।।११।।[२७३] सुखस्थाने यदा मीनराशि–र्भवति तदा स जातक: जलाश्रयेण सखं प्राप्नोति। यदि शनैश्चर: स्थित: तदा देवै: प्राप्त यानेन वस्त्रं धनं च लभ्यते।।१२।।[२७४]

**ग्रहफलम्**

सूर्यो यदि चतुर्थस्थाने भवति, तदा स: पुरुष: सुखयुक्तेन यानेन नितान्तं प्रेमपूर्वकं प्रवृत्तो भवति। चलनिवासी च भवति।।१।।[२७५] यदि सुखस्थाने निशाकरो भवति, तदा स जातको जलाश्रयेण धनोपलब्धिं करोति, तथा अङ्गनानाया वाहनस्य सुतस्य च सौख्यं प्राप्यते। एवं द्विजदेवयोर्भक्तश्च भवति।।२।।[२७६] चतुर्थस्थाने यदि भौमो भवति, तदा स जातक: सुहृद–वाहन–यात्रा–प्रवासाद् दु:खं प्राप्नोति। तथा कलेवरे रुग्णो भवति, तथापि बली च जायते।।३।। [२७७]बुधो यदि सुखस्थाने भवति, तदा पुत्रसौख्ययुत:,

---

[२७०] बृ.य. जा.४.२.८
[२७१] बृ.य. जा.४.२.९
[२७२] बृ.य. जा.४.२.१०
[२७३] बृ.य. जा.४.२.११
[२७४] बृ.य. जा.४.२.१२
[२७५] बृ.य. जा.४.३.१
[२७६] बृ.य. जा.४.३.२
[२७७] बृ.य. जा.४.३.३

बहुमित्रयुक्तः, मन्दवादे कुशलः, उत्तमलीलायुक्तः, सुशीलश्च भवति।।४।।[२७८] भूतले च यदा बृहस्पतिर्भवति, तदा स जातकः सत्पुरुषैर्मानं प्राप्तं करोति, प्रसन्नचित्तः, भूपतिमान्यः, सम्पतिवान्, नानाप्रकारस्य धन–वाहनादीनां सुखं प्राप्नोति।।५।।[२७९] मित्रक्षेत्रे यदि भृगुर्भवति, तदा स जातकस्य ग्रामस्य तथा सद्वाहनानां सुखं करोति। स जातको देवतानां वन्दनकर्ता, मानवानां नित्यानन्द–कर्ता च दृश्यते।।६।।[२८०] रसातले यदि शनैश्चरः स्यात्, तदा स जातकः पित्तेन विक्षीणबलः, कुशीलः, शीलवान् च भवति, तथा तस्य चित्ते मनसि मलिनता दृश्यते।।७।।[२८१] मातृभावे यदि सिंहिकासुतः स्यात्, तदा मित्रभ्रातृविनाशकर्ता, पितुर्मातुः क्लेशकारी इति सुनिश्चितं फलं भवति।।८।।[२८२] चतुर्थभावे यदि केतुर्भवेत्, तदा मातृसुखं न प्राप्यते। सुहृद्धर्मेण पितृद्वारा च दुःखं भवति, बन्धु–हीनश्च स भवति। यदि केतुः स्वगृही वा उच्चस्थः, तदा सुखं भवत्यन्यथा सदा व्यग्रतामनुभवति।।९।।[२८३]

**सुखभवनेशफलम्**

१) यदि सुखेशो लग्ने स्यात् – तदा स जातकः सुखवाहनभोगी च भवति । एवं विपुलयशयतश्च भवति। पितृ – मातृसुखमेवं नीरुजं वपुश्च फलं प्राप्यते ।[२८४]

२) द्वितीयभावे च यदि चतुर्थेशः, क्रूरग्रहैर्युतस्तदा पितृविरोधकरः, कृपणः शुचिश्च भवेत् । यदि शुभग्रहैर्युक्तस्तदा पितृभक्तः, धनाश्रयः, शुभयुतः. सर्वशास्त्रपण्डितश्च ज्ञेयः।[२८५]

---

[२७८] बृ.य. जा.४.३.४
[२७९] बृ.य. जा.४.३.५
[२८०] बृ.य. जा.४.३.६
[२८१] बृ.य. जा.४.३.७
[२८२] बृ.य. जा.४.३.८
[२८३] बृ.य. जा.४.३.९
[२८४] बृ.य. जा.४.४.१

३) सुखपतौ सहजे जातकः क्षमावान् , पितृसुहृज्जननीकलिकारः, रथमही–वृषभादिसुखान्वितो भवति। यदा शुभग्रहैर्युक्ते नरो बहुमित्रयुक्तश्च भवति ।[२८६]

४) यदि सुखेशः स्वगृहे स्यात् तदा सः जातको नृपसदृशं धनी, बहुसेवकैर्युतः, पितृसुखयुतः, बहुलं जनमान्यो रथ–गज–अश्वादीनां सुखभाङ्गनरो भवति ।[२८७]

५) सुतगते सुखेशे मनुष्यो दीर्घजीवी, पुत्रवान् एवं बुद्धिमांश्च भवति । शुभग्रहैर्युते सुखभोगी, शास्त्रमर्मज्ञः, शुचिर्लेखकश्च भवति ।[२८८]

६) मातृपतिश्च यदा रिपुगृहे प्राप्तस्तदा स नरो रिपुयुतस्तथाप्य–नर्थविनाशकर्ता भवति । यदि दुष्टग्रहैर्युक्ते वा खलग्रहैर्युक्ते मातुलतो दुःखी, सौम्यग्रहैर्युक्ते धनसंचयी च भवति।[२८९]

७) सुखेशो यदि सप्तमे स्थाने स्यात् , तदा स जातकः सुराकृतिसदृशो धनयुतो स्त्रीजनवल्लभश्च भवति । परन्तु यदि शुभग्रहैर्युक्तः, तदा कामयुक्तः सुभगो भवति । एवं खलैर्युक्तस्तदा कठिनस्वाभावो दुष्टश्च भवेत् ।[२९०]

८) मृत्युस्थाने यदा चतुर्थेशः, तदा सुखयुतः, पितृ – मातृसुखाल्पः, शुभ–ग्रहैर्यदा युक्तः,तदा स वाहननाशक एवं दुष्टग्रहैयुक्तस्तदा समागम–नाशको ज्ञेयः।[२९१]

९) सुखाधिपः यदि नवमे स्थाने स्थितः, तदा बहुभाग्यवान्, पितृधनप्रसन्नः, मित्रमनुष्याणामधिपतिः, तीर्थकरः, व्रतवान् क्षमी, सुनयनः परदेशे सुखी च भवति।[२९२]

---

[२८५] बृ.य. जा.४.४.२
[२८६] बृ.य. जा.४.४.३
[२८७] बृ.य. जा.४.४.४
[२८८] बृ.य. जा.४.४.५
[२८९] बृ.य. जा.४.४.६
[२९०] बृ.य. जा.४.४.७
[२९१] बृ.य. जा.४.४.८

१०) पातालेशो यदि गगने स्थितः, तदा स जातको गृहिणीसुखं, मातृ –पितृणां सुभगः, क्षमी, सुलोचनः, नृपसम्मतो भवति । एवं खलग्रहैः संयुक्त–स्तदा पूर्वोक्तस्य विपरीतं फलं ज्ञेयम् ।[२९३]

११) इन्दुपतौ एकादशे भावे प्राप्ते, जातकः पितृपालकः, विविधधन–लब्धियुतः, सदा शुभकृत्, मातृ – पितृभक्तः, प्रचुरजीवी, रोगवि–वर्जितश्च भवति ।[२९४]

१२) व्ययगतो यदि सुखाधिपः, तदा पितृनाशको दुष्टर्ग्रहैः संयुतः, तदा पिता परदेशे निवसति, शुभग्रहैः संयुतस्तदा पितृसुखकारको भवति।[२९५]

**सुखभावे ग्रहदृष्टिफलम्**

**सूर्यदृष्टिफलम्**

१) चतुर्थे गृहे यदि सूर्यस्य दृष्टिः, तदा स जातकः सुखं, मातृपीडां ददाति,बन्धूनां क्षयः, लाभादिः, सदैव पुण्यमेवं यशः प्राप्नोति ।[२९६]

**चन्द्रदृष्टिफलम्**

२) शीतकरेण विलोकितो यदा सुखभावः, तदा बन्धुक्षयः, यशः, सुखं च भवति । स योगो लाभार्थदः, पुण्ययशप्रदः, वायुप्रदः, पित्रादीनां लोकजनानां च सुखं न प्राप्यते ।[२९७]

**भौमदृष्टिः**

३) यदा कुजेन वीक्षितश्चतुर्थभावः, तदा चतुर्थे वर्षे मातृकष्टं, भूपतेस्तथा भूमितः सुखमेवं दर्शनमात्रेण तस्य शत्रुणां नाशो भवति ।[२९८]

---

[२९२] बृ.य. जा.४.४.९
[२९३] बृ.य. जा.४.४.१०
[२९४] बृ.य. जा.४.४.११
[२९५] बृ.य. जा.४.४.१२
[२९६] बृ.य. जा.४.५.१
[२९७] बृ.य. जा.४.५.२
[२९८] बृ.य. जा.४.५.३

**बुधदृष्टिफलम् –**

४) यदि तुर्यभावस्योपरि ज्ञस्य दृष्टिः स्यात्, तदा मातुसौख्यमुत्तमम्, राज्यादितः सौख्यम्, अर्थवृद्धिः, पितृधनवर्धकः, कामलुब्धश्च जायते।[२९९]

**गुरुदृष्टिफलम्**

५) हिंबुकस्थानं यदि गुरुणा दृष्टं, तदा अतुलं जनकमातृसुखं भवेत् । गजरथ–अश्वाभिर्युतः पण्डितश्च भवति । एवं स्वजनवर्गैः बहुलं यशस्य प्राप्तिर्दृश्यते।[३००]

**शुक्रदृष्टिफलम्**

६) सम्पूर्णदृष्टेः शुक्रो यदि चतुर्थगृहं पश्यति, तदा मातृसुखं करोति। कर्मे तत्परः, द्रव्ययुतो यशस एवं बहुवाहनानां सुखं ददाति ।[३०१]

**शनिदृष्टिफलम्**

७) शनिना वीक्षितो यदि तुर्यभावः, तदा तातमातृमरणं भवति। एवं जन्मतश्चतुर्थ एवं षोडशे वर्षे रोगान्महाभयं भवति ।[३०२]

**राहुदृष्टिफलम्**

८) चतुर्थगृहे यदि राहोर्दृष्टिः, तदा मातृसुखं न करोति, कर्मोदयं म्लेच्छ–कुलात् जयं च प्राप्नोति। तथा तस्योदरे च दारुणा पीडा भवति ।[३०३]

---

[२९९] बृ.य. जा.४.५.४

[३००] बृ.य. जा.४.५.५

[३०१] बृ.य. जा.४.५.६

[३०२] बृ.य. जा.४.५.७

[३०३] बृ.य. जा.४.५.८

**ग्रहवर्षसंख्या**

१) सूर्यश्चतुर्थगृहे चतुर्दशवर्षपर्यन्तं क्लेशकारको भवति । चन्द्रो द्वाविंशति–वर्षे पुत्रं ददाति। भौमोऽष्टमे वर्षे सहोदराणां पीडा। बुधो द्वाविंशतिवर्षे धननाशं करोति। गुरुर्द्वाविंशतिवर्षे धनप्राप्तिः, शुक्रश्चतुर्थे वर्षे सुख–कारकः, भौमसदृशं शनैश्चरो हानिं करोति।[३०४]

**विचार :**

१) यदि सर्वे ग्रहाः सुखभावस्थिताः स्युः, तदा मातृसुखकारका भवन्ति । शुभग्रहाणां दृष्टिः, तदापीदमेव फलं भवति । अशुभग्रहैः पीडा, जठरे वातरोगः शनिग्रहस्य कारणेन भवति ।[३०५]

२) सौम्यग्रहाः पाताले स्युः, तदा हृदयरोगकारकाः, परतापदाः, राजभय–दायकाः, अतिदुःखदाः, पवनगुल्मकरा जलार्तिदा भवन्ति ।[३०६]

३) सुखगृहं यदि भौमेन युतं तथा सहजस्थानं दृष्टग्रहैर्युक्तं तदा वह्निकृता उदरे व्यथा, ज्वरसमीरणवह्निकृतरोगैर्व्यथा भवति ।[३०७]

४) लग्ने जीवः स्यात्, धने शनिः, सहजे च यदा राहस्तदा तस्य माता न जीवति।[३०८]

५) लग्ने व्यये च पापग्रहाः स्युः, धनस्थाने सौम्यग्रहाः, सप्तमे स्थाने पापग्रहाः स्युः, तदा परिवारक्षयकारका भवन्ति ।[३०९]

६) अधिकसौम्यग्रहैः पातालो दृष्टः, तदा मातृधनसुखं प्राप्यते । अधिकक्रूरग्रहाणां दृष्टिः, तदा मातृकष्टं, स्वप्नेऽपि सुखं न दृश्यते ।[३१०]

---

[३०४] बृ.य. जा.४.६.१
[३०५] बृ.य. जा.४.७.१
[३०६] बृ.य. जा.४.७.२
[३०७] बृ.य. जा.४.७.३
[३०८] बृ.य. जा.४.७.४
[३०९] बृ.य. जा.४.७.५

## ५. सुतभवनं पञ्चमम्

पञ्चमभावस्य तदधीशग्रहयोगस्वस्वामिदृष्टिवशात् फलं दृष्टव्यम् । तत्र विलोकनीयानि – बुद्धिः, प्रबन्धः, मन्त्रः, विद्या, विनयः, गर्भस्थितिः, नीतिसंस्थाः– एतेषां पञ्चमभावाद् दैवज्ञैर्विचारः करणीयः ।।१।।[३११]

**लग्नफलम्**

१) सुतस्थाने यदा मेषलग्नं, तदा तस्य मनुष्यस्य प्रायेण धनहीनाः पुत्रा भवन्ति, सुरात्सुखं नित्यं मुदयुक्तः,पापानुरक्तः, कुलवित्तयुक्तश्च भवति ।।१।।[३१२]

२) पञ्चमे च यदा वृषलग्नं, तदा स सुभगाः सुरूपाः कन्याः प्राप्नोति, एवं ताः कन्याः संततिहीनाः, बहुकान्तियुक्तास्तथा सदैव निजपतिधर्मे युक्ता भवन्ति।।२।।[३१३]

३) पञ्चमस्थे च यदा मिथुनराशिः, स मनुष्यः पत्या निजसुखधर्मं प्राप्तं करोति । तस्य सद्गानानि गुणाधिकानि प्रभासमेतानि बलाधिाकनि भवन्ति ।।३।।[३१४]

४) सुतस्था यदा कुलीरराशिः, तदा स जातकः शीतस्वभावः, जलकेलिरक्तः, पुत्रयुतः, यशोधिकाप्राप्तियुतः, स्त्रीवल्लभः कामरसेन युक्तश्च भवति।।४।।[३१५]

५) पञ्चमे भावे यदा सिंहलग्नं, तदा तस्य सुताः क्रूरस्वभावाः, नयनीतिहीनाः, मांसप्रियाः, स्त्रीजनकाः, तीव्रस्वभावाः, विदेशभाजः, क्षुधायुक्ताश्च भवन्ति।।५।।[३१६]

---

[३१०] बृ.य. जा.४.७.६
[३११] बृ.य. जा.५.१.१
[३१२] बृ.य. जा.५.२.१
[३१३] बृ.य. जा.५.२.२
[३१४] बृ.य. जा.५.२.३
[३१५] बृ.य. जा.५.२.४
[३१६] बृ.य. जा.५.२.५

६) कन्यालग्नं यदा सुतस्थं तदा कन्या सन्ततिहीना , पतिप्रिया, पुण्यपरायणा, प्रगल्भा, प्रशान्तपापा, पापरहिता, प्रियभूषणा च भवति।।६।।[३१७]

७) यदा तुलालग्नं पञ्चमगं, तदा सुशीला:, मनोहरा:, सुरूपकान्तियुता:, क्रियावन्त एवं शुभेक्षणाः पुत्रा उत्पन्ना भवन्ति ।।७।।[३१८]

८) शुतस्थे यदा कीटः तदा सः जातकः सुन्दर:, शीलवान्, अज्ञातदोष:, प्रणयेनयुक्ता:, पुत्रोत्पन्नं करोति, एवं स्वयं सततं धर्मे आसक्तः भवति।।८।।[३१९]

९) धनुलग्नं यदा पञ्चमे दृष्टः तदा सः जातकः तस्य पुत्राः दुष्टा:, पापरता:, कुरूपा:, गंभीरचेष्टा धन्यमतियुक्तश्च भवति, प्रसिद्धाः भवन्ति।।९।।[३२०]

१०) सुतस्थाने यदा मकरलग्नं तदा स नरः विचित्र अश्वादीनां युत:, लक्ष्यसाधक:, धानुषकचर्यान्, शत्रुनाशक:, सेवाप्रिय:, राज्ञमान्यपुत्राः भवन्ति।।१०।।[३२१]

११) सुतस्थाने कुंभलग्नं तदा तस्य प्रस्नमूर्ति धनधान्ययुक्ता:, नष्टात्मजा:, नानागुणैः युक्त:, कुपुत्रात् कष्टं च भवति।।११।।[३२२]

१२) पञ्चमे यदा मीनलग्नं तदा सः श्रेष्ठ:, रोगरहित:, स्वरूपवान् पुत्राः भवन्ति, हास्ययुक्त:, स्त्रीसहता च जायते।।१२।।[३२३]

---

[३१७] बृ.य. जा.५.२.६

[३१८] बृ.य. जा.५.२७

[३१९] बृ.य. जा.५.२.८

[३२०] बृ.य. जा.५.२.९

[३२१] बृ.य. जा.५.२.१०

[३२२] बृ.य. जा.५.२.११

[३२३] बृ.य. जा.५.२.१२

**ग्रहफलम्**

**सूर्यफलम्**

पञ्चमस्थः सूर्यः, तदा स्वल्पापत्यं, शैलदुर्गेशभक्तिं प्राप्नोति, स जातकः सौख्येन युक्तः, विविधार्थयुक्तो भवति। तस्य मनुष्यस्य चित्तं सदा भ्रान्तं भवति ।[३२४]

**चन्द्रफलम्**

निशाकरो यस्य कुण्डल्यां पञ्चमभावे स्थितः, तदा स जातको जितेन्द्रियः, सत्यवादी, शरणगतः, धनात्मजाद्युतः, उभयोः सुखं प्राप्नोति, सुसंग्रही, सुशीलश्च भवति ।[३२५]

**भौमफलम्**

पञ्चमभावे यदा भौमस्तिष्ठति, तदा स कफवायुव्याकुलतायुतः, पुत्राद्यैः कलत्रैरेवं मित्रैः सुखं न प्राप्नोति । विलोममतिस्तथा विपुलजययुतो भवति।[३२६]

**बुधफलम्**

सुतसंस्थो बुधः, तदा स जातकं पुत्रसौख्यसहितं, बहुमित्रं, मित्रवादकुशलं सुशीलं सुरुपं च करोति। विषयेऽस्मिन् सन्देहो नास्ति ।[३२७]

**गुरुफलम्**

आत्मजभावे यदा गुरुः, तदा स जातकः सन्मन्त्रपुत्रः, उत्तमशस्त्रसुखयुतः, नानाधनवाहनसहितः, कोमलवाग्विलासयुक्तः, गम्भीरस्वभावश्च भवति ।[३२८]

---

[३२४] बृ.य. जा.५.३.१

[३२५] बृ.य. जा.५.३.२

[३२६] बृ.य. जा.५.३.३

[३२७] बृ.य. जा.५.३.४

[३२८] बृ.य. जा.५.३.५

**शुक्रफलम्**

शुक्रो यदा पञ्चमस्थः, तदा सकलकाव्यकलाभिरलंकृतः, तनयवाहनधनयुतः, सुरपतिगुरुगौरवः, सर्वजनमान्यश्च ।[३२९]

**शनिफलम्**

पुत्रे स्थितो यदि छायापतिः, तदा जातकं सुजर्जरक्षीणशरीरं, धनहीनं, कामहीनं पुत्रभयं च करोति ।[३३०]

**राहुफलम्**

सैंहिकेयो यदि पुत्रस्थाने, तदा बहुकालपर्यन्तं पुत्रप्राप्तिचिन्ता, कुक्षिपीडा च भवति। यदि राहुः स्ववर्गेण दृष्टः, तदा क्षुत्प्रबोधेन जातकस्य मरणं भवति।[३३१]

**केतुफलम्**

यस्य पञ्चमे भावे केतुस्तस्य उदरे वातघातादिकं कष्टं, बुद्धिव्याकुलता, अल्पसंततिः धेनुलाभादियुतश्च भवति ।[३३२]

**सुतभवनेशफलम्**

१) सन्ततिपतिर्यदि लग्ने स्थितः, तदा स जातकः पुत्रसुखी, विद्याप्रेमी, मन्त्रसिद्धियुतः, शास्त्रमर्मज्ञः, सुकर्मकर्ता, रागाङ्गयुक्तः, विष्णुभक्तश्च भवति।[३३३]

---

[३२९] बृ.य. जा.५.३.६
[३३०] बृ.य. जा.५.३.७
[३३१] बृ.य. जा.५.३.८
[३३२] बृ.य. जा.५.३.९
[३३३] बृ.य. जा.५.४.१

२) पञ्चमेशो धने स्थितः, तदा जातकः कुलेशाप्तवित्तः, कुटुम्बविरोधी, हानिकारी, भोगासक्तश्च भवति। यदि पञ्चमेशः शुभग्रहैर्युक्तः, तदा चिरजीवी, पुत्रैर्युत एवं द्रव्यनाथश्च भवति ।[३३४]

३) पञ्चमपतिर्यदा सहोदरे स्यात् तदा विक्रमी, सद्रतः, शान्तियुक्तः, मधुरभाषी च भवति। शुभग्रहैर्युक्तः, तदा शुभप्राप्तिकर्ता ज्ञेयः, मनःकार्यसिद्धियुतः सुखी ,शान्तो नम्रश्च ।[३३५]

४) सुतपतिर्यदा चतुर्थे स्यात्, तदा मातृपितृभक्तः, कुशलः, पूर्वजकर्मकरः, कविजनाय वसु वस्त्रं च ददाति ।[३३६]

५) सुतेशः स्वगृहे स्यात्, तदा मतियुतः, प्रबलवचनः, बहुलमानयुतः, पुरुषोत्तमः, सर्वाधिकः श्रेष्ठश्च भवति ।[३३७]

६) रिपुगतो यदा पञ्चमेशः, तदा रिपुजनाभिरतं, स्थिततनुं, बहुदोषयुक्तं जातकं करोति। दुष्टग्रहैर्युक्तस्तदा धनपुत्रादितो रहितश्च भवति ।[३३८]

७) यदि तनयस्थलनायको मदने गतः, तदा तस्य दयिता सुभगा पुत्रवती च भवति। स्वजनभक्तिरता, प्रियवादिनी, सुजना, शीलवती, तनुमध्यमा च भवति ।[३३९]

८) सुतपतौ निधनस्थले गते, कुवचनाभिरतः, विगताङ्गः,चण्डरुचिः, चपलः, गतधनः, विकलः, शठः, तस्करश्च जायते ।[३४०]

९) तनयाधिपो यदि भाग्ये दृश्यते, तदा स वितर्कः,सकलशास्त्रकलाकुशलः, भूपतिदत्तरथाश्वयुतो नरो भवति।[३४१]

---

[३३४] बृ.य. जा.५.४.२

[३३५] बृ.य. जा.५.४.३

[३३६] बृ.य. जा.५.४.४

[३३७] बृ.य. जा.५.४.५

[३३८] बृ.य. जा.५.४.६

[३३९] बृ.य. जा.५.४.७

[३४०] बृ.य. जा.५.४.८

१०) सुतनायको यदा दशमे स्थितः, तदा नृपतिकर्मकरं, सुखसंयुतं, विविधलाभयुतं प्रवरकर्मकरं वनितारतं च जातकं करोति ।[३४२]

११) सुतेशो यदि एकादशे तिष्ठति, तदा सुखसंयुतं पुत्रमित्रयुतं गानकलाप्रवरं सदैव हि नृपतुल्यकुलं नरं करोति ।[३४३]

१२) पञ्चमेशो यदा व्ययगतस्तदा विशेषव्ययी भवति जातकः। खलग्रहैः स विगतपुत्रसुखः, शुभग्रहैः सुतयुतः, स्वपरदेशगमागमने उत्सुकश्च दृश्यते ।[३४४]

### दृष्टिफलम्

### रविदृष्टिफलम्

पुत्रगृहे सूर्येण निरीक्षिते प्रथमसंततेर्नाशः, पश्चात्सदैव वातपीडा तथा दारासुखाल्पत्वं च जायते ।[३४५]

### चन्द्रदृष्टिफलम्

चन्द्रेण दृष्टे सुतभावे मित्रेण सुखं, स्ववंशे नरेन्द्रतुल्यप्राधान्यं, अन्यदेशे क्रय – विक्रययोराजीविकां च करोति ।[३४६]

### भौमदृष्टिफलम्

भौमस्य दृष्टिर्यदा पञ्चमभावोपरि, तदा प्रथमसंततिनाशकरः, उदरे तीव्राग्निर्भवति, भोजनार्थे च गृहे गृहे भ्रमयति ।[३४७]

---

[३४१] बृ.य. जा.५.४.९
[३४२] बृ.य. जा.५.४.१०
[३४३] बृ.य. जा.५.४.११
[३४४] बृ.य. जा.५.४.१२
[३४५] बृ.य. जा.५.५.१
[३४६] बृ.य. जा.५.५.२
[३४७] बृ.य. जा.५.५.३

**बुधदृष्टिफलम्**

संपूर्णदृष्ट्या बुधः पश्यति पञ्चमभावं, तदा कन्याचतुणां जन्म, पश्चात् पुत्रजन्म भवति, सुकीर्ति– ऐश्वर्ययुतश्च मनुष्यो भवति ।[३४८]

**गुरुदृष्टिफलम्**

सन्तानभावे यदा गुरोः पूर्णदृष्टिः, तदा प्रचुरं सन्तानसौख्यं करोति, सर्वेषु शास्त्रेषु निपुणं लक्ष्मीं, धनं विद्यां चायुर्वृद्धिं करोति ।[३४९]

**शुक्रदृष्टिफलम्**

काव्येन निरीक्षितः सुतभावः, तदा प्रथमं तनयः पश्चात् कन्या जायते। एवं स जातकः द्रविणसंचयी , शास्त्रपाठक एवं सौख्यभाक्च भवति ।[३५०]

**शनिदृष्टिफलम्**

सुतगृहं यदि मन्दनिरीक्षितं, तदा जातकस्य सुतसुखं न करोति। एवं च स्थिरमतिः, यशोयुतः, बहुकालपर्यन्तं रुग्जः, कुलधर्मे रतशच भवति ।[३५१]

**राहुदृष्टिफलम्**

राहू निरीक्षितं यदा सुतगृहं, तदा स तनयसुखं न करोति। तथापि भाग्ययुतः, नृपतेर्जयः प्राप्यते। श्रमकृतापि तस्य विद्या विफला भवति ।[३५२]

**वर्षसंख्या**

रविर्नववर्षाणि वा नवमवर्षे फलप्रदः, चन्द्रः नवमवर्षे पितृभयं करोति, मंगलः षष्ठवर्षेऽग्निभयं ददाति, बुधोऽपि षष्ठवर्षे मातृक्षयं विदधाति, गुरुणा सप्तमे वर्षे मातृलाद् दुःखं, शुक्रदशायां पञ्चमे वर्षे लक्ष्मीप्राप्तिश्च भवति।[३५३]

---

[३४८] बृ.य. जा.५.५.४

[३४९] बृ.य. जा.५.५.५

[३५०] बृ.य. जा.५.५.६

[३५१] बृ.य. जा.५.५.७

[३५२] बृ.य. जा.५.५.८

**विचारः**

१) लग्नाद् द्वितीये वा तृतीये वा प्रथमे लग्नेशः स्यात् तदा पुत्रो भवेत् । चतुर्थे गृहे स्यात्, तदा द्वितीयः पुत्रः पुनः पुत्री, पुनः पुत्रः। तथा ते वित्तयुता भवन्ति।[३५४]

२) सुतगृहोपरि शुभग्रहाणां दृष्टिः स्यात्, वा शुभग्रहैर्युक्तं स्यात्, तदा योगोऽयं संततिदायको भवति, विपरीते स्थिते विपरीतं फलं ज्ञेयम् ।[३५५]

३) पञ्चमभावो यदा निजनाथेन दृष्टः शुभग्रहैर्वा दृष्टः, तदा सन्तानप्राप्तिर्भवति । यदा खलग्रहैर्दृष्टस्तथा स्वस्वामिना न दृष्टः, तदा विपरीतं फलं कथयेत् ।[३५६]

४) यदा द्वादशे, द्वितीये, चतुर्थे लग्ने वा पञ्चमभावे स्थितो लग्नेशः पश्यति तदा प्रथमं सुतस्य जन्म भवति ।[३५७]

५) द्विस्वभावलग्ने शुक्रः,भौमः, चन्द्रश्च स्यात्, तदा आदौ संतानाः भवन्ति। यदि ते धनलग्ने स्युस्तदा आदौ वा पश्चात्सन्ततिदायका न भवन्ति ।[३५८]

६) सन्तानभाव उच्च–नीच–मित्र–शत्रुगृहे स्थिते ग्रहाणां संख्यानुसारं सन्ततिर्वा धनं प्राप्तं भवति।[३५९]

७) पञ्चमभावे यस्य नवांशः स्याद् वा पञ्चमभावे योऽङ्कः स्यात् तस्य संख्यातुल्यं संतानोत्पत्तिर्भवति । यदि पञ्चमभावे शुभग्रहाणां दृष्टिः स्यात् तदा उक्तसंख्यातो द्विगुणा संख्या ज्ञेया। यदि पापग्रहाणां दृष्टिर्वा युतिः, तदा दुःखात्सन्ततिं कथयेत्। एवं यदि मिश्रग्रहाः स्युः, तदा मिश्रफलं ज्ञेयम् ।[३६०]

---

[३५३] बृ.य. जा.५.६.१
[३५४] बृ.य. जा.५.७.१
[३५५] बृ.य. जा.५.७.२
[३५६] बृ.य. जा.५.७.३
[३५७] बृ.य. जा.५.७.४
[३५८] बृ.य. जा.५.७.५
[३५९] बृ.य. जा.५.७.६
[३६०] बृ.य. जा.५.७.७

८) यदा पञ्चमभावे पापग्रहस्य राशिः स्यात्,पापग्रहैर्योगस्तथा एकस्यापि सौम्यग्रहस्य दृष्टिर्न भवेत्, तदा मनुष्यः संतानहीनो भवति ।[३६१]

९) कलत्रे कविः स्यात्, मृगांको दशमे स्यात्, खलग्रहाश्चतुर्थे स्युः, तदापि जातकः सन्तानहीनो भवति ।[३६२]

१०) पञ्चमभावे यदि भृगोर्नवांशः स्यात् तथा भृगोर्दृष्टिः स्यात्, तदा बहुसन्तानोत्पन्ना भवन्ति । इत्थंप्रकारेण चन्द्रस्य नवांशेऽपि बहुसंततिः । एवं पञ्चमेशो यावत्संख्यकनवमांशे स्यात् तावत्संख्याकदासीद्वारा पुत्रोत्पत्तिं कथयेत् ।[३६३]

११) शुक्रचन्द्रयोर्वर्गेण युक्तः पञ्चमभावः स्यात्, शुक्रचन्द्रयोर्वा दृष्टिः पञ्चमभावोपरि स्यात्, एवं समराशिवर्गे स्यात्, तदा कन्या, एवं विषमराशिवर्गे तनयस्य जन्म भवेत् ।[३६४]

१२) शनेः राशिः (मकरकुम्भराशौ) पञ्चमे स्यात् , एवं शनिना युता वा चन्द्रेण दृष्टा तदा दत्तकपुत्रस्य संभावना । एवं पूर्वोक्तयोगमध्ये चन्द्रस्थाने बुधो योगकर्ता स्यात्, तदा क्रीतकपुत्रस्य प्राप्तिः ।[३६५]

१३) शनिवर्गः पुत्रभावे स्थितः, चन्द्रः पश्यति सूर्येण वा दृष्टः, तदा तस्य पुनर्भूर्द्वारा संतानोत्पत्तिर्जायते ।[३६६]

१४) जन्मकाले शनेः षड्वर्गः स्यात्, बुध–रवि –भौमानां दृष्टिः स्यात्, तदा जातकस्य स्त्रीमध्ये अन्यजनैः संतानोत्पत्तिर्भवति । एवं तस्मिन्नेव भावे बुधस्य षड्वर्गः स्यात्, शनिना दृष्टश्च, तदापि पूर्वोक्तं फलं प्राप्तं भवति।[३६७]

---

[३६१] बृ.य. जा.५.७.८

[३६२] बृ.य. जा.५.७.९

[३६३] बृ.य. जा.५.७.१०

[३६४] बृ.य. जा.५.७.११

[३६५] बृ.य. जा.५.७.१२

[३६६] बृ.य. जा.५.७.१३

[३६७] बृ.य. जा.५.७.१४

१५) यदा नवांशकाः पञ्चमभावे स्थिताः, तदा एवं यावत्संख्याकैः पापग्रहैर्दृष्टः, शुभग्रहैर्न वीक्षितस्तदा तत्संख्यायां गर्भनष्टा जायन्ते ।[३६८]

१६) सुतस्थाने भौमस्तदा जन्मसमये पुत्रा नाशमायान्ति । यदा बृहस्पतेर्दृष्टिः स्याद् भृगोर्वा दृष्टिः, तदा प्रथमो पुत्रो जीवति ।[३६९]

१७) धनुलग्नं वा मीनलग्नं पञ्चमे स्यात्, तदा प्रणवसौख्यफलं न प्राप्यते । मृतप्रजाः भवन्ति । एवं गुरुः पञ्चमे स्याद् वा तस्य दृष्टिमात्रेण शुभदायी भवति ।[३७०]

१८) पञ्चमेशः केन्द्रे पापग्रहाणां राशिमध्य उपस्थितः, पापग्रहैर्दृष्टस्तदा श्रेष्ठगतिः, शास्त्रज्ञाता, बलयुतः, लेखने चतुरः, एवं सन्तानदुःखं वर्तते। विष्णुशिवपूजनेन सन्तानोत्पत्तिर्जायते ।[३७१]

१९) सुतेशोऽस्तगतः स्यात्, पापग्रहेण युतो दृष्टो वा , तथा पापयुतचन्द्रः, तदा संततिबाधा भवति ।[३७२]

२०) जन्मकुण्डल्यां यदा तुला–मीन–मेष–वृषलग्ने शुक्रः, तदा धनयुतः, राजमान्यः, कलारसज्ञश्च भवति। त्रयः पुत्रा दीर्घायुयुता भवन्ति। द्वितीये वर्षे किञ्चिदाग्निभयं च भवति ।[३७३]

२१) सुतभवने सूर्यः, तदा एकः पुत्रः, चन्द्रः तदा सुताद्वयम्, भौमेन वंशे प्रधानास्त्रयः पुत्राः, बुधस्तदा पुत्रीचतुष्टमम् भवति।[३७४]

२२) सुतभवने बृहस्पतिः स्यात्, तदा पञ्चपुत्राः शुक्रस्तदा षट् पुत्राः, शनिना गर्भपातः, राहूः स्यात् तदा गर्भो न तिष्ठति ।[३७५]

---

[३६८] बृ.य. जा.५.७.१५
[३६९] बृ.य. जा.५.७.१६
[३७०] बृ.य. जा.५.७.१७
[३७१] बृ.य. जा.५.७.१८
[३७२] बृ.य. जा.५.७.१९
[३७३] बृ.य. जा.५.७.२०
[३७४] बृ.य. जा.५.७.२१

२३) अधिके सौम्यग्रहैर्दृष्टः, तदा सन्तानसुखं, पापग्रहाणामधिका दृष्टिस्तदा संतानपीडा भवति ।[३७६]

## ६. षष्ठं रिपुभवनम्

षष्ठे भावे स्वस्वामी, तद्दृष्टिः, तथा शुभाशुभग्रहाणां सम्बन्धेन पूर्ववद् फलं विचारयेत्।

**विलोकनीयानि**

ज्योतिषशास्त्रस्य ज्ञाता ज्योतिषी रिपुभावाद् अरिसमूहं, क्रूरकर्म, रुग्जचिन्तां, शङ्कां, मातुलस्य च विचारं कुर्यात् ।[३७७]

**लग्नफलम्**

**मेषः**

रिपुस्थाने मेषलग्नं वर्तते, तदा पुंसा चतुष्पदां सौख्यं प्राप्यते। स प्रसन्नचित्तः, रिपुघातकः, तथा तस्य लोके कार्यविनाशो भवति ।[३७८]

**वृषभः**

रिपुस्थाने वृषभस्तदा चतुष्पदार्थे वैरं करोति, स्त्रीसंततिर्भवति, एवं स्वबन्धुवर्गे सङ्गाभिमानो दृश्यते ।[३७९]

**मिथुनः**

रिपुगे तृतीयराशौ स्त्रीजनितं वैरं भवति। पापग्रहेण युतस्तदा वणिग्जनैः नीचैश्चानुसक्तो जायते । (५१)[३८०]

---

[३७५] बृ.य. जा.५.७.२२
[३७६] बृ.य. जा.५.७.२३
[३७७] बृ.य. जा.६.१.१
[३७८] बृ.य. जा.६.२.१
[३७९] बृ.य. जा.६.२.२

**कर्कः**

कुलीरराशौ षष्ठे गृहे सति स मनुष्यः स्वसहजैः सुतादिभिश्च युक्तो भवति। द्विजेन्द्रैरेवं भूपालैः सदृशश्च भवति । सः महाजनैर्विरोधकर्ता जायते।[३८१]

**सिंहः**

कुण्डल्यां रिपुस्थाने सिंहराशिः, तदा सुतेन बधुजनेन च नित्यं वैरं जायते । वराङ्गनाभिरनुरक्तस्यार्तस्य तस्य मनुष्यष्य धननिमित्तं वैरं भवति ।[३८२]

**कन्या**

शत्रुगृहे यदि कन्यालग्नं तदा स्वगृहे वैरं, स्वधर्मस्य साधुजनानां च कार्यकर्ता, स्बन्धुवर्गो निजालयस्थः, तस्याधिको रिपुजनः प्रबलो भवति ।[३८३]

**तुला**

षष्ठभावे तुलालग्नं जायते, तदा स जातकः स्वस्वामिजेन वैरी भवति। तस्य दुश्चारिणिभिः सुतांगनाभिः, आश्रमवर्जितभिर्वैश्याभिस्तस्य समागमो भवति।[३८४]

**वृश्चिकः**

यदा कीटराशिः शत्रुगृहे भवति, तदा सर्पैः, सरीसृपैः, व्यालैर्वैरं भवति। तथा मृग – चौरगणैर्विलासिभिश्च वैरं जायते।[३८५]

---

[३८०] बृ.य. जा.६.२.३
[३८१] बृ.य. जा.६.२.४
[३८२] बृ.य. जा.६.२.५
[३८३] बृ.य. जा.६.२.६
[३८४] बृ.य. जा.६.२.७
[३८५] बृ.य. जा.६.२.८

**धनुः**

शत्रुस्थाने यदा धनुलग्नं, तदा शव्दयुक्तशरैः, मनुष्यैः, हयैः, हस्तिभिरन्य–परवञ्चनैश्च पुनश्चान्यैर्वैरं जायते ।[३८६]

**मकरः**

रिपुस्थे यदा मकरस्तदा मनुष्यैः धनसम्भवैः सदा वैरं भवति। मित्रैः, साधुमहाजनैश्च प्रभूतकालपर्यन्तं गृहसम्भवं वैरं च भवति ।[३८७]

**कुंभः**

घटो यदा रिपुस्थस्तदार्थहेतोर्नराधिपैः, जलाश्रयैर्जीवैः, वापीतडा–गादिभिः,क्षेत्रसंबद्धं सुशीलैर्जनैर्वैरं भवति ।[३८८]

**मीनः**

रिपुगृहे यदि मीनराशिः दृश्यते, तदा सुतवस्तुजातं, स्त्रीणां कृते स्वीयजनान् पितरं च त्यक्त्वान्यैः सह वैरं भवति ।[३८९]

**ग्रहफलम्**

**सूर्यफलम्**

शत्रुक्षेत्रे यदा सूर्यस्तदा जातकः सदैव सौख्ययुतः, शत्रुहन्ता, पराक्रमी, उत्तमरथैर्युतः शूरो मन्त्री च भवति ।[३९०]

**चन्द्रफलम्**

रात्रिनाथो यदा शत्रुगृहे, तदा स जातको मन्दाग्निः, निर्दयः, कोपयुक्तः, लौल्योपेतः, निष्ठुरः, दुष्टचित्तः, रोषावेशकारणेन संजातशत्रुर्भवति ।[३९१]

---

[३८६] बृ.य. जा.६.२.९

[३८७] बृ.य. जा.६.२.१०

[३८८] बृ.य. जा.६.२.११

[३८९] बृ.य. जा.६.२.१२

[३९०] बृ.य. जा.६.३.१

**भौमफलम्**

शत्रुवर्गे यदा भौमस्तदा तस्य जठराग्निरत्यन्तं प्रबलो भवति, शत्रुवर्गे शान्तः, धर्मात्मा, सुपुरुषैः संयुतस्तथा स्वगोत्रजनैः पुण्योदयो भवति ।[३९२]

**बुधफलम्**

रात्रिनाथात्मजो यदि शत्रुगृहे स्यात्, तदा वादे प्रीतियुतः, रोगयुक्तः, निष्ठरात्मा, अनेकशत्रुभिः सन्तप्तचित्तः नित्यालस्यव्याकुलः, अशान्तचित्तो विद्यते ।[३९३]

**गुरुफलम्**

शत्रुसंस्थो बृहस्पतिस्तदा जातकः संगीतनृतादिरतः, कीर्तिप्रियः, निजशत्रुहन्ता, कार्यारम्भकृच्च नरो भवति ।[३९४]

**शुक्रफलम्**

भृगुर्यदि शत्रुगृहे तिष्ठति, तदा स्त्रीणामप्रियः, कामदेवेन हीनः, निर्बलः, शत्रुभयेन युक्तश्च जायते ।[३९५]

**शनिफलम्**

अर्कपुत्रो यदा रिपुगतः, तदा अरिगणोपरि विजयी, गुणज्ञः, स्वज्ञातिजनानां परिपालकः, पुष्टाङ्गयष्टिः, प्रबलोदराग्नियुतो बलिष्ठश्च भवति।[३९६]

---

[३९१] बृ.य. जा.६.३.२
[३९२] बृ.य. जा.६.३.३
[३९३] बृ.य. जा.६.३.४
[३९४] बृ.य. जा.६.३.५
[३९५] बृ.य. जा.६.३.६
[३९६] बृ.य. जा.६.३.७

**राहुफलम्**

राहुर्यदि षष्ठे स्थितः, तदा बलबुद्धिहीनः , धनी, रिपु–अरण्यदाहकः, पितुरेवं एवं मातुलस्य मानसं स्थिरतायुतं न दृश्यते ।[३९७]

**केतुफलम्**

शिखी यस्य कुण्डल्यां षष्ठे स्थितः, तदा शत्रुनाशः, मातुपक्षान्मानभङ्गः, चतुष्पदात्सर्वदा तुच्छं सुखं, निरोगी , किन्तु गुदे लोचने च रोगयुक्तो भवेत्।[३९८]

**रिपुभवनेशफलम्**

१) रिपुपतिर्यदा लग्ने स्यात्, तदा स जातको रिपूणां नाशकरः, वैरभयाद् विगतः, सबलः, स्वजनानां कष्टप्रदः, बहुचतुष्पदवाहनादीनां भोगवान् जायते।[३९९]

२) द्रव्यस्थाने यदा रिपुपतिः, तदा चतुरः, काठिन्येन धनसंग्रहणे क्षमः, निजप्रदप्रवरः, विदितश्चलः, रोगी, कृशवपुयुतश्च नरो जायते ।[४००]

३) रिपुभावेशो यदि सहजगः, तदा स नरः क्षमी, खलरतः, बहुकर्मकः, पितृभुजाप्तधनस्य व्ययकर्ता, बहुलकोपभरः सहजोज्झितश्च भवति।[४०१]

४) अरिपतौ सुखस्थाने गते, जातकः पितृपक्षपालकः, कलहप्रियः, रुग्णः, तातधेनन युतः, बली, जननीसौख्ययुतश्चपलश्च भवति।[४०२]

५) तनयस्थलगे रिपुपतौ, पितृसुताद् अतिविवादकरः, प्रियःभवति । खलग्रहैर्युक्ते नष्टपुत्रः भवति, शुभग्रहैरद्भुतधनस्य प्राप्तिर्भवति ।[४०३]

---

[३९७] बृ.य. जा.६.३.८
[३९८] बृ.य. जा.६.३.९
[३९९] बृ.य. जा.६.४.१
[४००] बृ.य. जा.६.४.२
[४०१] बृ.य. जा.६.४.३
[४०२] बृ.य. जा.६.४.४
[४०३] बृ.य. जा.६.४.५

६) रिपुभावपतिर्यदि स्वगृहे स्यात् तदा रिपुपक्षे कृपणः, खलोज्क्षितः, निजस्थललब्धसुखः, पशुयोषितानुरक्तो भवति ।[४०४]

७) अरिपतौ मदने सति, एवं खलग्रहैर्युक्ते, पुरुषः प्रवरकामयुक्तावनितायुतः, बहुलवादकरः, विषसेवको भवति। शुभ-खगैर्बहुलाभसुतान्वितः स्यात् ।[४०५]

८) षष्ठेशो यद्यष्टमभावे स्थितः, तदा ग्रहणीरोगेण विषधरान् वा मरणं, विषतो भयो वा भवति। चन्द्रो मरणदः,रवी राज्ञो मरणदः, गुरु - चन्द्रौ नयनेषु पीडाकरौ भवतः।[४०६]

९) षष्ठेशो नवमे स्थितः खलग्रहैर्युतः, चरणभङ्गकरः, पापात्मा, विविधवादकरः, प्रियः, एवं स धनसुखसुतरहितः सदा जायते ।[४०७]

१०) अरिगृहापतिर्दशमे स्यात्, तदा स मातृवैरकरः, चपलः, खलश्च भवति। शुभग्रहैर्युक्ते पालकपुत्रयुतः, पितृघाती, जगत्परिपालकश्च भवति ।[४०८]

११) खलग्रहेण युतोऽरिपतिरेकादशे स्यात्, तदा खलसंगमः, रिपुजना-नान्मरणं, नृपचौरजनाद् धनहानिः, किन्तु शुभग्रहेण युतस्तदा शुभं करोति ।[४०९]

१२) यदा व्ययगतश्च षष्टेशः, तदा जातकस्य चतुष्पद-अश्व-धनधान्यादीनां सुखस्य क्षयः, निरंतरं गमनबुद्धिश्च भवति, स दिवानिशं धनोपार्जने कृतोद्यमो स्यात्।[४१०]

**ग्रहदृष्टिफलम्**

**सूर्यदृष्टिफलम्**

सूर्येण दृष्टो रिपुग्रहः, तदा स जातकः सदैव शत्रुनाशकः, दक्षिणनेत्ररुजार्दितो भवति, तथा तस्य जननी- आदिसुखं न भवति ।[४११]

---

[४०४] बृ.य. जा.६.४.६

[४०५] बृ.य. जा.६.४.७

[४०६] बृ.य. जा.६.४.८

[४०७] बृ.य. जा.६.४.९

[४०८] बृ.य. जा.६.४.१०

[४०९] बृ.य. जा.६.४.११

[४१०] बृ.य. जा.६.४.१२

**चन्द्रदृष्टिफलम्**

अरिगृहं यदि चन्द्रः पश्यति, तदा रिपुवृद्धिकरः, कफार्तिरुजः, मदनक्षययुतो भवति। गुरुणा युते बहुरोगयुतो जायते ।[४१२]

**भौमदृष्टिफलम्**

भौमेन दृष्टं स्यात् अरिगृहं, तदा वैरिनाशकरं, मातुलीयसुखनाशकं, लोहशस्त्ररुधिर–अग्निपीडनं भवति।[४१३]

**बुधदृष्टिफलम्**

चन्द्रसुतेन दृष्टो यदा शत्रुवर्गः, तदा मातुलजं विशिष्टं सुखं स्यात्। स जातकः परापवादी, परकर्मकारी, नानारिपुद्वेषकारको भवति ।[४१४]

**गुरुदृष्टिफलम्**

गुरुणा दृष्टो यदा रिपुभावः, तदा स जातको रिपूवृद्धिंक्षयकारकः, स्थितिविनाशकारको भवति। तस्य मातुलजं च सुखं भवति ।[४१५]

**शुक्रदृष्टिफलम्**

शुक्रनिरीक्षिते रिपुगृहे अद्भुतं मातुलसुखं भवति। स्वयं च जनपूजितो भवति। रिपुप्रगतिविनाशकरश्च भवति ।[४१६]

**शनिदृष्टिफलम्**

शनिना दृष्टं यदि रिपुगृहं, तदा मातुलैः शत्रूणां च विनाशकरः, चरणनेत्रमुखेषु व्रणपीडितः, कटुभाषी, ज्वरमेहनिपीडितश्च जायते ।[४१७]

---

[४११] बृ.य. जा.६.५.१

[४१२] बृ.य. जा.६.५.२

[४१३] बृ.य. जा.६.५.३

[४१४] बृ.य. जा.६.५.४

[४१५] बृ.य. जा.६.५.५

[४१६] बृ.य. जा.६.५.६

[४१७] बृ.य. जा.६.५.७

**राहुदृष्टिफलम्**

अरिगृहं यदि राहुः पश्यति, तदा स नरो रिपुविनाशकरः, खलग्रहैर्युतं धनहानिकरं तथा स जातकः सकलसद्गुणवान्विनयान्वितश्च भवेत् ।[४१८]

**ग्रहवर्षसंख्या**

सूर्यः त्रीणि वर्षाणि सुखप्राप्तिं करोति, चन्द्रः षड्वर्षाणि मृत्युकारकः, भौमश्चतुर्विंशतिवर्षाणि पुत्रदायकः, बुधः सप्तत्रिंशद्वर्षाणि शत्रुभयकारकः, गुरुश्चत्वारिंशद्वर्षाणि शत्रुभयप्रदः, शुक्र एकचत्वारिंशद्वर्षाणि शत्रुमृतिकारकः, शनिराहुकेतवश्चतुर्विंशतिवर्षाणि सुतप्राप्तिप्रदः ।[४१९]

**विचारः**

१) शत्रुभावे क्रूरग्रहाणां दृष्टिर्युतिर्वा स्यात्, तदा शत्रूणां नाशः, यदि शुभग्रहाणां दृष्टिः स्यात् , तदा शत्रोरुत्पत्ती रोगवृद्धिश्च भवति ।[४२०]

२) यदा षष्ठे क्रूरग्रहाः, तदा जातकः शत्रुपक्षविमर्दकः भवति। यदि शुभग्रहेण युतस्तदा सदैव रुग्णो भवति। षष्ठे चन्द्रः स्यात्, तदा मृत्युं ददाति ।[४२१]

३) शुभग्रहाः षष्ठे स्युः, तदा जातको रोगी दीर्घायुश्च भवति । तस्य मातुलात्सुखं भवति। किन्तु षष्ठे पापग्रहेण शत्रोरेवं मातुलस्य नाशो भवति ।[४२२]

---

[४१८] बृ.य. जा.६.५.८
[४१९] बृ.य. जा.६.६.१
[४२०] बृ.य. जा.६.७.१
[४२१] बृ.य. जा.६.७.२
[४२२] बृ.य. जा.६.७.३

## ७. सप्तमं जायाभवनम्

अमुकाख्यं, अमुकदैवत्यं, अमुकग्रहयुक्तं, स्वस्वामिना युतं दृष्टं वा एवं शुभाशुभग्रहाणां योगो दृष्टिर्वा –इत्यादीनां विचारं कुर्यात् ।

**विलोकनीयानि**

रणाङ्गणम्, वणिक्क्रिया, स्त्रीविचारः, गमनप्रमाणम्, इत्यादिकं शास्त्रप्रवीणै–र्जायाभावाद् विचारणीयम् ।[४२३]

**लग्नफलम्**–

**मेषः**

कलत्रस्थाने यदि मेषलग्नं, तदा तस्य स्त्रीः क्रूरा चपलस्वभावा पापानुरक्ता, कुजनप्रशंसका, वित्तप्रिया तथा सदैव स्वार्थपरायणा भवति ।[४२४]

**वृषः**

सप्तमे यदा वृषभलग्नं, तदा तस्य स्त्रीः सुरूपदन्ता, प्रणता, प्रशान्ता, पतिव्रता, चारुगुणेन युक्ता, लक्ष्म्याधिका, ब्राह्मणदेवभक्ता च भवेत् ।[४२५]

**मिथुनः**

सति तृतीयराशौ कलत्रे, तदा तस्य कलत्ररत्नं, धनयुक्तं,सुवृत्तम्, रूपान्वितं, सर्वगुणोपपन्नं विनीतवेषं गुरुवर्जितं च भवति ।[४२६]

**कर्कः**

सप्तमे यदा कुलिरराशिः, तदा मनोहरा सौभाग्ययुक्ता, गुणान्विता, कलङ्कहीना सौम्यस्वभावा स्त्री तस्य भवति ।[४२७]

---

[४२३] बृ.य. जा.७.१.१

[४२४] बृ.य. जा.७.२.१

[४२५] बृ.य. जा.७.२.२

[४२६] बृ.य. जा.७.२.३

**सिंहः**

जायाभावे यदि सिंहलग्नं प्राप्तं, तदा तस्य पत्नी तीव्रस्वभावा चपला विहीनवेषा परगृहे रक्ता, वक्रस्वना, स्वल्पसुता कृशशरीरा च भवति ।[४२८]

**कन्या**

सप्तमे यदा कन्या लग्नं, तदा तस्य दारा रूपवत्यः, तनयैर्विहीनाः, सौभाग्य–भोगार्थनीतियुक्ताः, प्रियवंदाः, सत्यवादिन्यः, प्रगल्भाश्च जायन्ते।[४२९]

**तुला**

तुलालग्नं यदा सप्तमे तिष्ठति, तदा तस्य भार्या गुणभर्विताङ्गी, विविधप्रकारा, पुण्यप्रिया धर्मपरा, सुदन्ता, प्रभूतपुत्रा एवं पृथुलाङ्गयुक्ता भवति।[४३०]

**वृश्चिकः**

सप्तमे वृश्चिकलग्नं, तदा तस्य जातकस्य भार्या कृपणा, कलासमेता, सुकुत्सिताङ्गी, प्रणयेन हीना, विविधदौर्भाग्यदोषैर्युक्ता च भवति ।[४३१]

**धनुः**

सप्तमस्थे धनुलग्ने, जातकस्य भार्या पुरुषाकृतिः, सुनिष्ठुरा, भक्तिनीतिहीना, शांतिसौख्येन युता तथा मतिवर्जिता च स्यात् ।[४३२]

**मकरः**

कलत्रे यदा मकरलग्नं, तदा कलत्रं धर्मध्वजं, सत्सुतया समेतम्, पतिव्रतं, चारुगुणेन युक्तं, सुगुणान्वितं सौभाग्य युतं च भवति ।[४३३]

---

[४२७] बृ.य. जा.७.२.४
[४२८] बृ.य. जा.७.२.५
[४२९] बृ.य. जा.७.२.६
[४३०] बृ.य. जा.७.२.७
[४३१] बृ.य. जा.७.२.८
[४३२] बृ.य. जा.७.२.९

**कुम्भः**

सप्तमे घटो यदा तदा तस्य स्त्रीः स्थिरस्वभावा, पतिनिर्दिष्टकर्मे रता, देवद्विजप्रीतियुता, धर्मध्वजा, सर्वसुखैर्युता च भवति ।[४३४]

**मीनः**

मीनराशिः सप्तमे तदा तस्य स्त्रीर्विकारयुता, कुबुद्धिः, कुपुत्रा, अधर्मशीला, प्रणयेन हीना, सदा कलहप्रिया च भवति ।[४३५]

**ग्रहफलम्**

**सूर्यः**

सूर्यो यदि सप्तमे भावे स्यात् , स पुरुषः स्त्रिया विमुक्तः, हतकार्यकीर्तिः, भयरौगैर्युतः, कुशीलश्च, एवं नृपकोपार्तिकृशशरीरश्च जायते।[४३६]

**चन्द्रः**

जायास्थाने यदा चन्द्रो विराजति तदा महाभिमानी, कामातुरः, क्षीणकलेवरः, धनेन विनयेन हीनश्च जायते ।[४३७]

**भौमः**

दारास्थाने यदा भौमः स्थितः, तदा नानार्थव्यर्थचित्तोपसर्गैस्तथाने-कवैरिसमूहैर्मानवं हीनदेहं सततं पत्नीपुत्राणां दुःखैर्दुःखितं करोति ।[४३८]

---

[४३३] बृ.य. जा.७.२.१०

[४३४] बृ.य. जा.७.२.११

[४३५] बृ.य. जा.७.२.१२

[४३६] बृ.य. जा.७.३.१

[४३७] बृ.य. जा.७.३.२

[४३८] बृ.य. जा.७.३.३

**बुधः**

इन्दुजो यदा सप्तमे स्यात्, तदा स जातको विभवैरलङ्कृतः, सत्यवाक्, सुनिरतः, कामिनीकनकसूनुसंयुतश्च भवेत् ।[४३९]

**गुरु**

जायाभावे यदा देवपूज्यः स्यात् , तदा शास्त्राभ्यासे सक्तचित्तः, विनीतः, श्वशुरात्प्राप्तसौख्यः, कार्यकर्ता मन्त्री च भवति ।[४४०]

**शुक्रः**

सप्तमे शुक्रस्तदा स जातकः सर्वासु कलासु कुशलः, जलकेलिकृत्, रतिविलासविधाने विचक्षणो भवति। स अधिकृतां नटीं बहु मन्यते- तस्याः सहृदयतां प्राप्नोति ।[४४१]

**शनिः**

यदा सप्तमे शनैश्चरस्तिष्ठति, तदा तस्य जातकस्य रोगबलहीनता, हीनजनवृत्तिजनमित्रता, धान्यादितो दुःखी च भवति।[४४२]

**राहुः**

कलत्रे यदा सैहिकेयः, तदा स विनाशं करोति। कलत्रादिनाशं, यथा लोहजः कटाहोऽग्नितप्तस्तथा तथैव स मनुष्यो विवादेन शान्तिं न प्राप्नोति।[४४३]

---

[४३९] बृ.य. जा.७.३.४
[४४०] बृ.य. जा.७.३.५
[४४१] बृ.य. जा.७.३.६
[४४२] बृ.य. जा.७.३.७
[४४३] बृ.य. जा.७.३.८

**केतुः**

सप्तमे केतुः स्यात्, तदा तस्य मार्गे क्लेशः भवति। कलत्रादिवर्गे सदैव व्यग्रता भवेत्। सौख्यस्य निवृत्तिश्चौरभयं च भवति । परन्तु यदा कर्कराशिः स्यात् तदा सततं लाभदायको भवति।[४४४]

**सप्तमभवनेशफलम्**

१) मदनपतिर्यदा तनुस्थाने तदा स नरः सकलभोगयुक्तः, गतव्ययः, बहुकलत्रोऽपि न सुखी, जितवैरिजनः, प्रमदोत्सुकश्च भवेत् ।[४४५]

२) सप्तमेशो धनस्थाने स्यात्, तदा तस्य वनिता खलस्वभावा, धनवती, सुखवर्जिता, मदात् स्वपतिवाक्यविलापेकरी, मतिमती, स्वयमात्मजवर्जिता भवति ।[४४६]

३) सप्तमाधिपो यदि तृतीये स्यात्, तदा स पुरुषः स्वयं शूरः, निजबन्धुजनानां प्रियः स्यात्। यदि सप्तमे पापग्रहाः स्युः, तदा तस्य पत्नी देवरपक्षयुता कामदेवमदयुता च भवति ।[४४७]

४) सुखभावे यदा सप्तमेशः प्राप्तः, तदा बलहीनः पितृवैरी, खलश्च भवति। स्त्रीपरिपालकः, स्वपतिवाक्ययुता च तस्य दयिता भवति ।[४४८]

५) सुतस्थाने यदा मदनेशः, तदा स तनयप्रदः, सुभगसौख्यकरः स्यात् , जातकः सुखसंयुतश्च भवति। खलग्रहैर्युक्तस्तदा दुष्टवधः, तनयैर्युतः, दयितापरिपालकश्च भवति ।[४४९]

---

[४४४] बृ.य. जा.७.३.९
[४४५] बृ.य. जा.७.४.१
[४४६] बृ.य. जा.७.४.२
[४४७] बृ.य. जा.७.४.३
[४४८] बृ.य. जा.७.४.४

६) रिपुगते सप्तमेशे जातको गतवयाः, विपदा युतः, रुचिरवपुः, दयिताप्रेमी च स्यात्। यदि पापग्रहैर्युते क्षयरोगयुतश्च भवति।[४५०]

७) सप्तमेशः स्वगृहे स्यात्, तदा स जातको गतरुजः, परमायुषयुक्तश्च दृश्यते। निष्ठुरवाग्रहितः, अतिशीलवान्, कीर्तिवान्, परदारगश्च भवति।[४५१]

८) निधनगे सप्तमाधिपे जातकः कलहकृत्, गृहिणीसुखवर्जितः, निजदयितया न समागमकर्ता, मृतभार्यकश्च स्यात् ।[४५२]

९) मदपतिर्नवमे तदा स जातकः शीलवान् भवति। यदि दुष्टग्रहाः स्युः, तदा नपुंसकः,तथापि तपसि तेजसि च प्रसिद्धः, निजप्रमदया सह वैरकृच्च भवेत्।[४५३]

१०) सप्तमेशो दशमे प्राप्तः, तदा स जातको नृपदोषदः, कुवचनः, कपटी, चपलः भवति। खलग्रहैर्युक्तः, तदा श्वशुरदुष्टजनानामनुचरः, स्वबन्धुजनानां वधूनां च हर्षं न करोति ।[४५४]

११) कलत्रपतिरेकादशे स्यात्, तदा स्वदयिताप्रियकृत् भवति। तस्य पत्नी सती, अनुचरी, सुशीला, कलया पशुमतिरेवं पितृसंशयी भवति, इदं फलं दृश्यते ।[४५५]

१२) व्ययस्थाने गतः कलत्राधिपो व्ययं कारयति। जातकः स्वदयिता-गृहबन्धुविवर्जितः स्यात्। तस्य पत्नी लौल्यवती, खलवाक्यदा, व्ययपरा भवति। तथा गृहे तस्करयुक्तता च भवेत् ।[४५६]

---

[४४९] बृ.य. जा.७.४.५
[४५०] बृ.य. जा.७.४.६
[४५१] बृ.य. जा.७.४.७
[४५२] बृ.य. जा.७.४.८
[४५३] बृ.य. जा.७.४.९
[४५४] बृ.य. जा.७.४.१०
[४५५] बृ.य. जा.७.४.११

**दृष्टिफलम् ।।**

**सूर्यदृष्टिफलम्**

यदि कामभावे सूर्यस्य पूर्णदृष्टिः स्यात्, तदा स मदनक्षयं करोति। जायाविनाशः शत्रुपीडा च भवेत्। पाण्डुवर्णदेहयुतश्च स जातको भवति।[४५७]

**चन्द्रदृष्टिफलम्**

शीतकरेण दृष्टो जायाभावः, तदा सौन्दर्यवती भार्या गुणशालिनी च स्यात्। चापल्युक्ता गजगामिनी परापवादे निपुणा कुशीला च भवति ।[४५८]

**भौमदृष्टिफलम्**

जायागृहे भौमनिरीक्षिते, तदा तस्य पुरुषस्य जायाविनाशं कुरुते। बस्ति–व्याधिनिपीडितश्च भवति, स्त्रीतो विवादः, गमने महाभयं च प्राप्नोति।[४५९]

**बुधदृष्टिफलम्**

चन्द्रसुतेन दृष्टं यदि जायाभवनम्, तदा नित्यं जायासुखं प्राप्यते। दीर्घायुः, अद्भुतगात्रधारी, कलाधिशाली, धनधान्यभोगी च भवेत् ।[४६०]

**गुरुदृष्टिफलम्**

गुरुणा दृष्टो दाराभावस्तदा स जायासुखं, पुत्रसुखं च कारयति। व्यापारलाभो महती प्रतिष्ठा, धनेन धर्मेण संयुतो जातको भवेत् ।[४६१]

---

[४५६] बृ.य. जा.७.४.१२
[४५७] बृ.य. जा.७.५.१
[४५८] बृ.य. जा.७.५.२
[४५९] बृ.य. जा.७.५.३
[४६०] बृ.य. जा.७.५.४
[४६१] बृ.य. जा.७.५.५

**भृगुदृष्टिफलम्**

सुरपूजितेक्षिते कलत्रभावे जायासुखं पुत्रसुखं च भवति। शुभग्रहैर्युक्तस्तदा प्रभूतपुत्रोत्पत्तिं, व्यापारसौख्यं, विमलां मातिं च ददाति।[४६२]

**शनिदृष्टिफलम्**

मन्देन दृष्टो यदि जायाभावस्तदा जायाविनाशो मृत्युतुल्या शरीरे पाण्डुव्यथा, कलेशः, ज्वरातिसारः, एवं संग्रहणीविकारी च जातको भवति।[४६३]

**राहुदृष्टिफलम्**

कलत्रभावं यदि राहुः पश्यति, तदा स जातको मदवृद्धिकरः, सदैव स्ववचनस्य साधने तत्परः, राहोर्महादशायां जायामरणं जायते ।[४६४]

**वर्षसंख्या**

रविदशायां ३४ वर्षे स्त्रीनाशः, पञ्चचशवर्षे चन्द्रो मृत्युतुल्यं कष्टं करोति, भौमेनाग्निभयं सप्तदशे वर्षे, बुधस्य कारणेन सप्तमे वर्षे दयिताप्राप्तिः, गुरुदशायां द्वाविंशतिवर्षे स्त्रीप्राप्तिः, शुक्रेण चतुर्दशे वर्षे पत्नीप्राप्तिः, शनिराहुकेतवश्च स्त्रीनाशं कुर्वन्ति ।[४६५]

१) मूर्तौ सप्तमे भावे शुभग्रहाणां नवांश;, द्वादशांशः, द्रेष्काणो वा स्यात्, तदा स्त्रीप्राप्तिकृते शुभं भूयात् । अनेन योगेन मानवानां शीघ्रं दाराप्राप्तिश्च जायते।[४६६]

---

[४६२] बृ.य. जा.७.५.६

[४६३] बृ.य. जा.७.५.७

[४६४] बृ.य. जा.७.५.८

[४६५] बृ.य. जा.७.६.१

[४६६] बृ.य. जा.७.७.१

२) सप्तमभावे शुभग्रहाणां राशिः स्यात्, शुभग्रहैर्दृष्टं च स्यात् ,तदावश्यमेव पत्नीप्राप्तिर्भवति। योगस्य विलोमेन अशुभं वा विपरीतं फलं ज्ञेयम् । मिश्रग्रहैर्युक्तो वा दृष्टस्तदा स्त्रीप्राप्तिसमये प्रलापो जायते । (७३)[४६७]

३) लग्नाद् व्यये वा रिपुस्थाने सूर्यश्चन्द्रो वा स्यात् , शुभग्रहैर्दृष्टे सप्तमभावे तस्य एकैव वनिता भवेत् ।[४६८]

४) गण्डान्तकालेऽपि सप्तमे भृगुः स्यात्, लग्ने अर्कजः स्यात्, परन्तु यदि दाराभावः शुभग्रहैर्दृष्टो न स्यात्, किं तु पापग्रहेण दृष्टः स्यात्, तदा स जातको वन्ध्यापतिर्भवति।[४६९]

५) द्वादशे वा सप्तमे पापाग्रहाः,पञ्चमे च चन्द्रो यदा, तदा स मनुष्यः कलत्रसुतहीनो भवति ।[४७०]

६) सप्तमे शनेरेवं भौमस्य वर्गः स्यात् , एवं तयोर्दृष्टिः स्यात्, तदा तस्य दयिता व्यभिचारिणी तथा स्वयं च व्यभिचारकर्ता स जायते ।[४७१]

७) शुक्रो बुधश्च सप्तमे स्यात्, तदा स कलत्रहीनो भवति । शुभग्रहेण दृष्टस्तदा वयोविरमे कान्ता लभ्यते ।[४७२]

८) शुक्रश्चन्द्रो बुधश्च- एते त्रयः, द्वौ वा, कोऽप्येकः सप्तमे स्यात् । एवं विषमग्रहैरालोकिताः स्युः, तदा तस्य स्त्री खलस्वभावा ज्ञेया।[४७३]

---

[४६७] बृ.य. जा.७.७.२
[४६८] बृ.य. जा.७.७.३
[४६९] बृ.य. जा.७.७.४
[४७०] बृ.य. जा.७.७.५
[४७१] बृ.य. जा.७.७.६
[४७२] बृ.य. जा.७.७.७
[४७३] बृ.य. जा.७.७.८

९) चन्द्राद् विलग्नाद् वा यदा कलत्रभावे क्रूरग्रहा बलवन्तः स्युः, तदा ते स्त्रीनाशका भवन्ति। चन्द्रमन्दौ च सप्तमे स्याताम्, तदा स्त्रीप्राप्तिं कुर्वतः।[४७४]

१०) कलत्रभावेशो यस्मिन् नवांशे स्यात्, अथवा यत्संख्याकग्रहैर्दृष्टः स्यात्, तावत्संख्याकास्तस्य दयिता भवन्ति । यदि भौमसूर्ययोर्नवांशः स्यात्, एवं बुधसूर्यौ सप्तमे स्याताम् , तदा एकैव वनिता भवति ।[४७५]

११) सप्तमे शुक्रस्य वर्गः स्यात्, तथा शुक्रस्य दृष्टिः स्यात्, तदा बहुजायां प्राप्नोति । भृगुणा दृष्टाः सौम्यगणाः, तदा बहुवनिता प्राप्तिः, पापग्रहेण दृष्टस्तदोपर्युक्तं फलं न भवेत् ।[४७६]

१२) सप्तमे महीसुतः, तदा नरः कान्तावियुक्तो भवति। सप्तमं शनिः पश्यति एवं शुभग्रहैः न दृष्टं तदा पत्नीं लब्ध्वापि म्रियते ।[४७७]

१३) सप्तमे च यदा राहुं द्वौ पापग्रहौ पश्यतः, तदा पत्नीं न प्राप्नोति । यदि प्राप्ता तदा मरणं भविष्यति ।[४७८]

१४) रिपुस्थाने भौमः, जायाभावे राहुः, निधने शनैश्चरः, तदा तस्य भार्या न जीवति।[४७९]

१५) जायाभावसंख्या कर्मभावसंख्यां च एकत्रीकरणे, या संख्या प्राप्ता, तावत्संख्याकगतवर्षपत्द् विवाहो भवेत् । विषयेऽस्मिन् सन्देहो न विद्यते।[४८०]

१६) अथवा पूर्वोक्तयोगे यस्मिन वर्षे गुरोर्दृष्टिः स्यात् , तस्मिन्वर्षे विवाहो भवति, एवं भौमस्य दृष्टेर्वर्षे कष्टं कथयेत् ।[४८१]

---

[४७४] बृ.य. जा.७.७.९
[४७५] बृ.य. जा.७.७.१०
[४७६] बृ.य. जा.७.७.११
[४७७] बृ.य. जा.७.७.१२
[४७८] बृ.य. जा.७.७.१३
[४७९] बृ.य. जा.७.७.१४
[४८०] बृ.य. जा.७.७.१५

१७) कलत्रभावाधिपतिसदृशं कलत्रस्य वयः, एवं अवस्था मूतिश्च ज्ञेया, यदि लग्नेशः सप्तमेशस्य सुहृद्, तदा सा पतिव्रता भक्तियुक्ता च ।[४८२]

१८) सौम्यग्रहाणामधिकेन स्त्रीसुखं, क्रूराधिक्ये च वनितामरणं च ज्ञेयम् ।[४८३]

## ८. अष्टमे मृत्युभवनम्

अमुकदेवग्रहाणां स्थितिः, तस्य ग्रहस्य स्वामी, एवं अन्यग्रहाणां शुभाशुभग्रहेण योगो दृष्टिर्वा–इत्यादिकं दृष्ट्वा भावाभावस्य फलं पूर्ववदेव विचारयेत् ।

**तत्र विलोकनीयानि**

नदी–उत्तारः, अतिविषमदुर्गं, शस्त्रम्, आयुः, संकटं– इदं सर्वं प्राचीनानामा–चार्याणामाज्ञया रन्ध्रस्थानाद् विचारयेत् ।[४८४]

**विविधलग्नराशिफलम्**

१) निधने यदा मेषराशिः प्राप्तं, तदा तस्य विदेशे मरणं, पदार्थनिरीक्षण–चतुरः, महाधनित्वमेवं अतिदुःखितत्वं च भवेत् ।[४८५]

२) वृषभेऽष्टमस्थे कफविकाराद् गृहे मरणं, महाशयाद् वा चतुष्पदाद् रात्रौ दुष्टजनैर्महाभयम् –इदं फलं प्राप्यते ।[४८६]

३) आचार्याणां मतेन यदि रन्ध्रे मिथुनराशिः, तदा कनिष्ठसङ्गान् मृत्युः, अथवा प्लीहारोगाद् वरसंभवाद् वा गुदस्य रोगाद् वा प्रमादान्मरणं जायते ।[४८७]

---

[४८१] बृ.य. जा.७.७.१६
[४८२] बृ.य. जा.७.७.१७
[४८३] बृ.य. जा.७.७.१८
[४८४] बृ.य. जा.८.१.१
[४८५] बृ.य. जा.८.२.१
[४८६] बृ.य. जा.८.२.२
[४८७] बृ.य. जा.८.२.३

४) कुलीरराशिर्यदाष्टमे तदा जलोपसर्गकीटाद् वातिभीषणात् परहस्ताद् विनाशः, विदेशे संस्थस्य मरणं च जायते ।[४८८]

५) अष्टमे यदि सिंहराशिः, तदा तस्य जातकस्य सरीसृपात् सर्पैर्वा मरणं भवेत् । बालकैः, वनाश्रितैश्चौरैर्वा चतुष्पदोत्थो वा विनाशो भवेत् ।[४८९]

६) कन्याराशिरष्टमे तदा तस्य जातकस्य विलासाद् वा स्ववित्ताद् वा नाशो भवेत् । जातकः स्त्रीणां हन्ता, विषमासने रतो भवेत्। तस्य स्वगृहा-श्रिताभिः स्त्रीभिर्मरणं जायते ।[४९०]

७) रन्ध्रे तुलाराशिः, यदा स जातको विषदौषधसेवनेन, निशागमे चतुष्पदाद्वा व्रतोपवासात् प्रलापाद् वा विनाशो भवेत् ।[४९१]

८) वृश्चिकराशिर्यदाष्टमे, तदा तस्य जातकस्य विनाशो मुखरोगात् कीटोत्पन्नरोगैः स्वस्थानसंस्थेन कुलोद्भवैर्वा मनुष्यैर्जायते ।[४९२]

९) यदा चापो रन्ध्रे दृश्यते, तदा निजस्थाननिवासिना मरणं वा गुह्यरोगैर्गु-दोद्भवेन कीटचतुष्पदैर्वातस्य मरणं भवति ।[४९३]

१०) जन्मकुण्डल्या अष्टमे स्थाने, यदा मकरलग्नं दृश्यते, तदा स जातको विद्यान्वितो मानगुणैर्युक्तः, कामी, शूरः, विशालवक्षाः, शास्त्रार्थवेत्ता, सर्वकलासु दक्षश्च भवति ।[४९४]

११) घटे रन्ध्रे वह्निना संगमोत्पन्नरोगात् , नानाव्रणैजलविकारैः, श्रमैः वा परसंश्रयात् तस्य मरणं जायते ।[४९५]

---

[४८८] बृ.य. जा.८.२.४

[४८९] बृ.य. जा.८.२.५

[४९०] बृ.य. जा.८.२.६

[४९१] बृ.य. जा.८.२.७

[४९२] बृ.य. जा.८.२.८

[४९३] बृ.य. जा.८.२.९

[४९४] बृ.य. जा.८.२.१०

१२) निधने मीनलग्नं प्राप्तं, तदा तेषां जातकानामतिसारकृतं कष्टं, पित्त–ज्वरात्, मरुज्ज्वरात्, पित्तप्रकोपात्, शस्त्रेण वा निधनं जायते ।[४९६]

**ग्रहफलम्**

**सूर्यफलम्**

अष्टमे यदा सूर्यः प्राप्तः, तदा स नेत्राल्पत्वं, शत्रुवर्गाभिवृद्धिं, भ्रंशबुद्धिं, अति–रोषितं,अल्पधनयुतं, कृशवपुं च करोति ।[४९७]

**चन्द्रफलम्**

रन्ध्रस्थाने यदा हिमांशुः प्राप्तः, तदा नानारोगैर्युतः, धनरहितः, कृशशरीरः, चौरैररातिभिः संतप्तः, चित्तोद्वेगाद् व्याकुलश्च स मनुष्यो भवति।[४९८]

**भौमफलम्**

मेदिनीनन्दनो यदि रन्ध्रस्थाने स्थितः, तदा नेत्रे वैकल्यता, दुर्भगत्वं, रक्तपीडा, नीचकर्मे प्रवृत्तिः, बुद्धेरान्ध्यं, सज्जनानां च निन्दां करोति ।[४९९]

**बुधफलम्**

जन्मलुण्डल्या निधने यदि चन्द्रसुतस्तिष्ठति, तदा भूपप्रसादात् सर्वसिद्धिं प्राप्नोति, स्ववर्गे सुतरां विरोधी भवति, सर्वप्रयत्नैः परतापहन्ता च स्यात्।[५००]

**गुरुफलम्**

आयुःस्थाने च यदा बुहस्पतिः, तदा स मलिनः, अतिदीनः,, विवेकहीनः, विनयोज्झितः, नित्यालसयुक्तः, क्षीणकलेवरश्च भवेत् ।[५०१]

---

[४९५] बृ.य. जा.८.२.११
[४९६] बृ.य. जा.८.२.१२
[४९७] बृ.य. जा.८.३.१
[४९८] बृ.य. जा.८.३.२
[४९९] बृ.य. जा.८.३.३
[५००] बृ.य. जा.८.३.४

**शुक्रफलम्**

यदाष्टमस्थानगतः सितः, तदा स जातकः प्रसन्नमूर्तिः, नृपलब्धमानः, सदा शङ्कारहितः, सगर्वः, स्त्रीपुत्रचिन्तासहितश्च भवति ।[५०२]

**शनिफलम्**

मृत्युस्थाने यदा भानुसुतो दृश्यते, तदा स कृशशरीरः, दद्रुविचर्चिकारोगयुक्तः, विभवतोद्भवदोषविवर्जितः, अलसतासहितश्च भवेत्।[५०३]

**राहुफलम्**

राहुरष्टमे स्यात्, तदा स पण्डितैर्वन्दितः, अनिन्दितः, सकृद्भाग्यलाभः, सकृद् भ्रंशयुतश्च, तज्जना धनं च जातकं त्यजन्ति , श्रमग्रन्थिरोगैर्युक्तश्च भवति ।[५०४]

**केतुफलम्**

केतुर्यदा निधनगस्तदा स जातकस्य गुदं पीड्यते, एवं यदि वृश्चिक – कन्या – मिथुन – राशिमध्ये स्थितः, तदा जनैर्द्रव्यरोधो भवेत्। तथा मेष – वृषराशौ स्यात् तदा सुतार्थलाभं च करोति।[५०५]

**अष्टमभवनेशफलम्**

१) जन्मलग्ने निधनेशः स्यात्, तदा बहुदुःखकृत्, बहुरुष्टस्तथा विवादकृत् , नृपतेर्धनं लभते, धनमदयुक्तस्तथा बहुदुःखसमन्वितश्च जायते ।[५०६]

---

[५०१] बृ.य. जा.८.३.५
[५०२] बृ.य. जा.८.३.६
[५०३] बृ.य. जा.८.३.७
[५०४] बृ.य. जा.८.३.८
[५०५] बृ.य. जा.८.३.९

२) निधनपतिर्यदि द्वितीये स्थितः, तदा स जातकश्चलजीवितः, बहुशास्त्र–युतोऽपि तस्करः स्यात्। यदा दुष्टग्रहैर्युतस्तदा शुभं न भवेत् । तस्य नृपान् मरणं तथा रुग्णश्च भवति ।[५०७]

३) यदा सहजे गतो रन्ध्रेशः, तदा स्वयं सहजैश्च सुहृज्जनैर्विरोधकरो जायते । कठिनवाक्ये रतः, चलः, दुष्टबान्धवैर्युतो भवति ।[५०८]

४) सुखभावगतो यद्यष्टमेशः, तदा स जनकसंचितवित्तनाशकृत्, रोगयुतः, तथा पितापुत्रयोश्च सदैव कलेशो भवेत् ।[५०९]

५) मरणभावेशो यदि तनयस्थाने तदा सुतमरणं भवति। यदि पापग्रहाः स्युः, तदा अशुभफलं भवति। धूर्तानां प्रमुखः, शुभग्रहैर्युतः, तदा शुभ–फलदायकं फलं भवति। धनादीनां वृद्धिकारको भवति ।[५१०]

६) शत्रुस्थाने गतो यदि रन्ध्रेशः, एवं सूर्यकुजौ स्याताम्, तदा विरोधकरो भवति। चन्द्रबुधौ स्याताम् , तदापि विरोधकरो भवति। सितार्कजौ च यदा भवतः, तदा बहुरोगसमुत्पन्नो स्यात् ।[५११]

७) मदनपतिर्यदि मृत्युस्थाने स्थितः, तदा गुह्यरोगः, कृपणः, खलः, कुशीलजनप्रियः भवति। दुष्टग्रहैर्युतः, तदा स पुरुषो बहुपापविरोधकरः स्यात्। कुजेन सह स्यात्, तदा प्रेमदयाशान्तियुतो भवेत् ।[५१२]

८) मृतेशः स्वगृहे स्यात्, तदा स व्यापारे निपुणः, रोगैर्युतः, शुभवाक्, शुचिः, कितवकर्मकरः, कपटी, स्वकुले कितवकर्मणि विदितश्च दृश्यते।[५१३]

---

[५०६] बृ.य. जा.८.४.१
[५०७] बृ.य. जा.८.४.२
[५०८] बृ.य. जा.८.४.३
[५०९] बृ.य. जा.८.४.४
[५१०] बृ.य. जा.८.४.५
[५११] बृ.य. जा.८.४.६
[५१२] बृ.य. जा.८.४.७

९) भाग्यभावे गतो यद्यष्टमेशः, तदा पापकारी, हिंसकः,सुहृन्मुखपुज्यः, मित्रगणेनेतस्ततो विवर्जितो भवति ।[५१४]

१०) दशमस्थान आश्रितो यद्यष्टमेशः, तदा फलं वर्णितं यत् नृपतिकर्मकरोऽपि खलसमः, प्रियजनै रहितः, कर्मकरः, दुःखितश्च भवेत् ।[५१५]

११) एकादशे निधनपतिः प्राप्तस्तदाल्पपुष्टियुक्तः सुखी च भवति । शुभग्रहैर्युतस्तदा बहुजीवी, दुष्टग्रहैर्युतः, तदा जातको नीचजनैः समन्वितो भवति ।[५१६]

१२) मृतपाधिपो यदि व्यये गतः, तदा स जातकः कठोरवाक्युतः, तस्करकर्मकरः, शठः, विकलकर्मकरः, चतुर एवं दुष्टश्च भवति , कर्पूरभक्षणेन स म्रियते ।[५१७]

**ग्रहदृष्टिफलम्**

**सूर्यदृष्टिफलम्**

सूर्येण दृष्टं यदि निधनं, तदा गुह्यरोगी, पितृव्रतेन विवर्जितः, नृपपीडितः, अन्यस्त्रीषु रतश्च भवति ।[५१८]

**चन्द्रदृष्टिफलम्**

विधोः पूर्णदृष्टिः पतति यदि रन्ध्रस्थाने, तदा जातकं मृत्युतुल्यं करोति, व्याधिभयं, जलादिकष्टं, महारिष्टं, धनधान्यनाशनं च करोति।[५१९]

**भौमदृष्टिफलम्**

कुजेन दृष्टं यद्यष्टमस्थानं, तदा जातकं हर्षयुतं, बस्तिविशेषपीडासहितं, लोहधातोः भययुक्तं, धनधान्यनाशयुतं, मार्गे भयं, तस्करतो धनव्ययश्च भवति।[५२०]

---

[५१३] बृ.य. जा.८.४.८
[५१४] बृ.य. जा.८.४.९
[५१५] बृ.य. जा.८.४.१०
[५१६] बृ.य. जा.८.४.११
[५१७] बृ.य. जा.८.४.१२
[५१८] बृ.य. जा.८.५.१
[५१९] बृ.य. जा.८.५.२

**बुधदृष्टिफलम्**

ज्ञस्य दृष्टिर्यदाष्टमभावोपरि, तदा सः जातको मृत्युनाशकरः, राजवृत्ति-कृषिकर्मजीवितः, अन्यदेशगमनशीलश्च भवेत् ।[५२१]

**गुरुदृष्टिफलम्**

गुरुणा दृष्टो यदि रन्ध्रभावः, तदा स जातकोऽष्टमे वर्षे मृत्युतुल्यं कष्टं प्राप्नोति , नृपाद् वान्यतो भयं स्यात्, द्रव्यहीनो मतिहीनश्च भवति ।[५२२]

**शुक्रदृष्टिफलम्**

शुक्रनिरीक्षितेऽष्टमभावे, तदा तस्य रन्ध्रे सदैव व्याधिवृद्धिर्भवति। कष्टेनार्थः प्राप्यते। सदा कुबुद्धितोऽनर्थकरश्च भवेत् ।[५२३]

**शनिदृष्टिफलम्**

मृत्यभावं शनिः पश्यति, तदा लोहतो वारितो च भयं याति। जन्मतो विंशतिवर्षे मृत्यतुल्यं कष्टं रुग्णो वा स्यात्।[५२४]

**राहुदृष्टिफलम्**

राहुद्वारा दृष्टो यदि पूर्णदृष्ट्या मृत्युभावः, तदा वंशहानिः, बहुदुःखितः, व्याधि-पीडितः, स्वजीवने नीचकर्मकरश्च भवेत्।[५२५]

**ग्रहवर्षसंख्या**

अष्टमे सूर्यमहादशायां वर्षत्रयं मृत्युभयं, चन्द्रदशायां षड्वर्षपर्यन्तं मृत्युभयं, भौमदशायां द्वाविंशतिवर्षं विपत्तिः, बुधदशायां चतुर्दशवर्षं धनधान्यनाशः, गुरुणा एकत्रिंशद्वर्षं रोगः, शुक्रेण दशमवर्षं पराक्रमः।[५२६]

---

[५२०] बृ.य. जा.८.५.३

[५२१] बृ.य. जा.८.५.४

[५२२] बृ.य. जा.८.५.५

[५२३] बृ.य. जा.८.५.६

[५२४] बृ.य. जा.८.५.७

[५२५] बृ.य. जा.८.५.८

१) यदि चतुर्थेऽर्कस्तदुपरि निशीनाथस्य दृष्टिः, एवं शुभग्रहेण न दृष्टः, तदा तस्य मरणं निर्दिशेत् ।[५२७]

२) अष्टमेशो यस्मिन राशौ स्यात् , तस्याङ्कस्य त्रिगुणितं कृत्वा अष्टमाङ्कयोगे कृत आयुः कथयेत् ।[५२८]

३) आदित्यादिग्रहा अष्टमे स्युः, तदा क्रमेणेत्थं प्रकारेण मृत्युर्ज्ञेयः– अनलेन करवालः, ज्वरबलेन, रुजा, क्षुधया, तृषया ।[५२९]

## ९. भाग्यभावो नवमः

अमुकाख्यममुकदैवत्वं, अमुकग्रहयुतं, स्वामिना दृष्टिः, वा शुभाशुभग्रहैः दृष्टमस्ति वा न इत्यादिकं विचारयेत् ।

**विलोकनीयानि**

धर्मक्रियायां मनप्रवृत्तिः, भाग्योदयः, विमलं शीलं, तीर्थप्रयाणं, पुराणैःप्रणयः, नवमभावादिदं सर्वं प्रदिष्टम् ।[५३०]

**लग्नफलम्**

१) धर्मस्थाने मेषलग्नं प्राप्तं, तदा स चतुष्पदार्थं धर्मं प्रकरोति । द्वितीयशब्देन वयं वक्तुं शक्नुमो यत् स तेषां प्रदानेन पोषणेन दया – विवेकेन पशुपालनेन च धर्मं करोति।[५३१]

२) वृषभलग्नं प्राप्तं यदि भाग्यभावे, तदा स धनी प्रभूतवचनः, विचित्रदानरतः – वस्त्रभूषण –आहारप्रदो भवति।[५३२]

---

[५२६] बृ.य. जा.८.६.१
[५२७] बृ.य. जा.८.७.१
[५२८] बृ.य. जा.८.७.२
[५२९] बृ.य. जा.८.७.३
[५३०] बृ.य. जा.९.१.१
[५३१] बृ.य. जा.९.२.१

३) धर्मे यदा तृतीयराशिर्वर्तते, तदा तस्य नरस्य धर्मे मतिः, अभ्यागताद् द्विजभोजनात् नित्यं दीनानामनुकंपाश्रयणेन वा धर्मकार्ये तत्परो भवति।[५३३]

४) कुलीरराशौ धर्मभावे तिष्ठति, स विचित्रव्रतोपवासैधर्मं करोति । अथवा तीर्थाश्रयेण वनसेवया च धर्मं प्रकरोति ।[५३४]

५) नवमे सिंहराशिः, तदा स जातकः परेषां धर्मं करोति, स्वधर्महीनः, सुतीर्थसंपत् -विनयेन हीनश्च भवति ।[५३५]

६) यदि षष्ठराशिर्नवमे स्थिता, तदा स स्त्रीधर्मसेवी भवति। भक्तिहीनः, बहुजिष्णुतायुतः, पाखण्डाश्रितो भूत्वान्यपक्षं स्वीकरोति ।[५३६]

७) धर्मगता तुलाराशिः, तदा स सदा देवद्विजानां परितोषणाद् धर्मेण प्रसिद्धो भवति। जनानुरक्तः, तथाद्भुतः स भवति ।[५३७]

८) कीटराशिर्यदि नवमे स्थिता, तदा पाखण्डधर्मं करोति। जनानां पीडकारकः स्यात्। तथा च भक्त्या परितोषेण च विनम्रो जायते ।[५३८]

९) नवमे यदा नवमा राशिः, तदा द्विजपोषणं धर्मं करोति, स्वेच्छान्वितः, परतोषकः, त्रिलोके प्रसिद्धश्च भवेत् ।[५३९]

१०) नवमे मृगलग्नं स्यात्, तदा धर्मप्रतापी, स्वकुलं समाश्रितः,कामिनीषु विरक्तिश्च दृश्यते ।[५४०]

---

[५३२] बृ.य. जा.९.२.२
[५३३] बृ.य. जा.९.२.३
[५३४] बृ.य. जा.९.२.४
[५३५] बृ.य. जा.९.२.५
[५३६] बृ.य. जा.९.२.६
[५३७] बृ.य. जा.९.२.७
[५३८] बृ.य. जा.९.२.८
[५३९] बृ.य. जा.९.२.९

११) धर्मे यदा कुम्भलग्नं गतं, तदा देवनिर्दिष्ट कर्म करोति। वृक्षारोपणं, आरामवापीनिर्माणे सदैवानुरक्तश्च दृश्यते।[५४१]

१२) धर्माश्रिते मीनराशौ, जातकोऽस्मिंल्लोके विविधं धर्मं करोति। देवालय–आराम–तडाग –तीर्थाटनैः धर्मं करोति, विचित्रयज्ञानां कर्ता च स भवेत्।[५४२]

**ग्रहफलम्**

**सूर्यदृष्टिफलम्**

धर्मगो यदि दिनकरः, तदा स जातको धर्मकर्मनिरतः, पुत्र – मित्रजनैः सदा सुखान्वितः, मातृवर्गे विषमो वैरी वा भवेत् ।[५४३]

**चन्द्रदृष्टिफलम्**

निशिनाथो यदि कुण्डल्या धर्मभावे स्थितः, तदा स जातकः स्त्रीपुत्रधनयुक्तः, पुराणवार्ताश्रवणानुक्तः, सुकर्मरतस्तीर्थपरश्च जायते ।[५४४]

**भौमदृष्टिफलम्**

कुजो यदि नवमे स्यात्, तदा स जातको मनसि हिंसाविधानरतः स्यात्। नृपाद् गौरवोपलब्धिं करोति। क्षीणं च तस्य पुण्यं, स्वल्पमर्थं च प्राप्नोति ।[५४५]

**बुधदृष्टिफलम्**

नवमे च यदा बुधः स्यात्, तदा स जातको ज्ञानी, परोपकारी, चारुजातादरः, दासैः पुत्रैर्धनेन च युक्तः, विशेषहर्षयुक्तः, विकृतियुक्तमनस्कः, धर्मे पुण्ये च तत्परो जायते ।[५४६]

---

[५४०] बृ.य. जा.९.२.१०

[५४१] बृ.य. जा.९.२.११

[५४२] बृ.य. जा.९.२.१२

[५४३] बृ.य. जा.९.३.१

[५४४] बृ.य. जा.९.३.२

[५४५] बृ.य. जा.९.३.३

[५४६] बृ.य. जा.९.३.४

**गुरुदृष्टिफलम्**

गुरुर्यदि भाग्यभावे भवेत्, तदा स जातको राज्ञः सचिवः, श्रेष्ठकर्मे रतः, सकलशास्त्रकलाकलनादरः, व्रतकर एवं द्विजतत्परो भवेत् ।[५४७]

**शुक्रदृष्टिफलम्**

नवमे यदि सिंहः स्यात्, तदा स जातकोऽतिथिगुरुद्विजानां तीर्थे – यात्रायाम्– उत्सवेषु च पूजकः, पितृसंचितधनस्य व्ययकरणेन संतुष्टः , मुनिजनसमवेषधारी, जातिमान्यः, कृशशरीरश्च भवति ।[५४८]

**शनिदृष्टिफलम्**

मन्दो यदि भाग्ये स्यात्, तदा स जातको धर्मकर्मरहितः, विकलाङ्गः, दुर्मतिः, विमना एवं स्थिरचित्तो भवति ।[५४९]

**राहुदृष्टिफलम्**

नवमे च यदा राहुः स्थितः, सोऽङ्गीकृतं व्रतानि वा न व्यजेत् । एवमतिप्रियत्वात् सहोदरान्नैव त्यजेत्। रतिक्रीडायां कौतुकयुतः, शयने बन्दिनस्तं बोधयन्ति ।[५५०]

**केतुदृष्टिफलम्**

धर्मे केतस्तदा स धर्मनाशं करोति। तीर्थे मतिः, म्लेच्छतो लाभो वृद्धिश्च जायते। शरीरे व्यथा, बाहुरोगं च प्राप्नोति। तपोदानतो हास्यवृद्धिं करोति ।[५५१]

---

[५४७] बृ.य. जा.९.३.५

[५४८] बृ.य. जा.९.३.६

[५४९] बृ.य. जा.९.३.७

[५५०] बृ.य. जा.९.३.८

**नवमभवनेशफलम्**

१) नवमाथिपो लग्ने स्यात् , तदा स मनुष्यः सुरविनायकपूजने रतः, सुकृतवान्, कृपणः, नृपकर्मकृत्, स्मृतियुक्तो मितभुक्, शुचिश्च भवेत्।[५५२]

२) भाग्येशे धनगे जातको व्रतयुक्तः, सुशीलसुतः, शुचिः, गतियुत–श्चतुष्पदात्पीडितो, व्यययुतः, शमसाधने तत्परो जायते ।[५५३]

३) नवमेशो यदि सहजस्थाने प्राप्तस्तदा स रूपयुतो जनवल्लभः, स्वजनबन्धुजनानां प्रतिपालकप भवति। यदि जीवितः, तदा विदितकर्म करोति।[५५४]

४) सुकृतेश्वरो यदि पाताले दृष्टः, तदा स पण्डित–बन्धुसुहृत्पितृपूजने तत्परः, तीर्थे रतः, देवभक्तिरतः, निखिलमित्रपरः, समृद्धिमांश्च भवेत्।[५५५]

५) भाग्याधिपो यदि सुतस्थाने प्राप्तस्तदा सुरद्विजेषु भावयुतो भवेत् । स्वभावान्मोहकः, मतिमान् भवति। तथा मधुरवाक्तनयाश्च तस्य जातकस्य भवन्ति ।[५५६]

६) भाग्याधिपतिर्यदा रिपुस्थाने वा षष्ठे स्यात्, तदा स शत्रुयुतः, प्रणयकृद्विकलः, शुचिः, विकृतदर्शने रतः, खलः, निन्दितकीर्तियुतः कथितः ।[५५७]

७) जायाभावे नवमपः स्यात्, तदा वनितासुखं करोति। तस्य वचनानुसारं करणे तस्य स्त्री चतुरा भवति। तथा सा धनयुता, सुकृतकर्मे तत्परा, बहुशीलिनी च भवति ।[५५८]

---

[५५१] बृ.य. जा.९.३.९

[५५२] बृ.य. जा.९.४.१

[५५३] बृ.य. जा.९.४.२

[५५४] बृ.य. जा.९.४.३

[५५५] बृ.य. जा.९.४.४

[५५६] बृ.य. जा.९.४.५

[५५७] बृ.य. जा.९.४.६

८) भाग्यधिपो यदि रन्ध्रे स्यात् , तदा दुष्टवपुः, जनवञ्चकः, खलश्च भवेत्। सज्जनैः संगतिं न प्राप्नोति । शठो विट्सखः. नपुंसकश्च भवति ।[५५९]

९) धर्मेशः स्वगृहे स्यात्, तदा स बन्धुजनयुतः, शुचिः, अरुचिः, विवादकरः, गुरुसुहृदैः स्वजनैश्च प्रीतिकरः स्यात् ।[५६०]

१०) दशमे यदा धर्मपतिः, तदा स नृपकर्मकरः, नृपवित्तयुक्तः, श्रेष्ठकर्मकरः, मातृसेवायां तत्परः, विख्यातकर्मकरः स्यात्।[५६१]

११) धर्माधिपो यद्यायस्थाने स्थितः, तदा कर्मकरः, बहुनायकः, सुकृतवान्, बहुदानपरः, धनपतिः, नृपतेर्बहुवित्तभोजी भवति।[५६२]

१२) व्यये गतो भागयेशः, तदा स जातको मानयुक्तः, परदेशगः, मतियुतः, अतिसुन्दरदेहवान् भवति । खलग्रहेण युक्तः, तदा धूर्तो भवेत् ।[५६३]

**दृष्टिफलम्**

**सूर्यदृष्टिफलम्**

भाग्यस्योपरि यदि सूर्यस्य पूर्णदृष्टिः पतति, तदा सः स्त्रीसौखाद् रहितः, युवा–वस्थायां पापरतः, न तपकरः, वृद्धतनुर्वा जीवनस्य पृष्ठभागे संपूर्णसुखं भवेत्।[५६४]

**चन्द्रदृष्टिफलम्**

धर्मस्थानं यदि शशिना दृष्टं, तदान्यदेशं विचरणं कृत्वा राजपुत्रो भवति, बन्धुजनैः सौख्यं प्राप्नोति, दया–द्रव्यहीनः स क्वचिद् यशः प्राप्नोति ।[५६५]

---

[५५८] बृ.य. जा.९.४.७
[५५९] बृ.य. जा.९.४.८
[५६०] बृ.य. जा.९.४.९
[५६१] बृ.य. जा.९.४.१०
[५६२] बृ.य. जा.९.४.११
[५६३] बृ.य. जा.९.४.१२
[५६४] बृ.य. जा.९.५.१

**भौमदृष्टिफलम्**

कुजेन दृष्टं यदि धर्मभावस्तदा भाग्यवृद्धि करोति, शालकेन सह सत्यनाशनं, धर्मयुक्तोऽप्यतीवोग्रः, पश्चात् सुखं वर्तते ।[५६६]

**बुधदृष्टिफलम्**

भाग्यस्थानं यदि चन्द्रात्मजः पश्यति, तदा पुत्रसौख्ययुतः, भाग्ययुतश्च भवेत्। परदेशस्थराजपूजितः, सततं सुखी च भवति।[५६७]

**गुरुदृष्टिफलम्**

देवगुरुणा दृष्टं यदि भाग्यस्थानं, तदा धर्मवृद्धिः, सुखराज्यकामः, शास्त्रेषु नैपुण्यं, निर्गुणः, सदा राजधनयुतश्च स्यात् ।[५६८]

**शुक्रदृष्टिफलम्**

भार्गवेन दृष्टो यदि भाग्यभावः, तदा तस्य जातकस्य भाग्यवृद्धिर्भवति, अन्यदेशं गत्वा आजीविकां प्राप्नोति, अन्यदेशनृपैर्जयं प्राप्नोति।[५६९]

**शनिदृष्टिफलम्**

यदि भाग्यस्थानं शनिः पश्यति, तदा तस्य जातकस्य भाग्यवशतो यशो भवति, बन्धुहीनः, परदेशगतः, धर्महीनः, पराक्रमी च भवेत् ।[५७०]

**राहुदृष्टिफलम्**

भाग्यस्योपरि राहोर्दृष्टिः स्यात्, तदा स नववधूषु विलासयुतः, निजसहोदरतो–ऽतिपीडितः, सुतसुतादितोऽर्थयुतः, सौख्ययुतश्च दृश्यते ।[५७१]

---

[५६५] बृ.य. जा.९.५.२
[५६६] बृ.य. जा.९.५.३
[५६७] बृ.य. जा.९.५.४
[५६८] बृ.य. जा.९.५.५
[५६९] बृ.य. जा.९.५.६
[५७०] बृ.य. जा.९.५.७
[५७१] बृ.य. जा.९.५.८

**वर्षसंख्या**

सूर्यवर्षदशायां नववर्षं तीर्थधर्मं करोति। चन्द्रे विंशतिवर्षमध्ये तीर्थकरः। भौमस्य दशायां चतुर्दशवर्षं वातभयं भवेत् । बुधादेकोनत्रिंशद् वर्षं मातृकष्टं मरणं वा । गुरुणा पञ्चदशवर्षं पित्रारिष्टं मृत्युर्वा । शुक्रेण वर्षद्वयं लक्ष्मी–प्राप्तिः। शनि–राहु–केतुभिश्चतुर्दशवर्षं तातभयं भवति।[५७२]

१) जन्मलग्नाद् वा चन्द्रलग्नान्नवमभावो भाग्यभावो विद्यते । यदि सः स्वस्वामीयुतो दृष्टो वा, तदा निजदेशे भाग्योदयो ज्ञेयः। यद्यन्यग्रहेण युतो दृष्टो वा, तदा परदेशे भाग्योदयो भवति। यदि योगकारकग्रहः स्वोच्चे, मूलत्रिकोणे वा स्थाने स्थितः, तदा भाग्योदयो भवति । बलहीनो यदि तदात्यन्तं दुःखं प्राप्नोति ।[५७३]

२) भाग्येशः स्वगृहे स्यात्, अथवा बलवान् भूत्वा नवमगृहं पश्यति, तदा स जातको भाग्ययुतो भवति। विलासयुक्तो बहुलार्थयुक्तश्च जायते ।[५७४]

३) जन्मसमये भाग्येशः स्वगृहे स्यात्, एवं शुभग्रहैर्दृष्टः, तदा स जातको भाग्यशाली, स्वकुले तथैव प्रतिष्ठितो भवति, यथा मानसरोवरे हंसः।[५७५]

४) अर्ककुजौ च यदि पूर्णचन्द्रेण युतौ, एवं तौ बलिनौ भूत्वा भाग्ये स्थितौ, तदा स वंशानुमानान् नृपस्तस्य सचिवश्च स्यात्। एवं शुभग्रहैर्दृष्टौ तदा विशेषत इदं फलं भवति ।[५७६]

५) भाग्यस्थाने यदि कोऽपि ग्रहः स्वोच्चे स्थितः, तदा लक्ष्मीयुतं कुरुते । यदि स शुभग्रहैर्दृष्टः, तदा भूपालगजादिविलासयुक्तो भवति ।[५७७]

---

[५७२] बृ.य. जा.९.६.१
[५७३] बृ.य. जा.९.७.१
[५७४] बृ.य. जा.९.७.२
[५७५] बृ.य. जा.९.७.३
[५७६] बृ.य. जा.९.७.४

६) सूर्यस्य द्वाविंशति वर्षाणि, चन्द्रस्य चतुर्विंशतिवर्षाणि, भौमस्याष्टा-विंशतिवर्षाणि, बुधस्य द्वात्रिंशद्वर्षाणि, गुरो षोडश वर्षाणि, शुक्रस्य पञ्चाविंशतिवर्षाणि, शनेः षट् त्रिंशद्वर्षाणि क्रमेण यस्मिन् स्थाने प्राप्ते तस्मिन् वर्षे लाभादिफलं कुर्वन्ति ।[५७८]

## १०. दशमभावविचारः

दशमे कर्मभवनम्, देव-ग्रहयोग-निजस्वमिना दृष्टं न वा , शुभाशुभग्रहाणां दृष्टिः प्राप्ता न वा -इत्यादिकं पूर्ववत् जानीयात् । व्यापारः, मुद्रा, नृपमानः, राज्यप्रयोजनं, पितुर्महत्पदप्राप्तिः -एतत् सर्वं दशमभावाद् विचारणीयम् ।[५७९]

**लग्नफलम्**-

१) कर्मगृहे यदा मेषलग्नं, तदा स प्रवरं कर्म करोति । सुहृष्टं, पिशुनं, नृपानुरक्तं, निन्दितं तं जानीयात् । तथा लोके साधुजनैर्मानं प्राप्नोति।[५८०]

२) दशमे वृषभलग्नं दृश्यते, तदा स जातको व्ययात्मकः, साधुजनानु-कम्पयुतः, द्विज - देव - अतिथीनां पूजकः, ज्ञानात्मकः, सतां पुंसां प्रीतिकरश्च जायते।[५८१]

३) मिथुनलग्नं कर्मस्थाने प्राप्तं, तदा स गुरुभिः प्रदिष्टं कर्म करोति । कीर्तिसहितः, जनानां प्रीतिकरः, कान्तियुक्तः, कृषि - व्यापार कर्मणि निरतश्च भवेत् ।[५८२]

---

५७७ बृ.य. जा.९.७.५
५७८ बृ.य. जा.९.७.६
५७९ बृ.य. जा.१०.१.१
५८० बृ.य. जा.१०.२.१
५८१ बृ.य. जा.१०.२.२
५८२ बृ.य. जा.१०.२.३

४) कुलीरराशौ पितृस्थाने प्राप्ते, प्रपात – वापी–तडागादीनां निर्माणे रतः, विचित्राणि वापीवृक्षादीनि च रोपयति, तस्मिन् सदैव रतः स्यात् ।[५८३]

५) अन्तरिक्षे यदा सूर्यस्य राशिः, तदा स रौद्रः, पापयुक्तः, विकृतकर्मकरः, पुरुषार्थेन प्राप्तिकरः, नित्यं वधबन्धनात्मकं निन्दितं कर्म करोति ।[५८४]

६) आकाशे यदा कन्या लग्नं प्राप्तं, तदा कर्मज्ञः स्त्रीराजभारो, वेगी, रोगरहितः, तस्य दारा च सुन्दरा, धनयुतश्च स भवति ।[५८५]

७) व्योमे तुलाराशिर्भवेत्, तदा स प्रचुरं वाणिज्यकर्म करोति। स धर्मात्मकः, नीतियुक्तः, सतामभीष्टः परमपदप्राप्तिकरश्च स्यात्।[५८६]

८) अन्तरिक्षे कीटराशौ, दुष्टैः पुरुषैः सदृशं कर्म करोति । देवद्विजगुरूणां पीडाकरः, निर्दयः, नीतिविवर्जितकर्मकरश्च स्यात् ।[५८७]

९) चापेऽम्बरस्थे, स सेवात्मकं, चौर्ययुतं कर्म करोति । स परोपकारी, पराक्रमी, भूपालसदृशं, भूरि यशःसमेतकर्मणि रतश्च भवेत् ।[५८८]

१०) मकरलग्नं व्योमे, तदा प्रचुरप्रतापः, कर्मप्रधानः, सुनिर्दयः, बन्धुवधरतः, धर्महीनः, खलपुंसां समानश्च भवेत् ।[५८९]

११) व्योमे घटः, तदा स प्रयाणसक्तः, परवञ्चने रतः, इष्टलाभार्थं पाखण्डधर्मयुतः, जनताविरुद्धः, विश्वासहीनश्च भवेत् ।[५९०]

१२) मीनलग्नं दशमे स्यात्, तदा स गुरुप्रदिष्टं कुलोचितं कर्म करोति । स सुस्थिरः, कीर्त्यान्वितः, नानाद्विजानामाराधनायुतं कर्म करोति ।[५९१]

---

[५८३] बृ.य. जा.१०.२.४
[५८४] बृ.य. जा.१०.२.५
[५८५] बृ.य. जा.१०.२.६
[५८६] बृ.य. जा.१०.२.७
[५८७] बृ.य. जा.१०.२.८
[५८८] बृ.य. जा.१०.२.९
[५८९] बृ.य. जा.१०.२.१०
[५९०] बृ.य. जा.१०.२.११

## ग्रहफलम्

### सूर्यफलम्

कर्मस्थाने यदार्कः, तदा स जातकः सुहृद्दृष्टिः, धनवाहनानगमननि भूप्रसादाद् एवं सुतसौख्ययुतं च, साधुजनोपकाररतः, मणियुक्तः,भूषणयुक्तो भवति ।[५९२]

### चन्द्रफलम्

व्योमे यदा निशाकरः, तदा भूपालेन विशेषार्थाप्तिः, कीर्तियुक्तः, सत्त्वसन्तोषयुक्तः, शीलसंयुतः, चञ्चललक्ष्मीश्च भवेत् ।[५९३]

### भौमफलम्

मेषूरणे महीसुतः, तदा महीप्राप्तिः, धनयुतः, उत्साहसंयुतः, परजनोपकृतः, सुन्दरभूषणमणिद्रविणागमश्च भवति ।[५९४]

### बुधफलम्

कर्मगे चन्द्रात्मजः, तदा जातको ज्ञाता, श्रेष्ठकर्मकरः, नानासंपत्तियुतः, राजमान्यः, चञ्चललीलायुतः, वाग्विलासयुतश्च जायते ।[५९५]

### गुरुफलम्

राज्ये यदा देवगुरुः, तदा सराजचिह्नयुतः, उत्तमवाहनमित्रसुतलक्ष्मी-दारासुखयुक्तः, यशोविवृद्धियुतश्च भवेत् ।[५९६]

---

[५९१] बृ.य. जा.१०.२.१२
[५९२] बृ.य. जा.१०.३.१
[५९३]बृ.य. जा.१०.३.२
[५९४] बृ.य. जा.१०.३.३
[५९५] बृ.य. जा.१०.३.४
[५९६] बृ.य. जा.१०.३.५

**शुक्रफलम्**

पितृस्थाने यदा भार्गवः, तदा सौभाग्यसन्मानविराजमानः, सुतकान्ताप्रीतिकरः, स्नान –अर्चन–ध्यानयुतो भवेत् ।[५९७]

**शनिफलम्**

शनैश्चरो यदा कर्मगः, तदा स नृपसचिवः, नीतियुक्तः, विनीतः, संग्रामे चतुरः, पुराधिकारयुक्तः सुखी, सधनो भवेत् ।[५९८]

**राहुफलम्**

पुरुषस्य कुण्डल्यां यदा दशमे राहुः, तदा स पुरुषो धनाद्यूनतायुतः, प्रतापहीनः, जनैर्व्याकुलतायुतः, सुखेन शयनं न करोति, मित्रैर्दुःखी, क्रूरकर्मरतः, जलाच्छीतलत्वं च प्राप्नोति।[५९९]

**केतुफलम्**

कर्मस्थाने केतुः, तदा पितृसुखं न करोति, स्वयं दुर्भगत्वकारणेन मातृनाशं करोति, वाहनैः उरु पीडितः, यदि कन्यायाः जन्मपत्रिका स्यात् तदा वैणिकः,असितपदार्थरुचिकरो भवति।[६००]

**दशमभवनेशफलम्**

१) दशमधिपो यदि लग्ने स्यात्, तदा जननीसुखयुतः, पितृभक्तितत्परः, सुखयुतः स्यात्। पापग्रहाः स्युः, तदा बहुदुःखपरः, दुष्टः, वञ्चकः, सुखी भवति ।[६०१]

२) कर्मेशो यदि धनस्थाने स्यात्, एवं शुभग्रहैर्युतः, तदा जनकाय मातृसुखं ददाति, निष्ठरवाग्, सुवपुः, सुकर्मकरः, धनयुतश्च भवेत् ।[६०२]

---

[५९७] बृ.य. जा.१०.३.६

[५९८] बृ.य. जा.१०.३.७

[५९९] बृ.य. जा.१०.३.८

[६००] बृ.य. जा.१०.३.९

[६०१] बृ.य. जा.१०.४.१

३) व्योमेशो यदि सहजे, तदा स्वजनमातृविरोधकरः,बहुलसेवककर्मकरः, मातुलसुतेनाल्पसुखं प्राप्नोति, पृथुकर्मणि समर्थवपुश्च जायते ।[६०३]

४) मेषूरणेशः पाताले, तदा नितरां सुखी, पितरि मातरि पोषणे तत्परः, सकललोकदशायां तप्तः, नृपतिसंभवलाभविभूषितो जायते ।[६०४]

५) राज्येशः सुतस्थाने तदा सुन्दरकर्मकरः, नृपतिलाभयुतः, अतिभोगवान्, गानकलायां कुशलः, अल्पसुखी भवेत् ।[६०५]

६) रिपुस्थाने दशमाधिपः, तदा जातको रोगी, नृपतिवैरकरः, प्रबलकामी, भाग्येन रिपुगणेन जीवति, तदा जीवने लाभो भवेत् ।[६०६]

७) कर्माधिपो यदि कलत्रभावे स्यात्, तदा तस्य पुरुषस्य वनिता सुरूपवती, सुतवती भवेत् । मातृ – पति –उभयोर्भक्तिसमन्विता प्रियतमा भवति।[६०७]

८) दशमाधिपो रन्ध्रे स्यात्, तदातिखलः, अनृतवाक्, कपटी, चोरकलाकुशलः, जननीपीडनतापकरः, अल्पजीवितश्च भवेत् ।[६०८]

९) कर्मेशो यदि भाग्ये स्थितः, तदा सुभगः, तनुधारिणः, सहोदरैर्मित्रैः पराक्रमैर्युक्तश्च भवेत्। सततं सत्यवादी धनयुतश्च भवति ।[६०९]

१०) दशमेशः स्वगृहे स्यात्, तदा मातृसुखदायकः, मातृकुले रतः, पटुः, प्रबलः, राजसन्मानेन धनं प्राप्नोति ।[६१०]

---

[६०२] बृ.य. जा.१०.४.२
[६०३] बृ.य. जा.१०.४.३
[६०४] बृ.य. जा.१०.४.४
[६०५] बृ.य. जा.१०.४.५
[६०६] बृ.य. जा.१०.४.६
[६०७] बृ.य. जा.१०.४.७
[६०८] बृ.य. जा.१०.४.८
[६०९] बृ.य. जा.१०.४.९

११) लाभभावे दशमपः स्यात्, तदा स विजयलाभयुतः, स्त्रीसंयुतः, परपराजयतो विपुलधनप्राप्तिः, सुतकन्याभृत्यैर्युक्तश्च भवेत् ।[६११]

१२) व्यये यदि दशमेशः स्थितः, तदा सः स्वपराक्रमेन राजमान्यः, कर्म करोति, मातृसुखरहितः, वक्रबुद्धिः, परदेशे रतः, व्ययपरः, सुभगश्च भवति ।[६१२]

**दृष्टिफलम्**

**सूर्यदृष्टिफलम्**

कर्मस्थानं सूर्येण पूर्णदृष्ट्या दृष्टं, तदा जातकः कर्मसिद्धियुक्तः, आदि-अवस्थायां मातृमरणं । यदि स्वगृहे वा स्वोच्चे स्यात्, तदा शुभफलदायकं भवति ।[६१३]

**चन्द्रदृष्टिफलम्**

व्योमोपरि चन्द्रस्य दृष्टिः स्यात्, चतुष्पदकुलोपजीवितः, तस्य सुतः कान्तः, धनस्य सुखं, पितृबन्धुसुखं भवेत्, परन्तु धर्मेण हीनो भवति ।[६१४]

**भौमदृष्टिफलम्**

कर्मभावं भौमः पश्यति, तदा सर्वसिद्धियुक्तः, सुखी, पराक्रमी, श्रेष्ठः, प्रतापवान् , स्वदशायां भाग्योदयं करोति ।[६१५]

**बुधदृष्टिफलम्**

मेषूरणे यदि चन्द्रात्मजस्य पूर्णदृष्टिः स्यात्, तदा स कर्मजीवी, कविः, पण्डितः राजमान्यः, नृपपूजितः, सदा सुखदायकः, पितृधनैर्युक्तः, उद्यमी च भवेत्।[६१६]

---

[६१०] बृ.य. जा.१०.४.१०
[६११] बृ.य. जा.१०.४.११
[६१२] बृ.य. जा.१०.४.१२
[६१३] बृ.य. जा.१०.५.१
[६१४] बृ.य. जा.१०.५.२
[६१५] बृ.य. जा.१०.५.३

**गुरुदृष्टिफलम्**

कर्मस्थाने गुरोर्दृष्टिः स्यात्, तदा राजमन्दिरे अवश्यमेव कर्मसिद्धिं करोति, पुत्रदानधनवर्जितः, दिव्यभवने निवासी, पूर्वजाधिकसुखी भवेत् ।[६१७]

**शुक्रदृष्टिफलम्**

व्योमेशे यदि भार्गवस्य दृष्टिः पतति, तदा स्वपुरे नृपालये वा कर्मसिद्धिं प्राप्नोति, उत्तमाङ्गपरिपीडितः, पुत्रबन्धुयुतः, अद्भुतसुखं च प्राप्नोति ।[६१८]

**शनिदृष्टिफलम्**

शनैश्चरेण दृष्टं कर्मस्थानं, तदा पितृनाशं करोति, अल्पमातृसुखं, तनुजीवितः, यदि जीवति तदा भाग्ययुतश्च भवेत् ।[६१९]

**राहुदृष्टिफलम्**

राहोर्दृष्टिर्दशमे, तदा स अत्यन्तकर्मसिद्धिं प्राप्नोति, बालावस्थायामेव पितृमरणं भवेत्, मातृसौख्यमप्यल्पमेव भवेत् ।[६२०]

**वर्षफलम्**

सूर्यो दशैकोनविंशतिवर्षं वियोगं ददाति, चन्द्रेण त्रिचत्वारिंशद् वर्षमर्थप्राप्तिः, भौमेन सप्तविंशतिवर्षं शस्त्रभयं, बुधेनैकोनविंशतिवर्षं धनप्राप्तिः, गुरुदशायां द्वादशवर्षं धनप्राप्तिः, शुक्रेण द्वादशवर्षं सुखप्राप्तिः, शनि– राहू – केतुभिः सप्तविंशतिवर्षं शस्त्रभयं भवति ।[६२१]

---

[६१६] बृ.य. जा.१०.५.४
[६१७] बृ.य. जा.१०.५.५
[६१८] बृ.य. जा.१०.५.६
[६१९] बृ.य. जा.१०.५.७
[६२०] बृ.य. जा.१०.५.८
[६२१] बृ.य. जा.१०.६.१

१) लग्नाद् दशमे चन्द्रः स्यात्, तस्य नित्यवृत्तिर्भवति । नानाकलायां कुशलः, वाग्विलासी सर्वप्रकारैरुद्यमः, साहसकर्मभिराजीविकां करोति।[६२२]

२) जन्मलग्नाद् दशमस्थाने बलिष्ठग्रहाः स्युः, तदा तैर्ग्रहैस्तस्याजीविकां जानीयात् । अथवा बलयुतो वर्गपतिस्तस्य दशायां तस्य जीवनं भवेत्।[६२३]

३) जन्मलग्नाद् वा चन्द्रलग्नाद् दशमे सूर्यः स्थितः, तदा सोऽनेकोद्यमेन द्रव्यं प्राप्नोति। एवं स बलाधिकः, नरनायकः , पुष्टसर्वाङ्गः, मनसा प्रमोदयुतश्च ज्ञेयः ।[६२४]

४) लग्नेन्दुतः कर्मे कुजः स्यात्, तदा स जातकः साहसी, क्रूरकर्मरतः, निषादवृत्तिः, विषयासक्तः, दूरं निवासकर्ता च भवति ।[६२५]

५) चन्द्रलग्नाद् वा जन्मलग्नाद् दशमे रौहिणीपुत्रः स्थितः, तदा द्रव्यप्राप्तिः, बहुनां जनानां नायकत्वं, शिल्पाभ्यासरतः, सर्वकार्येषु साहसी, विद्वद्वृत्त्या जीवनं यापयति ।[६२६]

६) लग्नात् वा चन्द्रलग्नाद् गुरुर्यदि दशमे स्यात्, तदा नानावृत्त्या धनं प्राप्तं करोति, नृपगौरवं च प्राप्नोति ।[६२७]

७) होराया वा चन्द्रात्मजाद् यदि शुक्रो दशमे स्यात्, तदा स नानाशास्त्रकलाविलासं करोति, दाने साधुमतिः, जयं, विनतां, यथेष्टं धनप्राप्तिः, भूपालाद् प्रतिष्ठाप्राप्तः, शीलवान्, विपुलयशोवान् च भवति।[६२८]

---

[६२२] बृ.य. जा.१०.७.१

[६२३] बृ.य. जा.१०.७.२

[६२४] बृ.य. जा.१०.७.३

[६२५] बृ.य. जा.१०.७.४

[६२६] बृ.य. जा.१०.७.५

[६२७] बृ.य. जा.१०.७.६

८) होराया निशाकराद्वा शनैश्चरः मेषूरणे स्यात्, तदा हीनतराजीविकायुतः, कृशवपुः, सदा खेदं, वादभयं, धान्यधनयोर्हीनत्वं, चित्तोद्वेगभावेन चपलशीलः, च नो निर्मलः– इति फलम् ।[६२९]

९) लग्नात् चन्द्राद्वा सूर्यादिसप्तग्राणां कोऽपि ग्रहः स्थितः, तदा क्रमेण पितृणां–जननीद्वारा, शत्रु–मित्र–भ्राता– स्त्री– भृत्यैः स्वस्वदशाया–मर्थाप्तिं कथयेत्।[६३०]

१०) लग्नात् चन्द्राद्वा दशमे यदि कोऽपि ग्रहः न स्यात्, तथा लग्नं, चन्द्रः, भानुः, दशमाधिपो वा यस्मिन् नवांशे स्यात्, तस्य नवमांशस्य यो ग्रहः स्वामी, तस्य ग्रहेण समत्वं तथा वृत्तिं कथयेत् । लग्नात् सूर्याद्, चन्द्राद्वा दशमेशस्य स्वामी, यदि सूर्यस्य नवांशे स्थितः, तदा श्रेष्ठ– औषधिद्वारा, ऊर्णेन, तृणद्वारा, स्वर्णादितस्तस्याजीविका भवेत् ।[६३१]

११) यदि चन्द्रस्य नवांशे स्यात्, तदा तस्य मनुष्यस्य स्त्रीसम्बन्धेन, जलाशयोत्पन्नशङ्खमौक्तकमित्यादितः, भौमस्य नवांशे कृषिकर्मणा , साहसेन, धातुना (सुवर्णरजतमित्यादिना) शस्त्रकर्मणा वा, बुधः स्यात् तदा काव्यकलायाः संग्रहेणाजीविका भवेत् ।[६३२]

१२) यदि गुरोनवांशः, तदा ब्राह्मणभोजनेन देवधर्मणा वृत्तिर्भवेत् । शुक्रस्य नवांशे महिषी –इत्यादितः, रजतेन, रत्नेन वा जीविकां करोति, शनैश्चरस्य नवांशः स्यात् , तदा नीचकर्मणाजीविकां करोति ।[६३३]

१३) दशमभावस्य स्वामी यस्मिन् नवांशे स्यात्, तत्तुल्यकर्मणा स्व–आजीविकां करोति, मनीषिजनैरित्थं कथितम् ।[६३४]

---

[६२८] बृ.य. जा.१०.७.७

[६२९] बृ.य. जा.१०.७.८

[६३०] बृ.य. जा.१०.७.९

[६३१] बृ.य. जा.१०.७.१०

[६३२] बृ.य. जा.१०.७.११

[६३३] बृ.य. जा.१०.७.१२

१४) ये पूर्वोक्तयोगकारका ग्रहा मित्रगृहे शत्रुगृहे वा स्थिताः, तदा तेन योगेन तत एव अर्थस्य प्राप्तः कल्पनीया। सूर्यः स्वोच्चे, स्वक्षेत्रे मूलत्रिकोणे वा स्यात्, तदा स जातको निजबाहुबलेन धनं प्राप्नोति ।[६३५]

१५) यदा जन्मलग्ने धनभावे तथा लाभस्थाने बलयुक्ताः शुभग्रहाः स्युः, तदा भूधनप्राप्तिरिति पूर्वमुनिजनैरिदमुदीरितम् । बलानुसारं सर्वेषां ग्रहाणामुत्पन्नवस्तूनां विचारो भवेत् ।[६३६]

## ११. एकादशभावफलम्

एकादशो लाभभावो वर्तते, तस्मिन्नपि देव – ग्रहस्वामी दृष्टिः, वादृष्टिः, एवं शुभाशुभग्रहाणां योगः पूर्ववद् दृश्यते । गजाश्वहेमवस्त्ररत्नवाहनादिमङ्गल-मण्डलानि लाभश्च ग्रहज्ञैरेकादशभावाद् विचारणीयः ।[६३७]

१) लाभे यस्य कस्यापि जन्मकुण्डल्यां मेषलग्नं स्यात्, तदा तस्य चतुष्पदोत्थो लाभः, नृपसेवया देशातर आधिपत्यं धनं च प्राप्नोति ।[६३८]

२) लाभाश्रिते यदि वृषभलग्नं, तदा विशिष्टलाभः, स्त्रीणां सकाशात्, सज्जनानां द्वारा, एवं महीद्वारा लाभमेवं धर्मं च प्रकरोति ।[६३९]

३) मिथुनलग्न आयस्थिते, लाभः स्त्रीदयितस्य, वस्त्रमुख्यासनयानप्राप्तिः, विविधप्रसिद्धिश्च जायते ।[६४०]

४) कुलीरराशौ यदि कुण्डल्या लाभभावे स्थिता, तदा कान्तापक्षाद् लाभः, सेवाकृषिवृत्त्या, शास्त्रात्, साधुजनोपकाराद् लाभो भवति ।[६४१]

---

[६३४] बृ.य. जा.१०.७.१३
[६३५] बृ.य. जा.१०.७.१४
[६३६] बृ.य. जा.१०.७.१५
[६३७] बृ.य. जा.११.१.१
[६३८] बृ.य. जा.११.२.१
[६३९] बृ.य. जा.११.२.२
[६४०] बृ.य. जा.११.२.३

५) पञ्चमराशिर्लाभे दृष्टा, तदा ग्रहिणैः, नानाजनानां बन्धबन्धनैश्च व्यायामेन तथा देशान्तराश्रयेण लाभो भवेत् ।[६४२]

६) लाभगतं यदि कन्यालग्नं, तदा स नरो विविधैरुपायैः लाभं प्राप्नोति, छलेन, पापेन, सुभाषणेन वा परस्परशून्याकृतिविकारैर्लाभं याति ।[६४३]

७) तुलालग्नं यद्येकादशे स्थितं, तदा विचित्रैर्वनोत्पन्नैः, साधुसेवया, विनयेन स्तुत्या मुख्यतया च प्रभुत्वं प्राप्नोति ।[६४४]

८) कीटराशिर्यदा लाभे गता, तदा मुख्यं लाभं प्राप्नोति, आगमशास्त्रविनयेन नीतिज्ञानेन धनमर्जयति ।[६४५]

९) लाभाश्रितश्चापस्तदा राजस्थानात्, सुसेवया, स्वपुरुषार्थेन, अपराधनेन , अश्वकृत्यैर्धनं प्राप्नोति ।[६४६]

१०) यदा मकरलग्नं लाभे प्राप्तं, तदा तेषां नराणां जलयानेन, विदेशे निवासेन, भूपालसेवया लाभो भवति। परन्तु स विविधव्ययकार्ये रतश्च भवेत् ।[६४७]

११) आयस्थितो घटः, तदा जलयानयोगात्, जनैः, त्यागेन, धर्मेण, विद्याप्रभावात्, सुसमागमेन लाभ उपजायते ।[६४८]

१२) लाभे चान्तिमा राशिः प्राप्ता, तदा विविधं लाभं प्राप्नोति। मित्रेण, नृपसत्कारेण, विचित्रवाक्यैः, प्रणयेन वा लाभो भवेत् ।[६४९]

---

[६४१] बृ.य. जा.११.२.४
[६४२] बृ.य. जा.११.२.५
[६४३] बृ.य. जा.११.२.६
[६४४] बृ.य. जा.११.२.७
[६४५] बृ.य. जा.११.२.८
[६४६] बृ.य. जा.११.२.९
[६४७] बृ.य. जा.११.२.१०
[६४८] बृ.य. जा.११.२.११

**ग्रहफलम् ।।**

**सूर्यफलम्**

भानुर्यदि जन्मकुण्डल्यां लाभे स्यात्, तदा संगीते रुचिः, चारुकर्मप्रवृत्तिः, निरन्तरं कीर्तिधनेन पूर्णः, भूपात् सदैव धनं प्राप्नोति ।[६५०]

**चन्द्रफलम्**

यदि यस्य कस्यापि जन्मकुण्डल्यां लाभे चन्द्रः स्थितः, तदा स जातकः, जनानां आदरकर्ता, वाहनप्राप्तियुतः,, कीर्त्या श्रेष्ठभोगेन युक्तः, गुणानां प्राप्तिः, नित्यप्रसन्नाचित्तो भवेत् ।[६५१]

**भौमफलम्**

यस्य भौम एकादशे स्थितः, तदा ताम्रं, पुष्परागः, सुवर्णं, रक्तवस्त्रं- एतेस्तथा सुललितवाहनैर्युक्तः, भूप्रसादात् कौतुकमङ्गलानि प्राप्नोति ।[६५२]

**बुधफलम्**

एकादशे ज्ञो वा रौहिणेयः स्थितः, तदा स जातको भोगासक्तः, अत्यन्तवित्तवान्, नम्रः, नित्यानन्दयुक्तः, शीलबलयुक्तः, विविध- विद्याभ्यासकर्ता च ।[६५३]

**गुरुफलम्**

सुरगुरुर्लाभे स्थितः, तदा सामर्थ्यवित्तलाभयुतः, सद्रत्नवस्त्र-उत्तम- वाहनप्राप्तिसहितः, राजप्रसन्नयुक्तश्च भवति ।[६५४]

---

[६४९] बृ.य. जा.११.२.१२

[६५०] बृ.य. जा.११.३.१

[६५१] बृ.य. जा.११.३.२

[६५२] बृ.य. जा.११.३.३

[६५३] बृ.य. जा.११.३.४

### भृगुफलम्

भार्गवो यद्येकादशे प्राप्तस्तदा गीतनृत्यादिरतः, वित्तप्राप्तिसहितः, सत्कर्मधर्म-चित्तवृत्तिश्च भवति ।[६५५]

### शनिफलम्

एकादशे मन्दोऽर्कजो वा उपस्थितः, तदा इन्द्रनीलादिकानि, नानागज-दन्तादिनानाविधवस्तूनि प्राप्नोति ।[६५६]

### राहुफलम्

आये यदा राहुः स्यात्, तदा सुवाक्यैर्लाभं प्राप्नोति। दासैः समेतया देशान्तर-यात्रया प्रतिष्ठां , उभयोः पक्षयोः प्रसिद्धिं च प्राप्नोति। उत्तमप्रजया युक्ताः शत्रवः पराभवन्ति ।[६५७]

### केतुफलम्

एकादशे यदा केतुः स्यात्, तदा स सुभाषी, सुविद्याधिकः, दर्शनीयः, सुभोग-युक्तः, तेजस्वी, सुवस्त्रो भवति, उदरे पीडा, दुर्भगसंततिः, सर्वलाभैर्युतो भवति।[६५८]

### लाभभवनेशफलम्

१) लाभाधिपस्तनुस्थाने स्थितः, तदा स सुभगः, स्वजनप्रियः, बहुदानकर्ता, पुत्रयुतः, नृपाद् धनं चार्जयति ।[६५९]

---

[६५४] बृ.य. जा.११.३.५
[६५५] बृ.य. जा.११.३.६
[६५६] बृ.य. जा.११.३.७
[६५७] बृ.य. जा.११.३.८
[६५८] बृ.य. जा.११.३.९
[६५९] बृ.य. जा.११.४.१

२) धनस्थान एकादशेशः स्यात्, तदा तस्य चपलं, जीवितं, अल्पसुखं च स्यात्। क्रूरग्रहैर्युतस्तदा तस्करः, शुभग्रहाः स्युः, तदा धनयुतश्चिरायुष्यं प्राप्नोति ।[६६०]

३) तृतीये यदा लाभेशः प्राप्तस्तदा सः सहोदराणां धनैर्युतः, सबान्धवः, सहजानां प्रियः, शुचिः, स्वजनमित्रजनानां मतिलाभदायकश्च भवेत्।[६६१]

४) भवभावपतौ सुखे सति, अमितजीवनयुक्तः, पितृयुक्तः, पुत्रकर्मरतः, सुभगः, शुभः, पुण्यकर्मवशादतिलाभवान् च जायते ।[६६२]

५) आयेशो यदि पञ्चमे सुतस्थाने, तदा जनक-मातृप्रियश्च भवेत्, अल्पाहारी, सुखी च । क्रूरग्रहाः स्युः, तदा तद्विपरीतं फलं ज्ञेयम् ।[६६३]

६) भवाधिपो यदि रिपुगस्तदा शत्रुवर्गैर्युतस्तदा रोगी, कृशवपुः, चतुराणामपि चतुरः, जनैरादरयुतः, विदेशगमनं, तस्मिन्नेव मरणं, तस्कराद् भयं च भवेत्।[६६४]

७) आयाधिपो यदि कलत्रभावे स्यात्, तदा प्रकृतिनोग्रः, बहुसम्पदा युक्तः, दीर्घजीवी, शीलयुतश्च जायते । क्रूरग्रहाः स्युः, तदा बहुरोगयुतः शुभग्रहैः सौख्यं च प्राप्नोति ।[६६५]

८) लाभाधिपती रन्ध्रे स्थितः, बहुलरोगयुतः, रिपुवृन्दैर्विपुलवैरकरश्च जायते ।[६६६]

९) एकादशाधिपो भाग्ये प्राप्तस्तदा प्रसिद्धः, आगमशास्त्रविशारदः, विचारे चतुरः, धर्मप्रसिद्धः, गुरुदेवभक्तः स्यात्। क्रूरग्रहाः स्युः, तदा बन्धुजनैर्वर्जितो भवति।[६६७]

---

[६६०] बृ.य. जा.११.४.२
[६६१] बृ.य. जा.११.४.३
[६६२] बृ.य. जा.११.४.४
[६६३] बृ.य. जा.११.४.५
[६६४] बृ.य. जा.११.४.६
[६६५] बृ.य. जा.११.४.७
[६६६] बृ.य. जा.११.४.८

१०) भवस्थानाधिपो यदि कर्मस्थाने स्यात्, तदा पितरि वैरियुतः, जननीप्रियः, बहुधनः, यशःपूर्णः,मातृपालने रतो भवति ।[६६८]

११) लाभेशः स्वगृहे स्यात्, तदा सः पुरुषो बहुजीवी, मुग्धजनैर्युक्तः, सुन्दरशरीरः, वाहनैर्वस्त्रादितो युतश्च भवेत् ।[६६९]

१२) लाभेशो व्यये स्यात्, तदा स खलः, चपलजीवितः, अल्पद्रव्यैर्युतः, मानयुक्तः, बहुकष्टदः, धनयुतः, दुष्टमतिश्च भवति ।[६७०]

**दृष्टिफलम्**

**सूर्यफलम्**

यदा लाभस्थाने सूर्यस्य दृष्टिः स्यात्, तदा सकलवस्तु प्राप्यते, अधिव्याधि–युक्तः, सुतनाशकारकः, कर्मजीवी, सुबुद्धिमाँश्च जायते ।[६७१]

**चन्द्रफलम्**

चन्द्रस्य दृष्टिरेकादशभावोपरि पतति, तदार्थलाभं, व्याधिविनाशं प्राप्नोति। चतुष्पदानां हेम्नश्च वृद्धिः, सर्वत्रलाभश्चात्र कोऽपि संशयो न वर्तते।[६७२]

**भौमफलम्**

यदा लाभोपरि कुजस्य दृष्टिः स्यात्, तदा तस्य पुरुषस्यायुर्वृद्धिः, स्त्रिया गर्भनाशः, वृद्धिकायः, सुतसौख्यं, चतुष्पदात्सुखं च भवेत् ।[६७३]

---

[६६७] बृ.य. जा.११.४.९
[६६८] बृ.य. जा.११.४.१०
[६६९] बृ.य. जा.११.४.११
[६७०] बृ.य. जा.११.४.१२
[६७१] बृ.य. जा.११.५.१
[६७२] बृ.य. जा.११.५.२
[६७३] बृ.य. जा.११.५.३

**बुधफलम्**

यदाये बुधस्य दृष्टिः, तदा स भाग्ययुतः, सकलार्थसौख्यभाक्च भवति। बुद्धिमान्,शास्त्रे पण्डितः, प्रसिद्धश्च भवति। एवं तस्य पुष्कलाः पुत्रिका भवन्ति।[६७४]

**गुरुफलम्**

यदा गुरुणा दृष्ट आयभावः, तदा स जातकः पूर्णायुः, पुत्रदारधनसौख्ययुतः, सुखव्याधिहीनः, कान्तिमान् जयी च भवेत् ।[६७५]

**शुक्रफलम्**

लाभभावः शुक्रेण दृष्टः, तदा लाभवृद्धिः, सुखधनप्राप्तिः, ग्रामाधिपतिः, स्वजनानां पालकः, पूर्ववृत्तिपरिपालने रतश्च भवति ।[६७६]

**शनिफलम्**

शनिना दृष्टो लाभभावः, तदा जातको लाभं प्राप्नोति। पुत्रतश्चाल्पसुखं, धान्यलाभः पण्डितश्च भवति ।[६७७]

**राहुफलम्**

राहौ पश्यत्येकादशभावे, जातको पूर्णायुर्भवति । द्रव्यलाभः, भूपतिवर्गेण सुखं, सततमात्मवृद्धिर्नरतो भवति ।[६७८]

---

[६७४] बृ.य. जा.११.५.४
[६७५] बृ.य. जा.११.५.५
[६७६] बृ.य. जा.११.५.६
[६७७] बृ.य. जा.११.५.७
[६७८] बृ.य. जा.११.५.८

**वर्षसंख्या**

सूर्यस्य दशायां चतुर्विंशतिवर्षाणि लाभः, चन्द्रस्य दशायां षोडशवर्षाणि लाभः, भौमस्य चतुर्विंशतिवर्षाणि श्रीप्राप्तिः, बुधस्य पञ्चचत्वारिंशतद् वर्षाणि धनप्राप्तिः, गुरुणा द्वादशवर्षाणि श्रीलाभः, शुक्रेण द्वादशवर्षाणि धनलाभः, शनिराहुकेतवश्चतुर्विंशतिवर्षाणि धनलाभं कुर्वन्ति ।[६७९]

१) एकादशभावः सूर्येण युक्तो वा दृष्टः स्यात् , दिवाकरस्य षड्वर्गे वा स्यात्, तदा भूपात्, चौरात्, चतुष्पदात्, नानाधनप्राप्तिं करोति ।[६८०]

२) चन्द्रेण युक्तो लाभभावः, निशिनाथस्य दृष्टिः स्यात्, निशाकरस्य षड्वर्गे भवेत्, तदा तस्य जलाशयेन स्त्रीगजतुरङ्गमानां वृद्धिः। चन्द्रः क्षीणः, तदा विनाशकरो ज्ञेयः।[६८१]

३) कुजेन युक्त एकादशो भावः, तस्य दृष्टिर्वा स्यात्, तदा तस्य जातकस्य भूषणमणिसुवर्णवृद्धिः, कलाकौशले निपुणः, विचित्रा यात्रा, बहुसाहसै–र्युक्तश्च भवेत् ।[६८२]

४) गुरुरेकादशे स्थितः,गुरोर्दृष्टिः स्यात्, गुरोर्वर्गे स्यात्, तदा स जातको यज्ञकर्मरतः, साधुजनयुतः, राजाश्रितः, उत्कृष्टः, कृशतनुः, कनकप्रचुरेण युक्तो भवेत् ।[६८३]

५) शुक्र एकादशे स्यात्, तस्य वर्गे वा स्यात् , शुक्रेण दृष्टो वा, तदा वैश्यागमने रतः, उत्तमरजतमौक्तिकादीनां लाभयुक्तश्च भवति ।[६८४]

६) लाभभावे शनियोगो दृष्टिर्वा, मन्दस्य वर्गो वा, तदा नीलगौमहिषी–गजाश्वादीनां लाभ;, एवं ग्रामे पुरे वा गौरवयुतो भवेत् ।[६८५]

---

[६७९] बृ.य. जा.११.६.१
[६८०] बृ.य. जा.११.७.१
[६८१] बृ.य. जा.११.७.२
[६८२] बृ.य. जा.११.७.३
[६८३] बृ.य. जा.११.७.४
[६८४] बृ.य. जा.११.७.५

७) शुभग्रहैर्लाभभावो युक्तो दृष्टो वा, शुभग्रहाणां षड्वर्गे स्यात्, तदा नानाविधानां नराणां लाभः, एवं सर्वैर्ग्रहैर्युतो वा दृष्टस्तदा विपुलं लाभकरो जायते ।[६८६]

## १२. द्वादशभावफलम्

द्वादशो भावो व्ययनामकाख्यः। तस्य विचारे ग्रहप्राप्तिः, स्वामित्वं, दृष्टिः, शुभाशुभग्रहाणां दृष्टियुति–इत्यादीनां पूर्ववदेव विचारणीयम् । हानिः, दानं, व्ययः, दण्डः, बन्धनम् –इत्यादीनां विचारो व्ययभावाद् भवेत् ।[६८७]

**लग्नफलम्**

१) व्ययभावे मेषलग्नं प्राप्तं, तदा द्रव्यव्ययः, तनुपीडनम्, स्वप्नशीलत्वं च भवति। शुभग्रहैर्युक्तः, तदा लाभदायको वर्तते ।[६८८]

२) जन्मकुण्डल्या द्वादशे यदि वृषभराशिः स्थिता, तदा पुंसां व्ययो भवेत्। विचित्रस्त्रियाः प्राप्तिः, धातुवादे लाभः, साधुजनानां सङ्गो भवति ।[६८९]

३) मिथुनराशिर्यदि द्वादशे स्यात्, तस्य पुरुषस्य स्त्रीव्यसनात्मको व्ययः, भूतोद्भवं कृत्यं करोति, कुशीलः, पापयुक्तजनाश्रयेण व्ययो भवेत् ।[६९०]

४) चतुर्थराशौ व्यये सति, तदा द्विजदेवधर्मकार्ये व्ययः, नानाधर्मक्रियायां लाभः, साधुजनैः प्रशसां च प्राप्नोति ।[६९१]

५) व्यये पञ्चमराशिः स्थिता, तदा दृष्टकर्मण्यधिकव्ययः, रोगादितः पीडा, नीचकर्मरतिः, विद्यायां व्ययः, नृपधनचौरकर्मरतो भवति ।[६९२]

---

[६८५] बृ.य. जा.११.७.६
[६८६] बृ.य. जा.११.७.७
[६८७] बृ.य. जा.१२.१.१
[६८८] बृ.य. जा.१२.२.१
[६८९] बृ.य. जा.१२.२.२
[६९०] बृ.य. जा.१२.२.३
[६९१] बृ.य. जा.१२.२.४

६) कन्यालग्नं यदि व्ययस्थाने प्राप्तं, तदाङ्गनोत्सवैः, विवाहमङ्गलकार्ये , यज्ञे सततमन्नादिदानं, एवं सभायां साधुसमागमे व्ययं करोति ।[६९३]

७) व्ययस्थे तुलाराशिः, तदा स पुरुषो देव–विप्र–बंध–श्रुति–स्मृति–अर्थे द्रव्यव्ययं करोति, तथा यमनियमैरेवं तीर्थाटने व्ययं करोति ।[६९४]

८) अलौ यदि द्वादशे सति, प्रमादेन विडम्बनाभिर्धनव्ययं करोति। कुमित्रसेवाजनिता सुनिन्दा, एवं चौरकृताधिकाराद् धनव्ययं करोति ।[६९५]

९) द्वादशे धनुलग्नं, तदा पापजनप्रसङ्गात्, बहुवञ्चने रतः, एवं धनव्ययो वित्तधिया कृतसेवया धनव्ययं भवति ।[६९६]

१०) द्वादशे यदा मकरलग्नं समुत्पन्नं, तदा पान –आसव–अन्नेन च व्ययं करोति, स्ववर्गस्य सत्कार एवं कृषिकार्ये व्ययं करोति ।[६९७]

११) घटो यदि द्वादशे स्थितः, तदा देव–सिद्ध–विप्र–तपस्वी–बन्दीजनानामुपरि व्ययो भवेत् , एवं साधुजनानामनुरोधेन शास्त्रकथित–प्रामाण्येन व्ययं करोति ।[६९८]

१२) द्वादशे यदि मीन लग्नं, तदा स जलयाने दुष्टसंगति–कुसंगति–कुमित्रासनतः सततं विवादेन व्ययो भवति ।[६९९]

---

[६९२] बृ.य. जा.१२.२.५
[६९३] बृ.य. जा.१२.२.६
[६९४] बृ.य. जा.१२.२.७
[६९५] बृ.य. जा.१२.२.८
[६९६] बृ.य. जा.१२.२.९
[६९७] बृ.य. जा.१२.२.१०
[६९८] बृ.य. जा.१२.२.११
[६९९] बृ.य. जा.१२.२.१२

## ग्रहफलम्

### सूर्यफलम्

अर्को यदा द्वादशे स्थितः, तदा नयनेऽल्पतेजः, तातेन सह गतचित्तवृत्तिः, विरुद्धबुद्धियुक्तश्च भवेत् ।[७००]

### चन्द्रफलम्

हिमांशुर्यदा द्वादशे स्थितः, तदा स नरो मित्रैर्वैक्लव्यं, शीलयुतः, नेत्रवैकल्यः, शत्रुवुद्धिः, बहुधा रोषयुतो भवति ।[७०१]

### भौमफलम्

व्यये यदा भूमिसुतः स्यात्, तदा स्वमित्रवैरकरः, नयनातिबाधायुतः, क्रोधाभि–भूतः, अङ्गविकलः, धनव्ययी,अल्पतेजाश्च भवतीति फलं निगदितं ज्योतिष–शास्त्रे।[७०२]

### बुधफलम्

ज्ञो यदा द्वादशस्थः, तदा दयाविहीनः, स्वजनैर्विभक्तः, सत्कार्ये दक्षः, शत्रुजित्, नितान्तं धूर्तो मलिनश्च स्यात् ।[७०३]

### गुरुफलम्

द्वादशस्थो यदि जीवः, तदा नानाचित्तोद्वेगकोपसंयुक्तः, पापात्मा, आलसयुतः, त्यक्तलज्जः, बुद्ध्या विहीनः, मानहीनश्च भवति ।[७०४]

---

[७००] बृ.य. जा.१२.३.१

[७०१] बृ.य. जा.१२.३.२

[७०२] बृ.य. जा.१२.३.३

[७०३] बृ.य. जा.१२.३.४

[७०४] बृ.य. जा.१२.३.५

**शुक्रफलम्**

सितो यदा द्वादशे स्थितः, तदा सत्कर्मविधिविरोधी, मनोभवाराधानः,दयालुः, सत्यविविर्जितः –इति फलं प्रदिष्टम् ।[७०५]

**शनिफलम्**

अर्कसूनुर्यदा व्यये स्थितः, तदा दयाविहीनः, विधनः, व्ययार्तः, सदालसः, नीचजनानुरक्तः, अङ्गभङ्गकारणेन दुःखं प्राप्नोति, सौख्यविवर्जितश्च स्यात्।[७०६]

**राहुफलम्**

सिंहिकासुतो यदा रिष्फे स्थितः, तदा जातकः संग्रहविग्रहकृत्, प्रपातात्प्रपात इव इतस्ततो भ्रमति, नानासिद्धियुतः,विरामे मनोवाञ्छितवृद्धियुक्तः स्यात् ।[७०७]

**केतुफलम्**

द्वादशे शिखी दृश्यते, तदा सुन्दरनेत्रः, सुशिक्षः, राजतुल्यं व्ययं करोति, रिपोर्नाशनं, मातुलपक्षात् सुखं न प्राप्नोति, बस्तिगुह्यं च रुजा पीड्यते ।[७०८]

**व्ययभावेशफलम्**

१) तनुगे व्ययेशः, तदा स नरः सुवचनभाषी, स्वरूपवान्, विदेशगः, खलजनानुरक्तः, विवादयुतः, सहितोऽपि नपुंसकश्च स्यात् ।[७०९]

२) व्ययाधिपतिर्यदा धने स्यात्, तदा जातकः कृपणः, निष्ठुरः, विकलः, गतबुद्धिर्भवति । भौमः स्थितः, तदा भूपेण चौरेण वार्थव्ययः, चतुष्पदपापरतः स्यात् ।[७१०]

---

[७०५] बृ.य. जा.१२.३.६

[७०६] बृ.य. जा.१२.३.७

[७०७] बृ.य. जा.१२.३.८

[७०८] बृ.य. जा.१२.३.९

[७०९] बृ.य. जा.१२.४.१

३)	सहजे यदा व्ययेशः, तदा विगतबन्धुजनः, खलपूजितः, धनयुतोऽपि कृपणः, बन्धुजनानुरक्तः, सुभगशरीरयुतश्च दृश्यते ।[७११]

४)	द्वादशाधिपो यदि मित्रभावे स्थितः, तदा कठिनकर्मयुतः, शुभकर्मयुक्तः, सुखी, सुतजनान्मरणं, दृढव्रती , उपकारको भवेत् ।[७१२]

५)	आत्मजे यदा व्ययेशः, तत्र यदि पापग्रहाः स्युः, तदा दुष्टसुतो भवेत् । एवं यदि शुभग्रहाः स्युः, तदा शुभाचरणयुक्ताः सुताः । पैतृकधनस्य समर्थतया उपभोगं कुर्वन्ति ।[७१३]

६)	व्ययपतौ शत्रुस्थाने प्राप्ते, तदा जातकः कृपणः खलश्च भवति । क्रूरग्रहाः स्युः, तदा नयनरोगयुतः, परगृहाश्रितश्च। भृगुः स्यात्, तदा तनयरहितः, एवं स्वयं शुभबुद्धियुतश्च भवति ।[७१४]

७)	व्ययाधिपो दयिताभावे स्थितः, तदा दुष्टाचरणयुक्तः, गृहाग्रणीः, कपटी, दुष्टो भवति। यदि खलग्रहैर्युक्तः, तदा गणिकायाः धनं प्राप्नोति, कुधीश्च भवति ।[७१५]

८)	व्ययपो मरणे निधने वा प्राप्तः, तदा इत्थं फलं वर्णितम् – अष्टकपालकः, सम्पूर्णकार्ये विवेकरहितः । यदा पापग्रहैर्युक्तः, तदा उपर्युक्तं फलं ज्ञेयम् । एवं च यदि विपरीतं शुभग्रहेण युक्तः, तदा धनसंग्रहे तत्परः ।[७१६]

---

[७१०] बृ.य. जा.१२.४.२
[७११] बृ.य. जा.१२.४.३
[७१२] बृ.य. जा.१२.४.४
[७१३] बृ.य. जा.१२.४.५
[७१४] बृ.य. जा.१२.४.६
[७१५] बृ.य. जा.१२.४.७
[७१६] बृ.य. जा.१२.४.८

९) भाग्ये यदा व्ययेशः स्थितः, तदा निम्नफलं दृष्टं – वृषभ–गो–महिषी–प्रणयेन युतः, सुधीः, तीर्थाटनकृत्, पुण्यात्मा जायते। दुष्टग्रहेणयुतः, तदा पापकमरतश्च जायते ।[७१७]

१०) व्ययाधिपः कर्मस्थितः, तदा तनयेन युक्तः, वित्तसंग्रहे तत्परः, परजनानुरक्तः, तथा तेषां कार्यकृत्, जननीखलः, दुर्वचनानुरक्तश्च भवेत् ।[७१८]

११) व्ययेशो लाभस्थाने प्राप्तः, तदा स बहुजीवी, हर्षयुक्तः, उदारधीः, खलः,सत्यवाक्, सकलकार्यकरः, प्रियवाक्यो भवेत् ।[७१९]

१२) द्वादशेशः स्वगृहे स्थितः, तदा कृपणः, खलः, परस्थाने रतः, स्थिरकार्यकरः, पशुजने रक्तः, बहुभोजनकरो भवेत् ।[७२०]

**दृष्टिफलम्**

**सूर्यदृष्टिफलम्**

व्यये यदि दिवाकरस्य दृष्टिः, तदा स्थानभङ्गः, परवाहने वाहनारुढ, वाहनाद् भयं, शृङ्गिणो भयं, द्वादशाब्दं कष्टजीवितं च करोति ।[७२१]

**चन्द्रदृष्टिफलम्**

चन्द्रेण दृष्टो यदि व्ययभावः, तदा पितृसुखविवर्जितः, नयनेन चञ्चलः, पटुः, धनव्ययकरः, सदानृतभाषकश्च भवेत् ।[७२२]

**भौमदृष्टिफलम्**

कुजो यदि द्वादशे भावं पश्यति, तदा पितृसौख्यं न करोति, सकल–शत्रुविनाशकरः, अन्यजनानां सुखक्षयं च करोति।[७२३]

---

[७१७] बृ.य. जा.१२.४.९
[७१८] बृ.य. जा.१२.४.१०
[७१९] बृ.य. जा.१२.४.११
[७२०] बृ.य. जा.१२.४.१२
[७२१] बृ.य. जा.१२.५.१
[७२२] बृ.य. जा.१२.५.२

**बुधदृष्टिफलम्**

चन्द्रात्मजेन दृष्टो भावद्वादशः, तदा विवाहे सदैव व्ययकरः, स्वजनैर्बन्धुजनै–र्विरोधकरः, प्रतिदिनं व्रणवातेन हृदयरुजां च प्राप्नोति ।[७२४]

**गुरुदृष्टिफलम्**

गुरुणा दृष्टो व्ययभावः, तदा सर्वदा देवद्विजानां कार्ये तत्परः, सर्वकष्टयुतः, शत्रुपीडितः, स्वार्थपरः, बुद्धिमान् भवेत् ।

शुक्रस्य चेदमेव फलं वर्णितम् ।[७२५]

**शनिदृष्टिफलम्**

मन्देन दृष्टो यदा व्ययभावः,तदा विनाशकरः,सुतकलत्राल्पसुखः, समरतो विजयी भवेत्।[७२६]

**राहुदृष्टिफलम्**

व्यये यदा राहोः पूर्णदृष्टिः पतति, तदा व्ययविवर्जितः, दानवर्जितः, समरशत्रु–विनाशकरः, विकलता , प्रचुरं सुखं च भवति ।

उपर्युक्तं फलं केतोरपि निर्दिष्टम् ।[७२७]

**ग्रहवर्षसंख्या**

सूर्यस्त्रिंशदष्टायुताब्दपर्यन्तं धनव्ययं करोति, निशिनाथेन पञ्चचत्वारिंशद्वर्षाणि जलपीडा, भौमेन पञ्चवर्षाणि धनहरणं, द्वाविंशवर्षाणि बुधो व्ययं करोति, गुरुणा पञ्चविंशतिवर्षाण्यर्थव्ययः, शुक्रेण द्वादशाब्दानि धनप्राप्तिः केतु – शनि –राहवः पञ्चचत्वारिंशद्वर्षाणि हानिं ददति ।[७२८]

---

[७२३] बृ.य. जा.१२.५.३

[७२४] बृ.य. जा.१२.५.४

[७२५] बृ.य. जा.१२.५.५

[७२६] बृ.य. जा.१२.५.६

[७२७] बृ.य. जा.१२.५.७

[७२८] बृ.य. जा.१२.६.१

१)  द्वादशे भावे क्षीणचन्द्रो वा सूर्यो उभयौ वा स्याताम् , एवं भौमेन दृष्टो युक्तो वा, तदा तस्य जातकस्य धनं भूमिपतिना व्ययालयं गतम् ।[७२९]

२)  व्यये पूर्ण चन्द्रः स्यात्, बुध – गुरु – सिताः स्युः, तदा स जातको धनसंचयं करोति ।

प्रान्त्यास्थिते यदा शनैश्चरेण भौमेन युक्तो वा दृष्टः, तदा वित्तविनाशनयोगो भवति ।[७३०]

---

[७२९] बृ.य. जा.१२.७.१

[७३०] बृ.य. जा.१२.७.२

# चतुर्थ प्रकरणम्

# वृद्धयवनजातकानुसारेण द्वादशभावफलम्

# चतुर्थ प्रकरणम्

## वृद्धयवनजातकानुसारेण द्वादशभावफलम्

**प्रथमं मेषादिलग्नफलम्–**

वृद्धयवनजातके चतुर्विंशत्यध्याये लग्नवर्गफलं वर्णितम्।

**मेषलग्नोत्पन्नजातकफलम्–**

मेषलग्ने समुत्पन्नो जातकः स्वभावात् चण्डः, धनयुतः, सर्वकलासु दक्षः (शिल्पादिकलायां रुचियुक्तः) स्वपक्षहन्ता विनाशकरो वा, क्रोधभाक्, मन्दो महीपुत्रः, तीक्ष्णकार्यकरो भवेदिति ज्योतिषशास्त्रे विशेषेण कथितम् ।[७३१]

अत्र मीनराजाचार्येण लग्नफलं संक्षेपेण वर्णितम्, तथा पाठकानां सुलभतया ज्ञानसिद्ध्यर्थमन्य स्फूजिध्वजयवनचार्यस्य मतेन मेषलग्नस्य फलं प्रतिपाद्यते।[७३२]

उपर्युक्तफलानामतिरिक्तमन्यदपि फलं भवेत् तद्यथा– लोभी, यात्राप्रवासे रतः, अल्पसुखी, हृदये बाधायुतः, पित्ताधिक्यविकारत् पीडितः, सर्वत्र व्यवहारकुशलः, पराधीनकरणे कुशलः, ईर्ष्यानिरतः, विषादयुक्तः, चपलः, शीघ्रं शीघ्रं भोजने निरतः, पितृमातृकाराद् वा सहोदरात् परदेशे निवासकर्ता, दोषयुक्तसंततिसहितः, स्वकुलधर्माचरणाद् विपरीतः, अङ्गहीनः, कुकुलोत्पन्नो वा स्वेच्छाचारिणीभार्यायुतः, कठिनकार्यैः, धनोपार्जनं तस्य सिद्ध्यति ।[७३३]

---

[७३१] वृ.य.जा. २४.१

[७३२] वृ.य.जा.२४.१ हिन्दीव्याख्यायाम्

[७३३] वृ.य.जा.२४.१हिन्दीव्याख्यायाम्

**वृषभलग्नफलम्-**

वृषभलग्ने जातो जातकः मित्रमण्डलयुतः, क्षमाकृत्, हास्ये रतः, सुवाक्यभाषी, विशिष्टज्ञानयुतो विज्ञानयुतो वा, गुरुजनानां पूर्वजानाम् एवं अग्रजानां सेव्म्कर्ता, शूरः प्रधानः, तनयप्राप्तिमिच्छति ।[७३४]

स्फूजिध्वजस्य मतानुसारेण परिश्रमकृत्, क्लेशभारवहने रतः, वित्तसंग्रहे रतः, ओष्ठौ कपोलौ च विस्तीर्णौ, उन्नतशिरः, नासिकोन्नतः, तात-मातृक्लेशकरः, शत्रुहन्ता, व्यापारे निपुणः, नानाविधोपचारैर्वित्तव्ययकरः, अनिलकफ-प्रधानः, दुष्कृतयुतः, स्वजनानां हानिकारः, कन्यासंततियुतः, नास्तिकः, दाराविशेषानुयायी, भोजनादिषु विशेषरुचिकरः, वस्त्रधारणेन चित्रविचित्रदर्शनः, सहोदरविरोधी, स्वभावाद् द्वेषपूर्णः, चञ्चलः, विरोधकराहारी (मांसाहारी वा) वित्तयुतः, पापः, आपात-निर्यातेन धनं सिद्धयति, पूर्णबुद्धियुतः स्थिरकार्ये संलग्नो जायते ।[७३५]

**मिथुनलग्नगतफलम्-**

जातकस्य जन्म समये यदि लग्ने मिथुनराशिः प्राप्यते तदा जातकः कुलीनः, विशेषज्ञानयुतो, विद्यायां एवं वेदशास्त्रे लुब्धो वा रसिकः, स्वपक्षेण पूज्यः, परपक्षहन्ता शत्रुहन्ता वा जितेन्द्रियो बहुवित्तयुक्तश्च स्यात् ।[७३६]

अन्ययवनमतानुसारं -उपर्युक्तफलादन्यदपि फलं प्रतिपाद्यते । सम्मानयशयुतो, स्वादरेच्छुकः, दानशीलः, गायननृत्यसंगीतेऽनुरक्तः, शास्त्ररसिकः, विदग्धः, सुभगः, आभुषणवेशभूषायां रतस्तथा रतेर्वशीभूतः, सज्जनैः श्रेष्ठः, सत्यवादी, भातृद्वययुतः अनन्यव्यक्तित्वयुतः, हीनाङ्गः, अधिकाङ्गः वा नेत्रविकारी, शुचिः, विनीतः, क्षुद्रजनैर्युतः, अल्पबाम्धवैर्युतः, विरोधी, संततियुतः, एवमनेकस्त्रीषु रतश्च भवति ।[७३७]

---

[७३४] वृ.य.जा.२४.२

[७३५] वृ.य.जा.२४.२ हिन्दीव्याख्यायाम्

[७३६] वृ.य.जा.२४.३

[७३७] वृ.य.जा.२४.२ हिन्दीव्याख्यायाम्

**कर्कफलम्**

कुलीरे लग्ने यदि प्रसूतो जातकस्तदा नीतिविद्यायां निपुणः, नयप्रियः, रोगस्य भावनायां जीवितः, असम्भावितरुग्जैर्ग्रस्तः, इष्टयोगी, सौभाग्ययुक्तः, रतिलालसी मनने पारायणः (मन्त्रोपसेवी वा), सततं विचारयित्वा कार्ये निरतः, गुरुवत्सलश्च स्यात्।[७३८]

**सिंहलग्नस्य फलम्**

जन्मसमये पूर्वक्षितिजोपरि यदि सिंहलग्नोदितं तदा स जातकः शत्रुहन्ता, भाग्यफलेन न्यूनः, धनहीनः, अधिकभोजी, सदैव लज्जया व्यवहारिकः, संकोचेन संतप्तश्च, सज्जनैर्निन्दितः, नियतकार्ये रतः, कृतघ्नश्च जायते ।[७३९]

**कन्यालग्नस्य फलम्**

जन्माङ्गे यदि लग्नभावे कन्याराशिस्तदा विज्ञानविद्याया लालसायां जीवति, विद्यासागरः,शास्त्रलुब्धः वा, गुरूणामतिलालसायुतः, मानी, सौभाग्यगुणैर्युतश्य दृश्यते।[७४०]

**तुलायाः फलम्**

तुलायां प्रसूतो जातकः, स्वकर्मणा जीवति, स्वकार्ये रतः, धीमान्, पैतृककार्यै-राजीविकां पालयति, विद्यप्रियः, सर्वकलासु दक्षः, चलस्वभावयुतः, स्वदार-पराजितश्च भवेत् ।[७४१]

**वृश्चिकलग्नजातकस्य फलम्**

जन्मसमये यदि वृश्चिकलग्नमुदितं तदा जातकश्चण्डः, उग्रः, अभिमानी , अतिशूरः, विज्ञानवान्,कविः, कृतज्ञः, बहुरोषयुतः, संविभागी च वर्णितः ।[७४२]

---

[७३८] वृ.य.जा.२४.३

[७३९] वृ.य.जा.२४.५

[७४०] वृ.य.जा.२४.६

[७४१] वृ.य.जा.२४.७

**धनुलग्नस्य फलम्**

प्रसूतिर्यदि धनुलग्नस्योदितसमये स्यात्, तदा सः कुलप्रधानः, सुभगः, शूरवीरः, भक्तियुतः, भीतिपरः, लोकधर्मे भीरुः, कृतज्ञः, बन्धुबान्धवानां सहोदराणां च सहायकः, आयुष्यमान्, द्रविणश्च भवति ।[७४३]

**मकरफलं**

मृगस्य लग्ने यदि जातो जातकस्तदा स कुलोत्पन्नः, नीचकर्मे रतः, बहुभृत्य–युतश्च लुब्धः, स्वप्रसंशायां रतः., कृतघ्नः, स्वकार्ये निरतः, गुरुवत्सलश्च जायते।[७४४]

**कुम्भलग्नफलं**

यदा कुम्भलग्नमुदितं प्रसूतिसमये, तदा जातकः कुलीनः, चपलस्वभावयुतः, स्थिरसौहृदः,प्रभूतधनधान्यैर्युतः,प्रचण्डः,लुब्धकः,अन्यनारीरति–क्रियालाल–सश्च स्यात्।[७४५]

**मीनलग्नफल्**

मीनलग्ने जातो जातकः, अभिजातः, प्रभूतधनद्रविणः, त्यागात्मवान्, अल्पकेशयुतः, शास्त्रविशारदः, दीर्घसूत्री , मन्दबुद्धिश्च भवेत् ।[७४६]

**लग्नगतहोराफलम्–**

यदि जन्मलग्ने सूर्यस्य होरा स्यात्, विषमलग्ने पूर्वार्धे वा समलग्नस्योत्तरार्धे जन्म, तदा जातको बहुसौख्ययुक्तः, विवेकी, धर्मपरः, कृतज्ञः, त्यागी, शीलयुतः, सत्यपरायणश्च ज्ञेयः।

---

[७४२] वृ.य.जा.२४.८

[७४३] वृ.य.जा.२४.९

१४ वृ.य.जा.२४.१०

[७४५] वृ.य.जा.२४.११

[७४६] वृ.य.जा.२४.१२

यदि जन्मसमये लग्ने निशानाथस्य होरा स्यात् , तदा परदारायां रतो भवति। लग्ने सौम्यग्रहाः स्युः, तदा शीलस्वभावयुतः, क्रूरग्रहैः क्रूरस्वभावी, सम्भोगकाले न चिरप्रदिष्टो भवेत् ।[७४७]

**लग्नगतद्रेष्काणफलम्**

यदि लग्ने अर्कस्य द्रेष्काणः स्यात्, तदा जातकस्तीव्रस्वभावयुतः कलहकरः, दानरतः, विशालाकारः, विद्वेषशीलः, द्विजदेवतासु श्रद्धाहीनः- अर्थात् नास्तिको भवेत्।

यदि लग्ने चन्द्रस्य द्रेष्काणस्तदा स जातकः सुखलाभान्वितः,श्रियान्वितः, गुरुषु भक्तिपरः, प्रख्यातकर्मे रतश्च भवेत् ।

यदि लग्ने कुजस्य द्रेष्काणः प्राप्यते, तदा क्षतजातदेहयुतः, क्रूरस्वभावयुतः, बन्धुदारहन्ता, प्रतापहीनः, विषयार्दितो भवति ।

यदि तृतीयभागे (द्रेष्काणे) विधुपुत्रस्य लग्नं प्राप्तं, तदा सौम्यः, सरुजः, न दीर्घसूत्रः, भक्तिविहीनः, सत्यप्रियः, न्यायप्रियः, सदैव भूरिसुतो भवेत् ।

यदा देवपुरोहितस्य त्र्यंशो लग्ने स्यात्, तदा जातकं तेजस्विनं, सर्वसुखाधिवासं, आकृतिप्रकृतियुतं, सुधर्मिणं, प्रीतिकरकार्ये निरतं सर्वत्र प्रियं वा, स्वपक्ष-प्रियकरं ज्ञेयम् ।

जन्मलग्ने सितस्य द्रेष्काणः स्यात्, तदा जनः वित्तान्वितः, धनसंपत्तिभोगयुतः, शास्त्रानुरक्तः, शास्त्राध्ययने पारायणो वा, गतरोगपापः, भूपालस्य प्रियः, देवगुरुप्रसक्तश्च दृश्यते ।

त्रिविभागसंस्थमर्कजस्य लग्नं, तदा जातकमतिकृपणस्वभावं, वित्तविहीनं बहुदुःखयुतं, चलप्रतिज्ञं (वचनबद्धतां न धारयति), शठस्वभावपूर्णं च ज्ञेयम्।[७४८]

---

[७४७] बृ.य.जा.२४.१३-१४

**लग्नगतनवांशफलम्-**

नवमे भागे लग्नस्थो दिवामणिराशिनवांशः स्यात्, तदा जातकं सदैव विजितं,खलस्वभावैर्युतं, नीचानुरक्तं, पापरतं, जिह्मस्वभावं, विशीलं च ज्ञेयम्।

यदि जातकस्य जन्मलग्ने रात्रिपतेर्विलग्नं प्राप्तं नवांशे, तदा बहुशोधनः, कृषिकार्यैर्वित्तान्वितः, सुतसौख्यप्राप्तः, प्रियातिथिः,अतिथीनां सत्कारे रतः, सर्वजनप्रियश्च दृश्यते ।

यदि जन्मलग्ने भूतनयस्य नवांशः स्यात्, तदा बहुदुःखयुक्तः, पित्त-रक्तविकारैः पीडितः, हीनप्रतापः, कुचैलवस्त्रधारणे निरतः, दीनदर्शी च भवेत्।

जन्मलग्ने यदि शशिजस्य सौम्यस्य वा नवांशः प्राप्तः, तदा जातकस्य फलं वर्णितं यत् स बहुवित्तयुतः, मेधावी, सर्वसुखर्द्धिभाक्, विवेकी, पण्डितः, विद्वान् एवमल्पशत्रुयुतश्च जायते ।

जीवनवांशके लग्ने फलमिदं भवति-सुतवित्तसौख्यम्, नरैरतिगाढमैत्री, सुवर्णादिलाभः, नराणां क्षितिपतेश्च पूज्यभावः।

जन्मकाले लग्ने च भार्गवतनयस्य नवांशः प्राप्तः, तदा जातकं बहुपुत्रभोगम्, सुरूपचेष्टं, समृद्धं, सदैव दिव्याङ्गनाभोगसुखयुतं च करोति ।

यदि जन्मचक्रे लग्नोदयः कोणस्य नवांशे स्यात् , तदा जातको बहुभूमि-नाशयुतः, अर्थक्षययुतः, अन्यायी, उग्रस्वभावयुतः, चौरकृतप्रमोषणः, दुःखी भवति।[७४९]

---

[७४८] वृ.य.जा.२४.१५-२१

[७४९] वृ.य.जा.२४.२२-२८

**लग्नगतद्वादशांशफलम्-**

यदि जातकस्य जन्मलग्ने वासराधिपस्य द्वादशांशः स्यात्, तदा बहुमन्युवश्यं, लौल्यान्वितं, धर्मसुखैर्विहीनं, निश्त्रिंशमुग्रं चपलस्वभावयुतं करोति।

सूर्यांशको रात्रेपतेर्विलग्नं, तदा जातकं बहुरत्नभाजं, नानार्थलाभं, विविध-मार्गैर्लाभदं सुशीलं, कुलप्रधानं , बहुमित्र-मण्डलयुक्तं,जनसमर्थकं करोति ।

यदि क्षमासुतस्य जन्मलग्ने द्वादशांशः, तदा रक्तविकारैः पीडितो पामादिरोगै-र्ग्रस्तः, प्रपञ्चयुक्तो रणकातरः ।

जन्मसमये लग्ने सूर्यांशकः सोमसुतस्य भवति, तदा सुभगः, सुन्दरः, सुशीलः, नानाविद्याध्ययने रतः, गुरूणां देवानां च भक्तः, शत्रुंजयः, स्त्रीलोलुपो भवति ।

यदि जन्मकाले पूर्वक्षितिजोपरि लग्नोदयसमये देवगुरोः द्वादशांशः, तदा बहुशास्त्ररक्तं जनानुरागं विनीतं, सुशीलस्वभावयुतं, प्रभूतमित्रमंडलयुक्तं, रणजितं रणकोविदं च करोति ।

लग्ने भृगोर्द्वादशांशः, तदा मनुष्यः सुभगः, रूपशीलः, पार्थिवमानयुक्तः, क्षितिपालमानयुतः, अतिथीनां सत्कारे निरतः, पुत्रधनैः समेतश्च स्यात्।

प्रसूतिकाले छायामार्तण्डस्य द्वादशांशः, तदा जातको रुग्णः, कुशीलः, निजबन्धुहीनः, शोकार्दितः, सदैव हानियुतश्च दृश्यते ।[७५०]

**लग्नगतत्रिशांशफलम्-**

यदि भूपुत्रस्य त्रिंशांशः लग्ने प्राप्तः, तदा जातको व्यसनाभिभूतः, व्ययेन हीनः, बहुवैरयुक्तः, क्षितिपतिना पूजितः, सदैवं निरतश्च भवेत् ।

---

[७५०] वृ.य.जा.२४.२९-३५

त्रिंशल्लवो यद्यर्कतनयस्य लग्नं, तदा फलमित्थं वर्णितम् । परदेशरक्तः, क्षुधा-तृष्णाया तथात्यधिकपरिश्रमेण दुःखार्तः, बहुरोगयुक्तः, स्त्रीणां प्रियः, शत्रुंजयो स्यात् । देवगुरोर्लग्ने यदि त्रिंशांशकस्तदा बहुशास्त्ररक्तः, दृढप्रतिज्ञः परिश्रमी, दुःसाहसः, सत्यात्मकः, देवगुरुषु प्रसक्तः-एतत् फलं वर्णितम् ।

मगधदेशोद्भवस्य लग्ने त्रिंशांशः, तदा स जातकः सुखी, समृद्धः, सद्धर्मयुक्तः, गुरुबन्धुजनमान्यः, मितभोजी, धर्मपरः, कृतज्ञश्च स्यात्।

यदि लग्ने अङ्गिरादेशोत्पन्नस्य त्रिंशांशः प्राप्तः, तदा सदयः, लज्जान्वितः, सत्यपरायणः, कृतज्ञः, उदारचेष्टः, हितकरः, सुरूपः, सुखी च जायते ।[७५१]

## स्थानबलिनो लग्नफलम्

यदि जन्मलग्नं स्थानबलेन युक्तः, अर्थात् लग्ने लग्नेशः शुभखेटानां योगे, शुभग्रहाणां मध्य उपस्थितः, तदा स्थानवृद्धिः, पदवृद्धिदः, प्रतिष्ठालाभदः, भूपालेन सम्मानितः, सौभाग्ययुक्तः, दारायाः पूर्णसुखयुक्तश्च स्यात् ।[७५२]

## दिग्बली लग्नफलम्

यदि लग्नं दिग्बली स्यात्, प्राच्यां पूर्वदिग्बली राशिः स्यात् ,पुरुषराशीणां - मिथुन -कन्या-तुला-धनु(पूर्वाधम्)कुम्भराशीणां-लग्ने स्यात्, दिग्बली ग्रहास्तत्र वा स्युः, तदा जातकं गुणिनं, सर्वासु दिशासु लाभदं, रोगशत्रुनाशयुतं , लोके प्रियतायुतं च करोति।[७५३]

## चेष्टाबलस्य फलम्

यदि जन्मकाले लग्नं चेष्टाबलस्य भवति वा लग्नेशश्चेष्टाबलेन युक्तः, तदा जातकः सुचेष्टः, प्रियमित्रलाभयुतः, मिष्टान्नप्रेमी, चतुष्पदानामाधिपत्येन समृद्धो भवेत्।[७५४]

---

[७५१] वृ.य.जा.२४.३६-४०

[७५२] वृ.य.जा.२४.४१

[७५३] वृ.य.जा.२४.४२

[७५४] वृ.य.जा.२४.४३

यद्यपि राशीनां चेष्टाबलं जातकग्रथेषु न वर्णितं, तथापि यवनमतेन राशीशः, तस्य प्रकृतराशिर्य उच्चग्रहः, तद्बलयुतस्तदा राशिमपि बलवतीं मन्यते । अर्थात् राशीनां यद् बलं तत्पृथक्तया न कथितं, तदा राशीनां बलिग्रहाणां बलं विचारितं भवेत्।[७५५]

**कालबली लग्नफलम्**

यदा लग्नं कालबलेन युक्तम्- अर्थात् सायंकाले कीटराशिः, दिवा द्विपदराशिः, रात्रौ च चतुष्पदराशिः-तस्मिन् कालमध्ये जन्म, तदा जातको नराणां प्रियो लाभकारी च भवति, नृपेण पूजितः स्यात्, रोगक्षयं साधुजनेन सौख्यं च प्राप्नोति।[७५६]

**षड्वर्गशुद्धलग्नस्य फलम्**

यदि जन्मलग्नं षड्वर्गशुद्धं भवेत्, तदा तं मनुजं शरीरे सौख्यसमेतं, सौभाग्ययुक्तम्, उत्तमस्वास्थ्ययुतं, हस्तपादाभ्यां कान्त्यन्वितं, सर्वगुणैः सम्पन्नं च ज्ञेयम्।[७५७]

लग्नस्य बलं समस्तजन्मकुण्डल्या हृदयं वर्तते । यदि लग्ने समस्तषड्वर्गाणां राशिः-होरा-द्रेष्काणः, नवमांशः-द्वादशांशः-त्रिंशांशः, सर्वराशीनां शुभता तदा षड्वर्गशुद्धिर्मन्यते ।अधिकशुभवर्गत्वादप्यानुपातिकं शुभफलं पूर्वोक्तप्रकारेण निर्णीतव्यम् ।[७५८]

तस्य विपरीतं यदि सर्वत्र वा बहुवर्गेषु पापग्रहाणां राशीणां वर्गः स्यात्, पापयुक्तवर्गे, लग्नेशस्य नीचराशीणां वर्गे भवेत्, तदा लग्ने पापवर्गाणामधिकता भवति। वर्गशुद्धिः पापवर्गाणां तथा शुभवर्गाणामूनकारणेन शुद्धवर्गः प्राप्यते । यदि शेषं शुभवर्गः स्यात्, तदा शुभं, तथा शेषं पापवर्गः स्यात् तदा अशुभमेव गण्यते ।

---

[७५५] वृ.य.जा.२४.४३ हिन्दीव्याख्या
[७५६] वृ.य.जा.२४.४४
[७५७] वृ.य.जा.२४.४५
[७५८] वृ.य.जा.२४. ४५ हिन्दीव्याख्या

लग्ने यदि पापवर्गाणामधिकता, तदा मनुजो निर्बलो बलहीनो वा शिरालुः, दुर्गन्धयुतः,करालरूपः, अत्यन्तं जटिलः, स्त्रीणां प्रति क्रूरव्यवहारयुतो भवति।[७५९]

**अधिकाङ्गकाणयोगौ**

यदि जन्मलग्ने षड्वर्गमपि शुद्धं, परन्तु शनिभौमयुतं स्यात् , तदा जातको दृष्कर्म करोति। यद्युपर्युक्तयोगे दिवाकरस्य पूर्णदृष्टिः पतति, तदा जातकोऽधिकाङ्गः काणो वा भवेत्।[७६०]

**नेत्रे कर्णे च विकारयोगः**

जन्मप्रसूते लग्ने भूतनयस्य नवांशः स्यात्, तथा लग्नोपरि कस्यापि शुभग्रहस्य दृष्टिः न स्यात् , जन्मकाले कुजो व्यये मृत्युभावे च स्यात्, तदा जातकं कर्णे नेत्रे च विकारयुक्तं वदेत् । अनेन सार्धमेव स कृशो दीन एवं अल्पवीर्यश्च जायते ।[७६१]

**निशान्धादियोगः**

जन्मकाले लग्नेऽर्कस्य नवांशः स्यात्, लग्नोपरि कस्यापि शुभग्रहस्य दृष्टिर्नास्ति, सूर्यो द्वादशेऽष्टमे वा स्यात्, एवं यदि रात्रिकाले जातकस्य जन्म तदा निशान्धो भवति, तथा दिवाजन्म, तदा दिवान्धत्वं प्राप्नोति ।[७६२]

**खल्वाटकयोगः**

पापा व्यये स्युः, शुभखेटाः कलिंगोद्भवेन युक्ता मरणे स्युः, तदा खल्वाटयोगो ज्ञेयः। तद् विपरीतं पापा यद्यष्टमे स्युः, तथा शुभखेटा रविणा सह व्यये स्युः, तदा शुचिवर्जितोऽपवित्रश्च स्यात्। एवं भुक्तादीनामपि शुचिता न पालयति ।[७६३]

---

[७५९] वृ.य.जा.२४.४६

[७६०] वृ.य.जा.२४.४७

[७६१] वृ.य.जा.२४.४८

[७६२] वृ.य.जा.२४.४९

[७६३] वृ.य.जा.२४.५०

**अतिरौद्रयोगः**

जन्मकाले क्लीबे (नपुंसकौ) अर्थात् मन्दः सौम्यश्च स्याताम्, व्यये, सुते, लग्ने वा कोऽपि खेटः स्यात्, तदा स बृहदाकाराधरोऽतिरौद्रश्च ज्ञेयः । लग्ने कोऽपि खेटो न, तदा शेषं च यथावत्, तदा दृष्टिहीनत्वमन्धत्वं वा जायते ।[७६४]

**दृष्टिविकारयोगः**

जन्मसमये पूर्वक्षितिजोपरि सिंहं लग्नमुदितं, एवं दिननाथस्तथैव स्थितः, तदा मनुजस्य दृष्टिमध्ये विकारो दृश्यते । सिंहलग्ने विधुर्व्यये भवेत्, तदार्धदृष्टिर्जायते, अर्थात् तस्य जातकस्य नेत्रस्योपनेत्रं (शीशादिकनिर्मितं) संख्याधिकं भवेत् । यदि कस्यापि जातकस्य जन्म मेष-वृश्चिकयोः स्यात्,भौमश्च लग्ने स्यात्, तदा जातकं विरूपाक्षं कथयेत्।[७६५]

**कुब्जवामनयोगौ**

लग्ने यदि पापाः समस्ताः, सौम्या अष्टमे स्युः, तदा जातकं कुब्जं करोति। तद् विपरीतं- समस्ताः शुभा लग्ने स्युः, समस्ताः पापा अष्टमगाः, तदा जातको वामनो ज्ञेयः।[७६६]

**कुष्ठरोगयोगः**

पाताले निधने च यदि पापाः, मेषूरणे च शुभग्रहाः, तदा जनकं त्वग्विकारैः कुष्ठादिरोगैः ग्रसितं करोति । एतदतिरिक्तं चतुर्थाष्टमं शुभपापमिश्रितं, तथान्तरिक्षे च मिश्रितग्रहाः, तदा स जातकः स्वयमेव कुष्ठविकारैः पीडितो भवति। कुष्ठरोगाद् आंग्लभाषायां Alergy इत्यादिकं च ज्ञेयमेव ।[७६७]

---

[७६४] वृ.य.जा.२४.५१

[७६५] वृ.य.जा.२४.५२

[७६६] वृ.य.जा.२४.५३

[७६७] वृ.य.जा.२४.५४

**हृद्गदयोगः**

व्यये पापाः स्युः, शुभाः पराक्रमे स्युः, तदा दुर्गन्धयुतं वक्त्रं वर्तते। यदापर्युक्तस्थितिः पापानां नवांशे स्युः, तदा हृदयरोगो वर्णितः । यदि रोगभावेऽधिकसंख्याकं पापानां नवांशे स्थितिः, तदा जातको दरिद्रो भवेत् ।[७६८]

**बृहद्वृषणयोगः**

यदि पापस्य राशिर्लग्ने, लग्ने पापस्य नवांशश्च, अथवा पापानां दृष्टिः, एवं सौम्येन नावलोकिनं, तदा मनुजस्याण्डकोषं वृषणं वा प्रलम्बं स्यात् । यद्युक्तयोगे पापलग्नोदितं, एवं पापानां दृष्टिः, पापनवांशश्च, एवं जीवस्य दृष्टिर्भवेत्, तदा प्रलम्बलिङ्गश्च वर्तते । सूर्यश्चतुर्थे स्यात्, मन्दो निधने स्यात्, एवं स्ववर्गे गतः सौम्यस्तनुस्थः, तदा जातकोऽत्यन्तशूरः, कान्तियुक्तः, सुमधुरभाषी, सत्यरत एवं सुलोचनश्च जायते ।[७६९]

**गुरुनवांशगतलग्नफलम्**

जन्मकाले जीवस्य नवांशो लग्ने स्यात्, स्वयं च देवपुरोहितो लग्नगः, तदा सरूपः, सुभगः, स्त्रीणामभीष्टः, सुरतेऽतुलः, प्रियभाषी, गीतविद्यायां संगीतरसिकश्च ज्ञेयः । यदि जन्मकुण्डल्यां लग्ने भार्गवतनयस्य नवांशः स्यात्, लग्ने च सितः, तदा भोगी, सुविज्ञः, सुमतिः, सदर्पी, सुरूपः, दयालुः, सुवेषवस्त्राभरण प्रियश्च भवेत् । यदि लग्ने शुभराशिः शुभखेटाः, तदा जातको सुरूपः शुभवक्त्रनेत्रश्च जायते । लग्ने शुभखेटस्य नवांशः,तदा शुभांस-वक्षस्थलश्च प्रोच्यते । लग्ने निशाकरस्य होरा, तदा शुभबाहुधारी भवेत् । लग्ने शुभत्रिशांशः, तदा स जातकः सौम्यः सुशीलश्च भवेत्।[७७०]

---

[७६८] वृ.य.जा.२४.५५

[७६९] वृ.य.जा.२४.५६-५७

[७७०] वृ.य.जा.२४. ५८-६०

## नवांशेन विभिन्नाङ्गस्वभावादीनां विचारः

जन्मकाले शुभराशेर्लग्नमुदितं, तस्मिनेव भानोर्नवांशः, तदा जानुपार्श्वं शोभनीयं स्यात् (शोभनं जायते वा) । बलयुक्तलग्नोपरि शुभखेटानां दृष्टिः, तदा जातकः पराक्रमी भवेत्, ओजस्वाँश्च भवति । जन्मसमये यदि लग्ने कोऽपि खेटः स्वनीचे स्यात्, शुभग्रहेण कोऽपि न सम्बन्धः, तदा श्यामदन्त एवं स प्रायेण कर्महीनः पिशुनस्वभावयुतश्च भवेत् । यदि लग्ने कन्यायाः नवांशः, शुभग्रहेण लग्नं नावलोकितं, तदा कन्यारतः, पापयुक्तः, कन्यालोलुपः, स्त्रीलम्पटः, सततं विलुब्धश्च दृश्यते । जन्मकाले कुजस्य नवांशो मन्दश्च मदने स्यात्, तदा वृद्धाङ्गनेषु निरतः, कामानिपीडितात्मा च सदैवं भवेत् । यदि जन्मलग्ने सौराष्ट्रदेशोद्भवस्य नवांशः, लग्ने च शशांकः धनुषि, तदा जातकं वेश्यागमनेऽनुरक्तं, सदातुरं रुग्णयुतं, पापकार्ये निरतं, पशुतुल्यं, हिंसकं करोति । लग्ने यद्यर्कगृहस्य राशिः स्यात्, दिनकरश्च लग्नगो भौमेन दृष्टं लग्नं, अर्कजश्च दारायां स्यात् , तदा तस्य भाग्यसिद्धिः कदापि न भवेत्, तस्य गुप्ताङ्गं वक्रं भवेत् । यदि तद्विपरीतं ग्रहस्थितिः प्राप्ता, अर्थात् लग्ने कोणः, कलत्रेऽर्कः, एवं पितापुत्रयोरूपरि भूपुत्रस्य दृष्टिः, तदा विपरीतक्रियायामनुरक्तो ज्ञेयः। नीचगृहे यदि मन्दः, जायाभावे, अर्थात् तुलालग्ने जन्म स्यात्, सप्तमे मेषराशिः , मध्ये मन्दगतिगः, तनुगे पापाः, लग्नं शुभखेटैः नावलोकितं, तदा स मनुजो नीचकुलोत्पन्नस्त्रीष्वनुरक्तः, स्वहस्तै रतिक्रीडायां तोषयुतो रतो वा स्यात्। क्षमापुत्रो धनाश्रितः, शनैश्चरश्चारिनवांशे पाताले व्ययस्थो वा, तदोन्मत्तस्य सदृशं दृष्टः, समाजे सर्वत्र निन्द्यः, कृतघ्नश्च जायते । दिननाथास्त्रिकोणे (पञ्चमे नवमे वा) कुजः स्यात्, मन्दश्च सौम्यगृहाश्रितः, तदा मनुष्यः पादौ जानू इत्यादिषु लम्बकः, विरूपदेहः, सर्वेषां प्रियः, साहसपूर्णकार्यं च करोति । मृत्युगतो दिवाकरपुत्रो व्ययेस्थश्च भूतनयः, तदा स जातकोऽपुत्रः, सन्ततिविहीनो वा, पिशुने रतः, व्रणादियुक्ताङ्गः, विरूपः पापरतश्च भवेत् ।[७७१]

---

[७७१] वृ.य.जा.२४.६१-७०

## लग्नोपरि ग्रहाणां दृष्टिफलम्

अर्केण दृष्टं लग्नं, तदा सनृशंसचेष्टः, परुषस्वभावः, बहु-अभिमानी, निकृष्टधर्मा, रुजान्वितः, द्वेषरतः, सुशीलश्च भवेत् । लग्नोपरि निशाकरस्य पूर्णदृष्टिः पतति, तदा धर्मपरः, वरयानयुतश्च, स्त्रीभोगी, प्रभयासमेतः, प्रियंवदः, शास्त्रकथानुरक्तो विशेषेण दृश्यते । कुजेन विलोकिततनुभावः श्लेष्मविकारैः पीडितः, रक्तसमुद्भवैः पीडितः, सदातुरश्च जायते । चन्द्रपुत्रेण दृष्टं लग्नं, तदा सत्यभाषी, सुभगः, सच्चरित्रः, क्षितिपतिना पूज्यः, प्रथितः, प्रसन्नः, प्रियंवदः, दानपरः, अल्पकोपो जातको भवति । सुरपूज्येन विलोकिते लग्ने, जातकः रत्न-गज-अश्वादिकवाहनैर्युक्तः, नानार्थ-लाभयुतः, प्रगल्भः, प्रधानमनुजैः सेव्यः, द्विजदेवभक्तश्च ज्ञेयः। भार्गवतनयस्य पूर्णदृष्टिर्लग्नोपरि पतति, तदा पुण्यपरः, कृतज्ञः, यज्ञिकः, विवेकी, सुदृढः, हतारिपक्षः, शत्रुजितः, प्रणतः, प्रसन्नचित्तैः स्वकार्यं साधयति । जन्मकुण्डल्याः प्रथमो भावः सौरेण दृष्टस्तदाल्पसुखः, रोगान्वितः, स्वल्पसुतः, अल्पवित्तान्वितः, नीचजनानुरक्तः, सततं कृतघ्नश्च स्यात्।[७७२]

## लग्नस्वग्रहफलाध्यायः

## स्वतुङ्गे स्थितवासरपस्य फलम्-

यदि जन्मपत्रिकायामर्कः स्वतुङ्गे - मेषराशौ स्यात्, तदा तीव्रा तनुः संजायते। यद्युदितलग्ने स्वोच्चनवांशगो वासराधिपः, तदा दृढगात्रः, इत्थं प्रकारेण षड्वर्गशुद्धौ दिवामणिः, तस्यानेकभार्याभिरुद्वाहस्य योगं करोति ।[७७३]

---

[७७२] वृ.य.जा.२४.७१-७७

[७७३] वृ.य.जा.२५.१

**नीचस्थसूर्यलग्ने-**

लग्नभावे यदि दिनपतिः स्वनीचे तुलायां स्यात् ,तदा सदैव सरुजं विधत्ते । सैव दिनकरो यदि नीचनवांशे (परमनीचराशौ) स्यात्, तदा लावण्यहीनत्वफलं ददाति। दिननाथो लग्ने पापवर्गे स्थितः, तदानीतिपूर्णकार्येषु निरतो जायते ।[७७४]

**लग्ने मित्रगृहे दिवामणिः**

यदि वासरेशो मित्राश्रयस्तनुगः, तदा जातकं दीर्घतरगात्रं ज्ञेयम् । मित्रस्य नवांशे यदि भास्करः, तदा जटिलकेशो भवेत्। यदि वर्गोत्तमनवांशे, तदा हस्तपादाधिकशाखिनं ज्ञेयम् ।[७७५]

**शत्रुगृहे सूर्यो लग्नभावे**

लग्ने यदि भानुः शत्रोर्गृहे, तदा जातकः कृशतनुः स्यात्। यदि कलिङ्गदेशोद्भवः शत्रुनवांशे स्थितः, तदा स नीतिवर्जितं, गोलाक्षं, हीनाक्षकोणं च करोति।[७७६]

**विलग्न उच्चचन्द्रः**

जन्मलग्ने यदि पूर्णचन्द्रः स्वोच्चे - वृषभराशिमध्ये स्थितः, तदा मनुजस्य वपुः सौम्यं, प्रसन्नचित्तं, नेत्रप्रियं च भवेत्। निशिनाथः स्वोच्चनवांशे भवेत्, तदा सुमनोहरा तनुर्ज्ञेया। लग्ने षड्वर्गशुद्धनिशिनाथः, तदा वरनेत्रयुक्तः सुलोचनो वा जायते।[७७७]

**वृश्चिकराशेश्चन्द्रो लग्नभावे**

शुभाङ्को नीचाश्रितो यदि तनुगः, तदा क्षीणतनुर्भवेत् , काणत्वयुतश्च स्यात्। यदि सैव निशिनाथो नीचराशेर्भवेत्, तदा निशान्धकं जनयति। लग्नगतः सौम्यतातः पापवर्गे, तदा मनुजस्य नेत्रे तिमिरत्वं जायते। [७७८]

---

[७७४] वृ.य.जा.२५.२
[७७५] वृ.य.जा.२५.३
[७७६] वृ.य.जा.२५.४
[७७७] वृ.य.जा.२५.५
[७७८] वृ.य.जा.२५.६

**मित्रराशिस्थश्चन्द्रो लग्ने**

मित्रगृहे (मित्रगृहाणां राशौ) शीतकरो लग्ने, तदा सुतनुधारी, मनोज्ञः, सुभगश्च जातको भवति। मित्रराशिनवांशे प्राप्तः, तदा वरवक्त्रयुक्तः। लग्ने यदि वर्गोत्तमांशनवांशे स्थितः, तदा सुशरीरः, कान्तियुक्तश्चोक्तः।[७७९]

**तनुगः शत्रुक्षेत्री शीतनाथः**

तनुगे निशिनाथः स्वशत्रुगृहाश्रितः, तदा जातको निशान्धः, तस्य बहुकेशाः, स्थूललोमाश्च भवेत्। यदि स यमुनातीरोद्भवो रिपुनवांशे स्थितः, तदा पृथुदीर्घकायस्य फलं लभते। पूर्णिमायां ग्रहणे जातको यदि लग्ने मूलत्रिकोणे राश्यां स्थापितः, तदा शुभाधरौकं प्रकरोति ।[७८०]

**उच्चकुजो लग्ने**

अङ्गारको स्वतुङ्गे स्थितो लग्ने, तदा स मर्त्यः संरक्तमनीषश्च दृश्यते । लग्ने कुजो यदि स्वतुंगनवांशे स्थितः, तदा चिपिटस्वभावः, चिपिटनासिकायुतः, मुखं च तथैव। एवं यदि षड्वर्गशुद्धो भौमो लग्ने स्यात्, तदा स्वभावेन कर्कशं जातकं करोति।[७८१]

**विलग्ने नीचगत-अङ्गारकफलम्**

नीपाश्रितो भूसुतो लग्नगः, तदा सदैव कामातुरो स जातको भवेत्। यदि सैव कुजः मूर्तिस्थाने स्वनीचनवांशे निशान्धत्वफलप्राप्तिः । तनुगे पापानां वर्गे वक्रदृष्टिफलम् । लग्ने मित्रनवांशे प्राप्ते नेत्ररोगं करोति । यदि देहस्थाने क्षमासुतः वर्गोत्तमांशो नवांशे स्थितः, तदा दूरदृष्टिर्दूरविलोकी च जातको जायते।[७८२]

---

[७७९] वृ.य.जा.२५.७

[७८०] वृ.य.जा.२५.८

[७८१] वृ.य.जा.२५.९

[७८२] वृ.य.जा.२५.१०

**रिपुक्षेत्री भौमो लग्ने**

भूमितनयो यदि लग्ने शत्रुगृहे च तदा बहिर्दृष्टिर्भागिति फलम् । सौम्यखेटस्य नवांशे तदा समीपदृष्टिं करोति। लग्ने भौमो यदि मूलात्रिकोणराश्यां तदा जलार्द्रदृष्टिर्भवति ।[७८३]

**स्वतुङ्गे सौम्यो लग्नगः**

कन्यायां सौम्यस्तनुगः सुमुखम्, उन्नतनासिकायुतं च करोति । स्वनवांशे चन्द्रात्मजो यदि मूर्तिस्थाने तदा सुदन्ता एवमोष्ठं च मनोरमं भवति । लग्ने षड्वर्गे शुद्धो मगधदेशोद्भवः सुशरीरकान्तिं ददाति ।[७८४]

**नीचस्थज्ञः**

सोमपुत्रो नीचाश्रितो लग्नगः, तदा वक्त्रकुगनधतां याति । नीचनवांशे च ज्ञस्तदा जिह्वादीर्घकरालमशोभनीयं करोति। पापानां वर्गे विद्वान्  तस्य फलं दीर्घकर्णत्वं भवेत्।[७८५]

**लग्ने मित्रगृहे**

लग्ने बुधो यदि मित्रराशौ स्यात्, तदा शुभ्रशिरोरुहः स्यात् । लग्ने मित्रस्य नवांशे शुभदृष्टिं याति, वर्गोत्तमनवांशे लग्नगः, तदा सुरूपो गोलाकारो दर्शनयोग्यश्च स्यात्।[७८६]

**रिपुगृहस्य फलम्**

जन्मसमये यल्लगनमुदितं तस्मिन्नेव स्थाने सौम्यः शत्रुगृहे तदा करालवदनो जातको भवति।शत्रुनवांशे लग्ने चपलस्वभावः।यदि स्वमूलत्रिकोणराश्यां तदा रोगवृद्धिकरं वदेत्।[७८७]

---

[७८३] वृ.य.जा.२५.११

[७८४] वृ.य.जा.२५.१२

[७८५] वृ.य.जा.२५.१३

[७८६] वृ.य.जा.२५.१४

**लग्ने सुरेज्यस्य फलम्**

कर्कराशिमध्ये जीवो लग्ने प्राप्तस्तदा मनोज्ञं मनुष्यं विजनयति। यदि तदैव गुरुरुच्चनवांशे प्राप्तस्तदा शुभबाहुहस्तयुक्तश्च स्यात्। षड्वर्गशुद्धो यदि देवाचार्यः, तदा शुभचर्मयुक्तं वदेत् ।[७८८]

**नीचराशेः गुरुलग्नगं तत्फलम्**

देवगुरुर्विलग्ने नीचाश्रितस्तदा खञ्जं निरुजं च जातकं करोति। नीचनवांशे देवपुरोहितो लग्नगः, तदा खञ्जनसमाननासकं रक्तवर्णा स्वल्पा च नासिका भवेत् । पापानां वर्गे यदि देवगुरुः,तदा सुभूषणाढ्यं करोति ।[७८९]

**मित्रगृहे गुरुर्लग्नगतः**

मित्राश्रयस्थो देवपुरोहितस्तनुगस्तत् फलं वर्ण्यते यत् – मित्रस्य नवांशे जीवः, तदा सुकटिं सुनाभिं करोति। वर्गोत्तमांशे यदा जायते, तदा गुरुः सुभगोदरं करोति ।[७९०]

**अरिगृहगतो गुरुः**

लग्ने यदि देवराजपुरोहितः शत्रुणां गृहे गतस्तदा स्वोदरिकं प्रसूते। शत्रोर्विभागे (नवांशे वा) फुल्लोदरो भवति। मूलत्रिकोणराश्यां लिङ्गरहितं करोति ।[७९१]

**विशेषः**

लग्ने मूलत्रिकोणी शुभग्रहः सदैव शुभफलमेव ददाति । मतानुसारेण महापुरुषयोगमपि निर्माणं करोति मीनराजस्य वचनमिदम् । अन्येषां विद्वज्जनानां मतेन मूलत्रिकोणराशेः फलं स्वराश्याधिकम्, उच्चराशेः किञ्चिदूनं ज्ञेयम् ।[७९२]

---

[७८७] वृ.य.जा.२५.१५
[७८८] वृ.य.जा.२५.१६
[७८९] वृ.य.जा.२५.१७
[७९०] वृ.य.जा.२५.१८
[७९१]वृ.य.जा.२५.१९

**उच्चस्थसितो लग्ने**

स्वतुंगे यदि भार्गवाचार्यो लग्नसंस्थः, तदा सुरूपजानुं मनुजं करोति। यदि उच्चनवांशे भृगुपुत्रः, तदा शुभपाणिपादं फलमुक्तम् । लग्ने यदि दैत्यपूज्यः षड्वर्गशुद्ध– स्तदा सुविभक्तगात्रं वदेत् ।[७९३]

**नीचस्थशुक्रो लग्ने**

यदि लग्ने कन्याराशेर्दैत्याचार्यः, तदा शिरसोपरि स्वल्पकचं करोति । यदि स्वनीचनवांशे, तदा खल्वाटं करोति, एवं लग्ने पापानां वर्गे स्यात्, तदा शरीरे वलिरोमं ददाति ।[७९४]

**मित्रगृहे लग्नस्थभार्गवः**

लग्ने सर्वशास्त्रप्रवक्तारो मित्रगृहे स्थितः, तदा सुभगत्वं शुभकीर्तिभाजत्वफलं प्राप्यते। लग्ने यदि मित्रनवांशः स्थितः, तदा सुनखं करोति। एवं सैव भृगुतनयो वर्गोत्तमनवांशे प्राप्तस्तदा बहुरूपी, अभिनेता च भवेत् ।[७९५]

**अरिगृहस्थभृगुसुतो लग्ने**

यदा शत्रुगृहं गत्वा लग्ने स्थितः, कुब्जतनुर्भवेत्स जातकः । अरिनवांशे च शरीराद् विगन्ध (दुर्गन्धो वा) आगच्छति । कृसवपुश्च भवेत् । यदि भार्गवपुत्रो लग्ने स्वमूलत्रिकोणराश्यां स्थितस्तदा तस्याकृतिः सुलोचना नयनमिरामा वा भवति ।[७९६]

**लग्नोच्चस्थमन्दः**

तुलाराशिगतो मन्दस्तनुगस्तदा श्यामतनुः स जातको भवेत् । यदि स्वोच्चनवांशे स्थितस्तदा भिन्नवर्णशरीरः। लग्ने षड्वर्गशुद्धो भूत्वा मूर्तिगः, तदा गौरगात्रत्वफलं वदेत्।[७९७]

---

[७९२] वृ.य.जा.२५.१९ हिन्दीव्याख्या

[७९३] वृ.य.जा.२५.२०

[७९४] वृ.य.जा.२५.२१

[७९५] वृ.य.जा.२५.२२

[७९६] वृ.य.जा.२५.२३

**नीचस्थछायासुतः**

छायापुत्रो यदि मेषगतो लग्ने स्थितः, कासाद्यैर्ग्रसितै जातकः स्यात्। नीचनवांशे कफवातपातं ददाति। पापग्रहस्य वर्गे पित्तविकारैर्दूषयति ।[७९८]

**मित्राश्रयी लग्ने**

लग्नेऽर्कतनयो मित्रस्य राशिमध्ये स्थितः, तदा गौर-गात्रमिति फलम् । यदा मित्रस्य नवांशे गतो सूर्यसूनुः, तदास्थिमज्जादिमध्ये विकारो भवेत्। वर्गोत्तमांशे कोणो लग्नगः, तदा पीवराङ्गं दृश्यते ।[७९९]

**रिपुगृहे दिवाकरतनयः**

रविजो लग्ने यदि शत्रोर्गृहस्थः, तदा कुरूपो विरूपो वा जातकः। सौराष्ट्रदेशोद्भवः शत्रुनवांशे स्थितः, तदा स्थूलदन्तं, एवं मूलत्रिकोणे सुदीर्घजानुं जातकं ज्ञेयम् । यदि लग्नेऽर्कसुतः स्वोच्चे स्वक्षेत्रे वा, तदा क्षितिपालतुल्यो देशपुराधिनाथो वा जायते । यद्यन्यावस्थायामाश्रितः,तदा बाल्ये दरिद्रः, काम-व्यसनी, मलिनोऽलसश्च जायते ।[८००]

**धनभावफलाध्यायः**

कस्यापि जातकस्य जन्मपत्रिकाया जन्मचक्रे दिवमणिर्यदि द्वितीयभावे मेषराशिमध्ये प्राप्तस्तदा भूपालेन मान-सम्मानो भवेत् । यद्युच्चनवांशे स्थितोऽर्कः, तदा स क्षितिपालसेवकः, राजकीयसेवारतो वा भवेत्। षड्वर्गशुद्धकुण्डल्या-मधिकस्थानाानि यदि शुभवर्गे गतानि, तदा सज्जनानां सहायेन धनोपर्जितं करोति। शुभजना-नामाश्रयेणाजीविकां च प्राप्नोति । द्वितीयभावे वीराणामधिपस्तुलाग-

[७९७] वृ.य.जा.२५.२४
[७९८] वृ.य.जा.२५.२५
[७९९] वृ.य.जा.२५.२६
[८००] वृ.य.जा.२५.२७-२८

तस्तदान्यायेन, पापमार्गेण वा धनोपार्जितं करोति । एवं धर्मावलम्बनेऽप्यधर्मादिकं याति । स्वकीयन–वांशे स्थितस्तदा स्थलाद् भूमिद्वाराजीविकां प्राप्नोति। पापग्रहाणां वर्गे याति, तस्करादितो धनमुपार्जयति । दिनपो यदि वित्ते गतो मित्रराश्यां भवति, धन–धान्या–दिकेनान्नेन वा धनोपार्जेने रतो भवति। मित्रनवांशे स्थितः, तदा लोहधातुना–जीविकामुपार्जयति । वर्गोत्तमांशो धने दिवाकरः, तदा परदारजातं करोति । यदि शत्रोर्गृहे गत्वा वित्ते संयुक्तस्तीक्ष्णरश्मिः, तदा धन–एकत्रीकरणेऽपि सदैवाल्पधन एव दृश्यते । यदि शत्रुनवांशे तपनो द्वितीयभावे, तदाधर्मिजनानां सेवया धनं प्राप्यते। स्वमूलत्रिकोणराश्यां स्थितः, तदा भिक्षावृत्तिद्वारा जीविकोपार्जने सफलो जायते ।[८०१]

**धनस्थरात्रिपतेः फलम्**

स्वोच्चे यदि चन्द्रो द्वितीयभावे स्थितः, तदा प्रायेण मुक्ता–मणि–धनेन युक्तो भवेत्। स्वोच्चे नवांशे यदि हिमांशुस्तदा जातकं रजतकनकयुक्तं ज्ञेयम् । षड्वर्गशुद्धो द्वितीयभावो यदि, तदा जातकं विविधहिरण्यादिकेन युक्तं करोति।५।वृश्चिकराशिमध्ये धवलकान्तिर्धनगः, तदा स मनुजः स्ववित्तमसत्कार्ये व्ययं करोति । नीचनवांशे स्थितः, व्ययेन हीनं करोति। पापानां वर्गे, सैव निशिनाथो वसूनामाभूषणादिभ्यो भयेन संतप्तं करोति। यस्य मित्राश्रयस्थो वित्तगः शशिः, तस्य संततिर्धनयुता, सुहृदां समृद्ध्या स सुखी स्यात्। मित्रग्रहाणां नवांशे रात्रिपतिः, तदा कृषिकार्येण धनोपार्जनी। धनस्थाने यदि शशांको वर्गोत्तमनवांशे. तदा मित्राश्रयेण– तेषां धनेन वा सुखं प्राप्यते।७। अरिगृहे वित्तगो यदि विधुः, तदा तस्करेण धनमर्जयति, यदि शत्रुग्रहाणां नवांशे भवति, तदा कुकर्मणा (अधर्मेण वा)धनं प्राप्यते। मूलत्रिकोणे स्यात्, तदा तस्य दारा धनोपार्जनं करोति, एवं स उपभोगमात्रं करोति । [८०२]

---

[८०१] वृ.य.जा.२६.१–४

[८०२] वृ.य.जा.२६.५–८

**धनस्थाङ्गारकफलम्**

कोशगः कुजः स्वतुङ्गाश्रितः, तदा युद्धेन धनमर्जयति विजयति वा। स्वोच्चनवांशे यदि भूतनयः, तदा बहुकष्टेनातिस्वल्पं धनं प्राप्यते । षड्वर्गशुद्धो यदि भौमस्तदा स्वजनोद्भवेन धनेन भोगकरतां याति । जन्मकाले यदि कुजः कर्के भूत्वा कोशे स्यात्, तदा निर्धनः स्यात्। स्वकीयनवांशे ग्रहकुमारः, तदा बहु–ऋणी स्यात्। पापोत्थवर्गे सति, जातकं व्रणदेहयुक्तं वदेत् । यदि क्षमातनयो मित्रसंस्थो वित्ते प्राप्तस्तदा मित्रबलेन जीवनं यापयति। यदि मित्राणां नवांशे स्थितः, सुहृज्जनाश्रयेण। वर्गोत्तमनवांशे च स्याद् धरणीसुनुः, तदा देवगुरुप्रसादाद् धनप्राप्तिर्भवति । कुण्डल्याः कोशस्थाने यदि मंगलः शत्रोर्गृहे संस्थितो जातकाय कदाचिदेव धनं ददाति। यदि शत्रुराशिनवांशे ऋणेन पापसङ्गाद्वा धनं प्राप्तं भवति। यदि स्वमूलकत्रिकोणराश्यां, तदा जनोपरोधादर्थाद् बलपूर्वकं धनहरणं नाम–अधर्मेण धनं हरति ।[८०३]

**धनस्थसौम्यस्य फलम्**

स्वतुङ्गे कोशसंस्थो यदि चन्द्रात्मजः, तदा पूर्वकालात् संचितमेवं भूरिधनं भवेत्। यदि स्वोच्चनवांशे सौम्यः, तदा चतुष्पदेन–कृषिकार्येण वा धनं लभ्यते । षड्वर्गशुद्धे विविधैरूपायैर्लाभदः स जातकम् । मगधदेशोद्भवः कोशे यदि मीनराश्यां स्यात्, तदा नराणां निकृष्टवित्तं कुरुते। यदि स्वनीचनवांशे, तदा तं जातकं रिपुतो दीनजनैर्धनं ददाति । पापग्रहाणां वर्गे स्यात्, वर्गे पापानामधिकता वा स्यात्, तदा बहुवञ्चनैः (असद्भाषणादिभिः) धनं प्राप्तं करोति । मित्राश्रयस्थो यदि रोहिणीपुत्रो धनगः, तदा वणिक्कर्मणा धनलाभं करोति । मित्रराशेर्नवांशे, सुहृदां सहायेन धनप्राप्तिं करोति । वर्गोत्तमनवांशे यदि सौम्यः, तदा सत्कर्मणा धर्मकार्येण वा धनामर्जयति । द्वितीयभावे सोमपुत्रो यदि शत्रुणां गृहे स्थितः, तदा शत्रुणा सह धनं प्राप्यते । शत्रुनवांशे तदाल्पधनैः, त्रिकोणे च वरलोकैः सहायेन धनप्राप्तिं कर्तुं स क्षमः स्यात् ।[८०४]

---

[८०३] वृ.य.जा.२६.९–१२

[८०४] वृ.य.जा.२६.१३–१६

**वित्तस्थदेवपुरोहितस्य फलम्**

जन्मकुण्डल्याः कोशस्थाने यदा जीवः स्वोच्चे स्यात्, तदा तस्य समीपं सदैव न्यायार्जितं धनं प्राप्तं स्यात् । स्वोच्चे नवांशे च स्थितः, तदा पूर्वजसंचितं वित्तं प्राप्यते। एवं च पूर्वोक्तावस्थायां षट्वर्गशुद्धो द्वितीयस्थः, तदा बहु धनमर्जयति । देवगुरुर्द्वितीये यदा नीचाश्रितः, तदा परदारातो धनं प्राप्तं करोति । यदि नीचनवांश उपास्थितस्तदा शूद्रैरन्त्यजनैर्दासैर्वा धनप्राप्तिं वदेत् । पापाग्रहाणां वर्गे तदा बहुकष्टाद् धनप्राप्तिरुक्ता । द्वितीये च जीवः स्वमित्रगृहे स्थितः, तदा वस्त्र-गज-अश्वैराजीविकां करोति । मित्रनवांशे च देवपूज्यः, तदा कृषिप्रसूतं वित्तं प्राप्तं भवति । वर्गोत्तमांशे प्राप्तो यदा ऋषिपूज्यः, तदा सुजनप्रदत्तं तस्य जातकस्य समीपे धनं भवेत् । कुण्डल्या वित्ते यद्यरिगृहे बुद्धिभूतः स्थितः, तदारिनिवेषणेन धनमर्जयति । शत्रुनवांशे गतो यदि, तदा शत्रुजनेन प्रदत्तवित्तेन जीवनं यापयति। स्वमूलत्रिकोणराश्यां यदि जीवः, तदा निधिजेन भूमिमध्यप्राप्तधनेन वा जीविकां करोति ।[८०५]

**धनस्थसितफलम्**

जन्मसमये कस्यापि जातकस्य कुण्डल्यां यदि कोशे सितः स्वतुंगे स्थितः, तदा अक्षयमेवं भूरिधनं प्राप्यते । उच्चनवांशे स्थितः, तदा पूर्वजसंचितं धनं भवति । षड्वर्गे शुद्धो भूत्वा वित्तस्थाने स्थितः, तदा नितान्तं धनमर्जयति स्वजीवने । दैत्यानां गुरुः स्वनीचराश्यां वित्ते स्थितः, तदा सेवया प्रेष्यकर्मणा वा धनं प्राप्यते । श्रुतिकर्मणा च धनमर्जयति । स्वनीचराश्यां नवांशे यदा स्थितः, तदा द्यूतार्जितम्। पापानां वर्गे प्राप्तः, तदा परदेशवसनेन धनं करोति । यदि भृगुतनयो मित्राश्रयस्थः कोशस्थाने, तदा नृपेण दत्तं धनं प्राप्तं भवेत् । मित्रनवांशे प्राप्तो यदि, तदा राजपुत्राद् धनप्राप्तिर्भवति। षड्वर्गशुद्धः, तदा राज्ञीसहायेन धनप्राप्तिं वदेत् । अरिगृहे यदि भार्गवसुतो वरकर्मणा

---

[८०५] वृ.य.जा.२६.१७-२०

श्रेष्ठकर्मणा वा धनं करोति। शत्रुवर्गाणां नवांशे यदि, तदा वृत्त्यादितो भिक्षया वा धनप्राप्तिं वदेत् । यदि मूलत्रिकोणराश्यां स्थितः, तदा स्वसुतार्जितधनेन सुखमुपभोगति।[८०६]

## कोशस्थकोणस्य फलम्

तुलायां यदि मन्दो जन्मकुण्डल्या वित्तस्थाने स्यात्, कुकर्मणा वित्तप्राप्तिं कथयेत् । उच्चनवांशे स्थितो तदा, कष्टेन सेवया वा। एवं च षड्वर्गशुद्धो भूत्वा द्वितीये स्यात्, तदा व्यसनोद्भवं वित्तनाथं तं जातकं ज्ञेयम् । अर्कजो यदि तस्मिन्नेव भावे स्वनीचराश्यां मेषे वा स्यात्, तदा नित्यमनेकदु:खभाजं जातकं विद्यात्। स्वनीचनवांशे स्थितः, तदान्त्यजनीचावृत्तियुक्तजनैः धनाश्रितं ज्ञेयम्। पापाग्रहाणां वर्गे गतः, तदा पापकर्मणा जीविकां करोति । यदि कोशस्थो भास्करतनयः स्वमित्रस्य गृहे, तदा स्वकार्येण योग्यं च धनप्राप्तिं करोति। स्वमित्रस्य नवांशे च मृण्मयं धनं ददाति । यदि तदेव सौरिर्वर्गोत्तमांशे प्राप्तः, तदा जलजं धनं तं जातकं याति । रिपुगृहाश्रयस्थो यदि मदनो वित्ते तदा स पापधनं करोति । शत्रुनवांशे च यद्युपस्थितो बहुसुकर्मणा धनमर्जयति । मूलत्रिकोणे च यदि स्यात् सैव छायासूनुः, परपोषणेन धनप्राप्तिं वदेत् । दिनेशः कोशे स्वतुङ्गे, तदा स जातकः सहस्रनाथो भवेत्। निशाधिपः स्वोच्चे, तदा लक्षाधिपः स्यात्। इत्थंप्रकारेण सर्वेषां ग्रहाणां फलमधोलिखितप्रकारेण वर्णितं वृद्धयवनजातके तद्यथा- उच्चस्थभूतनयेन शताधिपः, सोमसुतेन कोटीश्वरः, जीवेन खर्वाधिपः, सितेनासंख्ययतिः, कोणेन शताधिपश्च वर्णितः । कोऽपि खेटः स्ववर्गजः, स्ववर्ग-गुण-धातुसदृशं मनुजाय वित्तं ददति । परन्तु वित्तदायको यदि भृगुतनयः, सिद्धं तदा विविधस्रोतेर्धनं भवति । ग्रहाः स्वस्वदशास्वन्तर्दशासु वा धनं ददति । स्वोच्चादिकं स्थिताः खेटाः स्वप्रकृत्यनुरूपमेव फलं ददति ।[८०७]

---

[८०६] वृ.य.जा.२६.२१-२४

[८०७] वृ.य.जा.२६.२५-३१

**सहजभावफलाध्यायः**

## तृतीयस्थवासराधिपस्य फलम्

कस्यापि जातकस्य जन्मकुण्डल्यास्तृतीये मेषराशेर्दिनेश उपस्थितः, तदा नृपात् सुहृद्त्वं वदेत् । उच्चराशेर्नवांशे च स्थितेन नृपतनयेन सह मैत्रीं करोति। आधुनिकयुगे मन्त्रिगणानां सुतैः। षड्वर्गे शुद्धो यदि, तदा सार्वभौमं मैत्रीभावं करोति ।१। तृतीये यदि नीचाश्रितो वारेशः, तदा नीचकर्मणा धनेन जनैर्युक्तं वदेत्। नीचनवांशे च यदि सैव दिवाकरः, भिक्षुकः पुत्रवैरी च भवति। पापानां वर्गे च यदि, तदा चारणेन मैत्री भवति। यदि तपनो मित्रगृहस्थो भूत्वा सहजे प्राप्तस्तदा द्विजेन्द्र मित्रत्वं कुरुते । मित्रस्य नवांश उपस्थितो दिननाथस्तदा सुशीलं जनयेत् । वर्गोत्तमांशे चाद्भुतशास्त्रेऽनुरक्तं ज्ञेयम् । शत्रूणां क्षेत्रे यदि तमोभेदी, तदा लोकप्रियं रिपुवर्जितं च मित्रं करोति। अरिनवांशे स्थितः, तदा तस्य सुहृदो गुणवर्जिता भवेयुः। मूलत्रिकोणे च यदि तृतीयस्थोऽर्कः, तदा सः जातकः शान्तः समर्थश्च भवेत् । [८०८]

## तृतीयस्थरात्रिपतेः फलम्

हिमांशुर्यदि तृतीयभावे वृषभराशौ प्राप्तः, तदा कृपण-स्वभावमनुजेन मैत्रीं करोति। स्वोच्चनवांशे तृतीयस्थो निशिकरः, तदा तस्य मित्रं परतर्ककं भवति। षड्वर्गशुद्धः, तदा परदाररक्तं तस्य मित्रम्। तृतीये शीतकरो निचाश्रितः, तदा तस्य मित्रमन्त्यजम् । नीचनवांशे स्यात्, तस्मिन्नेव भावे यदि, नर्तकं तस्य मित्रं स्यात्। पापानां वर्गे भण्डं खलस्वभावं च सुहृदं ज्ञेयम् । मित्राश्रयस्थो यदि विधुस्तृतीयस्थे, तदा परवञ्चकेन सुहृद्त्वं ज्ञेयम् । वर्गोत्तमे च घृणया विहीनं करोति । अरिगृहे च यमुनातीरोद्भवो यदि तृतीयस्थः, तदा नराधमेन मैत्रीभावः प्राप्यते । शत्रुनवांशे प्राप्तः, तदा बहुमायया युतैर्जनैर्मैत्रीभावं याति । मूलत्रिकोणे, तदा तस्य सुहृदं परदाररक्तानुरागी ज्ञेयम् । [८०९]

---

[८०८] वृ.य.जा.२७.१-४

[८०९] वृ.य.जा.२७.५-८

## परक्रमस्थकुजफलम्

स्वोच्चे क्षमासूनुर्यदि सहजगः, वरभूमिपालैर्मित्रत्वं ददाति। स्वोच्चांशे च नृपामात्यैर्मैत्रीभावं याति । षड्वर्गे शुद्धे तस्मिन्नेव भावे द्वितयं मित्रं करोति । तत्रैव यदि भौमः कर्कराश्यां स्थितः, बहुकामासक्तं तस्य सुहृदं वदनीयम् । नीचांशे यदि, तदा भृतकेन मैत्रीभावं याति । पापगृहे सैव भूपुत्रः, तदा तस्य सुहृदं सदैव व्यसनाभिभूतं ज्ञेयम् । तस्मिन्नेव सहजे यदि बालो मित्रस्य राशौ स्थितः, तदा मित्राणां भूरिसुखं ज्ञेयम्। मित्रांशके च हानियुक्तं ज्ञेयम्। वर्गोत्तमस्थो यदि, तदा प्रचुरान्नपानं च तस्य गृहे भवति। ग्रहाणां नेता यदि पराक्रमस्थः शत्रोर्गृहस्थः, तस्य सहजास्तदुपरि (जातकोपरि) आश्रिता भवन्ति । शत्रुनवांशे सैवाङ्गारको समृद्धिफलं ददाति।मूलत्रिकोणे च,दण्डनाथेन मैत्रीं करोति। [८१०]

## तृतीयस्थतारातनयफलम्

विधुर्यदि तृतीयस्थः स्वतुङ्गे, तस्य मित्रं शान्तमतिर्भवेत् । स्वोच्चनवांशे च, कञ्चुकिनं मित्रं तस्य ज्ञेयम्। मन्दगत्या च स्वकार्ये रतः, मन्दबुद्धिं वा तं मित्रं ज्ञेयम्।, षड्वर्गशुद्धे च कृतघ्नं मित्रं ज्ञेयम् । बोधनो यदि तस्मिन्नेव भावे नीचाश्रितः, तदा पापजनैः सहजत्वं जायते। नीचनवांशगः, तदा गो–महिषीपालकेन, ( यः पशुपालनं करोति वा)। पापगृहे स्थिते गतसुहृद्त्वं तस्य फलं वर्णितम् । तारातनयो यदि तृतीयस्थः, परन्तु मित्रराशौ प्राप्तः, तदा बहुकर्मभाजं मित्रं ददाति। मित्रस्य नवांशे नापितेन मित्रं करोति । यदि वर्गोत्तमस्थे, कुम्भकारेण सहजत्वं ज्ञेयम् । शत्रोर्गृहस्थस्तृतीयगो यदि सोमपुत्रः सुनिन्द्येन मित्रता स्यात्। शत्रोर्नवांशे स्यात्, तदा जनतातिगेन– जनानामत्याचारी मित्रं भवति, मूलत्रिकोणे मलिनेन मित्रं करोति । [८११]

---

[८१०] वृ.य.जा.२७.९–१२

[८११] वृ.य.जा.२७.१३–१६

**पराक्रमस्थवाचस्पतेः फलम्**

बृहस्पतिस्तृतीयस्थः स्वतुङ्गराशौ, तस्य मित्रं विनयेन हीनं, स्वोच्चनवांशे दम्भपरं नृशंसं, षड्वर्गे शुद्धे मित्रमप्रजं च वदेत् । देवेज्यो यदि तस्मिन्नेव भावे नीचाश्रितः, बहुवदितारं मित्रं प्राप्यते, नीचांशे तदा तस्य मित्रं सदैव द्यूतरतं, पापवर्गेण गतबन्धुवर्गं फलं याति । ग्रहाणां मन्त्री यदि मित्रगृहे स्यात्, तदातिकृशं मित्रं करोति, मित्रांशके च पण्यपरं मित्रं करोति। वर्गोत्तमे च स्थिते कितवेन सुहृदत्वं करोति । जीवः शत्रोर्गृहे यदा तृतीयगः, तदा क्लीबसुखं प्राप्नोति, आरिनवांशे च स्थितः, तदा शिल्पिप्रधानेन मित्रत्वं भवेत्, मूलत्रिकोणे पतिते, निकृष्टजनैर्मैत्रीभावं वदेत् ।[८१२]

**सहजस्थसितफलम्**

कविस्तृतीये यदि स्वतुङ्गः, तदा पतितं मित्रं तस्य ज्ञेयम्। स्वोच्चनवांशे च यदा, नृपसेवकैः सहजत्वं, षड्वर्गशुद्धः, तदा कलहप्रियजनैर्मैत्रं करोति । दैत्यगुरुस्तस्मिनेव भावे यदि नीचाश्रितः, तदा वधकर्तारं नृशंसं मित्रं करोति। स्वनीचनवांशे प्राप्तो यदि, तदा नीचकुलप्रसूतं मित्रं स्यात्। एवं पापस्य वर्गे, पतितं नृशंसं मित्रं ददाति । पूर्वोक्तभाव एव भृगुर्मित्रस्य गृहे स्थितः, भण्डमेव मित्रं करोति, मित्रांशके च वारणमप्रशस्तं, वर्गोत्तमांशे च शबरं कृतघ्नं मित्रं भवतीति फलं वर्णितं वृद्धयवनजातके। भृगुजस्तृतीयगो यद्यरिगृहे, तदा क्रीडनकं मित्रं भवति। शत्रोर्नवांशे शिल्पिनमप्रशस्तं, मूलत्रिकोणे च जनैर्निरस्तं मित्रं भवतीति फलं ज्ञेयम् ।[८१३]

---

[८१२] वृ.य.जा.२७.१७-२०

[८१३] वृ.य.जा.२७.२१-२४

**कोणस्तृतीयगः**

सौरिस्तृतीयगो यदि स्वतुङ्गे, भूमिपालेन, स्वोच्चनवांशे वित्तपतिना, षड्वर्गशुद्धः, तदा बहुशास्त्ररक्तजनैर्मैत्रीभावं याति । सूर्यतनुर्यदि नीचाश्रितः, तदा मलिनस्वभावं मित्रं, नीचांशके च वञ्चनतत्परं, पापवर्गे च घृणया विहीनं सहजं करोति। तस्मिन्नेव भावे यमो यदि मित्रश्रयस्थो भवेत्, सचिवं नयज्ञं मित्रं करोति। मित्रांशके प्राप्ते, तदा गुणवित्तभाजैः सह मैत्री, वर्गोत्तमस्थः, तदा मानयुक्तैः सुहृद्त्वं जायते । छायातनयो यदि शत्रुगृहाश्रयस्थस्तृतीयगः, तदा पापरतं मित्रमिति फलं, तदंशे गतस्तदा वृजिनं सुदीनं मित्रं भवति। मूलत्रिकोणे च विजितारिपक्षैः सहजत्वं वर्णितम् ।[८१४]

**मित्राणां समर्थकानां योगः**

तृतीये यदि सविता परमोच्चे स्यात्, तदासंख्यमित्राणि, स्वोच्चगतशीतकरेण दशसंख्याकाः, कुजेन सहस्राणि, ज्ञेन च सहस्राणि, देवेज्येन शताधिपः, भृगुतनयेनाशीतिनाथः, सौरेण सहस्राणि किंञ्चिदधिकं वा, तस्य जातकस्य मित्राणि वदेत्। पूर्वोक्तफलं परमोच्चे ग्रहाणां स्थितिवशादेवं कथनीयम् । मध्ये स्थिते, तदा अनुपातेन संख्यां फलं च वदेत् ।[८१५]

---

[८१४] वृ.य.जा.२७.२५-२८
[८१५] वृ.य.जा.२७.२९-३०

## सुखभावफलम्

### पातालस्थार्कफलम्

दिनेशः सुखस्थः स्वतुङ्गे, तदा बहुकष्टभाक्स जातको भवेत्। स्वोच्चनवांशे कदाचिदल्पसुखं याति, षड्वर्गशुद्धेन परदारजं ज्ञेयम् । पूर्ववर्णितभावे च यदा हेलिर्नीचाश्रितः, तदा कदाचित् कस्मिन्नपि समये वा सुखं न विधत्ते। नीचांशके विमिश्रितं फलं – सुखं दुःखं सार्धमेव समानमात्रायां कथितम्, पापग्रहस्य वर्गे, ऋणदुःखमिश्रं फलं ददाति । तपनो यदि तस्मिन्नेव भावे मिश्राश्रयस्थः स्यात्, तदा पापकर्म कृत्वा सुखं प्राप्तं भवेत्, विमूढराशौ चौर्योद्भवेन लाभान्वितं तं जातकं विद्यात्, वर्गोत्तमस्थश्च यदा सुखस्थान इव द्यूतकर्मणा सुखं प्राप्यते । शत्रोर्गृहे यदि दिवामणिः, तदा युद्धे नराणां सौख्यं कुरुते । अरिनवांशे च यदोपस्थितः, पाताल इव वधबन्धनादिकर्मणा सुखं याति ।[८१६]

### सुखस्थशीतकरफलम्

सुखस्थितो यदि शीतकरः स्वतुङ्गे, गजवाजि–आदिभिः सुखं करोति, तुङ्गांशके यदा प्राप्तः, तदा स्वर्ण–रजतादिभिः सौख्यं भवति, षड्वर्गशुद्धस्तदा विविधैर्मार्गैर्लाभान्वितं करोति । शीतद्युतिर्यदि तत्रैव नीचाश्रितो वृश्चिकराशिमध्ये वा स्यात्, तदा द्यूतजेन सुखं अनुभवति, नीचांशके च स्यात्, तदा कृषिकर्मणा भूरि सुखं जायते, पापानां गृहे गतस्तदा बहुपापं करोति, पातालस्थानवद् यदि मित्राश्रयसदस्थो हिमांशस्तदा भूरि सुखं कुरुते, मित्रविभागसंस्थस्तदा सुतोद्भवं सुखं प्राप्तं स्यात्, वर्गोत्तमस्थेन कलत्रोद्भवं सुखं करोति– इत्थं प्रकारेण फलं वर्णितम्। चतुर्थग इन्दुः शत्रोर्गृहस्थः, अन्यायेनोत्पन्नं सुखं प्रापयति, रिपुनवांशे च यदा रात्रिपतिः, तदेव कपटेन सुखं करोति, मूलत्रिकोणे च धर्ममार्गेण जीवनं करोति ।[८१७]

---

[८१६] वृ.य.जा.२८.१–४

[८१७] वृ.य.जा.२८.५–८

## सुखस्थभौमफलम्

पातालगो कुजः स्वोच्चे परसूदनेन सुखं, उच्चनवांशे परबन्धनेन, षड्वर्गशुद्धे परवञ्चनेन सुखं विधत्ते । वक्रो यदि सुखस्थो नीचाश्रितः, जातकः कदाचिन्न सुखं याति, नीचांशकस्थेन परपोषणेन, पापस्य वर्गे वधबन्धनेन च सौख्यं ज्ञेयम् । त्राश्रयस्थ आरो यदि सुखगः, तदा परदेशगमनेन जातकस्य जीवने सौख्यं वदेत् । मित्रांशकस्थः, तदा सुरतप्रसङ्गेन, वर्गोत्तमस्थः, तदा परवित्तनाशनेन सुखं करोति स्वजीवने, यदि रिपुगृहे भूमिपुत्रः पुंश्चलजं सौख्यं कुरुते। अरिनवांशे च तस्मिन्नेव भावे स्यात्, तदा व्यभिचारेण, मूलत्रिकोणे स्यात्, तदा परमोहनेन भूरि सुखं प्राप्यते ।[८१८]

## सुखभावगतबुधफलम्

सुखस्थो ज्ञो यदि स्वोच्चे स्थितः, तदा महाजनोत्थं सुखम्, उच्चांशके च भूपालपक्षात्, षड्वर्गशुद्धे व्ययेन सुखं विधत्ते । सोमतनयो नीचाश्रयस्थस्तत्रैव, तदा क्लेशजमेव विज्ञेयम्, नीचांशके स्थितः, तदा परसेवया, पापस्य वर्गेऽतिविगर्हणीयं कार्यं कृत्वानन्दं अनुभूयति । मातृभाव एवं मित्रगृहे च यदि मगधदेशोद्भवः स्थितः, वरपुत्रेण सुखं, मित्रांशके दाराजातं, वर्गोत्तमस्थेन दुहितोद्भवं सुखं वर्णितं वृद्धयवनजातके । बोधनो यदि तस्मिन्नेव भावे रिपुक्षेत्रे प्राप्तः, क्रयविक्रयेण, तस्यैव भागे (शत्रुनवांशे वा ) पशुपालनेन, मूलत्रिकोणे प्राप्तः, तदा निजबान्धवैः सुखं ज्ञेयम्।[८१९]

---

[८१८] वृ.य.जा.२८.९-१२

[८१९] वृ.य.जा.२८.१३-१६

## चतुर्थस्थबृहस्पतिफलम्

स्वतुङ्गे देवेज्यो यदि चतुर्थस्थः, तदा सदैव निरन्तरं सकलं वा सुखं प्राप्तं भवति, तुङ्गस्यांशे प्राप्ते तदर्धफलं कथितम्, षड्वर्गशुद्धे सुधर्मयुक्तं जातकं प्रकरोति । वाचस्पतिस्तत्रैव नीचाश्रितो नीचसङ्गात् सौख्यं कुरुते, नीचांशकस्थो विचित्रभावैः, पापस्य वर्गे परपोषणेन सौख्यदायको ज्ञेयः। खेटानां मन्त्री मित्राश्रयस्थश्चतुर्थगो वंशजं सौख्यं स्यात्,तदंशे स्थिते बहुभृत्यैः सुखं, वर्गोत्तमभागे गते भगिनीसमुत्थेन सौख्यं कुरुते । शत्रोर्गृहस्थो जीवः पाताले स्यात् , नीचनिषेवनेन युक्तः जातकः स्यात्, तदंशके रिपुनवांशे वा स्यात्, तदा भूरि सौख्यं, मूलत्रिकोणे प्राप्ते नृपसेवया सुखं अनुभवति ।[८२०]

## सुखस्थशुक्रफलम्

दैत्येज्यः स्वतुङ्गे यदि चतुर्थगः, तदा बहुवित्तभाजनेन, उच्चांशके च खरोष्ट्रै। षड्वर्गशुद्धश्च गजोद्भवं सौख्यं ददाति । सुखभावगतो यदि नीचाश्रयस्थः सितः, तदा परनारिजातम्, नीचनवांशे च स्थितः वराङ्गनानां विलासीनीनां सम्पर्कात्, पापस्य वर्गे गुरुदारासङ्गात् सुखं भवति । कविर्मित्राश्रयस्थस्तस्मिन्नेव भावे गतः, तदा बहुगोधनित्वं सुखं कुरुते, तदंशके चाजाविकादितः, वर्गोत्तमस्थे महिषीसमुत्थं सुखं विधत्ते । भृगुसूनुः शत्रुक्षेत्रगो यदि पाताले, तदा कुनिषेवणेन सौख्यं, अरिनवांशे च परदेशवासात्, मूलत्रिकोणे स्वराश्यां प्राप्ते द्विजदेवसङ्गात् सुखप्राप्तिपूर्वकं जीवनं यापयति ।[८२१]

---

[८२०] वृ.य.जा.२८.१७-२०

[८२१] वृ.य.जा.२८.२१-२४

## चतुर्थगतशनैश्चरफलम्

स्वतुङ्गे मन्दो यदि सुखस्थः, मृगपक्षिनाशनेन मारणेन वा, तदंशके चामिषभक्षणेन, षड्वर्गशुद्धः स्यात्, तदा कृषिकर्मणा सौख्यं याति । दिनजो नीचाश्रितः पूर्वोक्त एव भावे, मुक्तसुखः जातकः- अर्थात् सुखं न प्राप्नोति, नीचांशके च लोकनिबन्धादिभिः, पापस्य वर्गे पररन्ध्रसङ्गात् सुखं जायते तस्य जातकस्य जीवने । मित्राश्रयस्थो यदि कोणः पाताले, स्वकलत्रभोगेन, मित्रांशके च कुटुम्बहीनो बन्धुबान्धवैर्हीनो वा, वर्गोत्तमस्थः प्राप्तस्तदा परपीडनेन जीवने सुखं विधत्ते । यमो यदि शत्रु-आश्रयस्थः सुखभावे गतः, तदा परवञ्चनेन,तदंशके मानुषविक्रय-कर्मणा,मूलत्रिकोणे स्यात्,तदा क्रयविक्रयेण सौख्यं ज्ञेयम्।[८२२]

## खेटानां सुखप्रदत्वं विशेषेणात्र

जीवश्चतुर्थे स्यात्, तदानन्तसुखं याति, सोमसुतेन शताधिपः, रात्रिकरेण सहस्रपः, अर्केण, अर्कजेन, कुजेन च षष्ठ्यधिपाः सुखानि प्रवर्तन्ते । पूर्वोक्तग्रहाः स्वपरमोच्चे स्युः, तदा पूर्णसौख्यानि यच्छन्ति, अन्यत्र स्थिताः, तदा अनुपातेन फलं ज्ञेयम्, ग्रहा यदि केवलं स्वगृहे स्वराशौ वा, तदा किमपि सुखं न यान्ति, षड्वर्गशुद्धाश्च, तदा यथावत् स्वतुङ्गसदृशं फलं ज्ञेयम् ।[८२३]

---

[८२२] वृ.य.जा.२८.२५-२८
[८२३] वृ.य.जा.२८.२९-३०

**पञ्चमभावफलम्**

**सुतस्थार्कफलम्**

तनयस्थार्को यदि स्वतुङ्गे स्यात्, तदा जातकस्याल्पपुत्रा ज्ञेयाः। तेऽपि सुता नृसंशा ज्ञेयाः । तुङ्गांशकस्थः, सकलार्थसिद्धिं ददाति। षड्वर्गशुद्धे जातकं सुभगं मनोज्ञं करोतीति फलं वर्णितम् । नीचाश्रयस्थो यदि भास्करस्तस्मिन्नेव भावे भवति, तदा सुतान् नष्टजातान् विजानीयात्। नीचांशकस्थो विकलाङ्गभागान् सुतान् जनयति। पापस्य वर्गे गर्भानिष्टं प्रकरोति।पूर्वकथितभावमध्ये तपनो यदि मित्रक्षेत्रे स्थितः, तस्य पुत्राः पूर्वकालात् सुतीव्राः सुशीलवृत्ता भवन्ति। मित्रनवांशेन, वर्गोत्तमी स्यात् तदा व्यसनाधिकाश्च भवन्ति। जन्मकुण्डल्याः सुताश्रितः शत्रुक्षेत्री दिनकरः, तदा स परदेशजातान् सुतान् कुरुते। शत्रोर्विभागे तु जरजातान् करोति। मूलत्रिकोणे च गुणवर्जितांश्च प्रकरोति ।[८२४]

**पञ्चमस्थविधोः फलम्**

यदि पञ्चमस्थः सोमसुतः स्वोच्चे स्यात्, विपुलातयाक्ष्याः कन्याः प्रसूते। उच्चनवांशे स्थितः, तदा तस्य कन्याः सुरूपयुक्ता भवन्ति। षड्वर्गशुद्धस्थेन सुभगा मनोज्ञाः कन्याश्च कुरुते । निशिनाथः सुतस्थो नीचगः, तदा शुभशीलयुक्ताः कन्याः प्रसूते। नीचांशे च यदि प्राप्तस्तदा कुबुद्धियुक्ता बालिकाः सूते। पापाणां वर्गे च पररक्तभावा ज्ञेयाः ।

पूर्वोक्ते तनये यदीन्दुर्मित्रगृहे, तदा शुभशीलयुक्ताः कन्याः प्रसूते । मित्रांशे च शुभाचरणयुक्ताः, वर्गोत्तमे च पतिपारायणाः स्युः।

तनयगो रात्रिपतिररिराशौ, तदा कन्या अतिखलस्वभावाः, शत्रोरंशकेन कुत्सिताङ्गाः, मूलत्रिकोणे च नितरां प्रगल्भा भवन्तीति वृद्धयवनजातके फलं वर्णितम् ।[८२५]

---

[८२४] वृ.य.जा.२९.१-४

[८२५] वृ.य.जा.२९.५-८

## तनयगभौमफलम्

अङ्गारको यदि सुतगः स्वोच्चे (मकरराश्यां वा) जातकस्याल्पपुत्राः स्युस्तथा ते दीर्घायुष्यजीविताश्च, तुङ्गांशके, पुत्रा रोगभाजः, षड्वर्गशुद्धे क्षतजार्द्रदेहाः प्रोक्ताः। कर्कराशिगतो भौमस्तस्मिन्नेव भावे, तदा तस्य सुताः परदाररक्ता ज्ञेयाः, तदंशकस्थे, अदीर्घजीवाः, पापस्य वर्गे च बहुपापरक्ता भवन्ति । वक्रः यदि मित्रक्षेत्रं गत्वा सुतभावे स्थितः, तदा तस्य पुत्राः कृपणस्वभावा भवन्ति, मित्रांशके कुविधिप्रसक्ताः, वर्गोत्तमस्थे च यदि गतास्तदारिपक्षविजितान् वदेत् । शत्रुराशिमध्ये यदि ग्रहाणां कुमारो तनयगः, तदा व्रणरुद्धदेहाः पुत्राः स्युः, शत्रुनवांशे यदि गतास्तदा कुचैलाः सुताः, मूलत्रिकोणे परतर्कका: पुत्रा ज्ञेयाः।[८२६]

## सौम्यः सुतगः

कन्याराशिमध्ये ज्ञो यदि तनये स्यात्, तस्य पुत्रान् सुभगान् मनोज्ञान् कुरुते, उच्चांशके च विनयेन युक्तान्, षड्वर्गशुद्धे विनयेन हीनान् करोति । सौम्यो यदि स्वनीचराशिमध्ये तनयगः, तदा बहुदुःखैर्युक्तान् सुतान् कुरुते, नीचांशके प्राप्ते तदा कन्यासन्ततिं प्राप्नोति, पापस्य वर्गे नृशंसान् विकृतान् सुतान् ददाति । पञ्चमस्थो बोधनो मित्रक्षेत्रे स्यात्, तदा निरुजान् पुत्रान् जनयति, मित्रनवांशे गते बहुशास्त्ररक्तान् सुतान् प्राप्नोति, वर्गोत्तमस्थो भवेत्, तदा सुता नीतिविद्यायां कुशलाः, लोकविदो भवन्ति। अरिक्षेत्रगत इन्दुपुत्रस्तनयगः, तदा बहुबन्धुपक्षान् सुतान् कुरुते, शत्र्वंशगेन पिशुनस्वभावान् सुतान् जनयति, स्वमूलत्रिकोणराश्यां वर्तते, तदा गुरुदेवभक्तान् पुत्रान् विधत्ते।[८२७]

---

[८२६] वृ.य.जा.२९.९-१२

[८२७] वृ.य.जा.२९.१३-१६

**सुतगगुरोः फलम्**

यदि पञ्चमस्थः कर्के जीवः, तदा बहुजीवभाजान् सुतान् जनयति, स्वोच्चनवांशे च सुभगान् मनोज्ञान् प्राप्नोति, षड्वर्गशुद्धे स्यात् यदि बृहस्पतिः, तदा प्रियदर्शनांश्च तनयान् विधत्ते । सुतस्थो नीचाश्रयस्थो यदि वाचस्पतिः, तदा सुदुःखान् तनयान् करोति, नीचांशके च स्यात्, तदा वृजिनैः समेतान् करोति, पापग्रहाणां वर्गे स्यात्, तदा गतसौहृदान् करोति। देवपुरोहितस्तस्मिन्नेव भावे मित्रक्षेत्रे गतः, पतितान् सुरक्तान् सुतान् करोति, मित्रांशके मित्रस्य नवांशे वा स्यात्, तदा द्यूतप्रियान् जनयति, मूलत्रिकोणे च स्थितः, तदा अद्भुतविक्रमांश्च ज्ञेयाः । शत्रुक्षेत्रादिफलं मूलग्रन्थस्याध्याये न वर्णितम्, अतः सर्वेषां गृहाणामनुसारेण फलमत्रापि ज्ञेयम् ।[८२८]

**सुतस्थसितफलम्**

स्वतुङ्गसंस्थो यदि कविः सुतस्थः, तदा कन्याजन्म स्यात्। ताः कन्याः सुभगा मनोज्ञा ज्ञेयाः, तुङ्गांशकस्थे बहुपुत्रयुक्ताः, एवं षड्वर्गशुद्धे तस्य जातकस्य कन्याः शुभरूपयुक्ता भवन्ति । दैत्यानां पूज्यो नीचाश्रितः पूर्ववर्णितभावे, तदा विविधाः सुरूपाः कन्या विधत्ते, नीचनवांशे प्राप्ते पररक्तचिन्ताः, पापखेटानां वर्गे कृपणस्वभावाः कन्याः कुरुते । मित्राणां राशौ सुतगो यदि भार्गवतनयः, तदा तस्य कन्यकाः पतिभक्तियुक्ताः, मित्रांशके व्रतसत्ययुक्ताः, वर्गोत्तमे च प्रभया युक्ताः सुताः विधत्ते । भृगुजः शत्र्वाश्रयस्थो सुतस्थः, तदा बहुपापयुक्ताः सुता भवन्ति। शत्रुनवांशे गते नष्टसुखाः कृतघ्नाश्च, मूलत्रिकोणराश्यां हतशत्रुपक्षान् वदेत् ।[८२९]

---

[८२८] वृ.य.जा.२९.१७-१९

[८२९] वृ.य.जा.२९.२०-२३

**पञ्चमस्थशनैश्चरफलम्**

पञ्चमगो मन्दो यदि स्वोच्चे, बहुशत्रुपक्षान् सुतान् प्रसूते, मित्रनवांशे च बहुरोगयुक्तान्, षड्वर्गशुद्धेन सुतरां कृतघ्नान् सुतान् प्राप्नोति । अर्कजो नीचांशे प्राप्तो यदि तनयभावे स्यात्, तदा स्वभावनष्टान् सुतान् सूते। नीचनवांशे च यदि गतयौवनान्, पापग्रहाणां राशौ बहुरोगभाजान् कुरुते । सूर्यसूनुर्मित्राश्रयस्थो तनयगः, कृषिकर्मसक्तान् सुतान् प्राप्नोति, मित्रांशके च यदि गतः, पशुपालने रतान्, बहुलोकपालांश्च वर्गोमत्तमस्थेन ददाति फलमिति । शनिः सुतस्थितोऽरिगृहे, तदा पुत्रान् कापुरुषान् प्राप्नोति, शत्रुनवांशेऽतीवभूततमान्-निम्नाचारान्, मूलत्रिकोणराश्यां बहुपानभाजान् (मदिरापान- सक्तान्) च करोति । तनयो यदि समराशौ, निर्बला: खेटा वा विषमराशौ स्युः, तदा प्रायेण पुत्रसंततिर्ज्ञेया। पञ्चमं यत्संख्याकं स्त्री-पुरुषा नपुंसका वा खेटाः पश्यन्ति, ते स्वयं बलबलानुसारं संततिं ददति । [८३०]

**रिपुभावफलम्**

यदा भानुः कस्यापि जातकस्य जन्मकुण्डल्या रोगभावे मेषराशिमध्ये, तदा व्रती जनैर्नीतिपारायणैर्वा शत्रुतां कुरुते, उच्चनवांशे च तदैव विप्रैः सह, षड्वर्गशुद्धे भूपालैररितां करोति । तपनः पूर्वोक्तभाव एव नीचाश्रयस्थस्तदा शत्रुः कुमतिः कृतघ्नश्च भवति। नीचांशगतो यदि तदा शत्रुः प्रमादानुरक्तः, पापगृहस्य क्षेत्रे स्यात्, तदा परतर्ककः शत्रुः स्यात् । सुहृद्गृहे भास्करो रोग एव वणिजानुरक्तं व्यापारे निपुणेन शत्रुता, मित्रस्य नवांशे भवेत् तदा गो-अजादिपालकेन शत्रुता स्यात्, वर्गोत्तमे स्यात् तदा बहुशिष्यभाजेनारिर्भवति ।

शत्रुराशावरिसंस्थो दिवाकरः, तदा स्त्रिया शत्रुता भवति, यदि शत्रु-अंशके पूंश्चलीभिः, मूलत्रिकोणे विलासिनीभिर्वैरं जायते ।[८३१]

---

[८३०] वृ.य.जा.२९.२४-२८

[८३१] वृ.य.जा.३०.१-४

**वैरस्थनिशिनाथफलम्**

षष्ठे सोमो यदि स्वतुङ्गे बहुशास्त्ररक्तैर्विद्वज्जनैर्वा वैरं भवति, स्वोच्चांशके स्यात् , तदा परदाररक्तः शत्रुः, षड्वर्गशुद्धेन क्षितिपतिना वैरं विधत्ते । शीतद्युतिर्वृश्चिकराश्यां षष्ठस्थानगतः, किंचित् मित्रं न कुरुते, प्रायेण सर्वेषु जनेषु शत्रुतां याति, नीचनवांशे बहुप्रकारं वैरं भवति, पापवर्गे स्यात्, तदा स्ववर्णस्य जनैः शत्रुता, यथा यदि विप्रो जातकस्तदा विप्रैः सहैव वैरं कुरुते । षष्ठस्थनिशिनाथो मित्रराशौ तदा भूपतिना सह वैरं भवति, मित्रस्य नवांशे राज्ञः सुतेन, वर्गोत्तमस्थो यदि चन्द्रः, तदा नृशंसजनैः शत्रुतां दधाति । शीतरश्मिः शत्र्वाश्रयस्थः शत्रुभावे, विकृतस्वभावेन शत्रुतां याति, यदि शत्रुनवांशे गते, सेनापतिना, मूलत्रिकोणराश्यां च गुरुवत्सलेनारित्वं याति।[८३२]

**अरिस्थभौमफलम्**

मङ्गलः षष्ठे मकरे च, तस्य कदाचित् शत्रुत्वं न भवति, उच्चांशके सुदीनचेष्टैः सह शत्रुता, षड्वर्गशुद्धे परदेशभाग्जनैः शत्रुतां विधत्ते । अरिसंस्थो वक्रो नीचसंस्थः शूद्रादिभिः शत्रुतां करोति, नीचांशके कृषिकर्मरक्तैः, खलवर्गे धनधान्यहीनजनैर्वैरं कुरुते। आरो यदि मित्राश्रयस्थः षष्ठे तनयेन शत्रुतां भवति, मित्रनवांशे गते, बन्धुबान्धवैः, वर्गोत्तमस्थस्तदा स्वमातुलेन वैरं कथितम् । शत्रुगृहे कुजोऽरिसंस्थः,तदा देवैर्गुरुणा च शत्रुता, तस्यैव भागे –अर्थात् शत्र्वांशके गतस्तदा घृणया विहीनजनैः शत्रुता, मूलत्रिकोणराश्यां गतस्तदा प्रियसाहसेन वैरं वर्णितम् ।[८३३]

---

[८३२] वृ.य.जा.३०.५-८

[८३३] वृ.य.जा.३०.९-१२

**षष्ठस्थबुधफलम्**

श्वतुङ्गाश्रितः सौम्योऽरिसंस्थो विकृतस्वभावं शत्रुं जनयति, तुङ्गांशके स्यात्, तदा धनिनं विरूपं शत्रुं करोति, षड्वर्गशुद्धस्तदा सुरतानुकूलैः शत्रुत्वं ज्ञेयम् । स्वनीचराशौ ज्ञो यदि षष्ठस्थः, तदा विकलैर्गतनेत्रैः, नीचांशके गतस्तदा काणेन, विकृताङ्घ्रिणा विकृतदन्तेन वा , पापानां वर्गे द्विजघातरक्तजनैर्वैरं करोति । यदि तारातनयो मित्रराशिमध्ये षष्ठगः, तदा वैरं सचिवेन मन्त्रिणा वा, मित्रांशके गते तदा सचिवस्य तनयेन, षड्वर्गशुद्धस्तदा परदाररक्तैर्वैरं जायते । अरिभावे शत्रोर्गृहे यदि बुधः, परवित्तरक्तेन शत्रुता भवेत्, तस्मिन्नेव नवांशे गते, सततं चौरेण नृशंसेन च, मूलत्रिकोणे स्यात्,व्यसनाभिभूतजनैररितां करोति। [८३४]

**षष्ठस्थगुरोः फलम्**

वाचस्पतिर्यदि षष्ठसंस्थः कर्कराशिगः, बहुदोषभाजं, उच्चनवांशे चारिवर्जितं, षड्वर्गशुद्धे प्रमदानुकुलं शत्रुं प्रसूते । स्वनीचराशौ जीवस्तत्रैव, अल्पसुखसक्तं, यदि तदंशके बहुपानरक्तं, खलवर्गे गुणवर्जितं वैरिणं कुरुते । षष्ठस्थो देवानां पूज्यो मित्राश्रयस्थः, अश्वपतिमनुजेन, मित्रांशके च खरगर्दभानां पतिना, वर्गोत्तमस्थो जीवः, श्रुतवर्जितेन शास्त्राज्ञानेन विहीनेन, वैरोत्पन्नं करोति । देवेज्यः शत्र्वाश्रयस्थः शत्रुगः, तदा निजबन्धुवर्गेण, शत्रोर्नवांशे विनयेन हीनेन, मूलत्रिकोणराश्यां स्यात्, तदा यस्य बहुपुत्रपौत्राणि स्युस्तेन साकमरिभावो भवेत् । [८३५]

---

[८३४] वृ.य.जा.३०.१३-१६

[८३५] वृ.य.जा.३०.१७-२०

**षष्ठस्थदैत्यपुरोहितफलम्**

स्वोच्चे यदि सितः शत्रुसंस्थः, जितशत्रुपक्षजनेन, तुङ्गांशके जितशत्रुदारेण– (अर्थात् शत्रूणां विजयपूर्वकं तेषां वराङ्गनान् स्वगृहे पालयति तेन साकं), षड्वर्गशुद्धे प्रणतारिपक्षैं शत्रुं कुरुते । दैत्येज्यो रिपुगः स्वनीचराश्यां बहुकन्यकाढ्यम्, नीचनवांशे गजाधिनाथं, खलखेटानां वर्गे पापकृतसक्तं शत्रुं प्रसूते । रिपुगो यदि कविर्मित्राश्रयस्थो बान्धववर्गः, तदंशके च स्वकलत्रवर्गः, वर्गोत्तमसंस्थः, तदा स्वतुङ्गस्तस्य शत्रुर्जायते। भार्गवतनयः शत्र्वाश्रयस्थोऽरिगः सुतरां नृशंसं, शत्रुनवांशे च व्याधिग्रस्तं मूलत्रिकोणे च निर्धनं रिपुं ददाति ।[८३६]

**षष्ठस्थार्कजफलम्**

मन्दो यदि षष्ठगतस्तुलायां तदा जातको रिपुविवर्जितः, उच्चांशके चाल्परिपुर्जितारिश्च, षड्वर्गशुद्धे सुनतो नतमस्तको वा परैश्च ज्ञेयः । स्वनीचे मेषे वा रिपुगः कोणः, तरलमनुजस्तस्य रिपुः, नीचस्य भागे गतस्तदा धनिकः, खलखेटानां वर्गे कृषिकर्मदक्षो मनुजो वैरीति वर्णितम् । नीलद्युतिर्मित्रराशिमध्ये रिपुभावे संस्थितः, तदा शठं रिपुमल्पतनुं च, मित्रनवांशे धनिनं प्रधानं, वर्गोत्तमस्थो बहुकर्मयुक्तजनं शत्रुं विधत्ते । शत्र्वाश्रयस्थः सौरी रिपुगः, तदा गतधनेन, शत्रोर्विभागे सुतदारहीनेन, मूलत्रिकोणराश्यां स्यात् तदा परसङ्गतेन वैरभावं कुरुते ।[८३७]

**शत्रूणां संख्याविचारः**

रिपुगो यद्यर्कः परमोच्चराश्यां तदा दश, परमोच्चे च निशाकरेण सहस्रं, कुजमन्दौ च शून्यं, शेषैर्जीवसितसौम्यैः सहस्रं रिपवो ज्ञेयाः। परमोच्चाद् हीनपरौ ह्रासो ज्ञेयः। अतस्त्रैराशिकपद्धतिना शत्रुणामङ्को ज्ञेयः।[८३८]

---

[८३६] वृ.य.जा.३०.२१–२४

[८३७] वृ.य.जा.३०.२५–२८

[८३८] वृ.य.जा.३०.२९

**सप्तमस्थभानुफलम्**

कस्यापि जन्मपत्रिकायां कलत्रे दिनाधिपो यदि मेषराश्यां भवेत्, कलहप्रिया, उच्चांशके परकर्मरक्ता , षड्वर्गशुद्धे दरिद्र्ययुक्ता भार्या प्राप्यते । तस्मिन्नेव भावे तुलायामर्कः, तस्य स्त्री व्यभिचारिणी, नीचनवांशे रोगयुक्ता, पापवर्गे सुशीला दुःचरित्रा वा भार्या भवेत् । दिनपस्तत्रैव मित्रगृहे, सुतरां नृशंसाम्, तदंशके वित्तविहीनां, वर्गोत्तमस्थे सुरतप्रियां जायां प्राप्नोति । यदि दिवाकरः शत्रुसंस्थः, व्यसनाभिभूतां, शत्रोर्नवांशे परहीनकृत्यां, मूलत्रिकोणे राश्यां प्रियसाध्वसां भार्यां कुरुते ।[८३९]

**कलत्रस्थनिशिनाथफलम्**

दारायां यदि रजनीपतिर्वृषभराश्यां तदा सुभगां मनोज्ञां च, उच्चांशके सुरदेवभक्तां, षड्वर्गशुद्धस्थेऽतिमनोज्ञरूपां पत्नीं प्रापयति तं जातकम् । तस्मिन्नेव भावे शशी यदि वृश्चिके, तदा बहुरोगभाजां, नीचनवांशे कुष्ठरोगेण पीडितां, खलानां वर्गे पतिविरुद्धां भार्यां कुरुते । इन्दुर्यदि मित्राश्रयस्थस्तस्मिनेव क्षेत्रे कुण्डल्यां, तदा प्रियवादिनीं भार्यां, मित्रस्य नवांशे विनयेन युक्तां, वर्गोत्तमस्थे बहुकर्मयुक्तां पत्नीं विन्दति । शीतकरः शत्र्वाश्रयस्थस्तत्रैव, तदा विरुद्धचेष्टां, शत्रोर्नवांशे गते विगतप्रभावां, मूलत्रिकोणे बहुकृत्यदक्षां भार्यां जनयेत्। [८४०]

**मदनग-अङ्गारकफलम्**

जन्मपत्रिकायां जन्मचक्रे कामे यदि भूतनयो मकरे प्राप्तः, गतरूपवित्तां, उच्चनवांशे वातिजराभिभूतां, षड्वर्गशुद्धे प्रथितप्रभावां जायां प्राप्नोति । पूर्वोक्तैव भावे नीचराशौ यदि धराजः स्थितः, प्रचुरप्रगल्भां, नीचनवांशे बहुशत्रुयुतां, पापवर्गे स्यात्, निजवर्गहीनां भार्यां प्राप्नुयात्। कुजस्तत्रैव मित्राश्रयी, तदा लघुलोचनां, मित्रनवांशे

---

[८३९] वृ.य.जा.३१.१-४

[८४०] वृ.य.जा.३१.५-८

गतोऽल्पशिरोरुहाक्षीं, वर्गोत्तमस्थः, तदा प्रभुताविहीनां दारां प्रकरोति । शत्र्वाश्रयस्थो यदि कुजः कामे, तदा कठिनस्वभावां, तन्नवांशे हतबन्धुवर्गां,मूलत्रिकोणे परसंगतां व्याभिचारिणीं वा वदेत्। [८४१]

**कामस्थविद्फलम्**

यदि तारातनयः कन्यायां गतः कामेगः, अद्भुतरूपयुक्ता, तुङ्गांशे बहुभोगयुक्ता, षड्वर्गशुद्धे शृङ्गारादिभिर्विशेषनुरक्ता च तस्य दारा भवति । दारायामेव स्वनीचराश्यां सौम्यगुणः, तदा परपुरुषानुरक्तां, नीचनवांशे व्यसनाभिभूतां, खलवर्गे गुणवर्जितां च भार्यां प्रसूते । दारगो ज्ञो यदि मित्रक्षेत्रां, बहुपुत्रपौत्रयुतां, मित्रांशके प्रचुरान्नपानकरणे रतां, वर्गोत्तमस्थः, प्रभया समेतां च दारां करोति । शत्रुराश्यां कामगः सौम्यः, अर्थवर्जितां, अरिनवांशे धनधान्यहीनां, मूलत्रिकोणे जनवल्लभां दारां ददाति। [८४२]

**मदनगवाचस्पतेः फलम्**

देवेज्यः कलत्रे कर्के गतः, प्रियदर्शनां पत्नीं करोति, उच्चांशके च बहुसौख्ययुक्तां, षड्वर्गशुद्धे सुकुलोद्भवां च भार्यां ददाति । खेटानां मन्त्री नीचराशौ यदि मदने, तदा कुलोद्भवां न करोति, नीचांशके बहुमातृयुक्तां, खलवर्गे पिशुनस्वभावां भार्यां वर्णयति ग्रन्थकारः । देवपुरोहितो मित्रराश्यां गतो मदने स्थितः, तदा बहुसाधुमित्रां, मित्रांशकस्थो मणिमौक्तिकाढ्यां, वर्गोत्तमस्थोऽतिविशुद्धकायां भार्यां करोति । चपलस्वभावां पत्नीं याति यदि सुरेज्यो कामे शत्र्वाश्रयस्थः, तदंशकेऽतिकठोरवाक्यां, मूलत्रिकोणे गुणवर्जितां दारां प्रकरोति । [८४३]

---

[८४१] वृ.य.जा.३१.९-१२

[८४२] वृ.य.जा.३१.१३-१६

[८४३] वृ.य.जा.३१.१७-२०

**कामगभृगुफलम्**

मीनराश्यां गतो भार्गवतनयः सप्तमस्थस्तदा बहुमित्रपक्षाम्, स्वोच्चांशके द्विजदेवभक्तां, षड्वर्गशुद्धे पतिव्रतां भार्यां प्रसूते । सितो नीचाश्रितः कलत्रे प्राप्तस्तदा प्रसन्नाम्, नीचांशके गतस्तदा सुरूपनेत्रां, पापानां वर्गे घृणया विहीनां भार्यां कुरुते । मित्रराश्यां तस्मिन्नेव भावे गतो भृगुः, सुकामां सुभगां च, मित्रांशके सुशुद्धचित्तां, वर्गोत्तमस्थो जनवल्लभां दारां प्रसूते । अरिराशौ कविः कामगः सुतरां प्रहीणां, शत्रोर्नवांशे चाप्रकृतस्वभावयुतां, मूलत्रिकोणे सुसमन्वितां पत्नीं याति। [८४४]

**मदने मन्दफलम्**

यदि सौरिस्तुलायां गतः कलत्रे, तदा स्थूलां पत्नीं, उच्चांशके सुकृष्णगात्रां, षड्वर्गशुद्धे बहुदुःखभाजां दारां प्रकरोति । नीलवपुर्मदनेनैव मेषे प्राप्तो विकरालगात्रां, नीचांशके गतो विहीनधर्मां, दुष्टानां वर्गे गतः पररक्तचित्तां भार्यां करोति । यमभ्राता यदि कामाश्रित एव मित्रगृहे, तदा कोपपरां, मित्रस्यांशके गुणवर्जिताङ्गां वर्गोत्तमस्थो–ऽखिलस्वभावां पत्नीं प्रकरोति । अर्कजः शत्र्वाश्रयस्थः कामे गतस्तदा बहुपापरक्तां,तदंशके पतिनिन्दितां,मूलत्रिकोणे सदैव गतधनां भार्यां जनयेत्। [८४५]

**मृत्युभावफलम्**

**अष्टमस्थार्कफलम्**

दिवाकरो मेषे मृत्युगतः, तदा जातकस्य मृत्युरग्निनिवेशनेन, तदंशके च जनलज्जया, षड्वर्गशुद्धस्तदालस्येन प्रमादाद्वा निधनं ज्ञेयम् । भास्करस्तुलायामष्टमस्थो वनपावकेन, नीचनवांशे दम्भकर्मणा, पापवर्गे प्रदीपनेन, अग्निप्रभावेण वा मरणं वदेत्।

---

[८४४] वृ.य.जा.३१.२१–२४

[८४५] वृ.य.जा.३१.२५–२८

दिनाधिपस्तस्मिन्नेव भावे मित्रगृहे गतस्तदा विषभक्षणेन, मित्रांशके गतो बन्धनेन, वर्गोत्तमस्थो निशि तापसेन – तपस्याकारणान्मृत्युं विधत्ते । अरिराशौ दिनकरोऽष्टमस्थो रुधिरप्रकोपात्, तदंशके बहुकासशोषेन, मूलत्रिकोणे वनितापराधान् निधनं प्रसूते ।[८४६]

## निधनगशशिफलम्

रजनीपातिर्वृषभराश्यां मृत्युगः, तदा सलिलप्रवेशात्, उच्चांशकस्थः करकाभिघातात्, षड्वर्गशुद्धस्थस्तदा विद्युतप्रपातान्मृत्युं विधत्ते । वृश्चिकराश्यामिन्दुर्निधनगः, तदा वनिताकरेण,नीचांशकस्थः कफपित्तदोषात्, खलखेटानां वर्गे सन्निपाताद् विनाश उपजायते । मित्रगृहे रात्रिपतिर्मृत्युभाव एव, जठरप्रकोपात्, तदंशके गतो गुदारोगात्, वर्गोत्तमस्थः पशुपादघातान् मरणं जनयेत् । तत्रैव विधुररिराशौ गतो बहुगुह्यरोगात्, तदंशकस्थः पशुशृङ्गसङ्गात्, मूलत्रिकोणे क्षयरोगान्मरणं विधत्ते ।[८४७]

## रन्ध्रगकुजफलम्

भौमो यद्यष्टमस्थो मकरे, तदा संग्राममृत्युना, तदंशके शस्त्रप्रहारैः, षड्वर्गशुद्धस्तदा गोग्रहेण निधनं वर्णितम् । महीसुतः कर्केऽष्टमस्थः, तदा स्वहस्तेन, नीचांशके निजायुधेन, खलानां वर्गे द्विजपार्श्वतो नराणां मृत्युर्भवति । मित्रगृहे च यदि तस्मिन्नेव भावे धराजो गतः, पाषाणप्रहारेण, मित्रस्य नवांशे गोष्ठसङ्गात्, वर्गोत्तमस्थे कूपपातान्मृत्युं ददाति । यदि तत्रैव वक्रोऽरिगृहे भृगुप्रपातात्, तदंशके गुप्तिरोधात्, मूलत्रिकोणे विषभक्षणेन नराणां मृत्युं करोति।[८४८]

---

[८४६] वृ.य.जा.३२.१-४

[८४७] वृ.य.जा.३२.५-८

[८४८] वृ.य.जा.३२.९-१२

**अष्टमगसौम्यफलम्**

जन्मलग्ने अष्टमस्थस्तारातनयः कन्यायां गतः, करेण मुष्टिप्रहारैर्वा, उच्चांशके गतः कफविकारैः, षड्वर्गशुद्धो जलप्रभावैर्जातको मृत्युं याति । नीचाश्रितो यदि विदस्तत्रैव व्रणवैकृतेन, नीचांशके स्यात् तदा महाभयेन, दुष्टानां वर्गे प्रियविप्रयोगाद् वियोगेन वा निधनं प्रकरोति । ज्ञो यदि मित्रगृहे निधने गतस्तदा हृदयप्रकोपात्, मित्रस्य नवांशे नेत्रविकारैः, वर्गोत्तमस्थस्तदा गुह्यरोगान्मरणं ज्ञेयम् । रोहिणीशः शत्रुक्षेत्रे तत्रैव स्यात्, तदा दृढबन्धनेन, तदंशके जठरोत्थरोगेण, मूलत्रिकोणे स्यात् तदा पादव्रणेन पुंसां मृत्युं कुरुते । [८४९]वृ.य.जा.३२.१७-२०

**निधनस्थगुरोः फलम्**

अष्टमस्थो जीवो यदि कर्के, विविधै रोगैः, उच्चांशके तदा मूलरोगात् पितृदोषाद् वा, षड्वर्गशुद्धस्थस्तदा श्रवणप्रकोपान्नराणां निधनं विधत्ते । सुराचार्यो निधनगः स्वनीचराश्यां स्वजनस्य करेण, तदंशके च विषाग्निसङ्गात्, खलानां वर्गेऽतिसारतश्च मरणं जनयेत् । देवमन्त्री यदि मित्रगृहे तत्रैव, तदा स्वभृत्यात्, तदंशके रुधिरप्रकोपात्, वर्गोत्तमस्थः सुरतानुसङ्गाद् विनाशं कुरुते । देवपुरोहितः शत्र्वाश्रयस्थो मरणे तदा कोपात्, तस्यैव विभागे शिरसः प्रकोपात्, मूलत्रिकोणे बहुभक्षणेन मृत्युमुपैति ।[८५०]

---

[८४९] वृ.य.जा.३२.१३-१६

[८५०] वृ.य.जा.३२.१७-२०

**अष्टमस्थसितफलं ।**

भार्गवनन्दनो यदि मीनराश्यां मृत्युस्थाने स्यात्, तदा पिपासपा निधनं, उच्चनवांशे गतस्तदा मुखशोषात्, षड्वर्गशुद्धो वरदु:खाद् अन्तो भवेत् । दैत्यानां पूज्यस्तत्रैव स्वनीच –राश्यां गतस्तदा सन्निपातात्, नीचांशके वक्त्ररोगात्, खलवर्गे वनसत्त्वतो निधनं जायते । कविर्यदि तस्मिन्नेव भावे मित्रक्षेत्रे गतस्तदा सर्पदंशेन, तदंशके च विषकण्टकेन वर्गोत्तमस्थस्तदा लुतया विषादिभिश्च नाश उक्त: । अष्टमस्थ: शत्रोर्गृहे भृगुर्गतस्तदा विषकण्टकेन, शत्रुनवांशे सुरतप्रकोपात्,मूलत्रिकोणे भवेत्,तदा प्रचुरप्रकोपान्नाशो ज्ञेय:।[८५१]

**रन्ध्रगसौरिफलम्**

तुलायां शनैश्चरो रन्ध्रे गतस्तदातिबुभुक्षया, उच्चस्य भागे गुरुलङ्घनेन, वर्गशुद्धस्तदा प्रायोपवेशान्नाशो जायते । अर्कजस्तत्रैव मेषे गतो निजबन्धुवर्गात्, तदंशके च रिपुत:, खलानां वर्गे परिक्षयेण मरणं कुरुते । मन्दो मित्रक्षेत्रे तत्रैव स्यात्, तदा महादद्रुकृतैर्विकारै: तस्यैव भागे वितर्कै:, वर्गोत्तमस्थो गतो व्रणैर्मृत्युरुपजायते । नीलवपु: शत्राश्रयस्थस्तस्मिन्नेव क्षेत्रे, तदाश्वपादघाताद्, तदंशके च करिण: प्रसंगात्, मूलत्रिकोणराश्यां खरतो मरणं ददाति ।[८५२]

**धर्मभावफलम्**

**नवमस्थार्कफलम्**

वासराधिपो धर्मे मेषे भवति, तदा नटाणां धर्मं, दातृत्वादितापसादिरतं करोति, उच्चांशके दम्भिनं करोति, षड्वर्गशुद्धस्तदा लज्जया दानादिधर्मकृत्यं करोति ।

---

[८५१] वृ.य.जा.३२.२१–२४

[८५२] वृ.य.जा.३२.२५–२८

दिनाधिपो मेषे तत्रैव गतो धर्मेण हीनं, नीचांशके कुकर्मरक्तं, खलखेटानां वर्गे परधर्मरक्तं जनयेत् । तपनो मित्राश्रयस्थस्तस्मिन्नेव भावे कौलोत्थधर्मं, मित्रांशके वैकृतिकं, वर्गोत्तमस्थोऽतिलघुप्रमाणेन धर्मं पालयतीति फलं ज्ञेयम् । वैरगृहं गतः पूर्वोक्तभाव एव, कृतघ्नधर्मं कुरुते, शत्रुनवांशे चौरजं, मूलत्रिकोणेऽतिसत्त्वोत्थमेव धर्मं करोति ।[८५३]

**धर्मस्थरात्रिपतिफलम्**

वृषभराश्यामिन्दुर्धर्मे गतः, प्रासादधर्मं ददाति, तदंशके च तडागजं (तडागं निर्मीयते वा), षड्वर्गशुद्धो द्विजेभ्यो दानेन तोषयति । मित्राश्रयस्थो हिमांशुर्यदि भाग्ये, तदा स्वकुटुंबहितार्थाय दानं, तदंशके च मित्राणां सह, वर्गत्तमस्थः समृद्धिदं धर्मं चरति। विधुः शत्र्वाश्रयस्थो धर्मे गतो विटपात्रदानात्, तदंशकस्थः प्रमदानुसङ्गात्, मूलत्रिकोणे बहुवित्तदानाद् धर्मानुकरणं विधत्ते ।[८५४]

**भाग्यस्थारफलम्**

मकरे महीसुतो धर्मे स्यात्, तदा रणजं नराणां दानादिकं भवति, उच्चांशके च परसेवया, षड्वर्गशुद्धो गुरुपोषणेन धर्ममर्जयति । कर्के गतस्तत्रैव वक्रो वधबन्धनेन, तदंशके परदारलाभात्, खलानां वर्गे जनतापरोधाद् धर्मं मन्यते । धराजो मित्रगृहे धर्मे गतः सुहृद्प्रकोपात्, तस्यैव भागे च बहुकोपतः, वर्गोत्तमस्थः परसेवया धर्मं करोति । यस्य सेनापतिररिगृहे भाग्ये भवति, स मनुजः कदापि देवधर्माचरणं न कुरुते, तदंशकस्थः चौर्येण, मूलत्रिकोणे वनितावर्जितेन धर्मं पालयति ।[८५५]

---

[८५३] वृ.य.जा.३३.१-४

[८५४] वृ.य.जा.३३.५-७

[८५५] वृ.य.जा.३३.८-११

**नवमस्थविद्फलम्**

धर्माश्रितश्च ज्ञो यदि स्वतुंगे, तदा वरशत्रुजातम्, तस्मिन्नेव नवांशे द्विजदेवतानां, षड्वर्गशुद्धो व्रतपालनेन धर्ममाचरयति । रोहिणीसुतो यदि स्वनीचराश्यां धर्मे स्यात्, तदा कपटेन, तदंशके च कुहकप्रयोगैः, खलानां वर्गे छलेन नित्यं धर्माचरणं करोति । तत्रैव यदि सौम्यो मित्रराश्यां भवेत्तदा गृहदानतः, मित्रांशके तापस्यादिना, वर्गोत्तमस्थो बहुवस्त्रदानाद् धर्मानुचरणमुक्तम् । शशिजो भाग्ये शत्रुराशौ गतोऽक्षविवर्जितं, तदंशके गुरुलोकलाभान्, मूलत्रिकोणे बहुशान्तिविधायकं धर्मं कुरुते ।[८५६]

**धर्मस्थगुरोः फलम्**

धर्मे देवेज्यः स्वोच्चे गतः, प्रचुरं धर्मं विधत्ते, तदंशके गतो गुरुसेवनोत्थं, षड्वर्गशुद्धोऽद्भुतमेव धर्मं नराणां कुरुते । मकरे गतस्तत्रैव यदि स्यात्, तदा कृतकं , नीचांशके गुरूणामनुषङ्गात्, पापानां वर्गे बहुतीर्थसङ्गात् धर्मं करोति । सुरमन्त्री यदि तस्मिन्नेव भावे मित्रगृगहे च, बहुधर्ममार्गात्, मित्रांशके वनितामतेन, वर्गोत्तमस्थ-स्तनयानुसङ्गातद् धर्मं विधत्ते । देवानां पुरोहितोऽरिराशौ तत्रैव स्यात्, नराणां सुनयेन, तस्यैवांशे गुरुपोषणेन, मूलत्रिकोणे दयया धर्मानुकरणं करोति ।[८५७]

**भाग्यस्थभृगोर्फलम्**

स्वोच्चसंस्थो भार्गवो धर्मं गतः, वरदानजातं, तस्यांशे स्यात्, तदा वस्त्रान्नजं, षड्वर्गशुद्धस्थः पितृतर्पणेन धर्ममर्जयति । कविर्यदि भाग्ये स्वनीचराश्यां स्यात्, तदा परदेशसङ्गात्, तदंशकेऽध्वगलोकसङ्गात्, वर्गोत्तमस्थः, सुमुखैरनकैः धर्मं पालयति । मित्राश्रयस्थो भृगुजो धर्मं गतः, अल्पफलं लभते, तस्यैव भागे विनिश्चयेन धर्मफलं प्राप्यते, पापानां वर्गे परवञ्चने धर्मं जानीते । भृगुसुतो रिपुगृहे तत्रैव गतः, परलोकसङ्गात्, तदंशके गतोऽरिनिवेषणेन, मूलत्रिकोणे कृषिकर्मलाभात् प्राप्तधनेन धर्मकार्यं कुरुते ।[८५८]

---

[८५६] वृ.य.जा.३३.१२-१५

[८५७] वृ.य.जा.३३.१६-१९

[८५८] वृ.य.जा.३३.२०-२३

**धर्मस्थशनेः फलम्**

तुलायां शनैश्चरो धर्मभावं गतस्तदा तृतीये वयसि जीवने धर्मोत्पन्नं कुरुते, तस्यैवांशे चाल्पधर्मं, षड्वर्गशुद्धस्थो भक्तिबाह्यं धर्मं प्रकरोति । भास्करनन्दनस्तस्मिन्नेव भावे मेषे गतः, धर्मेण हीनं, मेषस्य नवांशे परधर्मरक्तं, खलखेटानां वर्गे कलहोद्भवं धर्मं विधत्ते। यमानुजो मित्राश्रयस्थः सततं सुगर्हं धर्मं विधत्ते, तदंशको जयमेव धर्मं, वर्गोत्तमस्थो नृपसेवयैव धर्मं मन्यते । न्नीलवपू रिपुराशौ धर्मे गतः, कृच्छ्रेण सुसूक्ष्मं च, तस्यैव नवांशे परदर्शनोत्थं, मूलत्रिकोणे गतो गुरुलब्धमानाद् धर्मं ददाति ।[८५९]

**कर्मभावफलम्**

**दशमस्थदिनेशफलम्**

तीक्ष्णरश्मिर्यदि मेषस्थः कर्मे स्यात्तदा व्रतोपवासादिभिः पौरोहित्येन, धार्मिकानुष्ठानेन, मेषस्य नवांशे वधबन्धजं, षड्वर्गशुद्धस्थे सकलासु कलासु दक्षतापूर्वकं जीवनं यापयति । तुलायां वासरपस्तत्रैव गतो बहुदासकर्मणा, तस्यैव भागे वणिजोद्भवेन, वर्गोत्तमस्थो वणिक्प्रसूतां पितृपरम्परयाजीविकां करोति । दिनकरो मित्रगृहे कर्मस्थाने कृषिजं, तदंशके कुनृपस्य सेवया, खलानां वर्गे वधबन्धजं कर्म कुरुते । यदि शत्र्वाश्रयस्थः कर्मस्थाने स्यात्तदा, शुभकर्म ददाति, तस्यैव भागे जनगर्हितं, मूलत्रिकोणे खरसेवजं कर्म प्रकरोति।[८६०]

---

[८५९] वृ.य.जा.३३.२४-२७

[८६०] वृ.य.जा.३४.१-४

**कर्मस्थशीतरश्मिफलम्**

कर्माश्रितो हिमांशुर्यदि वृषभे तदा जातकं नृलोके प्रथितं ज्ञेयम्। तदंशके द्विजदेवजं प्रसन्नकरं, तथा षड्वर्गशुद्धे वरदानभाजं कुरुते । वृश्चिक आकाशस्थ: शीतद्युति:, जातकाद् अतिलज्जया युक्तं कर्म कारयति, तस्यैव विभागे क्रयविक्रयोत्थं, खलखेटानां वर्गे गते व्यसनोद्भवं कर्म विधत्ते । विधुर्मित्रराश्यां व्योमे गत: सौम्यं कर्म कारयति, तस्यैव भागे बहुशास्त्रयुतं, वर्गोत्तमस्थे मखजं कर्म ददाति । आज्ञाभावे शत्रुराशिमध्ये रात्रिपति: सुतरां नृशंसं कर्म कारयति, तस्यैव भागे विनीतोद्भवं स्त्रीणां युक्तं शृङ्गारादीनां च, मूलत्रिकोणे च नृपदैत्यजसेवाकर्मणि रतो जातक: स्यात् ।[८६१]

**मानस्थारफलम्**

अन्तरिक्षे मङ्गलो यदि मकरे स्यात्तदा युद्धोद्भवं कर्म कारयति, तदंशके द्यूतक्रियायां रतं, षड्वर्गशुद्धस्थे नितान्तं स्मरजं कर्म जातकं कुरुते । कर्के यदि कुजस्तत्रैव, तदा परदारजातं, तदंशके गतो मणिकोद्भवं, पापवर्गे चोक्तोभयप्रकारेण कर्म कृत्वा वित्तोपार्जनं करोति । सेनापतिर्यदि पूर्वोक्तभावे मित्रक्षेत्रे स्यात्तदा अक्षसमुद्भवं कर्म कुरुते, तदंशके गतो बहुभारजातं, वर्गोत्तमस्थ: प्रणयेन हीनं कर्म ददाति । नभोगोऽङ्गारकोऽरिगृहे बहुदैन्यजातं, तस्यैव भागे भिक्षाजं, मूलत्रिकोणे चान्तरिक्षवृत्तिकर्मणा काष्ठजातं कर्म प्रकरोति ।[८६२]

---

[८६१] वृ.य.जा.३४.५-८

[८६२] वृ.य.जा.३४.९-१२

**आज्ञायां रोहिणीतनयफलम् ।**

अन्तरिक्षे तारातनयो यदि स्वोच्चे, धनधान्यजातम्, तदंशके चतुष्पदोत्थं, षड्वर्गशुद्धे गजवाजिजातं जीविकोपार्जनं करोति । मीनराशिगः सौम्यस्तत्रैव निजमेव, तदंशके गतः परदेशजातं, पापवर्गे खलजं कर्म सदैव विधत्ते । चन्द्रात्मजो मानभावे मित्रक्षेत्रे गतस्तदाश्वादिविक्रयोत्थं, तस्यैव विभागे रजतचन्द्रकादिभिः, वर्गोत्तमस्थेऽद्भुत-मन्त्रजातेन कर्म करोति स्वजीवने । इन्दुजः शत्र्वाश्रयस्थोऽम्बरे बहुकष्टजातम् , तदंशके गुणवर्जितं, मूलत्रिकोणे सुयशोद्भवं कर्म विधत्ते ।[८६३]

**माने गुरोः फलम् ।**

अम्बरस्थो जीवः कर्के प्रचुरं प्रधानं , तस्यैव विभागे द्विजपूजनं, षड्वर्गशुद्धे सुजनार्चनोत्थं कर्म प्रसूते । खंसंस्थो देवेज्यः स्वनीचराश्यामधमलोकसेव्यं, तदंशके च भूतचौर्यभाजं, खलखेटानां वर्गेऽर्थविवर्जितं कर्म करोति । वाचस्पतिस्तत्रैव गतो मित्राश्रयस्थः शुभानि कर्माणि करोति, तदंशसंस्थो व्योमे देवपुरोहितोऽरिगृहे गतः, सततं कृतघ्नम्, तस्यैव भागे परवञ्चनेन, मूलत्रिकोणे नृपतेरभीष्टं कर्म प्रसूते ।[८६४]

**जीविकायां भृगोः फलम्**

माने सितः स्वोच्चे गतस्तदा जनवल्लभं, तदंशके मणिमौक्तिकाढ्यं, षड्वर्गशुद्धे स्वर्णोद्भवं कार्यं कुरुते । स्वनीचराश्यां तस्मिन्नेव भावे गतो वनिताश्रितं, तदंशके नितान्तमल्पसुखं गुरुदुःखजं कर्म प्रसूते । मित्राश्रयस्थो भृगुजो माने गतः प्रभुतासमृद्धम्, तस्यैव भागे निजबन्धुजातं, वर्गोत्तमस्थो बहुगौरवाढ्यं कर्म जीविका भवति । अन्तरिक्षस्थो भार्गवतनयोऽरिराशौ गतो विरजं नृशंशम्, तदंशके बहुचिन्ताढ्यम्, मूलत्रिकोणेऽनृतसंयुतं कर्म करोति ।[८६५]

---

[८६३] वृ.य.जा.३४.१३-१६

[८६४] वृ.य.जा.३४.१७-२०

[८६५] वृ.य.जा.३४.२१-२४

**व्योमस्थार्कजफलम्**

स्वोच्चाश्रितो मन्द आकाशे गतोऽतिमृदु स्थिरं च, तदंशके बहुशिल्पजं, षड्वर्गशुद्धः प्रियसाध्वसं कर्म ददाति । नीचाश्रितश्छायातनयो माने स्यात्तदा द्विजद्रोहजातम्, तस्यैव विभागे नृपसेवाजं, पापस्य वर्गे सनृशंसरूपं कार्यं कुरुते । नीलवपुर्मित्रगृहे मानस्थः प्रभुताविहीनं कर्म, तदंशके नृपसेवाजं, वर्गोत्तमस्थो मृगयासमेतं कर्म प्रसूते । कोणः शत्र्वाश्रयस्थोऽम्बरस्थो बहुकष्टजातम्, तस्यैव विभागे परपैशुनोत्थं, मूलत्रिकोणे भिषजोद्भवं कर्म जायते ।[८६६]

**लाभभावफलम्।**

**लाभस्थार्कफलम्**

लाभाश्रितो यदि स्वोच्चेऽर्कः, तदा गजवाजिजं, तदंशके च महिषीसमुत्थं, षड्वर्गशुद्धः कनकोद्भवं लाभं विधत्ते । तुलायां दिनाधिपो जलपादपानाम्, तस्यैव विभागे कुधान्यकानां, पापस्य वर्गे गतः परयोषिद्गं लाभं कुरुते । तीक्ष्णरश्मिर्लाभे मित्रगृहे गतः सुहृदां, मित्रांशकस्थः कुलयोषितानां, वर्गोत्तमस्थः प्रवरार्यकाणां च लाभो ज्ञेयः । शत्रुगृहे दिनेशो रथवाहनादितः कम्बलानां च, तस्यैव नवांशे गतो लाभे तदा खलमानवानां, मूलत्रिकोणे गुणिनां नितान्तं लाभं प्रकरोति ।[८६७]

**एकादशस्थेन्दुफलम्**

हिमांशुर्यदि लाभाश्रितः स्वतुङ्गे, तदा मणिमौक्तिकानां, तस्यैव भागे द्रविणान्नकानां, षड्वर्गशुद्धे प्रियमानुषाणां लाभं प्रकरोति । शशी नीचाश्रितो लाभे स्यात्तदा कुकलत्रकाणाम्, नीचनवांशे सुसेवकानां, खलानां वर्गे परपैशुनानां लाभं

---

[८६६] वृ.य.जा.३४.२५-२८

[८६७] वृ.य.जा.३५.१-४

प्रसूते। इन्दुर्मित्रगृहे तत्रैव गतो बहुबान्धवानां लाभं विधते, तदंशके नटनर्तकानां, वर्गोत्तमस्थः प्रवरार्थकानां लाभं याति । शीतद्युतिः शत्रुगृहे लाभे च गतः, बहुकन्दजानाम्, अरिनवांशे महीरुहाणां, मूलत्रिकोणे क्षितिमृद्रुहाणां लाभं प्रसूते ।[८६८]

## आपस्थवक्रफलम्

यदि लाभसंस्थो भौमः मकरे, चतुष्पदानां लाभं विधत्ते, तस्यैव विभागे च सुभक्षकाणां, षड्वर्गशुद्धो नृपसण्डलान्तं लाभं संजनयति । लाभ आरः स्वनीचे स्यात्तदा बहुचौर्यजातम्, तदंशके च बहुवञ्चनोत्थं, खलानां वर्गे वधबन्धनेन च लाभं कुरुते । क्षितिजो यदि मित्रगृहे लाभे स्यात्तदा नृपलोकजातम्, तस्यैव विभागे गतो महाजनोत्थं, वर्गोत्तमी कुजः सदैवोभयप्रकारेण लाभं ददाति । धराजः शत्रुगृहे गतो लाभस्थाने बहुवञ्चकानां, तस्यैव भागे परतर्कनानां, मूलत्रिकोणेऽद्भुतभूषणानां लाभदः ।[८६९]

## सौम्यो लाभे तत्फलम्

स्वोच्चे यदि रोहिणीतनयो लाभे तदा बहुशास्त्रजातं, तदंशके गतो विविधैरुपायैः, षड्वर्गशुद्धस्थस्तदा सर्वविद्यानां पठनपूर्वकं लाभं प्रसूते । तारातननयो यदि लाभाश्रितो मीनराश्यां बहुनीचसंगात्, तस्यैव भागे कृत्रिमकर्मणा, दुष्टानां वर्गे दासानां संयोगेन लाभं विधत्ते । मित्रराश्यां लाभे गतः शशिजो वरलोकजातम्, तदंशके निजविद्यया, वर्गोत्तमें व्यवहारतो धनिको भवेत् । ज्ञो यदि शत्र्वाश्रयस्थो लाभे वितथोपचारात्, शत्रुनवांशे गतोऽनेकैः कपटैः, मूलत्रिकोणे च क्रयविक्रयेण लाभं प्रकरोति ।[८७०]

---

[८६८] वृ.य.जा.३५.५-८

[८६९] वृ.य.जा.३५.९-१२

[८७०] वृ.य.जा.३५.१३-१६

**लाभस्थजीवफलम्**

कर्के लाभे गतो देवेज्यो नरेन्द्रात्, तस्यैव विभागे नृपसेवकानां, षड्वर्गशुद्धो प्रचुरप्रभावाद् लाभं ददाति । देवपुरोहितो लाभे नीचाश्रितो भूतो जनसम्पर्केण धनं कुरुते, नीचांशके गतो भृतकाह्वयानां , पापस्य वर्गे स्यात्तदा बहुकष्टतो लाभं याति । सुरेज्यो मित्रराशौ लाभे गतो रजतोद्भवं, मित्रनवांशे बहुधातुजं, वर्गोत्तमे सुजनोद्भवं लाभं प्रसूते। देवानां पूज्यः शत्रुराशावापे स्यात्तदा पुरुषाधमानां लाभं प्रकरोति, तदंशके गुणवर्जितानां, मूलत्रिकोणे विविधात्माजानां सौख्यं करोति ।[८७१]

**लाभस्थभृगृफलम्**

दैत्येज्यः स्वोच्चे स्याद् लाभे, तदा सुतबान्धवोत्थम्, तदंशके च नृपकन्यकातः, षड्वर्गशुद्ध उभयोक्तप्रकारेण जातकं लाभदं प्रकरोति । भार्गवनन्दनो लाभे नीचे स्यात्, तदा कुपुत्रकानां, तस्यैव नवांशे स्यात्तदा कुबुद्धिकानां, खलानां वर्गे गतो द्विजनिन्दितानां लाभं विधत्ते । मित्राश्रयस्थः कविर्लाभे गतो वरवाहनानाम् , तदंशके वरसुन्दरीणां, वर्गोत्तमस्थे प्रियदर्शनानां लाभं कुरुते । दैत्यपुरोहितः शत्रुसंस्थो लाभे हतबान्धवानाम्, तस्यैव भागे गतसौहृदानां मूलत्रिकोणे सदैव सुखिनां लाभं प्रकरोति।[८७२]

**आयस्थमन्दफलम्**

सौरिस्तुलायां लाभे पुरुषोत्तमानां लाभं विधत्ते, तस्यैव भागे धनधान्यकानां, वर्गोत्तमस्थः प्रवरार्चितानां लाभं कुरुते । मन्दो मेषे तत्रैव गतो बहुपातकानाम्, तस्यैव भागे जनगर्हितानां, खलानां वर्गे मतिवर्जितानां लाभो ज्ञेयः । मित्रराशिमध्ये स्थित्वा लाभे च यदा कोणः, तदा बहुमित्रजातम्, तदंशके च दारासमुत्थं, वर्गोत्तमस्थः शुभकर्मनो लाभो वर्णितः। यमानुजः शत्र्वाश्रयस्थो लाभे बहुवित्तजं, तदंशके च कृतिजं, मूलत्रिकोणराश्यां स्थिरधर्मजातं लाभं ददाति ।[८७३]

---

[८७१] वृ.य.जा.३५.१७-२०

[८७२] वृ.य.जा.३५.२१-२४

[८७३] वृ.य.जा.३५.२५-२८

## व्ययभावफलम्

### व्ययस्थभास्करफलम्

अर्को व्ययस्थितः स्वोच्चे गुरुलोकसङ्गात्, तदंशके गुरुसेवकानां, षड्वर्गशुद्धो द्विजदेवकार्याद् धर्मकार्ये वा व्ययं वदेत् । व्ययगस्तपनो तुलाराशिमध्ये कुजनात्, कुसङ्गाद् वा, तुलाया नवांशे च स्त्रीनिरोधात्, वर्गोत्तमस्थो नृपसङ्गाद् व्ययं कुरुते । द्वादशस्थो भानुर्मित्रराशिमध्ये गतो बहुमित्रकार्ये, तस्यैव नवमांशे कुदारात्, खलानां वर्गे दासानां सम्पर्केण धनं व्ययीकरोति । शत्र्वाश्रयस्थस्तीक्ष्णरश्मिर्व्ययगो वेश्यानां सङ्गात्, तस्यैव विभागे च कुजनानुरागात्, मूलत्रिकोणे च सदैव जनानां कृते व्ययं करोति ।[८७४]

### द्वादशस्थहिमांशुफलम्

शशाङ्को वृषे गतो व्यये स्यात्तदाक्षविदेवनेन, तस्यैवांशे स्यात् तदा क्रयविक्रयाभ्यां षड्वर्गशुद्धो द्विजसेवनाच्च व्ययं ज्ञेयम् । शीतद्युतिर्वृश्चिकराशिमध्ये व्यये परमारिसङ्गात्, तस्यैव नवांशे गतः परलोकसङ्गात्, पापवर्गे स्यात्तदा बहुपापतो व्ययं प्रसूते । मित्रराश्यां विधुर्व्यये तदा सुहृदां प्रसङ्गात् , तस्यैव भागे निजबन्धुमानाद्, वर्गोत्तमे गतः प्रियसङ्गाद् व्ययं वदेत् । इन्दुः शत्रुगृहे व्यये गतो रिपुलोकतः, तदंशके बहुप्रकारेण, मूलत्रिकोणे गतो निजबन्धुतो व्ययं विधत्ते ।[८७५]

### व्ययस्थवक्रफलम्

व्ययस्थो वक्रो यदि स्वोच्चे तदा रणजैर्विकारैः, तदंशके च परवञ्चनेन, षड्वर्गशुद्धो रणजाद्विकाराद् व्ययो भवेत् । कर्के व्ययस्थोऽङ्गारकोऽन्त्यजलोकसङ्गात्, तस्यैव नवांशे चानेकैर्व्यसनैः, खलवर्गे खलसङ्गेन व्ययो जायते । मित्राश्रयस्थः कुजो व्यये गतो वितथं , तदंशके पितृकर्मजातं, वर्गोत्तमस्थः सुहृदानुरागाद् व्ययं कुरुते । धराजः शत्रुराशिमध्ये व्यये गतश्चतुष्पदोत्थम्, तस्यैव विभागे बहुरोगतः, मूलत्रिकोणे वरबन्दितश्च व्ययं वदेत् ।[८७६]

---

[८७४] वृ.य.जा.३६.१-४

[८७५] वृ.य.जा.३६.५-८

[८७६] वृ.य.जा.३६.९-१२

**व्ययस्थसौम्यफलम्**

तारातनयो व्यये कन्याराशिमध्ये गतो गीतवाद्यैः, कन्याया विभागे स्यात्तदा गुणिनां प्रसङ्गात्, षड्वर्गशुद्धस्तदाग्निप्रकोपादिभिर्व्ययो जायते । नीचाश्रितः सोमसुतो व्ययगश्च धनसङ्गमेन, तदंशके चाधमलोकजातं, खलवर्गे नृपलोकदानाद् धनव्ययं प्रकरोति । इन्दुजो मित्राश्रयस्थो द्वादशे बहुमित्रसङ्गात्, तदंशके निजबान्धवानां सङ्गात्, वर्गोत्तमस्थो व्रतिनां सङ्गाद् धनव्ययं विधत्ते । रिपुराशौ रोहिणीसुतो व्ययगः सुतजं, तदंशके गतः सुतदारजं, मूलत्रिकोणे वरभोगतो व्ययं प्रसूते ।[८७७]

**व्ययस्थजीवफलम्**

व्ययस्थो जीवो यदि कर्के स्यात्तदा गुरुलोकदानात्, तस्यैव विभागे गतो गुरुसेवकानां, षड्वर्गशुद्धौ निजबान्धवानां व्ययं कुरुते । मकरराश्यां वाचस्पतिर्व्यये गतो व्यवहारजातम्, तस्यैव नवांशे कुसीदजातं, पापवर्गे वणिक्वाक्याद्वारा व्ययं प्रसूते । व्ययगो देवपुरोहितो मित्रश्रयास्थो परवादतः, तदंशे गतो परदेशसङ्गात्, वर्गोत्तमस्थः प्रणयानुरोधाद् व्ययं सुवते । मन्त्री व्ययगः शत्र्वाश्रये विचित्रैर्व्यसनैः, तदंशके मतिविभ्रमेण, मूलत्रिकोणे सुरतोपरोधाद् व्ययं वर्णितम् ।[८७८]

**व्ययस्थशुक्रफलम्**

कविर्व्ययस्थो स्वोच्चे व्रतजैर्विकारैः, तस्यैव विभागे बहुशास्त्ररागात्, षड्वर्गशुद्धः प्रियसङ्गमेन व्ययं कुरुते । भार्गवतनयो व्ययगो नीचाश्रयस्थो नृपलोकसङ्गात्, तदंशके पररोषतः, पापवर्गे भयतश्च नित्यं व्ययं प्रकुरुते । भृगुजो द्वादशस्थो मित्रराशौ गतो बहुभक्षणेन, तस्यैव नवमांशे गतो बहुपानयोगात्, वर्गोत्तमस्थः स्यात्तदा क्षितिजैर्विकारैर्व्ययो ज्ञेयः। दैत्यानामाचार्यो शत्र्वाश्रयस्थो व्यये गतो रणकर्मयोगात्, तस्यैव विभागे जनविप्लवेन मूलत्रिकोणे वितथोपचारैर्व्ययं सुवते ।[८७९]

---

[८७७] वृ.य.जा.३६.१३-१६

[८७८] वृ.य.जा.३६.१७-२०

[८७९] वृ.य.जा.३६.२१-२४

**व्ययस्थार्कजफलम्**

व्ययस्थः सौराष्ट्रदेशोद्भवस्तुलायां गतोऽधर्मजातं, तस्यैव विभागेऽाधममित्रसङ्गात्, षड्वर्गशुद्धो निजबन्धुदोषाद् व्ययं विधत्ते । सूर्यसूनुर्नीचाश्रितो व्ययस्थोऽन्त्यजमानतः, तस्यैव नवांशेऽद्भुतवादसङ्गात्, पापवर्गे निजबन्धनेन व्ययं प्रसूते । मित्राश्रयस्थः कोणो व्यये गतो बहुमित्ररोधात्, तदंशके सुतदासदोषात्, वर्गोत्तमस्थः प्रणयप्रकोपात् व्ययं वदेत् । भास्करनन्दनः शत्र्वाश्रयस्थो व्ययस्थो करुणानुरोधात्, तस्यैव नवांशविभागे बहुलौल्यदोषात्, मूलत्रिकोणे प्रियसङ्गमाद् व्ययं वर्णितमस्मिन् ग्रन्थे ।[८८०]

**भावेशफलम्।**

**लग्नेशभावफलम्**

लग्नभावे लग्नेशो गतो नीरोगं दीर्घायुष्यं च प्रसूते। स जातकोऽतिबली, अवनिपतिः, भू-लाभ-युक्तश्च भवति । कोशे यदि लग्नेशः स्यात्तदा धनयुतं, दीर्घजीवितं, स्थूलम्, अवनीशं,स्थानप्रधानं, राज्ञा सदृशभाग्ययुतं, सत्कर्मणि रतं मनुजं ज्ञेयम् । लग्नाधिपतिः सहजे गतः, सद्बान्धवैर्युक्तं, मित्रैः सुशोभितं, दानप्रियं, धार्मिकं, बलयुतं, शूरं च करोति । पाताले तन्वाधिपो भवेत्तदा नृपप्रियं, प्रचुरजीवितं, सलुब्धमित्रं, मातृपितृभक्तं, अधिकभोजिनं च विधत्ते । लग्नपतिर्विद्याभावे गतः सुभगं, सत्यागं, दातारं, क्षितिपाल-सदृशजीविनं, विदितम्, बहुजीवितं, सुगीतं, सत्कर्मरतं च वर्णितम् । अरिभावे लग्नेशस्तदा जातकोऽरोगिणं, भूरि नतं, शूरं, कृपणं, वित्तयुतं, शत्रुंजयं, सुकर्मपक्षान्वितं च प्रसूते । तनुपः कलत्रे भवेत्तदा स जातकः सतेजः,

[८८०] वृ.य.जा.३६.२५-२८

शीलयुतः, तद्भार्यापि सुशीला, सुरूपा, तेजस्विनी दारायुतश्च पुरुषो जायते। मूर्तिपतिर्निधने गतस्तदा जातकः कृपणः, धनसंचयी, सुदीर्घायुर्भवति। यदि लग्नेशः क्रूरः, तदा कटुभाषी, मुर्खाधिराजश्च ज्ञेयः। प्रथमाधिपो भाग्ये स्थितः, तदा प्रवरबान्धवैर्युतः, सत्कृतः, सत्त्वसमः, सुशीलः, सुकृती, तेजस्वी च भवेत् । मूर्तिपतिर्यद्यन्तरिक्षे, तदा स भूपालपक्षात् लाभदः, पण्डितः, सुशीलः, गुरुमातृभक्तः, प्रसिद्धः, क्षितिपतिश्च भवेत्। लाभे यदि प्रथमेशो दीर्घायुष्यभोगी, सुतयुतः, तेजस्वी, सबलः, मनुजानां कष्टदायकश्च विदितः। जन्मकुण्डल्या व्यये यदि प्रथमभावः, तदा स जातकः कटुभाषी, वाद-विवादे प्रवीणः, मानी, विधिमिलितानां सहगः, विदेशगः, दत्तभुक्तो नरश्च भवति ।[८८१]

## विविधभावगतधनेशफलम्

कोशाधिपो लग्नगः कृपणं, व्यवसायिनं, सुकर्माणं, वित्तयुतं, श्रीपतिप्रसिद्धम्, अतुलभोगभुजं, नरं विधत्ते । धनेशः स्वगृहे गतो बहुधनं, भोगभाजिनं, लाभाधिकाद् लोभयुतं, सदैवं दक्षं प्रकरोति । वित्तेशस्तृतीये भावे स्यात्तदा व्यवसायी, अपशब्दभाषी, कलाविहीनः,चौरः, चलप्रकृतिः, नवीनकलया हीनो भवेत् । यदि द्रविणेशस्तुर्यगस्तदा जातकः पितृलाभपरः, सदोदयः, सुदीर्घायुर्भवेत्। परन्तु तदेव कोशेशः क्रूरखेटस्तदा मातुर्मरणदुःखं विनिर्दिशेत् । तनये धनाधिपो गतस्तदा कृपणं, दुःखनिधानं, धर्मरतं, विपुलं सत्त्वयुक्तं, कठोरहृदयं कुरुते । द्रविणाधिपो यदि रोगे स्यात्तदा धनसंग्रहे तत्परः, अरिहीनः, दुःखयुतः, पापी, धनवर्जितश्च जायते । धनपो दाराभावे गतस्तदा श्रेष्ठा, वित्तविलासभोगवती, वित्तसंग्रहणी, वराङ्गना च प्राप्यते । खलो यदि धनेशस्तदा सा वन्ध्या -सन्तानोत्पत्तिक्षमतायामसमर्था भवति। अष्टमस्थो वित्तपस्तदा जातक

---

[८८१] वृ.य.जा.३७.१-१२

आत्मघातकः,भोगविलासी, परहिंसी, दैवपरः- अर्थाद् भाग्यस्यानुसारं जीवनं यापयति। धर्मभावे कोशपः स्यात्तदा सौम्यः, दानात् प्रसिद्धः, क्रूरः स्यात्। यदि द्वितीयेशो दरिद्रः, भिक्षुकः, विडम्बवृत्तिः, मनुजो ज्ञेयः। मेषूरणस्थधनेशो नृपमान्यः, कृपणधनलोभी भवेत्। पापः स्याद्यदि द्वितीयेशस्तदा मातृपितृपरिपालकादिकं फलं निर्दिष्टम् । श्रियाधिपो लाभे तदा व्यवहारपरं, श्रियः पतिं, ख्यातियुतं, अनेकमनुजानां पालकं वदेत् । व्ययस्थाने द्रविणपतिर्गतोऽष्टकपाली, विदेशे रतः, दुष्कर्मी, याचकः, क्रूरश्च स्यात्। परन्तु सौम्यखेटा यदि वित्ताधिपास्तदा धनसंग्रहे रतं च विद्यात् ।[८८२]

**सहजेशभावफलम्**

सहजाधिपो मूर्तिगस्तदा जातको विवादी, स्त्रीलम्पटः, स्वजनानां हन्ता, सेवायां सदा निरतः, लोभयुतः, कूटकरः, व्याधियुतश्चेत्यादिकं फलं ददाति । सहजेशो धने गतो याचकं, निर्धनं, अल्पायुषं, बान्धवानां विरोधी जातकं ज्ञेयम्। सौम्येन खेटेन पुनरीश्वरं तं जातकं प्रकरोति । सहजपः स्वगृहे गमने सहजैः समानभावः, मित्रप्रेमी, सज्जनः, देवगुरुपूजने रतः, भूपालेन भक्तितो लाभं कुरुते । तृतीयेशः पाताले स्यात्तदा पितृसहोदराणां सुखकर्ता, तेषां चोदयकृर्ता, जनन्ता सह वैरभावेन युतः, पितृकोशभक्षकश्च स पुरुषो विदितः। सुतगे सहोदराधिपस्तदा जातकः सुबान्धवः, तनयसहोदरैः पाल्यः, दीर्घायुष्यभोगी,परोपकारी च जायते । सहजेशो रोगभावे गतो जातकस्य जीवने बन्धुविरोधं, चक्षुरोगित्वं, भू -लाभं, भृशं रोगभयेन ग्रस्ततां निश्चितरूपेण याति । दुश्चिक्येशो ज्यायाभावे स्यात्तदा तस्य भार्या प्रवररूपा, सौभाग्यवती, साध्वी भवति। क्रूरग्रहे सहजेशे देवरेण सह व्यभिचारं विधत्ते । सहजप्रभुर्मृत्युभावे तदा रुग्णग्रस्तो बान्धवैर्हीनश्च । तृतीयपो यदि खलस्तदा

---

[८८२] वृ.य.जा.३७.१३-२४

यावद्वर्षाणि जीवति तावद् बाहुव्यङ्गं विधत्ते । सहजेशो धर्मभावे गतो बन्धुवर्जितो जातकः स्यात्। सौम्यस्तदा सद्बान्धवैर्युक्तः सुकृती, सहजानां सहायकश्च प्रसिद्धः । भ्रातृप्रभुः पितृभावे भवेत्तदा भूपालेन पूज्यः, मातृबन्धुपरित्यक्तः, स्वबान्धवानां श्रेष्ठश्च भवति। तृतीयप्रभुर्यदि लाभभावे तदा जातकः सद्बान्धवैर्युतः, सत्कार्यैर्लाभदः, बन्ध्वपेक्षया ख्यातिप्राप्तः, सेवाविधायी, भोगरतश्च भवेत्। दुश्चिक्याधिपो व्ययगो तदा मित्रविरोधी, स्वबन्धुसन्तापी, दूरवासी, विदेशगामी च जातकस्य फलं वर्णितम् ।[८८३]

**चतुर्थेशफलम्**

लग्नगः पातालपस्तदा जातकं पितृसुखयुतं, मिथः स्नेहिलं, पितृपक्षेण वैरिकरं, पितृनाम्ना प्रसिद्धं च ज्ञेयम्। धनस्थे क्रूरखेटो यदि पातालाधिपस्तदा पितृविरोधकतः, शुभग्रहेण पितृपालकः प्रसिद्धः, तल्लक्ष्मीं तस्य पितापि भुनक्ति। हिबुकेशः सहजे गतस्तदा जातकः सुप्रसिद्धस्य पुत्रः, पितृमातृविच्छदेकरः,पितृवैरी, पितृबान्धवानां घातकश्च जायते । तुर्याधिपः स्वगृहे स्यात्तदा पितुराज्ञारक्षकः, सदैव प्रसन्नः, पितृलाभकरः, सुकर्मा, सुखी, निधिपश्च जातकः स्यात् । तुर्येशस्तनये गतस्तदा जातकस्य पिता लाभोद्गतः, दीर्घायुः, संसारे प्रसिद्धः, सुसुतः, सुतपालकोऽपि च दृश्यते । पातालेशो रिपौ गतः पितुरर्थविनाशकः, पितृवैरी, पितृद्वेषकरः स्यात्, परन्तु चतुर्थेशः शुभखेटस्तदा धनसंचयी तथा सुतयुतश्च ज्ञेयः । क्रूरेऽम्बुपतौ कलत्रे स्थिते जातकः स्त्रियं न पालयति । शुभः स्यात्तदा पालयति । एवं पातालेशौ सितकुजौ व्यभिचारिणीं च जायां कुरुतः । हिबुकेशो निधने तदा सरुग्णं, दरिद्रिणं, दुष्कर्मरतं, मन्युप्रियं मनुजं वदेत् । सुकृतगोऽम्बुप्रभुः पितर्यसङ्गिनं, सर्वासु विद्यासु कुशलं, पितृधर्मसंग्रहपरं, पितृनिरपेक्षिणं च विधत्ते । आकाशे पातालपः खलः, तदा तनयं मातरं च त्यजति, अन्यदयितायामासक्तः, शुभखेटेनान्यस्त्रीसेवारतश्च भवति ।

[८८३] वृ.य.जा.३७.२५-३६

खलपातालेशो लाभे स्यात्तदा पितृपालकः, सुकर्मा, पितृभक्तः, सुदीर्घायुर्जातकः स्यात्। सौम्यस्तदा जातकं क्षितिपालं प्रवदेत् । व्ययगस्तुर्याधिपः, तदा विदेशगो मृतपिता वा जातकस्य, पापखचरो यदि पातालेशस्तत्रैव तदान्यपितुर्जनिं जातकस्य जानीयात् ।[८८४]

**पञ्चमेशभावफलम्**

तनयाधिपो लग्नगतः प्रसिद्धम्, अधिकतनयैर्युतम्, शास्त्रवेत्तारम्, गीतविदं, सुकर्मनिरतं नरं करोति । क्रूरस्तनयपो धनस्थः स्यात्तदा धनविहीनं करोति । सौम्यपञ्चमेशे गीतादिकलायां निपुणः, कष्टभुक्, प्रचुरस्थानको ज्ञेयः । तनयपतिः सहजे गतः सुमधुरवाचं, स्वबन्धुजनमध्ये पूज्यं जनयति। तदीयास्तनया बन्धुं परिपालयन्ति । सुदेशः पाताले स्यात्तदा पितृकर्माणं, पित्रा प्रपालितं, जननीभक्तं करोति। यदि क्रूरेशस्तत्पितृविरोधकृज्जायते । तनयप्रभुः स्वगृहे गतो मतियुतं मानिनं, वचनकुशलम्, प्रवरजनं, सतनयं विख्यातं च मानवं कुरुते । अरिसंस्थः क्रूरः पञ्चमप्रभुस्तदा शत्रुप्रतिमाङ्गसम्भवं, रोगयुतं, धनहीनं करोति। परन्तु शुभेशः शुभफलं ददाति । कामे गतो सुतेशस्तदा सुतनयां, सुभगां,देवगुरुभक्तां, सुशीलां च तस्य दारां विद्यात् । मृत्युसंस्थः सुतपस्तदा कुत्सितवाक् , स्त्रीषु भण्डः, नष्टा व्यङ्गाश्च सहजाः पुत्रास्तस्य जातकस्य वर्णिताः। धर्मगस्तनयाधिपस्तदा जातकं सुबोधविद्यं, कविं, सुगीतम्, क्षितिपरतिपूज्यम्, नाटकरसिकं च वदेत् । अन्तरिक्षे गतः पञ्चमेशः नृपकर्मरतं, नृपाद् लाभकरं, सत्कर्मरतं, प्रवरं, मातृसुखयुतं च प्रकरोति । सुतनाथो यदि लाभस्थस्तदा जातकः शूरः, सुतनयायुतः, सुकृतभोगी, गीतादिकरसिको नृपभाजी च दृश्यते । क्रूरः पञ्चमनाथो यदि द्वादशगस्तदा सुतविरहितो जातकः। शुभपञ्चमेशे ससुतः, सुतकष्टकरो विदेशगमनोद्यतश्च भवति।[८८५]

---

[८८४] वृ.य.जा.३७.३७-४८

[८८५] वृ.य.जा.३७.४९-६०

**षष्ठेशभावफलम्**

लग्नगतो रोगाधिपो निरोगः, सबलः, कुटुम्बकष्टकरः, बहुपक्षयुतः, शत्रुहन्ता, शौचवचनभाषणे दक्षश्चादिकं जातकं फलं ददाति । रिपुपतौ कोशे गते दुष्टः, चतुरः, संग्रहे न तत्परः, स्थानप्रवरः, प्रसिद्धो जातको भवेत्। क्रुरः षष्ठेशः, तदा व्याधियुतं गतधनं च प्रकरोति । सहजे यदि क्रुरो गाधिपः स्यात्तदा लोके सर्वेषां जनानां कष्टकरः, जनकस्यापि कष्टदायकः, संग्रामादिना च तस्य मरणं कुरुते । चतुर्थे यदि षष्ठाधिपस्तदा पितृवैरी, सरोगः पिता, तनयः कालान्तरे लक्ष्मीं प्राप्नोति । सुतगे रिपुभवनाधिपः क्रूरस्तदा पितृसुतयोर्मध्ये परस्परं वैरम्, तेन कारणेन तस्य जातकस्य मरणं स्यात्। शुभो यदि स खेटः, तदा जातको निर्धनपदवी दुष्टश्च विदितः । स्वगृहे यद्यरिभवनेशः, तदा नीरुग्, वैरी, सुखी, कृपणस्वभावयुतः सीदति, निकृष्टस्थाने निवसति । क्रूरो वैरिपतिर्मदने गतः, चण्डा, विरोधिनी, तापकरी भार्या च भवति। शुभषष्ठेशः स्यात्तदा वन्ध्या नष्टगर्भा वा ज्ञेया । अहितनाथोऽष्टमे स्यात्तदा निम्नप्रकारेण निधनभयमुक्तम् । शनिना संग्रहण्याः, कुजेन सर्पदंशात्, सौम्येन विषपानात्, चन्द्रेण सपदि–शीघ्रमेव, सूर्येण सिंहभयात्, गुरुणा नृपतितः, कविना स्वमानादेवं धनदोषाच्च भयं भवति । वैरिभावप्रभुर्धर्मे क्रूरस्तदा खञ्जः, बन्धुविरोधी, नास्तिको भिक्षुकश्च प्रसूयते। शत्रुप्रभुः क्रूर आकाशे तदा दुष्टः, मातृरिपुश्च, शुभेण मातृदोषैर्वैरी कठोरश्च तथा धर्मेण पुत्रपालकश्चेत्यादिकं फलं वर्णितम् । क्रूरः षष्ठप्रभुर्लाभे भवेत्तदा शत्रुपक्षात् निधनं, तस्करेण हानिः, चतुष्पदाल्लाभस्तस्य जातकस्य। षष्ठाधिपो व्यये गतश्चतुष्पद–द्रव्यधान्यादीनां नाशकरः, चललक्ष्मीयुतः, भाग्यवरः स मनुजः।[८८६]

[८८६] वृ.य.जा.३७.६१–७२

**सप्तमेशभावफलम्**

जायाधिपस्तनुगः, तदा शोकरहितं, एकपत्नीयुतं, भोगभुजं, रूपयुतं, दारादलितशक्तिं च जातकं विद्यात्। धनस्थे दयितेशे दुष्टा दयिता, सुतेनोज्झिता स्यात्। तस्य वित्तं कलत्रकरं, तद्वदनं विसंज्ञश्च ज्ञेयम् । सहजे गतो दारापतिस्तदा जातक आत्मबली, बन्धुवत्सली, दुःखी च भवति। तस्य वनिता सुरूपा, देवररता स्यात्। यदि क्रूरेशस्तदा गृहत्यक्ता परजनेषु रता च । पाताले यदि जायाधिपः, तदा चपलप्रवृत्तिः, पितृवैरी, स्नेहरहितश्च भवति। अस्य जातकस्य पितापि दुर्वाक्यभाषणे तत्परः, एवं पिता तद्भार्यां पालयति । सुतस्थे सप्तमप्रभौ जातकः सुभगः, सुतान्वितः, स्वदरिकया सह दुष्टमतिर्भवति। तस्य जायां पुत्रं च रक्षति । दयितानाथो रिपुभावे गतः सरुग्भार्यं, प्रियया सह वैरिणं, दयितासङ्गात् क्षीणमेवं क्रूरभावे मृत्युकारकं च ज्ञेयम् । कान्तेशः स्वगृहे स्यात्तदा परमायुः, प्रीतितत्परः, सततं निर्मलशीलः, तेजस्वी च जातको भवति। परिणीतेशो मरणे गमनं करोति, तदा तं जातकं विवाहरहितं, गणिकासु रतं, देवद्विजासक्तिकरं, दयितासेवाकरं चादिकं फलं ददाति । सप्तमाधिनाथो भाग्ये स्थितस्तदा सतेजः, शीलयुतः, स्वभावात् प्रियः जातकः स्यात्। वारेशः क्रूरस्तदा विशेषेण षष्ढसदृशो दृश्यते । मेषूरणे सप्तमाधिपः स्यात्तदा नृपदोषी, लम्पटः, दुर्भाषी, क्रूरग्रहेण दुःखार्तः, स्वश्रुवशगो जायते । लाभसंस्थः परिणीताधिपस्तस्य वनिता भक्ता, रूपान्विता, सुशीला, परिणीता दयिता परन्तु प्रसवसमये सा म्रियते । द्वादशे स्याद्यदि जायानाथः, भार्या तस्य गृहबन्धा, नास्तिका, लोला, दुष्टगुणैर्युक्ता, रुग्वलिता भवेत्।[८८७]

[८८७] वृ.य.जा.३७.७३-८४

**अष्टमेशभावफलम्**

अष्टमप्रभुस्तनुगो बहुविघ्नी, दीर्घरोगी, नष्टानुवादरतः, भूपालाज्ञया लक्ष्मीं च प्राप्नोति । कोशे स्यात् निधनेशः (क्रूरश्च), तदा जातकोऽल्पजीवी, वैरीवान्, चौरप्रवृत्तिकुशलश्च प्रसूयते। शुभखेटेन शुभं, परन्तु नृपान्मरणं च निश्चितम् । सहजे स्थितो यद्यष्टमेशः, तदा बन्धुविरोधी, सुहृदानां विरोधी, व्यङ्गी, दुर्वाग्लोलः, सोदररहितश्च भवेत्।

तुर्यगतो निधनाधिपः, पितरि रिपुत्वं कारयति। स पितृगतां लक्ष्मीं लभेत्। पिता–पुत्रयोर्मध्ये युद्धं स्यात्। पिता च रुग्णो ज्ञेयः । तनयस्थो यद्यष्टमप्रभुः क्रूरश्च यदि स निधनेशः, तदा सुतरहितो भवति, सुतो जातोऽप्यल्पं जीवति, जीवति तदापि कितवकर्मरतश्च स्यादिति फलं ददाति । यदि छिद्रपती रोगे, तदा प्रत्येकग्रहस्य फलमित्थं वर्णितम् । अष्टमेशोऽर्केण नरेन्द्रविरोधी, उच्चस्थगुरुणा दृष्टिरोगकलितः, शुक्रेण सरोगः, कुजेन संहतोऽभिभयः, अर्कजेन विषाधिकसर्पाद् भयं, निशातनयेन व्याधिभयं, इन्दुना निधनम्। षष्ठस्थो यदि रन्ध्रेशः, शुभैरदृष्टस्तदा पूर्वोक्तं फलं विशेषेण घटितम् । रन्ध्रेशो दारायां गतो गुह्यरोगी, दुष्टापतिः, स्वयमेव दुष्टो भवति। क्रूरे भार्याद्वेषी, एवं दयितादोषान्मरणं लभते । स्वगृहे निधनाधिनाथस्तदा व्यवसायी, व्याधिवर्जितः, नीरुक्, कितवकलाकलितवपुः, कितवकुले च प्रसिद्धो भवति । नवमसंस्थो मृतिनाथः, तदा निःसङ्गी, जीवघातकः, पापी, निर्बन्धुः, निःस्नेही, पूजाविमुखः, मुखव्यङ्गश्च जातकः प्रजायते। अन्तरिक्षे यदि रन्ध्रप्रभुः, नृपकर्मा, नीचाकर्मनिरतः, अलसः, क्रूरश्च जातकः स्यात्। यद्यष्टमेशः, तदान्यपुरुषेणोत्पन्नतनयः, तन्माता च न जीवति । मृत्युपतिर्यदि लाभसंस्थः, तदा स जातको बाल्यदुःखी, पश्चात् सुखी च, दीर्घायुः स्यात् सौम्यखेटेन । खलेनाल्पायुश्चोक्तः। व्ययस्थो यदि रन्ध्राधिपः, क्रूरमनाः, तस्करः, शठः, निर्घृणः, आत्मगतिः, व्यङ्गवपुः, एवं मरणानन्तरं शवं काकादिभिर्भक्ष्यं च – अर्थात् तस्य न गतिर्भवति ।[८८८]

---

[८८८] वृ.य.जा.३७.८५–९६

**नवमेशभावफलम्**

भाग्याधिपो लग्नसंस्थस्तदा देवगुरु–आदर–सत्कारादिके तत्परः, बलयुतः, कृपणः, नृपकर्मा, स्वल्पभोजी मतिमांश्च जायते । नवमप्रभुर्धनसंस्थः श्रेष्ठः, प्रसिद्धः, सुशीलयुतः, सत्यपरः, सुकृती, मुखे किंचित् व्यंगयुतः, एवं चतुष्पदोत्पन्नपीडावान् भवेत् । सुकृताधिपः सहजे गतः स जातको रूपयुतः, दयिताबन्धुवत्सलः, बन्धूनां स्त्रीरक्षणे तत्परः, बन्धुरहितश्च जायते । पातालस्थे यदि भाग्यप्रभुस्तदा स जातकः पितृभक्तः, पितृकृत्येषु श्रद्धावान्, विदितः, सत्कार्ये रतः, मैत्रः, कर्मरतिर्भवति । सुतस्थे सुकृतगृहप्रभुः, तदा सुकृती गुरु–देवपूजने निरतः, सुरूपश्च भवति। तस्य तनयाः सुकृतसमेताश्च प्रोक्ताः । रिपुभावे यदि नवमेशः, तदा शत्रुप्रणतिपरायणः, धर्मरतिकलितः, कलाविकलदेहः, दर्शननिन्दायां निरतो भवति। जायागतो नवमाधिपः, तदा तस्य वनिता सत्यवती, सुविनया, सुरूपा, शीलश्रीयुता,सुकृतयुता च जायते । नवमाधिपो निधने, तदा दुष्टौजः, विघाती, गृहबन्धुविवर्जितः, सुकृतरहितः स्यात्। यदि क्रूरः स्यात्तदा षण्ढश्च भवति । स्वगृहे सुकृतपतिः, तदा स्वबन्धुभिः प्रीतम्, अनुदितसत्त्वम्, दानशीलं, देव–गुरु–स्वजनदयितादिषु भक्तं च विज्ञेयम् । कर्मसंस्थः सुकृतेशो भूपालकर्माणं, शूरं, ख्यातं, नृप–लाभवन्तं, स्वकर्मरतं, मातुर्विघ्नकरं कुरुते । धर्मेश्वरो यदि लाभभवनसंस्थः, तदा जातको दीर्घायुः, धर्मपरः, स्नेहिलः, क्षितिपतिलाभयुतः, सुकृतख्यातो भवति । द्वादशगो सुकृतप्रभुः, तदा मानी, देशान्तरे निवासी, सुरूपः, विद्यावान् च भवति। क्रूरखेटेन जगति धूर्तश्च स्यात् । [८८९]

---

[८८९] वृ.य.जा.३७.९७–१०८

**दशमेशभावफलम्**

लग्नगते गगनाधिपः, सरलः, मातृवैरी, पितृपूजकः, लोभासक्तः, सुखी च भवेत्। स गतपितः, परपुरुषरता तन्माता भवेत् । दशमपतौ कोशे सति, मात्रायान्यया लालितः स, सलोभः, मातरि दुष्टः, स्वल्पग्रासी, सुतनुकर्मा च स्यात्। सहजभावसंस्थो दशमपतिर्मातृस्वजनविरोधी, सेवानिरतः, कर्मणि चासमर्थः, मातुलक-पालितो ज्ञेयः। अन्तरिक्षाधिपतिर्हिबुकसंस्थस्तदा निरतः, सुखी, पितृमातृपोषणपूजनतत्परः, सकलजनानां सुखकारी, क्षितिपतिसम्भवलाभविभूषितश्च दृश्यते । तनयगते गगनाधिपः, तदा शुभकर्मकः, अविडम्बी, नृपलाभयुतः, संगीतवाद्यादिनिरतः, तत्सुतं माता पालयति । गगनपो रिपुसंस्थः, तदा बाल्यावस्थायां दुःखी क्रूरश्च पश्चात्सुखी, एवं तन्माता परनरनिरता कथिता । दयितागतोऽम्बराधिपः, तदा तस्य जाया सुतवती, शुभरूपसमन्विता, रमणमातृपालनलालसा स्यात् । अम्बरप्रभुर्निधने प्राप्तः, तदा क्रूरं, चौरं, मृषान्वितं दुष्टं, मातरि सन्तापकरं, अल्पजीवितं कितवं च जानीयात् । भाग्ये गतो यद्यम्बरेशः, तदा शुभशीलः, सद्बन्धुः, सन्मित्रैर्युतः, तन्माता सुशीला, सुकृतवती, सत्यक्चनरता वर्णिता । स्वगृहे लीनो यदि गगनेशः, जननीसुखप्रदं पुरुषं जनयति। जननीकुलविपुलसुखं प्रकटघटनापटीयांसं च तं जानीयात्। लाभाश्रितो गगनेशः, तदा मातर्यतिरिक्तपरः, दीर्घायुर्मातृसुखः स्यात् । माता च सुतपक्षिणी, सुखिनी भवेत्। व्ययसंस्थे व्योमपतौ मात्रोज्झितः, निजबलः, शुभकर्मा, नृपतिकर्मरतः स्यात्। पापेशः, तदा देशान्तरगं च तं ज्ञेयम् । [८९०]

[८९०] वृ.य.जा.३७.१०९-१२०

**एकादशेशभावफलम् ।**

लाभेशो लग्नगतः, तदा स्वल्पायुः, बलकलितः, शूरः, दाता, सुभगः, जनप्रियः, तुच्छादोषान्निधनं लभते । लाभपः कोशे स्यात्तदाल्पायुः, अल्पभोजी, अष्टकपाली, चौरश्च भवति। परन्तु शुभेशस्तदा धनसंपन्न उक्तः। सप्तजे लाभाधिपः, तदा बन्धुस्त्रीपालनकः, सुबान्धवः, बन्धुवत्सलः, बन्धूनामाश्रयी, रिपूच्छेत्ता (शत्रुजित्) च जातको भवेत् । पाताले यद्येकादशाधिपः, तदा दीर्घायुः, पितृभक्तिभाक्, सामाजिक-कर्मरतः, स्वकर्मतो लाभवान् च भवति। लाभपतिस्तनयसंस्थः, तदा पितापुत्रौ परस्परस्नेहिलौ, तुल्यगुणौ, परस्परतुच्छौ जातकं करोति। लाभाधिपतिर्यदि षष्ठगः, तदा सुवैरः, सुदीर्घरोगी, चतुरङ्गसंग्रही, चौरहस्तात् मृतिं प्राप्नोति । क्रूरग्रहेशः, तदा विदेशान्तरसङ्गतो नरश्च जायते । लाभप्रभुर्यदि सप्तमस्थः, तदा तेजस्वी, शीलसंपद्युतः, पदवीयुतः, दीर्घायुर्भवति, दयितां प्रीतिर्नियतं च विधत्ते । एकादशाधिपो निधने गतः (क्रूरेशश्च ), तदाल्पायुः, सुदीर्घरोगी, जीवन्मृतो भवति। सौम्यखेटे प्राप्ते दुःखी च भवति। सुकृताश्रयो यदि लाभाधिपः, तदा शास्त्रविशारदः, बहुश्रुतः, धर्मप्रसिद्धः, गुरुदेवभक्तः स्यात्। क्रूरखेटेन बन्धुव्रतवर्जितश्च जायते । आकाशगो यदि लाभप्रभुः, तदा जातको मातृभक्तः, सुकृती, पितृद्वेषी, सुदार्घतरजीवी, धनयुतः, जननीपालकनिरतश्च भवेत् । स्वगृहे लाभनाथ आश्रितः, तदा दार्घायुषं, पुष्कलपुत्रैर्युतं, सत्कर्मरतं, सुरूपसंयुतं, सुशीलं, जनप्रमोदप्रवणं सुगीतं च कुरुते । व्ययगे लाभपतौ, रोगी, उत्पन्नभुग्, अस्थिरः, उत्पातरतः, मानिनीजाययुतः, दुःखी च स जातको भवति ।[८९१]

---

[८९१] वृ.य.जा.३७.१२१-१३२

## व्ययेशभावफलम्

तनुगे यदि व्ययनाथः, तदा जातको विदेशगः, सुवचनः,सुरूपः, अपसङ्गवाददोषी कुमारः षण्ढो वा भवति । धनसंस्थे द्वादशपतौ, कृपणः, कटुवाग्विनष्टः, लाभलम्बः स्यात्। यदि स व्ययेशः कुजः, तदा नृप–तस्कर–वह्निभयतो निधनं लभते । सहजो यदि द्वादशपतिः, तदा गतधनबान्धवयुतः स्यात्, परन्तु शुभखेटो व्ययेशः, तदा धनयुतो भवति, तत्सोदरः सुकृपणो बन्धूनां दूरं वसति । तुर्याश्रितो व्ययेशः, तदा कृपणः, रोगरहितः, सुकर्मा च भवति। सुतो मृतिं प्राप्नोति, सुजनोऽपि स महादुःखी वर्णितोऽत्र। सुतस्थो द्वादशेशः क्रूरश्च, तदा सुतवर्जितो भवेत्। शुभे स्थिते सुतयुतः स्यात्। जनकलक्ष्म्या विलासी, सामर्थ्यविरहितश्च कथितः। षष्ठाश्रितो द्वादशेशः क्रूरः स्यात्तदा अक्ष्णा दोषी, कृपणः, करितो– गजतो मृतिमाप्नोति । यदि भार्गवनन्दनः स्याद्द्वादशेशः, तदा गतनयनश्च वदेत् । द्वादशाधिपः सप्तमाश्रितस्तदा दुष्टः, दुश्चरितधृक्, कपटवचनः स्यात्। क्रूरेशः, तदा स्त्रीसुखं न भवति, गणिकातः सौख्यमुपैति । निधनेशो गतो व्यये, तदा अष्टकपाली, कार्यसाधनरहितः, द्रोहमतिः स्यात्। सौम्यखगेन धनसंग्रहतत्परश्च दृश्यते । सुकृतगते व्ययनाथः, तदा तीर्थाभीष्टव्ययी, व्ययवृत्तिर्भवति। क्रूरखेटेन पापी भवति, निरर्थकं तद्द्रव्यं याति । गगनस्थे व्ययाधिपे पवित्राङ्गः, पररमणीपराङ्मुखः, सुतधनसङ्गनिरता दुर्वचनपरा च तस्य माता । लाभस्थे द्वादशपे द्रव्यपतिः, दीर्घजीवी, स्थानप्रवरः, दाता, विख्यातः, सत्यवचनपरश्च भवति । यदि जन्मचक्रे व्ययेशो ग्रहे लीनः, तदा जातो विभूतिमान्, ग्रामनिवासवित्तः, कार्पण्यबुद्धिः, पशुसंग्रही च ज्ञेयः। चेज्जीवति ग्रासयुतो भोजन–पानादिसुखभोगी ज्ञेयः। [८९२]

---

[८९२] वृ.य.जा.३७.१३३–१४४

**लग्नगतद्वादशराशिफलम्**

जन्मकाले पूर्वक्षितिजोपरि मेषलग्नमुदितं, तदा स जातको रक्तवर्णतनुः, सदाल्पबुद्धिः, परनिर्जितः, पित्ताधिकः, सर्वजनोपसेव्यः, सर्वानशनः, अबुद्धिविचक्षणश्च(मूर्खेषु बुद्धिप्रदर्शकः) भवेत् । वृषोदयस्य लग्नं, तदा श्वेततनुवर्णः, श्लेष्माधिकः, क्रोधपरः, कृतघ्नः, सुमन्दबुद्धिः, स्थिरतासमेतः, स्त्रीभृतकैः पराजितश्च ज्ञेयः। पूर्वक्षतिजे यदि मिथुनलग्नमुदितं भवेत्, तदा यदि जातकस्य जन्म, तदा स पुरुषोऽतिगौरवर्णः, स्त्रीरतः, नृपैः पीडितः, दूतः, प्रसन्नः, प्रियभाषी, विनीतः, सुमूर्धजः, गीतनिपुणो भवेत् । कर्कोदये जातो जातकः, गौरवपुः, पित्ताधिकः, कल्यतनुः, प्रगल्भः, जलक्रीडारतः, अतिबुद्धः, शुचिः, क्षमी, सुसेव्यः, धर्मरुचिकरः स्यात् । पञ्चमे लग्ने जातो जातकः, पाण्डुवर्णः, पीत–कफ–प्रकृत्या पीडितः, परिपीडिताङ्गः, प्रियामिषः, अरण्यप्रियः, सुतीक्ष्णः, सबलः, प्रगल्भः, सुतनिरीहः स्यात् । कन्यायां यदि जातकस्य जन्म, तदा स कफपित्तयुक्तः, शुभकान्तिभाक्, श्लेष्मयुक्तः, स्त्रीविजितः, अतिभीरुः, अधिकमायायुतः, कामासक्तश्च प्रजायते । तुलाविलग्ने यदि जातकस्य जन्म, स जातकः श्लेष्मान्वितः, सत्यपरः, वणिक्क्रियायां निपुणः, अधिकमानयुक्तः, देवानां पूजने तत्परः, कृशतनुश्च ज्ञेयः। अष्टमे लग्ने प्रसूतस्तदा स कफपरः, जराढ्यः, (अल्पकाले वृद्धवत्) क्षितिपालेन पूजितः, गुणान्वितः, शास्त्रकथायामनुरक्तः, प्रमर्शकः, शत्रुगणैर्युक्तो भवेत् । धनुलग्नोदये जातो जातकः राजयुतः, स्वकार्ये प्रधृष्यः, द्विज–सुरपूजने तत्परः, अश्वयुक्तः, सदैव सुहृदैः प्रयुक्तः, प्रबलबन्धो जायते । भृगोदये प्रसूतो जातकः तोषरतः, सतेजः, भीरुः, पण्यक्रियायां निपुणः, श्लेष्मवायुप्रकृतिपीडितः, सुदीर्घवपुः, परवञ्चकश्चोक्तः । कुम्भलग्नमध्ये यदि जातकस्य जन्म, तदा स सुस्थिरः, वाताधिकः, चौराणां सुहृदः, सुगात्रयुक्तः, शिष्टानुरक्तः, जनवल्लभश्च

भवेत् । अन्तिमे लग्ने जातो जातकः, तुष्टः, विनीतः, सुरतक्रियायां कुशलः, सुपण्डितः, स्त्रीदयितः, प्रचण्डः, पित्ताधिकः, कीर्तिसमान्वितश्च स्यात् ।[८९३]

**धनगतद्वादशराशिफलम्**

मेषलग्नोदयो यदि कोशे, तदा विविधैर्मार्गैर्धनं प्राप्नोति, सदैव चतुष्पदाढ्यः, बहुबान्धवैर्युतः, प्रीतिपरश्च भवति । धनस्थे यदि वृषराशिः, तदा स जातकः कृषिकार्येणान्नाभिधानं, चतुष्पदैः, हेम्ना, मणिमुक्तादिभिश्चार्जयति । वित्तगे तृतीयराशौ नित्यं स्त्रीजनतो रौप्यकाञ्चनेन, हयाधिकं धनं लभते । स सज्जनैः सौख्यं च लभते। चतुर्थराशिर्धनगस्तदा स वृक्षजैः, जलोद्भवं, यद्यदनिष्टभोज्यं, नयार्जितं, सुतानां प्रीतिकरं धनं संचिनोति। धनस्थे सिंहराशिः, तदारण्येन वनेन वा धनं समुपैति, तथैव स सर्वोपकारकः, मृदुस्वभावयुतः, स्वविक्रमोपार्जितधनैर्युक्तश्च भवेत्। कन्योदये वित्तभावे भूपालैः सकासाद् धनं लभते, हिरण्य-मुक्ता-मणियुक्तैर्गज-अश्वादिनानाविधिमार्गैर्लाभं प्राप्नोति। धनस्थे तुलाराशिः, तदा बहुव्यापारी, कर्मणा धनं विधत्ते, सुतयुतः, प्रधानः, स्वन्यायलब्धं धनं गुरवे ददाति । तत्रैव यदि वृश्चिकराशिः, तदा जातकस्तृण-काष्ठादिभिः, पाषाणैः, मृत्तिकया, सस्योद्भवेन इत्यादिना कर्मणं धनमर्जयति। कोशे धनुर्धरस्तदा सः स्थैर्यविधानेन धनं लभते, चतुष्पदाढ्यं, विविधयशोयुतः, धर्मविधानलुब्धः, रसिको दृश्यते । धनस्थे मकरस्तदा विविधैरुपायैः प्रपञ्चेन वा धनं प्राप्यते, सेवामानी, कृषिकर्मणा, क्षितिपालसेवया, विदेशसङ्गाद् वित्तं कुरुते । घटो यदि वित्तस्थस्तदा फलपुष्पैर्धनं, प्रभूतं जनवल्लभ;, साधुजनभोज्यः, परोपकारेण महाजनैर्धनमर्जयति । धनस्थो मत्स्यस्तदा स प्रभूतैर्नियमोपवासैर्धनं प्रकुरुते। विद्याप्रभावात्, निधिसङ्गात् , मातापितृभ्यां समुपर्जितं धनं करोति ।[८९४]

---

[८९३] वृ.य.जा.३८.१-१२

[८९४] वृ.य.जा.३८.१३-२४

**तृतीयगतद्वादशराशिफलम्**

सहजस्थो यदि प्रथमराशिः, तदा द्विजातिं मित्रं मनुजो लभते, परोपकारे निपुणः, पवित्रः, प्रभूतविद्यः, नृपपूजितो भवति। सहजे यदि वृषभराशिः, तदा स प्रचुरप्रतापो नरेन्द्रः, धनयुतः, भूरियशस्वी, शूरः, कविः, विप्ररक्तचित्तयुतश्च जायते । सहजप्रयाते तृतीयराशौ स जातको वैश्यजनैः, गुरुणा मैत्रीभावं, कृषिवलः, धर्मकथायां रतः, सुशीलः, सुरसम्मतश्च प्रजायते । सुहृदि यदि कर्कटस्तदा विप्रजनैः, शान्तैः, सुधर्मिकैः, स्वधनैः, कृतज्ञैमैत्री, देव-विप्राराधने तत्परश्च वर्णितः। तृतीयाश्रिता यदि सिंहराशिस्तदा शूद्रं, कुमित्रं, परवित्तलुब्धं, वधात्मकं, पापकथायामनुरक्तं, प्रचण्डवाक्यैर्जनगर्हितं च मित्रं लभते। यदि तृतीये भावे कन्यालग्नं तदा प्रजातो सुन्दरस्त्रीणां विदेशस्थाभिर्विलासिनीभिर्मैत्री भवति। सुपुण्यरतो गुरुभक्तिकश्च स भवेत्। तुलाभिधाने तृतीयसंस्थे पापपरैर्मनुष्यैर्मैत्रीभावं याति, लौल्यात्मकः, लौल्य-कथायामनुरक्तः, सुतार्थिनीजनैर्लाभदः सः । मैत्रीभावेऽलौ तिष्ठति, दरिद्रैः कृतघ्न-ताढ्यैः पापजनैश्च कलहानुरक्तैः,जनताविरुद्धैः, व्यपेतलज्जैश्च मैत्री भवति । सहजस्थे चापो गतः सुशूरैः, राजसेवकैः, धर्मप्रभुणा, प्रसन्नैः कृपानुक्तैः रणकोविदैः मित्रत्वं ददाति । मृगः सहजे स्यात्तदा सततं सुखाढ्यम्, सौख्यं नित्यं सुहृद्-देव-गुरु-प्रसक्तम्, महाधनिनं, पण्डितमप्रमेयं च प्रसूयते । व्रतज्ञैः, बहुकीर्तियुक्तजनैः, सत्यपरैः, क्षमायुक्तैः, सुशीलैः, गुणाधिकैः, साधुकथानुरक्तैर्मैत्रीं करोति, यदि सहजे घटो विद्यते । मत्स्यस्तृतीये तदा हास्यपरैः, सुमुग्धैः, कुशीलनैः, क्रीडनकैः, गीतपरैः, गोपपरैः, खलैश्च सुहृत्त्वं कुरुते ।[८९५]

---

[८९५] वृ.य.जा.३८.२५-३६

## चतुर्थस्थद्वादशराशिफलम्

सुखस्थे मेषे यदा जातको जायते, तदा विलासिनीभ्य एवं चतुष्पदेभ्यः सुखं प्राप्नोति, विचित्रभोगैः, प्रचुरान्नपानैः, पराक्रमोपार्जितमदनैर्धनादिकं प्राप्यते । सुखस्था वृषराशिः, तदा नरोऽतिमान्यः,विविधसुखयुतः, शौर्येण, भूपालनिवेषणेन, विप्रोपचारैः, नियमव्रतैः सुखं प्राप्नोति । तृतीयराशौ सुखगे प्रमदाकृतानि सुखानि कुरुते, जलावगाहनेन, वनसेवया, भूरि पुष्पाम्बरसेवनेन च सुखं लभते । यदा सुखस्थे कर्कटः, तदा जातकं सुरूपं, सुभगं, सुशीलं, स्त्रीसंगतं, सर्वगुणैः समेतं, विद्याविनीतं, जनवललभं च ज्ञेयम्। सुखभावे सूर्यस्य गृहं, तदा प्रचुरप्रकोपः, दरिद्रः, शीलविपर्यस्तः स्यात् । धनसंश्रयात् कुमित्रसंगाद्वा धनं कुरुते । बन्धुगृहे कन्याराशिः प्राप्ता, तदा प्रमदाभियोगात् सौख्यम्, एवं बहु–अन्न–पानात्, नृपसेवया, महोद्यमधर्मनिवेशणात् सुखं प्राप्नोति । चतुर्थे यदि तुला, तदा पैशुन्यसङ्गात् सुखानि प्राप्यन्ते । परदोषदर्शनेन, क्षणकीर्तनेन, चौर्येण, युद्धेन, मोहनेन च सुखं वर्णितम् । अलौ बन्धुगृहे, नितान्तं सुतीक्ष्णं, परभीतचित्तम्, प्रभूतसेवया गतवीर्यदर्पं, परैः सुरक्ष्यं, मतिधैर्यहीनं प्रकरोति । धनुरार्शियदा सुखस्था, तदा सङ्गरसेवनेन, तत्कीर्तनेनेव, हर्यविचित्रैः, सेवासुखस्थेन निबन्धनेन सुखलाभं याति। बन्धुगृहे मृगः तोयनिवेषणेन, उद्यानवापीतटसङ्गमेन – जलप्रपातैः, सुरतप्रधानै–र्मित्रोपचारैः सुखमनुभवति । सुखस्थे घटे प्रमदाभिधानात् सौख्यं, मिष्टान्नपानैः, फलशाकैः, पत्रैः, विदग्धवाक्यैः तन्त्रमार्गेण कुवचनेन सुखं दृश्यते । सुखस्थे मीने जलसंश्रयेण देवसमुद्भवैः, सुवस्त्रैः, सुदानैर्विचित्रैः सुखं चोक्तम् । [८९६]

---

[८९६] वृ.य.जा.३८.३७–४८

**पञ्चमगतद्वादशराशिफलम्**

सुतस्थो मेषराश्याश्रितस्तदा जातकः प्रायः विविधान् पुत्रान् लभते। तेषां मध्ये केचन शूराः, मुख्या विकृताः , अन्ये पापानुरक्ताः, कुलवित्तयुक्ताश्च भवन्ति । पञ्चमस्था वृषराशिः, तदा सुभगाः कन्यकाः, ताः सुरूपाः, अपत्यहीनाः, बहुकान्तियुक्ताः, निजपतिधर्मे सदानुरक्ताश्च ज्ञेयाः। तनयगे तृतीयराशौ, तदपत्यानि, मनोहराणि, सुशीलयुक्तानि, गुणाधिकानि, प्रभासमेतानि, बलाधिकानि प्राप्यन्ते । कर्के सुतस्थाने, जातकस्य प्रसिद्धान्, सुतलालसान्, विस्तीर्णकीर्तियुतान्, महानुभावान्, धनेन युक्तान्, विनयेन संयुतांश्च जनयति । पञ्चमराशौ तनयगे, तस्य सुताः क्रूरस्वभावाः, मासप्रियाः, नयनेन कान्ताः, स्त्रीजनकाः, सतेजाः, विदेशभाजः, क्षुधया समेताश्च जायन्ते । पञ्चमगा कन्याराशौ तदा तनयैर्विहीनः, प्रायेण कन्यासन्ततिः, ताः कन्याः पतिप्रियाः, पुण्यपराः, प्रगल्भाः, प्रशान्तपापाः, प्रियभूषणाश्च भवन्ति । तुलाधरः पञ्चमे गतो जातकस्यापत्यानि सुशीलानि, मनोहराणि, सुरूपकाणि, स्वक्रियासमेतानि, सुशिक्षितानि च कुरुते । सुतस्थे कीटराशौ तस्य सुता वियोनौ पुत्रान् जनयन्ति। ते सुताः सुभगाः, सुशीलाः, प्रणयेन युक्ताः, अज्ञातदोषाः, निजगोत्रधर्मे सदानुरक्ताश्च दृश्यन्ते। सुतस्थाने यदा चापस्तदा विचित्रान्, हयलब्धान्, शत्रुंजयान् सेवाप्रियान्, धानुष्कचार्यान्, पार्थिवमानतुष्टान् सुतान् वदेत् । सुतस्थे मृगे तस्य पुत्रान् पापमतीन्, कुरूपान्, क्लीबान्, कुभावान्, विगतप्रभावान्, सुनिष्ठुरान्, विप्रविवर्जितान् विजानीयात्। तनयस्थे घटे, स्थिरतासमेतान्, गम्भीरचेष्टान्, मतिसत्ययुक्तान्, प्रसिद्धान्, नष्टात्मजान्, कष्टसहान्, पुत्रान् जानीयात्। मत्स्य आत्मजे तस्य सुतान् अल्पवीर्यान्, सलिलानुरक्तान्, रोगातुरान्, पापरतान्, कुरूपान् , सुहास्ययुतान् स्त्रीसहितान् सदैवं जानीयात्। [८९७]

---

[८९७] वृ.य.जा.३८.४९-६०

**षष्ठस्थद्वादशराशिफलम्**

रिपुगे प्रथमराशौ, तस्य चतुष्पदाः, मूर्खतराः, सुरौद्राः, म्लेच्छसमुद्भवा जना निरर्थकं शत्रवो ज्ञेयाः। रिपुस्थे वृषभे चतुष्पदार्थेऽसत्यमार्गेण, तथाङ्गनानां सङ्गान् निजबान्धवैर्नितान्तं प्रवैरं कुरुते । अरिगृहे मिथुनराशौ नराणां स्त्रीजनितं, पापैः, वणिग्जनैः, नीचजनानुरक्तैः सह वैरं भवेत् । शत्रुगृहे कर्केऽश्वसम्भवैः, आतुरैः, विप्रैः, क्षितिपालैः, महाजनैः, परानुरोधाद् रिपुकर्म प्रवदेत् । रिपुस्थे पञ्चमराशौ सुतैः, बान्धवैः, धनोत्थैरार्तैः, विनिर्जितैर्जायाभिर्वैरं सम्पन्नं प्रकुरुते । कन्याराशिस्थिते शत्रुभावे स्वकन्याभिः, दुराचारिणीभिः, सुनिर्णयाभिः, वेश्याभिः, आश्रयवर्जिताभिश्च वैरं वदेत्। रिपुगृहे तुलाधारी, तदा निधिपतिना सह वैरं भवति। सः स्वभावेन साधुः, सुधर्मकार्यरुचिशीलः । तस्य निजगृहे स्वबान्धवैर्वैरं चोक्तम् । रिपुगे कीटे सरीसृपैः, सर्पैः, व्यालैः, मृगैः, चौरैः, अन्यैश्च बिलाश्रितजीवैः शत्रुतां करोति । अरिस्थे मृगे धनकारणैर्वैरभावो दृश्यते। अन्यदपि फलं वर्णितमत्र – यथा मित्रैः, साधुमहाजनेन गृहसम्भवं वैरं दीर्घकालपर्यन्तं ज्ञेयम् । रिपुगे चापे शरैः, शरावरैः, हयैः, हस्तिभिः, पुनस्तथान्यैः परवञ्चनैः रिपुभावं समुत्पन्नं भवति। अर्थहेतोर्भूपालाधिपेन, जलाश्रयैः, वापीतडागादिभिः, नित्यं क्षेत्रादितः, अन्यैः पुरुषैः, कुचैलैश्च नित्यं रिपुत्वं भवति । मीनेऽरिस्थे सुतवस्त्रजातम्, स्त्रीहेतुकं, स्वीयपुत्रैरपरैश्च प्रियजनैरितरेतरं च वैरं भवेत्।[८९८]

---

[८९८] वृ.य.जा.३८.६१–७२

**सप्तमस्थद्वादशराशिफलम्**

प्रथमराशिर्जायाभावे स्थिता, तदा तस्य जातकस्य जाया क्रूरा, चपलस्वभावा, पापानुरक्ता, कठिना, नृशंसा, धनप्रिया, सदैव साध्यपरा च भवेत् । कलत्रे वृषस्थिते तस्य भार्या सुरूपदन्ता, प्रणता, प्रशान्ता, पतिव्रता, आचरणगुणेन युक्ता, विप्रदेवभक्ता लज्जायुक्ता ज्ञेया । तृतीयराशिर्जायायां भवेत्तदा सुधनं, सुवृत्तं, सुखान्वितं, सर्वगुणोपन्नं, विनीतवेशं, गुणवर्जितं कलत्रं कुरुते । अस्तसंस्थे कुलीरराशौ, तस्य जातकस्य दयिता मनोहरा, सुभगा, गुणान्विता, सौम्या, कलङ्कहीना, सुसंयता ज्ञेया। अस्तसंस्थे पञ्चमराशौ चपलं, तीव्रस्वभावं, सुदुष्टं, विहीनवेषं, परगृहानुरक्तं, कृशं, बहु–अशनं, अल्पसुतं कलत्रं भवति । कलत्रं कन्याराश्याश्रितं, तदा तनयैर्विहीना, सुरूपदेहा, सौभाग्ययुक्ता, भोगार्थनयेन युक्ता, प्रियंवदा, सत्यधना, प्रगल्भा जाया भवति । दाराभावे तुलाधरे गुणगर्विताङ्गा, विविधप्रकारपण्यप्रिया, धर्मपरा, सुदन्ता, भूरिपुत्रा, प्रथिता, विनीता, तस्य नारी भवेत् । यस्य जन्मसमये कीटोऽस्तसंस्थो रुजासमेता, कृपणा, सुकुत्सिताङ्गा, प्रणयेन हीना, दौर्भाग्यदोषैर्विविधैः समेता तस्य जातकस्य जाया स्यात् । कलत्रे चापो भवेत्तदा पुरुषाकृतिं, सुनिष्ठुरां, भक्तिनयेन हीनां, प्रशान्तसौख्यां, मतिवर्जितां भार्यां लभते । जायास्थाने यदि मृगः सुदुष्टा, विगतस्वभावा, विस्रस्तलज्जा, परलोकरक्ता, युद्धप्रिया, दम्भसमन्वितस्वभावयुक्ता तस्य भार्या भवति। अस्तसंस्थे घटे तस्य वराङ्गना स्थिरस्वभावा, पतिकर्मदक्षा, देवानां विप्रा, सततं सुहृष्टा, धर्मध्वजा, संशयसमेता भवेत् । मदने मत्स्यः, तदा विकारयुक्ता, कुपुत्रा, कुमतिवती, स्वधर्मशीला, प्रणयहीना, कलहप्रिया दयिता प्राप्यते ।[८९९]

---

[८९९] वृ.य.जा.३८.७६–८४

**अष्टमस्थद्वादशराशिफलम्**

निधनस्थे मेषराशौ जातकस्य विख्यातस्य महाधनवतो विदेशे, रुजान्वितेनातिदुःखपूर्वकं निधनं वदेत् । अष्टमस्थितो वृषराशिः, तदा गृहे, श्लेष्मविकारात्, महासनात्, चतुष्पदात्, रात्रिकाले, हृष्टजनार्दितानां नराणां मरणं भवति। तृतीयराशौ निधनेऽनिष्टदौषैः, प्लीहरोगात्, रससम्भवात्, गुदायां रोगार्दितात्, प्रमादात् निधनं कथितम् । अष्टमस्थे कर्के, जलोपसर्गात् , कीटात्, विभीषणाद्, भयात्, परहस्ततः, विदेशसंस्थस्य नरस्य विनाशो वर्णितः । सिंहे विनाशे सति फलं वर्णितं यत् सरीसृपात्, व्यालोद्भवः, वनाश्रितप्राणिभिः चौरोद्भवः,चतुष्पदोत्थो विनाशो ज्ञेयः। यदाष्टमगा कन्या, तदा मनुजस्य स्ववित्तात्, स्त्रीणां हिंस्त्रविषमासनस्थात् तथा स्वगृहाश्रितेन विनाश उक्तः । अष्टस्थे तुलाधरे द्विपदोत्थः, निशायां यदि जन्म तदोपवासादिभिः, निष्ठीवतो, प्रपातात् मृत्युर्भवति। अष्टमराशिरष्टमस्था, तदा मुखरोगेण, वदनोद्भवेन रोगेण, कीटसमुद्भवैः, स्वस्थानसंस्थस्य विषकारणैर्विनाशो भवेत् । चापे विनाशसंस्थे शरताडितानां स्वसंख्ये नाम युद्धे, गुह्यरोगोत्पन्नेन, गदोद्भवैः, चतुष्पदाद् वा विसंस्थितस्य मरणं प्राप्यते । मृगेऽष्टमस्थे मानगुणैरुपेतः, विद्यान्वितः, कामी, शूरः, विशालवक्षाः, शास्त्रार्थवित्, सर्वकलासुदक्षो ज्ञेयः । निधने यदि कुम्भराशिः, तदा वैश्वानरात्, सद्मगतजन्तोः, नानाविधव्रणैः, अग्निजैर्विकारैः, श्रमात्, परसंश्रयाद् वा विनाश उपजायते । मृत्युसंस्थे मीने नृणामतिसारकृतकष्टात्, पित्तज्वरात्, जलसंश्रयेण, शस्त्रात्, रक्तप्रकोपात् मृत्युर्जायते ।[१००]

---

[१००]वृ.य.जा.३८.८५-९६

**नवमस्थद्वादशराशिफलम्**

धर्मे स्थितमेषराशौ, चतुष्पदोत्थधर्मयुतः, एवं तेषां पोषणेन दयाभावयुक्तः, विवेकी, सुपालने तत्परश्च जायते । धर्मगृहे द्वितीयराशौ, स मनुष्यो धनप्रसूतं, विचित्रदानैः, बहुगोप्रदानैः, विभूषणाच्छादनैः, भोजनैश्च धर्मं प्रकरोति । तृतीयराशौ भाग्ये सस्यकृतं, अभ्यागतोत्थं, द्विजभोजनात्, दीनानुकम्पया, आश्रयमनसा धर्माचरणं कुरुते । व्रतैः, उपवासैः, विचित्रैर्विषयैः, तीर्थाश्रयात्, वनसेवया धर्मं संकुरुते, यदि चतुर्थराशिर्धर्माश्रिता स्यात् । तत्रैव नवमे भावे यदि सिंहराशिः स्यात्तदा परेषां, स्वधर्महीनं, विक्रियाभिरेव, सुतीर्थरूपं, विनयेन हीनं धर्मं पालयति । षष्ठराशिर्यदि भाग्ये भवेत्, तदा स्त्रीधर्मसेवायुतं, भक्तिविहीनं, बहुजन्मना युक्तं , पाषडविद्यारतं, अन्यपक्षं धर्मं कुरुते । धर्माश्रितः यदि सप्तमराशिः, तदा प्रसिद्धं धर्मं देव-विप्राणां परितोषणेन, जनानुराणेण तथाद्भुतयुतं च प्रकरोति । अष्टमगा राशिर्धर्माश्रिता, तदा पाषण्डधर्मयुतं, जनानां पीडाकरं, भक्त्या विहीनं, परपोषणेन धर्मं धारयति । भाग्ये गते चापे द्विजतर्पणोत्थम्, सदान्वितं, शास्त्रविनिर्मितं, प्रभूततोषं, प्रथितं नृलोके धर्मं धारयति। मकरः यदि नवमे भावे तदा मनुष्यः शस्त्रेण प्रतापशीलः, कुलपरंपरानुसारं वर्तते किन्त्वन्तरं विडम्बनाभिर्धर्मं पालयति। धर्माश्रिते घटे, सुरसंघजातं, वृक्षाश्रयोत्थं, सिरोत्थं, आराम-वापीविषयं धर्मधारणं प्रकुरुते । मीनराशौ धर्मे सति विविधं धर्मं,सत्रप्रपारामतडागजातं,तीर्थजननं, मखैर्विचित्रैश्च धर्मानुकरणं करोति । [९०१]

---

[९०१] वृ.य.जा.३८.९७-१०८

**दशमस्थद्वादशराशिफलम्**

कर्मे प्रथमराशौ प्राप्ते,प्रवरं कर्म सुदुष्टं, पैशुन्यरूपं, विनयातिरक्तं, साधुजननिन्दितं करोति । आकाशे वृषस्थिते साधुजनानामनुरक्तं, व्ययात्मकं, द्विज–भूपाल–अतिथिभिर्विभक्तं आज्ञात्मकं, सतां प्रीतिकरं च कर्मोपार्जयति । अम्बरस्थे युग्मे गुरुभि: प्रदिष्टं कर्मकरं, कीर्त्यान्वितं, प्रीतिकरं, प्रभासमेतं, कृषिजं सदैव कर्मनिरतं ज्ञेयम् । अन्तरिक्षस्थे कुलीरराशौ, प्रपारामतडागजातं, विचित्रवापीतटनिर्माणपरं, कृपाभिनिष्पन्नमकल्यकं –सज्जनं प्रसूते। कर्मक्षेत्रे नभस्थे यदि सिंहः, रौद्रं, सपापं, विकृतं, सपौरुषं, नित्यं प्राणजैर्बधात्मकं निन्दितं कर्म प्रकुरुते । षष्ठराशावन्तरिक्षे प्राप्ते विख्यातो मनुष्यः, स्त्रीसहायेन राज्यभागी, जनताविरुद्धं, कामात्मकं, नृलोके निन्द्यतमं कर्म करोति । व्योमे तुलाराशि: स्थिता, तदा प्रचुरं वणिज्यकर्म, धर्मात्मकं, नयेन युक्तं, सतामभीष्ठं, परसंमते कर्मणि रतो ज्ञेय: । अन्तरिक्षस्थे कीटे तदा सुदुष्टं, जनसंमतं कर्म, व्यथाकरं देवद्विजानां गुरूणां सुनिर्दयं, अनैतिकं कर्म प्राप्यते । अम्बरस्थे चापे यदा स जातक: सेवात्मकं, चौर्ययुतं, परोपकारात्मकं, ओजसाढ्यं, नृपात्मकं, भूरियशःसमेतं च प्रकरोति । अम्बरस्थो यदा मकरस्तदा परोपतापप्रधानं, सुनिर्दयं, बन्धुवधै रतं, अधर्मिकं, दुष्टसंमतं कर्म कुरुते । घटे व्योमे स्थिते प्रायेण परवञ्चनोत्थम्, पाषण्डधर्मान्वितं, इष्टलोभदं, विश्वासहीनं, लोकविरुद्धं कर्म सदैव करोति। धर्मगुरुप्रदिष्टं, कीर्त्यात्मकं, स्थिरादरेण युतं, नानाद्विजाराधनसंस्थितं कर्म भवेत्, यदि व्योमे मत्स्यो भवेत्।[१०२]

---

[१०२] वृ.य.जा.३८.१०९-१२०

## लाभस्थद्वादशराशिफलम्

लाभाश्रिते प्रथमराशौ चतुष्पदोत्थं, नराणां, नृपसेवया, देशान्तराराधनतो लाभं प्रभूतं प्राप्नोति। आयस्थिते वृषभे विशिष्टजातः, स्त्रीणां, सज्जनानां, कुसीदानां सकाशाद् धर्मकृत्यैः प्रलाभो भवेत् । एकादशे तृतीयराशिः, तदा स्त्रीदयितया, वस्त्रार्थेन, पुष्पासनेन, पात्रजातेन, विविधप्रकारेणातिलाभं प्रकुरुते । वरभाजनैः, सेवाकृषिभ्यां, शास्त्रेण, साधुजनाश्रयेण लाभो भवेत्, यद्याये कर्कस्थितः । पञ्चमो लाभाश्रितस्तदा निर्गर्हणाभिः, नानाजनानां वधबन्धनैः, व्यायामदेशान्तरसंश्रयादतिलाभदं ज्ञेयम् । आयस्थिते कन्यात्मके, विविधैरुपायैः शास्त्रागमाभ्यां विनयेन, विवेकेनाद्भुतेन नित्यं लाभमर्जयति । तुलाधार आयगते विचित्रैर्वणिजैः, सेवया, विनयेन सुसंस्तुतं, मुख्यतमं लाभं प्रभूतं प्राप्नोति । अष्टमे राशौ लाभसंस्थे तदा छलेन, पापेन, सुमोषणेन, पैशुन्यकृतविकारैः (परमनुजस्य) अतिनिन्द्यं लाभं जनयेत् । स्त्रीसेवया, निजपौरुषेण, पुष्पाम्बराराधनेन, अश्वजोत्थं, नृपार्थलाभं भजते, यदि जन्माङ्गे धनराशिरायस्थिता । लाभाश्रितो मकरस्तदा जलयानयोगात्, विदेशवासात्, नृपसेवया लाभदः, परन्तु व्ययात्मकस्तस्य स्वभावो भवेत्। कुम्भधरो यदि लाभाश्रितः, कर्मजातिन्यायेन, धर्मेण, पराक्रमेण, सुसमागमेन, विद्याप्रभावाच्च लाभं प्रकरोति । अन्त्यराशौ लाभाश्रितः, तदा विविधैर्मनुष्यैः, मित्रोद्भवं, पार्थिवमानजातं, विचित्रवाक्यं, प्रणयेन नित्यसमलाभं च प्रकरोति ।[१०३]

---

[१०३] वृ.य.जा.३८.१२१-१३२

## द्वादशभावगतराशिफलम्

व्ययस्थे मेषराशिः, आच्छादनेन भोजनेन, अनेकपौरुषेण, चतुष्पदानेकविधधनेन व्ययं प्रवदेत् । व्ययगे वृषे तदा विचित्राम्बरयोषितानां लाभेन, कृत्रिमेण रणेन, एवं विविधैः सुसाधुवादैर्व्ययं प्रकरोति । अन्त्यभावे तृतीयराशौ स्त्रीव्यसनात्मकः, भूतोद्भवः, कुशीलजः, पापजनाङ्गनाभिर्व्ययं प्रभूतं स्यात् । अन्तिमे भावे यदि इन्दुगृहं, तदा द्विजदेवतानां यज्ञसमुद्भवैः, धर्मक्रियाभिः, विद्याभिः सुसंशितः, लोके साधुजनेनोक्तयोग्यकार्ये व्ययं करोति । द्वादशस्थेऽर्कगृहे भूरितरः सद्व्ययः, रूपान्नजातः, कुकर्मणा निन्द्यः, पार्थिवचौरतो व्ययो वदेत् । अन्त्यगते कन्यात्मके जायाविषये, उद्वाहमङ्गलयज्ञकार्ये, विचित्रैः सूत्रैः, बहुसाधुसङ्गात् प्रभाभिर्धनं व्ययीकरोति। अन्त्यस्थायां तुलायां तदा देव–विप्र–श्रुतिसम्मतधार्मिककार्ये व्ययः, एवं यमनियमसुतीर्थजनितं व्ययं प्रसिद्धं ब्रूयात् । कीटे व्ययस्थे, प्रमोदन विऽम्बिताभिः, कुमित्रसेवाजनितः, सुनिन्द्यः, कुबुद्धितः चौरकृताधिकारात् कार्ये व्ययकरो ज्ञेयः। गतस्थे चापे तदा परवञ्चनाभिः, पापजनप्रसङ्गात्, सेवाकृतः, वीतधिया, कृषिप्रसङ्गाद् व्ययकरो ज्ञेयः। व्ययस्थे मृगे पानाशनसस्यजातः, स्ववर्गपूजानिरतः, अल्पः, कृषिविहीनः, विगर्हितः भवेत् । घटे द्वादशभावे सुरसिद्धविप्रतपस्विनां बन्दिभवः, साधुजनानुरोधात्, शास्त्रनिर्दिष्टकर्मणा व्ययं करोति । मीने व्ययस्थे जलपानतः, कुसङ्गमात्, कुपुत्रैः, विवादेन, सन्ततिलालनेन, वाद–विवादेन व्ययो ज्ञेयः । पूर्वोक्तप्रदिष्टायोगा ये प्रथमादिष्वध्यायेषु सन्ति, तेषामतिरिक्तमपि स्वबुद्ध्या प्रकाशेनानेकयोगान्विचिन्त्य शुभाशुभयोगानां कल्पनामपि स्वचित्ते कुर्यात् ।[१०४]

---

[१०४] वृ.य.जा.३८.१३३–१४५

# पञ्चमं प्रकरणम्

# बृहद्यवनजातक –
# वृद्धयवनजातकयोर्द्वादश–
# भावफलविचारस्य तुलना
# समीक्षा च

# पञ्चमं प्रकरणम्

## बृहद्यवनजातक-वृद्धयवनजातकयोर्द्वादशभावफलविचारस्य तुलना

**प्रस्तावना-**

इतः पूर्वमस्माभिर्बृहद्यवनग्रन्थे वृद्धयवनग्रन्थे च द्वादशभावफलस्य ये सिद्धान्ताः प्रतिपादितास्तेषां विवरणं प्रकरणद्वयेषु प्रतिपादितम्। अधुना द्वयोर्विचाराणां परस्परं तथा च मानसागरीग्रन्थेन साकं च तुलनात्मकमध्ययनं समीक्षा च प्रस्तूयते।

बृहद्यवनजातके विविधजातकविषयकसिद्धान्तानां विवरणं श्लोकबद्धं प्राप्यते। तत्र द्वादशभावानुसारं द्वादशाध्यायेषु ६३२ श्लोकेषु क्वचन गद्यवाक्येषु च विवरणं द्वादशभावफलानां वर्तते। वृद्धयवनजातके यद्यपि संपूर्णे ग्रन्थे होराविषयकविचाराणां वर्णनं दृश्यते । तथापि केवलं २४ अध्यायतः ३८ अध्यायपर्यन्तं द्वादशाध्यायेष्वेव द्वादशभावविषयस्य विशिष्टं विवरणं वृद्धयवनजातके संप्राप्यते । तत्र तु ६७५ श्लोकाः समुपलभ्यन्ते। द्वयोरप्यध्यायसंख्याद्वादशभावानुसारं द्वादशैव, किन्तु वृद्धयवनजातके ४३ श्लोका अधिकाः सन्ति। एवं संख्यादृष्ट्या वर्णनं समसमानं दृश्यते। मानसागरीग्रन्थे द्वितीय-तृतीयाध्यान्तर्गतेषु विविधविभागेषु(पृ.११७ तः २९६पर्यन्तं) द्वादशभावानां विस्तृतं फलकथनं विद्यते। किन्तु तत्र न भावदृष्ट्या विचारो न कृतः। विविधराशीनां ग्रहाणां च द्वादशभावफलं प्रस्तुतं वर्तते। तत्रापि केषुचन श्लोकेषु समानता दृश्यते। मानसागरीग्रन्थः प्रायेण वृद्धयवनजातकं बृहद्यवनजातकं चाधारीकृत्य लिखितः स्यादिति ग्रन्थानां तुलनात्मकेन द्वादशभावविचारस्य परिशीलनेन सिद्धं भवेत्।

बृहद्यवनजातके प्रथमं प्रत्येकभावस्य किं किं फलं भवति –किं विलोकनीयम्– इति विशेषेण स्पष्टतया वर्णितम्। यथा –प्रथमभावे रूपं, वर्णः, चिह्नं, जातिः,अवस्थाप्रमाणं, सुखदुःखानि, साहसम्–इति लग्ने विलोक्यते। तथैव प्रत्येकस्य भावस्य वर्णितम्। धनभावे सुवर्णादिधातूनां क्रय–विक्रयः, सुवर्णरत्नादीनां कोशेऽपि संग्रहः –एतत् सर्वं धनस्थाने विचारणीयमेवं सुधीजना मन्यन्ते। तृतीयस्थाने सहोदरः, दासवर्गः, पराक्रमः, उपजीविका, जनविचारः, एतत् सर्वं विचारयितुं शक्यते। सुहृद् गृहाद् ग्रामः, चतुष्पदः, क्षेत्रम्, उद्यम इत्यादयश्चतुर्थभावाद् विचारणीयम्। पञ्चमातस्थानात् बुद्धिः, प्रबन्धः, मन्त्रः, विद्या, विनयः, गर्भस्थितिः, नीतिसंस्थाः– विलोक्यते। ज्योतिषशास्त्रस्य ज्ञाता ज्योतिषी रिपुभावाद् अरिसमूहं, क्रूरकर्म, रुग्जचिन्तां, शङ्कां, मातुलस्य च विचारं कुर्यात् । रणाङ्गणम्, वणिक्क्रिया, स्त्रीविचारः, गमनप्रमाणम्, इत्यादिकं शास्त्रप्रवीणैर्जायाभावाद् विचारणीयम् । नदी–उत्तारः, अतिविषमदुर्गं, शस्त्रम्, आयुः, संकटं– इदं सर्वं प्राचीनानामाचार्याणामाज्ञया रन्ध्रस्थानाद् विचारयेत् । धर्मक्रियायां मनप्रवृत्तिः, भाग्योदयः, विमलं शीलं, तीर्थप्रयाणं,पुराणैः प्रणयः, नवमभावादिदं सर्वं प्रदिष्टम् । व्यापारः, मुद्रा, नृपमानः, राज्यप्रयोजनं, पितुर्महत्पदप्राप्तिः –एतत् सर्वं दशमभावाद् विचारणीयम् । गजाश्वहेमवस्त्ररत्नवाहनादिमङ्गलमण्डलानि लाभश्च ग्रहज्ञैरेकादशभावाद् विचारणीयः। हानिः, दानं, व्ययः, दण्डः, बन्धनम् –इत्यादीनां विचारो व्ययभावाद् भवेत् । एतत्सर्वं फलकथनेऽतीवोपयोगी भवति। मानसागरी ग्रन्थेऽपि वर्णनमिदं शब्दशः समानं प्राप्यते। इदं वर्णनं मूलभूतं तथा नवीनदैवज्ञानां कृते फलकथनेऽतीवोपयुक्तं वर्तते। नेदं वर्णनं वृद्धयवनजातके न प्रस्तुतम्। अत स ग्रन्थस्तत्फलवर्णनं च किंचित्क्लिष्टं तथा प्रशिक्षितानां कृते समुपयुक्तं स्यात्। एवंप्रकारेण वृद्धयवनजातके विलोकनीयानि न वर्णितानि।

मानसागरीग्रन्थेऽपि प्रायेण यवनमतसंग्रहो दृश्यते। तत्रापि बृहद्यवनसदृशं विलोकनीयानि सुस्पष्टं वर्णितानि सन्ति। तत्र बृहद्यवनोक्ताः श्लोका मानसागरीग्रन्थस्य द्वितीयाध्यायस्य भावविवरणस्य श्लोकैः साकं शब्दशः समानरूपतां भजन्ते। तद्यथा–

## १. विलोकनीयानि

| क्रमः | भावः | बृहद्यवनः | मानसागरी |
|---|---|---|---|
| १ | प्रथमभावे | १.१ | २ भावे १ |
| २ | द्वितीयभावे | २.१ | २.२ |
| ३ | तृतीयभावे | ३.१ | २.३ |
| ४ | चतुर्थभावे | ४.१ | २.४ |
| ५ | पञ्चमभावे | ५.१ | २.५ |
| ६ | षष्ठभावे | ६.१ | २.६ |
| ७ | सप्तमभावे | ७.१ | २.७ |
| ८ | अष्टमभावे | ८.१ | २.८ |
| ९ | नवमभावे | ९.१ | २.९ |
| १० | दशमभावे | १०.१ | २.१० |
| ११ | एकादशभावे | ११.१ | २.११ |
| १२ | द्वादशभावे | १२.१ | २.१२ |

अत्र केवलं क्रमभिन्नता वर्तते। बृहद्यवनजातके प्रत्येकभाववर्णनस्य प्रारंभे विलोकनीयानि प्रदत्तानि। मानसागरीग्रन्थे भाववर्णनाध्यायप्रारम्भ एव विलोकनीयान्येकस्थान एव प्रदत्तानि।

२ बृहद्यवनजातके प्रत्येकभावे समुदितमेषादिद्वादशराशीणां फलं वर्णितम्। वृद्धयवन–जातकेऽपि मेषादिद्वादशराशीनामुदये भावफलं वर्णितम्। तत्र भिन्नता वर्तते। केवलं पित्ताधिक्यमिति द्वयोरपि समानम्। मानसागरी नामको यवन–मुस्लिम–शासनकाले केनापि विदुषा संकलित आधुनिकः, किन्तु बहूपयुक्तो जातकग्रन्थः । तत्रापि यवनविचाराणां संग्रहः क्वचित् शब्दशः विहितो दृश्यते। अतस्तस्य विचारोऽत्र विधीयते। मानसागरीग्रन्थेऽपि प्रत्येकभावे मेषादिद्वादशराशीनामुदये भावफलं वर्णितम्। तत्तु वृद्धयवनजातकेन वर्णितेन साकं शब्दशः समानरूपतां भजते। तद्यथा –

**भावफलम्**

| **क्रमः** | **राशिः** | **बृहद्यवनः** | **वृद्धयवनः** | **मानसागरी** |
|---|---|---|---|---|
| १ | मेषोदये | १.२.१ | ३८.१ | ३ राशिफलम् १ |
| २ | वृषोदये | १.२.२ | ३८.२ | ३.२ |
| ३ | मिथुनोदये | १.२.३ | ३८.३ | ३.३ |
| ४ | कर्कोदये | १.२.४ | ३८.४ | ३.४ |
| ५ | सिंहोदये | १.२.५ | ३८.५ | ३.५ |
| ६ | कन्योदये | १.२.६ | ३८.६ | ३.६ |
| ७ | तुलोदये | १.२.७ | ३८.७ | ३.७ |
| ८ | वृश्चिकोदये | १.२.८ | ३८.८ | ३.८ |
| ९ | चापोदये | १.२.९ | ३८.९ | ३.९ |
| १० | मृगोदये | १.२.१० | ३८.१० | ३.१० |
| ११ | घटोदये | १.२.११ | ३८.११ | ३.११ |
| १२ | मीनोदये | १.२.१२ | ३८.१२ | ३.१२ |

३ बृहद्यवनजातकेप्रत्येकभावे सूर्यादिग्रहाणां स्थितौ फलं वर्णितमस्ति। वृद्धय-वनजातकेऽपि प्रत्येकभावे सूर्यादिग्रहाणां स्थितौ फलं वर्णितमस्ति। वृद्धयवनजातके विशेषेण ग्रहाणामुच्चनीचतायास्तथा मित्रत्वशत्रुतायाः संदर्भे विशिष्टं वर्णितम्। अयं सूक्ष्मो विचारो बृहद्यवनजातके न प्राप्यते। मानसागरीग्रन्थे तु सूर्यादिग्रहाणां भावानुसारिफलं वर्णितम्। प्रत्येकग्रहस्य द्वादशभावेषु स्थिते क्रमशः फलं वर्णितम्-इति वर्णने परिवर्तनं दृश्यते। राहु-केत्वोरपि बृहद्यवनजातके फलादेशे विचारः प्रस्तुतः। वृद्धयवने तु नैतादृशी पद्धतिः। किन्तु तेन प्रत्येकभावे प्रत्येकग्रहस्य स्थितौ विचारः प्रस्तुतः। तत्रापि तस्य ग्रहस्य उच्चस्थानता, नी चस्थानता, मित्रक्षेत्रता, शत्रुक्षेत्रता - एतेषां सूक्ष्मविषयाणां चर्चां कृत्वा फलं वर्णितम्।

४ वृद्धयवनजातके ३७ तमे भावेशफलध्याये द्वादशभावेशानां द्वादशेषु भावेषु किं फलं भवतीति वर्णितम्। विषयविवरणमेव बृहद्यवनस्य केचन विचाराणां साकं वैचारिक-समानतां भजते। मानसागरीग्रन्थेऽपि (३.पृ.१७६-२०९)त एव १४४ श्लोकाः समानरूपेण प्राप्यन्ते। यवनमहर्षेर्विचाराणां शब्दशः संग्रहः कृत इति स्पष्टतया दृश्यते।

**भावेशफलम्**

| **क्रमः** | **विषयः** | **वृद्धयवनः** | **मानसागरी** |
|---|---|---|---|
| १ | लग्नेशफलम् | ३७.१-१२ | ३.२-१३ |
| २ | धनेशफलम् | ३७.१३-२४ | ३.१-१२ |
| ३ | सहजेशफलम् | ३७.२५-३६ | ३.१-१२ |
| ४ | चतुर्थेशफलम् | ३७.३७-४८ | ३.१-१२ |

| | | | |
|---|---|---|---|
| ५ | पञ्चमेशफलम् | ३७.४९–६० | ३.१–१२ |
| ६ | षष्ठेशफलम् | ३७.६१–७२ | ३.–१२ |
| ७ | सप्तमेशफलम् | ३७.७३–८४ | ३.१–१२ |
| ८ | अष्टमेशफलम् | ३७.८५–९६ | ३.१–१२ |
| ९ | नवमेशफलम् | ३७.९७–१०८ | ३.१–१२ |
| १० | दशमेशफलम् | ३७.१०८–१२० | ३.१–१२ |
| ११ | घटोदये | ३७.१२१–१३२ | ३.१–१२ |
| १२ | मीनोदये | ३७.१३३–१४४ | ३.१–१२ |

**५** बृहद्यवनजातके प्रत्येकग्रहस्य प्रत्येकभावस्योपरि दृष्टिफलं वर्णितम्। वृद्धयवनजातके तु प्रत्येकग्रहस्य केवलं लग्नभावस्योपरि दृष्टिफलं वर्णितम्। मानसागरीग्रन्थे प्रत्येकग्रहस्य प्रत्येकभावस्योपरि दृष्टिफलं न वर्णितम्।

**६** बृहद्यवनजातके प्रत्येकभावे ग्रहवर्षसंख्याफलं वर्णितम्। वृद्धयवनजातके मानसागरीग्रन्थे च प्रत्येकभावे ग्रहवर्षसंख्याफलं न वर्णितम्।

**७** बृहद्यवनजातके प्रत्येकभावे विशिष्टं विचारं प्रस्तुत्य सिद्धान्ताः प्रतिपादिताः। वृद्धयवनजातके मानसागरीग्रन्थे च प्रत्येकभावे विचारं प्रस्तुत्य सिद्धान्ताः न प्रतिपादिताः।

**८** बृहद्यवनजातके ग्रहाणामुच्चता–नीचता–मित्रता–शत्रुता–अनुसारं फलविचारो न वर्तते। वृद्धयवनजातके मानसागरीग्रन्थे च ग्रहाणामुच्चता–नीचता–मित्रता–शत्रुता–अनुसारं विचारो वर्तते।

**९** बृहद्यवनजातके वृद्धयवनजातके च ग्रहाणां मूलत्रिकोणदृष्ट्या विचारो न प्रस्तुतः। मानसागरीमध्ये तु मूलत्रिकोणदृष्ट्या फलं वर्णितम्।

१० **मानसागरीमध्ये** षड्वर्गदृष्ट्या विवरणं विस्तृतमस्ति। वृद्धयवनजातके लग्नफलविचारे षड्वर्गस्य विचारः प्रस्तुतः। बृहद्यवनजातके तु षड्वर्गस्य विचारो न प्रस्तुतः।

११ **वृद्धयवनजातकानुसारेण**

लग्नगतहोराफलम्, लग्नगतद्रेष्काणफलम्, लग्नगतनवांशफलम्, लग्नगत-द्वादशांशफलम् , लग्नगतत्रिशांशफलम्, स्थानबलिनो लग्नफलम्, दिग्बली लग्नफलम् ,चेष्टाबलस्य फलम् ,कालबली लग्नफलम् ,षड्वर्गशुद्धलग्नस्य फलम् । अधिकाङ्गकाणयोगाः, नेत्रे कर्णे च विकारयोगः, निशान्धादियोगः, खल्वाटकयोगः, अतिरौद्रयोगः, दृष्टिविकारयोगः, कुब्जवामनयोगौ , कुष्ठरोग-योगः, हृद्गदयोगः, बृहद्वृषणयोगः

**तुलनात्मकं कोष्टकम्-**

| **क्रमः** | **बृहद्यवनजातकम्** | **वृद्धयवनजातकम्** | **मानसागरी** |
|---|---|---|---|
| १ | विलोकनीयानि वर्णितानि | विलोकनीयानि न वर्णितानि | विलोकनीयानि वर्णितानि (शब्दशः समानता बृहद्यवनसदृशम्) |
| २ | प्रत्येकभावे मेषादिद्वादशराशीनामुदये भावफलं वर्णितम् | प्रत्येकभावे मेषादिद्वादशराशीनामुदये भावफलं वर्णितम् | प्रत्येकभावे मेषादिद्वादशराशीनामुदये भावफलं वर्णितम् (शब्दशः समानता वृद्धयवनसदृशम्) |
| ३ | प्रत्येकभावे | प्रथमभावे सूर्यादिग्रहाणां | सूर्यादिग्रहाणां |

| | | | |
|---|---|---|---|
| | सूर्यादिग्रहाणां वर्णितमस्ति | फलम् अस्ति | भावानुसारिफलं वर्णितम् |
| ४ | प्रत्येकस्य भवनेशफलं वर्णितम्। | प्रत्येकस्य भवनेशफलं वर्णितम्। | प्रत्येकस्य भवनेशफलं वर्णितम्। वृद्धयवनेन शब्दशः समानम् |
| ५ | प्रत्येकग्रहस्य प्रत्येकभावस्योपरि दृष्टिफलं वर्णितम्। | प्रत्येकग्रहस्य केवलं लग्नभावस्योपरि दृष्टिफलं वर्णितम् । | प्रत्येकग्रहस्य प्रत्येकभावस्योपरि दृष्टिफलं न वर्णितम् । |
| ६ | प्रत्येकभावे ग्रहवर्षसंख्याफलं वर्णितम् | प्रत्येकभावे ग्रहवर्षसंख्याफलं न वर्णितम् | प्रत्येकभावे ग्रहवर्षसंख्याफलं न वर्णितम् |
| ७ | प्रत्येकभावे विचारं प्रस्तुत्य सिद्धान्ताः प्रतिपादिताः | प्रत्येकभावे विचारं प्रस्तुत्य सिद्धान्ताः न प्रतिपादिताः | प्रत्येकभावे विचारं प्रस्तुत्य सिद्धान्ताः न प्रतिपादिताः |
| ८ | ग्रहाणामुच्चता–नीचता–मित्रता–शत्रुता–अनुसारं विचारो न वर्तते। | ग्रहाणामुच्चता–नीचता–मित्रता–शत्रुता–अनुसारं विचारो वर्तते। | ग्रहाणामुच्चता–नीचता–मित्रता–शत्रुता–अनुसारं विचारो वर्तते। |
| ९ | ग्रहाणां मूलत्रिकोणदृष्ट्या विचारो न प्रस्तुतः। | ग्रहाणां मूलत्रिकोणदृष्ट्या विचारो न प्रस्तुतः। | ग्रहाणां मूलत्रिकोणदृष्ट्या विचारः प्रस्तुतः। |
| १० | ———————– | कुत्रचित् षड्वर्गः | षड्वर्गदृष्ट्या विवरणं विस्तृतमस्ति |

**अन्यग्रन्थैः साकं तुलना-**

**१ बृहज्जातकम्-**

वराहमिहिरविरचिते प्रप्रथमेऽस्मिन् प्राचीनतमे जातकग्रन्थे भावाध्यायनामके विंशतितमेऽध्याय एकादशश्लोकैः सारगर्भं भावफलविवरणं प्राप्यते। तत्र सूर्यादिग्रहाणां द्वादशभावेषु स्थिते जातकफलं वर्णितम्। (बृ.जा.२०.१-९) द्वादशभावेषूदितानां राशीणां फलविवरणं न कृतम्। वराहमिहिरेण (बृ.जा.२०.१०-११)[९०५] मित्र-शत्रु-उच्च-नीच-त्रिकोण-सौम्य-पापग्रहाणां तत्तद्भावे स्थिते फलं सत्याचार्यस्य मतानुसारेण सूचितम्। वृद्धयवनजातके तु विस्तृतं विवरणं प्राप्यते। केवलं त्रिकोणस्य विचारो वृद्धयवनेन न कृतः। बृहद्यवनजातके तु मित्र-शत्रु-उच्च-नीचादिविचारो न दृश्यते।

**२ सारावली-**

कल्याणवर्मविरचितः सारावलीग्रन्थो जातकफलकथनेऽतीव प्रसिद्धः प्रायेण वराहमिहिरस्य बृहज्जातकानन्तकालीनोऽयं ५७७-५७८ख्रिस्ताब्दस्य

---

[९०५] सुहृदरिपरकीयस्वर्क्षयुङ्गस्थितानां

फलमनुपरिचिन्त्यं लग्नदेहादिभावेः।

समुपचयविपत्ति सौम्यपापेषु सत्यः

कथयति विपरीतं रि:फषष्ठाष्टमेषु। (बृ.जा.२०.१०)

उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः।

शुभं सम्पूर्णपादोनदलपादाल्पनिष्फलम्।। (बृ.जा.२०.११)

ग्रन्थः सारसंग्रहरूपः। तस्मिन्ग्रन्थे त्रिंशतितमेऽध्याये ८७ श्लोकेषु द्वादशभावविवरणं सारगर्भं प्राप्यते। बृहद्यवनजातकेन मर्त्यादीनां द्वादशभावेषु विलोकनीयत्वं विस्तृतरूपेण वर्णितम्। सारावल्यां केवलं प्रथमश्लोके (३०.१) मूर्त्यादीनां सूचनमात्रं कृतम्।[१०६] लग्नादिषु भावेषु स्थितानां राशीणां विचारो न प्रस्तुतः, यथा बृहद्यवनेन कृतः। सारावल्यां केवलं द्वादशभावेषु स्थितानां सूर्यादिग्रहाणामेव विचारः प्रस्तुतः। लग्नेऽल्पकचः ( सारावली ३०.२) तथा दाक्षिण्य. (३०.१४) बृहद्यवनजातके (१.३ तथा १.४) वर्तते। एतौ तु श्लोकौ समानौ। अन्तिमश्लोकद्वयेषु (३०.८६-८७) शुभग्रह-पापग्रह-शत्रु-मित्र-उच्च-नीच-स्थानां विचारः करणीयेति केवलं निर्दिष्टम्। वृद्धयवने तस्य विस्तारो दरीदृश्यते। सारावल्यां प्रत्येकभावोपरि ग्रहदृष्टिफलं न वर्णितम्। बृहद्यवने तु विस्तारेण वर्णितम्। वृद्धयवनेन केवलं लग्नस्थानोपरि

[१०६] मर्त्यादयः पदार्था जायन्ते येन सर्वजन्तूनाम्।
तस्मादधुना वक्ष्ये भावाध्यायं विशेषेण।। सारावली ३०.१
लग्नेऽर्केऽल्पकचः क्रियालसमतिः क्रोधी प्रचण्डोन्नतो
मानी लोचनरूक्षकर्कशतनुः शूरोऽक्षमो निर्घृणः।
स्फोटाक्षः शशिभे क्रिये सतिमिरः सिंहे निशान्धः पुमान्
दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां नरः।। सारावली ३०.२
पापा निघ्नन्ति मूर्त्यादीन् भावान् पुष्णन्ति शोभनाः।
विपरीतं रिपूरन्ध्रव्ययेषु सदसत्फलम्।। सारावली ३०.८६
योगा ये बलयोगाः सौम्यसुहृद्रिपुनिरीक्षणाच्चैव।
उच्चादिभवनसंस्थैर्ग्रहैश्च फलमन्यथा।। सारावली ३०.८७

विविधग्रहाणां दृष्टेः फलं वर्णितम्। सारावल्यां वृद्धयवनजातके च राहु-केतुग्रहाणां फलस्य विचारो न कृतः। बृहद्यवनजातके तु राहु-केत्वोरपि फलं विवरणं प्रत्येकभावे कृतम्।

| ग्रहः | सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| उच्चराशिः | मेषः | वृषभः | मकरः | कन्या | कर्कः | मीनः | तुला |
| अंशाः | १० | ०३ | २८ | १५ | ५ | २७ | २० |
| नीचराशिः | थुला | वृश्चिकः | कर्कः | मीनः | मकरः | कन्या | मेषः |
| अंशाः | १० | ०३ | २८ | १५ | ५ | २७ | २० |
| मूलत्रिकोणः | सिंहः | वृषभः | मेषः | कन्या | धनुः | तुला | कुम्भः |
| मित्रराशिः | चन्द्रः, भौमः, गुरुः | सूर्यः, बुधः | रविः, चन्द्रः, गुरुः | शनिः शुक्रः | रविः, चन्द्रः, भौमः | बुधः, शनिः | बुधः शुक्रः |
| शत्रुराशिः | शुक्रः, शनिः | — | बुधः | चन्द्रः | बुधः, शुक्रः | सूर्यः, चन्द्रः | रविः, चन्द्रः, भौमः |

## ३ बृहत्पाराशरहोराशास्त्रम्-

१ बृहत्पाराशरहोराशास्त्रे द्वादशभावानां विचारः पूर्वभागे १२-२५ अध्यायेषु विस्तृतरूपेण च वर्तते। तत्र प्रथमं द्वादशतमेऽध्याये २-१३ श्लोकेषु प्रत्येकभावात् किं विचारणीयमित्यस्यैकस्थान एव विवरणं वर्तते। बृहद्यवनजातके विलोकनीयानि विविधस्थानेषु भाववर्णनप्रसङ्गे

प्रस्तुतानि। १) पराशरदृष्ट्या तनु–रूप–ज्ञान–वर्ण–बलाबल–प्रकृति–सुख–दु:ख– एते तनुभावात् चिन्तनीयानि।[१०७] अत्र बृहद्यवनजातके ज्ञानस्य उल्लेखो नास्ति। बलाबलं साहसरूपेण वर्णितम्। चिह्नस्योल्लेख: पराशरे नास्ति। २) कुटुम्ब–धनधान्य–शत्रु–मृत्यु–धातुरत्नादिकं धनस्थानात् निरीक्षेत्–इति पराशरस्य स्पष्टीकरणम्।[१०८] बृहद्यवनजातके तु सुर्वणादिधातुक्रयविक्रय: रत्नादि–कोषसंग्रहश्च द्वितीयस्थानाद् द्रष्टव्यमिति केवलं वर्णितम्। ३) तृतीयभावेन पराक्रम–भृत्य–भ्राता–उपदेश–यात्रा–पित्रोर्मरणं–इत्यादिकं द्रष्टव्यम्।[१०९] बृहद्य-वनजातके तु केवलं पराक्रम–भृत्य–भ्रातृणामेव समुल्लेख:। ४) पराशरमतेन बान्धव–वाहन–मातृसुख–निधि–क्षेत्र–गृह–आरामादिकं विचारणीयम्।[११०] बृह–द्यवनजातके वाहन–मातृसुख–निधि–इत्यादिकं न वर्णितम्। किन्तु ग्राम–चतुष्पद–उद्यम–आलोकनं वर्णितम्। ५)पराशरानुसारेण पञ्चमस्थानात् यन्त्र–मन्त्र–विद्या–बुद्धि–प्रबन्धक–

---

[१०७] तनुं रूपं च ज्ञानं च वर्णं चैव बलाबलम्।
प्रकृतिं सुखदु:खं च तनुभावाद् विचिन्तयेत्।। बृ.पा.हो. १२.२

[१०८] कुटुम्बं च धनं धान्यं मृत्युजालममित्रकम्।
धातुरत्नादिकं सर्वं धनस्थानान्निरीक्षयेत्।। बृ.पा.हो. १२.३

[१०९] विक्रमं भृत्यभ्रात्रादि चोपदेशप्रयाणकम्।
पित्रोर्वै मरणं विद्वान् दुश्चिक्याच्च निरीक्षयेत्।। बृ.पा.हो. १२.४

[११०] बान्धवानथ यानानि मातृसौख्यादिकान्यपि।
निधिक्षेत्रगृहारामादिकं तुर्याद् विचारयेत्।। बृ.पा.हो. १२.५

पुत्र–राज्यापभ्रंशादिकं पश्येदिति वर्णनम्।[१११] बृहद्यवनजातके विनेय–गर्भस्थिति–नीति–संस्था:–एतेषां विशेषोल्लेख:, किन्तु राज्यापभ्रंशस्य नोल्लेख:। ६) पराशरविचारेण मातुल–मृत्युशंका–शत्रु–व्रण–सपत्नीमाता–इत्यादिकं चिन्तनीयम्।[११२] बृहद्यवनजातके क्रूरकर्मणो विशेषोल्लेख: किन्तु तत्र सपत्नीमातु: निर्देश:। ७) पराशरदृष्ट्या जाया–यात्रा–पदप्राप्ति–वाणिज्य–स्वदेहमरणादिकं जायाभावात् चिन्तनीयम्।[११३] बृहद्यवनजातके विशेषेण रणाङ्गणस्य विचार: सप्तमस्थानात् कराणीय इति वर्णितम्। ८) अष्टमस्थानात् पराशराभिमतेन आयु:–मृत्यु–गुदरोग–भगन्दर–पूर्वजन्मवृत्त–आदिकं विलोकनीयम्।[११४] बृहद्यवनजातके तु केवलं नद्युत्तार–विषमदुर्ग–संकट–आदिकं विशिष्टं कल्पितम्। ९) धर्मस्थानाद् भाग्य–श्याल–भ्रातृपत्नी–तीर्थयात्रा–आदिकं निरीक्ष्यम्।[११५]बृहद्यवनजातके तु धर्मक्रियाप्रवृत्ति–विमलशील–पुराणप्रणय–इति विशेषेण वर्णितम्। तत्र

---

[१११] यन्त्रं मन्त्रं तथा विद्यां बुद्धेश्चैव प्रबन्धकम्।

पुत्रराज्यादिभ्रंशादीन् पश्येत् पुत्रालयाद्बुध:।। बृ.पा.हो. १२.६

[११२] मातुलं मृत्युशङ्कां च शत्रूंश्चैव व्रणादिकान्।

सपत्नीमातरं चापि शत्रुस्थानान्निरीक्षयेत्।। बृ.पा.हो. १२.७

[११३] जायामध्वप्रयाणं च पदााप्तिं च वणिक्–क्रियाम्।

मरणं च स्वदेहस्य जायाभावान्निरीक्षयेत्।। बृ.पा.हो. १२.८

[११४] आयुर्मृत्युपरं चापि गुदे चैवाङ्कुरादिकम्।

पूर्वापरजनुर्वृत्तं सर्वं रन्ध्राद् विचिन्तयेत्।। बृ.पा.हो. १२.९

[११५] धर्मं भाग्यमथो श्यालं भ्रातृपत्न्यादिकांस्तथा।

तीर्थयात्रादिकं सर्वं धर्मस्थानान्निरीक्षयेत्।। बृ.पा.हो. १२.१०

श्यालकस्य भ्रातृपत्न्याश्च नोल्लेखः। १०) राज्य–आकाशवृत्ति–गान–पिता–ऋण–प्रवास–इत्यादिकं पराशरमतेन दशमस्थानात् चिन्तनीयम्।[११६] यवनमतानुसारेण दशमस्थानात् व्यापार–मुद्र–राजसन्मान– महत्पदप्राप्ति–इत्यादिकं विशेषेण दर्शनीयम्। ११) नानावस्तुभव–पुत्र–स्त्री–पशुसमृद्धि– आदिकस्यायस्य विचार एकादशस्थानात् भवति।[११७] बृहद्यवनजातके तु गजाश्वहेमाम्बर–रत्नजातस्तथा आन्दोलिकामङ्गलादिको लाभ एकादशस्थानाद् वर्णितः। १२) पराशरानुसारेण व्ययः शत्रुवृत्तान्तश्च व्ययस्थानाद् जानीयात्।[११८] यवनानुसारेण हानि–दान–दण्ड–बन्धन–आदिकं द्रष्टव्यमिति विशेषः।

२ भावेशफलम्– बृहत्पराशरहोराशास्त्रे २५तमेऽध्याये द्वादशभावानां येऽधीशास्तेषां विविधभावगते फलं वर्णितम्। बृहद्यवनजातके वृद्धयवनजातके च भावेशस्य विवरणं प्राप्यते। बृहद्यवनजातके विविधाध्यायेषु भावेशफलं वर्णितम्, किन्तु वृद्धयवनजातक एकस्मिन्नेवाध्याये(अध्यायः–३७)फलं प्रतिपादितम्।

---

[११६] राज्यं चाकाशवृत्तिं च गानं च पितरं तथा।

ऋणं चापि प्रवासं च व्योमस्थानान्निरीक्षयेत्।। बृ.पा.हो. १२.११

[११७] नानावस्तुभवस्यापि पुत्रजायादिकस्य च ।

आयं पशुसमृद्धिं च भवस्थानान्निरीक्षयेत्।। बृ.पा.हो. १२.१२

[११८] व्ययं च वैरिवृत्तान्तं रिष्फमन्त्यादिकं तथा ।

व्ययाच्चैव हि जानीयादिति सर्वत्र बुद्धिमान।। बृ.पा.हो. १२.१३

## ४ जातकपारिजातः -

श्रीवैद्यनाथविरचिते जातकपारिजातग्रन्थे ११-१५ अध्यायेषु द्वादशभावानां विस्तृतं विवेचनं प्राप्यते। प्रत्येकभावस्य वर्णनात्पूर्वं प्रत्येकभावस्य विचारणीयविषयाः सुस्पष्टं वर्णिताः। बृहद्यवनजातकेऽपि विलोकनीयानि भाववर्णिनात्पूर्वकं वर्णितानि।

१) प्रथमभावे जातकपारिजातदृष्ट्या शरीरस्य वर्ण-आकृति- लक्षण-यशः-गुण-स्थान-सुख-दुःख-प्रवास-तेजः-बलाबलं-एते विचारणीयविषयाः सन्ति।[११९] बृहद्यवनजातकानुसारेण रूपं, जातिः, वयःप्रमाणं- एतेऽपि विलोकनीयानि। अत्र यशः, गुणानि, स्थानं, प्रवासः - एतानि जातकपारिजातदृष्ट्या विलोकनीयानि प्रथमभावादिति चिन्त्यम्।

२) द्वितीयभावे जातकपारिजातानुसारेण वित्तं, नेत्रं, मुखं, विद्या, वाक्, कुटुम्बं, भोजनम्- एते विचारणीयविषयाः सन्ति।[१२०] बृहद्यवनजातकानुसारेण तु केवलं सुवर्णधातुक्रयविक्रयः, रत्नादिकोषसंग्रहो विलोक्यते धनभावात् । अन्ये विषया जातकपारिजातोक्ता विचारणीयाः।

३) जातकपारिजातानुसारेण तृतीयभावाद् ज्येष्ठ-अनुज-विचारः, पराक्रमः, साहसं, कण्ठस्वरः, श्रवणं, आभरणं, वस्त्रं, धैर्यं, वीर्यं, बलं, मूलफलाशनम्-

---

[११९] शरीरवर्णाकृतिलक्षणानि यशोगुणस्थानसुखासुखानि ।

प्रवासतेजोबलदुर्बलानि फलानिलग्नस्य वदन्ति सन्तः।। जा.पा.११.१३

[१२०] वित्तं नेत्रं मुखं विद्या वाक्कुटुम्बाशनानि च ।

द्वितीयस्थानजन्यानि क्रमाज्ज्योतिर्विदो विदुः।। जा.पा.११.४९

एतान्यखिलानि विलोकयानि।[१२१] बृहद्यवजातके तु दासवर्गस्य उपजीव्यजनानां विचारस्तृतीयात् क्रियते। तत्रान्येषां विषयाणां नोल्लेखः। जातकपारिजातविवरणं विस्तृतं वर्तते।

४) जातकपारिजातानुसारेण चतुर्थभावे विचारणीयानि वस्तूनि विद्या, जननी, सुखं, सुगन्धः, गौः, बन्धुः, मनोगुणानि, राज्यं, यानं, भूमिः, मन्दिराणि, सन्ति।[१२२] बृहद्यवनानुसारेण सुहृद्, ग्रामः, उद्यमः, एतान्यपि द्रष्टव्यानि। तेन विद्या, जननी, सुखं, सुगन्धः,बन्धुः, मनोगुणानि, राज्यं, यानं, एतानि न संगृहीतानि सन्ति।

५) पञ्चमभावाद् देवः, राज्ययोगः, पुत्रयोगः, पितृयोगः, बुद्धिः, पुण्यं, एतानि चिन्तयेत्–इति जातकपारिजाते वर्णितम्।[१२३] बृहद्यवनानुसारेण प्रबन्धः,मन्त्रः, विनयः, गर्भस्थितिः, नीतिसंस्था – एतान्यपि द्रष्टव्यानि इति विशेषः। तेन देवः,राज्ययोगः, पितृयोगः, पुण्यं– एतेषां निर्देशाः न कृताः।

६) षष्ठभावाद् रोगः, शत्रुः, व्यसनं, क्षतं, एतानि चिन्तयेत्।[१२४] बृहद्यवनदृष्ट्या चिन्ता, शङ्का, मातुलः,–एतेषामपि विचारः षष्ठभावात् करणीयः।

७) सप्तमस्थानाद् यात्रा, पुत्रः, कलत्रसौख्यं, एतेषां विचारः करणीयः।[१२५] बृहद्यवनानुसारेण रणाङ्गणः, व्यापारः, एतेषामपि विचारो जायाभावात् करणीयः। तेनात्र पुत्रस्योल्लेखो न कृतः, जातकपारिजाते तु भवति–इति विचारणीयम्।

---

[१२१] ज्येष्ठानुजस्थितिपराक्रमसाहसानि कण्ठस्वरश्रुतिवराभरणांशुकानि।
धैर्यं च वीर्यबलमूलफलाशनानि वक्ष्ये तृतीयभवनात् क्रमशोऽखिलानि।। जा.पा.१२.१

[१२२] वदन्ति विद्याजननीसुखानि सुगन्धगोबन्धुमनोगुणानि।
महीपयानक्षितिमन्दिराणि चतुर्थभावप्रभवानि तज्ज्ञाः।। जा.पा.१२.५९

[१२३] पुत्राद्देवमहीपपुत्रपितृधीपुण्याणि सञ्चिन्तयेत्। जा.पा.१३.१

[१२४] रोगारिव्यसनक्षतानि वसुधापुत्रारितश्चिन्तयेत्। जा.पा.१३.७१

[१२५] यात्रापुत्रकलत्रसौख्यमखिलं सञ्चिन्तयेत्सप्तमात। जा.पा.१४.१

८) मृत्युभावाद् आर्युदाय:,अरिष्टहेतु:, विजानीयाद् इति जातकपारिजात उक्तम्।[१२६] बृहद्यवने तु नद्युतार:, विषमदुर्गं, शस्त्रं, इत्येतान्यधिकानि प्रोक्तानि- इति विशेष:।

९) ंनवमभवनात् भाग्यं, प्रभाव:, गुरु:, धर्म:, तप:, शुभं, एतानि विचारणीयानि जातकपारिजातानुसारेण ।[१२७] तीर्थप्रयाणं, शीलं, पुराणै: प्रणय:- एतानि विशेषतो बृहद्यवनेनोक्तानि। तेन प्रभव:, गुरु:, शुभं, इति न विचारितम्।

१०) दशमभावाद् आज्ञा, मानं, विभूषणानि, वसनं, व्यापार:, निद्रा, कृषि:, प्रव्रज्या, आगम:, कर्म, जीवनं, यश:, विज्ञानं, विद्या - इति विषया वर्णिता जातकपारिजाते।[१२८] बृहद्यवने मुद्रा, नृपमान:, राज्यं, प्रयोजनं, पिता, महत्पदप्राप्ति:- एतानि विशिष्टानि। तत्र आज्ञा, मानं, विभूषणानि, वसनं, निद्रा, कृषि:, प्रव्रज्या, आगम:, कर्म, जीवनं, यश:, विज्ञानं, विद्या एतानि न निर्दिष्टानि।

११) एकादशभावाद् धनप्राप्तिविचार: करणीय इति जातकपारिजाते वर्णितम्। नाधिकं किञ्चित्।[१२९] किन्तु बृहद्यवनजातके तु विशेषेण गज-अश्व-अम्बर-रत्न-आन्दोलिका-मङ्गल-मण्डल-आदीनि प्रोक्तानि। लाभविचारस्तु भवत्येव।

१२) व्ययस्थानाद् दूराटनं,दुर्गतिं, दातृत्वं, शयनादिसौख्यं, विभवं, वित्तक्षयं च चिन्तयेदिति जातकपारिजाते कथितम्।[१३०] बृहद्यवनजातके तु हानि:,दानं, व्यय:, दण्ड:,बन्धनम्- एतेषां विलोकनीयत्वं कथितम्।

---

[१२६] आयुर्दायमनिष्टहेतुमुदयव्योमायुरीशार्कजै:। जा.पा.१४.४८

[१२७] भाग्यप्रभावगुरुधर्मतप:शुभानि सञ्चिन्तयेन्नवमदेवपुरोहिताभ्याम्। जा.पा.१४.६५

[१२८]आज्ञामानविभूषणानि वसनव्यापारनिद्राकृषि-

प्रव्रज्यागमकर्मजीवनयशोविज्ञानविद्या क्रमात्। जा.पा.१५.१

[१२९] लाभस्थानेन लग्नादखिलधनचयप्राप्तिमिच्छन्ति सर्वे। जा.पा. १५.६६

जातकपारिजाते प्रत्येकभावे ग्रहाणां स्थितेः, दृष्टेः, उच्चनीचशुभाशुभ–मित्रशत्रुबलाबलम् , भावेशविचारः – इत्यादिकस्य चिन्तनं तत् फलं च विवर्णितम्। बृहद्यवनजातके तु उच्चनीचशुभाशुभमित्रशत्रुबलाबलं न विचारितम्, यत्तु वृद्धयवनेन चिन्तितम्।

## ५ षट्पञ्चाशिका –

वराहमिहिरपुत्रेण पृथुयशसा प्रथमे होराध्याये द्वादशभावानां विचारः प्रदत्तः।[९३१] तत्र प्रथमं प्रत्येकभावस्य विचारणीयविषया विस्तरतो वर्णिताः। प्रथमे तनुभावे सौख्यं, आयुः, वयः, जातिः, आारोग्यं, लक्षणं, गुणं, क्लेशः, आकृतिः, रूपं, वर्णः,[९३२] एतानि सर्वाणि विचारणीयानि। प्रायेणेदं बृहद्यवनवर्णनानुरूपम्। पृथुयशसा आरोग्यस्योल्लेखः कृतः। बृहद्यवनेन साहसस्य निर्देशः कृतः। इति विशेषः। षट्पञ्चाशिकानुसारेण द्वितीयभावस्य विलोकनीयानि सन्ति– मुक्ताफलं, माणिक्यं, रत्नानि धातवः, धनं, अम्बराणि, अश्वकार्यं, अध्वविज्ञानम्।[९३३] बृहद्यवनजातकानुसारेण केवलं सुवर्णादिधातुक्रयविक्रयः, रत्नादिकोषः, धनसंग्रहश्च विलोकनीयः। अम्बराणि,

---

[९३०] लग्नादन्त्यदीशभानुतनयैर्दूराटनं दुर्गतिं

दातृत्वं शयनादिसौख्यविभवं वित्तक्षयं चिन्तयेत्। जा.पा.१५.७२

[९३१] प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा।

प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्यशसा।।१।। षट्पञ्चाशिका १

[९३२] सौख्यमायुर्वयोजातिरारोग्यं लक्षणं गुणम्।

क्लेशाकृतिरूपवर्णास्तनोश्चिन्त्यं विचक्षणैः।। षट्पञ्चाशिका १.१

[९३३] मुक्ताफलञ्च माणिक्यं रत्नधातुधनाम्बरम्।

हयकार्याध्वविज्ञानं वित्तस्थानाद्विलोकयेत्।। षट्पञ्चाशिका १.२

अश्वकार्यं, अध्वविज्ञानम् – एतत् त्रयं षट्पञ्चाशिकायां विशिष्टं वर्तते। तृतीयभावे षट्पञ्चाशिकायास्तथा बृहद्यवनजातकस्य विलोकनीयानि समानानि वर्तन्ते। तानि च – भगिनी, भ्राता, भृत्यः, सेवकः– सन्ति[१३४]। चतुर्थभावात् पृथुयशसोऽनुसारेण वाटिका, खलकं, क्षेत्रं, महौषधिः, निधिः, विवरादिप्रवेशः,– एतानि विलोकनीयानि सन्ति। [१३५] बृहद्यवने तु विलोकनीयेष्वेतानि नोक्तानि। तत्र तु केवलं सुहृद्, गृहं, ग्रामः, चतुष्पदः, क्षेत्रं, उद्यमः, – एतान्युक्तानि, नोपर्युक्तानि। पञ्चमभावाद् विलोकनीयानि द्वयोरपि समानानि गर्भः, अपत्यं, शिष्यः, मन्त्रः, विद्या, बुद्धिः, प्रबन्धः[१३६]। षष्ठभावात् चौरभीतिः, रिपुसंग्रामः, खरः, उष्ट्रः, क्रूरकर्म, मातुलः, रोगः, भृत्यः – षट्पञ्चाशिकानुसारेण विलोकनीयानि कथितानि।[१३७] प्रायेण तदेव बृहद्यवनजातके वर्णितम्। तेन खर–उष्ट्र–भृत्यविचारो न निर्दिष्टः। पृथुयशसोक्तदिशा वाणिज्यं, व्यवहारः, विवादः, गमनागमनं, कलत्राणि, सप्तमभावाद् दृष्टव्यानि।[१३८] बृहद्यवनेन वाणिज्यं, गमनागमनं, कलत्रं, एतानि

---

[१३४] भगिनी भ्रातृभृत्यानां दासकर्मकृतामपि ।
कुर्वीत विक्षणं विद्वान् सम्यक्दुक्यवेश्मतः।। षट्पञ्चाशिका १.३

[१३५] वाटिका खलकक्षेत्र महौषधिनिधीनपि।
विवरादिप्रवेशञ्च पश्येत्पातालवेश्मतः।। षट्पञ्चाशिका १.४

[१३६] गर्भपत्यविनेयानां मंत्रसंधानयोरपि ।
विद्याबुद्धिप्रबन्धानां सुतस्थाने विनिर्णयः।। षट्पञ्चाशिका १.५

[१३७] चौरभी रिपुसङ्ग्राम खरोष्ट्र क्रूरकर्मणाम् ।
मातुलातङ्कभृत्यानां रिपुस्थानाद्विनिर्णयः ।।षट्पञ्चाशिका १.६

[१३८] वाणिज्यं व्यवहारञ्च विवादं च समं परैः ।।
गमागमकलत्राणि पश्येत्प्राज्ञः कलत्रतः ।। षट्पञ्चाशिका १.७

समानानि। तेन व्यवहार- विवादविचारो नोक्तः। किन्तु तेन रणाङ्गणस्य विचारः कृतः, पृथुयशसा नास्य वर्णनं कृतम्। अष्टमस्थानतः नद्युत्तारः, अध्ववैषम्यं, दुर्गे शत्रुसङ्कटं, नष्टं, दुष्टं, युद्धं, व्याधिः, छिद्रं - एतानि पृथुयशसा विलोकनीयानि कथितानि।[९३९] तत्र बृहद्यवनेन प्रायेण समानं किन्तु शस्त्रं, आयुः, पृथुयशसा नोक्तम्। व्याधेरुल्लेखो बृहद्यवनेन न विहितः। नवमभावात् वापी, कूपः, तडागः, प्रपा, देवगृहं, दीक्षा, यात्रा, मठः- इत्यादिकं[९४०] धर्मकार्यं निरीक्ष्यमिति पृथुयशाः। बृहद्यवनदृष्ट्या भाग्योदयः, शीलं, पुराणप्रणयः - एतदपि द्रष्टव्यम्। पृथुयशसा इष्टापूर्तानां विशेषत उल्लेखः कृतः। दशमभावाद् राज्यं, मुद्रा, परं पुण्यं, स्थानं, तातः, प्रयोजनं, वृष्ट्यादिः, व्योमवृत्तान्तः - एतानि द्रष्टव्यानि षटपञ्चाशिकानुसारेण ।[९४१] बृहद्यवनानुसारेण व्यापारः, नृपात् सन्मानः, एतानि विशिष्टानि । किन्तु परं पुण्यं दशमभावात् पृथुयशसा कथितम्।वृष्ट्यादिः व्योमविचारः - तेन कथितः सयुक्तिकः। लाभस्थानात् गजाश्वयानानि, वस्त्राणि, सस्यं, काञ्चनं, कन्यकाः, विद्यालाभः, धनलाभश्च - एतानि विलोकनीयानि [९४२]- इति पृथुयशाः। बृहद्यवनस्य विवेचनं प्रायेण

[९३९] नद्युत्तारेऽध्ववैषम्ये दुर्गे शात्रवसङ्कटे ।

नष्टे दुष्टे रणे व्याधौ छिद्रे छिद्रं निरीक्षयेत् ।। षट्पञ्चाशिका १.८

[९४०] वापीकूपतडागादिप्रपादेवगृहाणि च ।

दीक्षां यात्रां मठं धर्मे धर्मान्निश्चिन्त्य कीर्तयेत् ।। षट्पञ्चाशिका १.९

[९४१] राज्यं मुद्रां परं पुण्यं स्थानं तातं प्रयोजनम् ।

वृष्ट्यादिव्योमवृत्तान्तं व्योमस्थानान्निरीक्षयेत् ।। षट्पञ्चाशिका १.१०

[९४२] गजाश्वयानवस्त्राणि सस्यकाञ्चनकन्यकाः ।

बिद्वान् विद्यार्थयोर्लाभं लक्षयेल्लाभलग्नतः ।। षट्पञ्चाशिका १.११

समानम्। तत्र सस्यस्य कन्यकायाश्च विद्यालाभस्य विचारो न वर्तते। व्यय–भावात् त्यागः,भोगः, विवादः, दानं, इष्टकार्यं, कृषिकर्मणि च व्ययः [१४३] – एतानि द्रष्टव्यानि पृथुयशसो दृष्ट्या। तत्र हानिः, दानं, व्ययः, इति तेन समानं बृहद्यवनेनोक्तम्। किन्तु दण्डः, बन्धनमिति द्वयं तेनोक्तं विशिष्टम्। पृथुयशसा दृष्टिः, युतिः, शुभपापग्रहयोगः, त्रिकोणः, षडवर्गविचारः,शीर्षोदयः – इत्यादीनां विचारः करणीय इति प्रतिपादितम्। बृहद्यवने केवलं दृष्टेर्विचारः। वृद्धयवने शीर्षोदयस्य न विचारो वर्तते।

## ६ सर्वार्थचिन्तामणिः –

लग्नस्य विलोकनीयानि न कथितानि। कुटुम्बस्थानात् मुखं, वाणी, दक्षिणनेत्रं, विद्या, धनं, भोगविशेषाः, दासाः, मित्राणि, एतत्सर्वं विचारणीयं,[१४४] बृहद्यवनजातके सुवर्णादिधातूनां क्रयविक्रयः, रत्नादिकोशस्य संग्रहः। कुटुम्बस्थानात् मुखं, वाणी, दक्षिणनेत्रं, विद्या, धनं, भोगविशेषाः, दासाः, मित्राणि, एतत्सर्वं न प्रतिपादितम्। सर्वार्थचिन्तामणिग्रन्थे तृतीयस्थानात् भ्राता–पराक्रम–औषध–सहाय–कण्ठ–हृदय–दक्षिणकर्ण–भक्ष्यविशेष–मूल–आदीनां विचारः करणीय इति सर्वार्थचिन्तामणिकारो वर्णयति। [१४५] तृतीयस्थानात् सहोदर–किंकर–पराक्रम–उपजीवी–एतेषामेव विचारो बृहद्यवने कथितः। तत्र

---

[१४३] त्यागभोगविवादेषु दानेष्टकृषिकर्मसु ।

व्ययस्थानेषु सर्वेषु विद्धि विद्वन् व्ययं व्ययात् ।। षट्पञ्चाशिका १.१२

[१४४] कौटुम्बाद्वर्त्तव्यान्मुखं च वाग्दक्षिणाक्षिपूर्वार्थान् ।।

विद्याभुक्तिविशेषान् दासान्मित्राणि च प्रवदेत् ।। सर्वार्थ. ३.१

[१४५] सहजेन सहजविक्रमौषधहायान्गलोरस्थानम् ।

विद्याद्दक्षिणकर्णं भक्ष्यविशेषांश्च मूलादीन् ।। सर्वार्थ. ४. १

औषध–कण्ठ–हृदय–दक्षिणकर्ण–भक्ष्यविशेष–मूल–आदीनां नोल्लेखः कृतः। चतुर्थस्थानात् बान्धव–गृह–माता–जल–उन्नति–भोज्य–वाहन–हृदय–स्कन्ध–आसन–शयन–सुख–पातालजल–इत्यादीनां विचारः ग्रन्थकारमतेन कर्तुं शक्यते।[१४६] बृहद्यवनजातकमतेन ग्राम–चतुष्पद–क्षेत्र–उद्यम–एतेषां चतुर्थस्थानादवलोकनं कर्तव्यम्। एतेषामुल्लेखः सर्वार्थचिन्तामणौ न वर्तते। पञ्चमभावतः सुत–बुद्धि–मन्त्री–मन्त्र–भोजन–पितृभाव–हृदय–उदरप्रवेश–विवेकशक्ति– इत्यादीन् निर्दिशेत्– इति वेङ्कटेशः।[१४७] प्रबन्ध–विद्या–विनय–गर्भस्थिति–नीतिसंस्था–एतषां परिचिन्तनमपि पञ्चमभावाद् भवतीति बृहद्यवने। तत्र मन्त्री–भोजन–हृदय–उदरप्रवेश–विवेकशक्ति– इत्यादीनां न निर्देशः। ग्रन्थकारमतेन षष्ठभावतः अरि–चोर–क्षत–विघ्न–क्लेश–नाभि–उदरदेश–मधुरादिषडुपदंश–आदीन् प्राज्ञ वदेत्।[१४८] बृहद्यवनदृष्ट्या क्रूरकर्म–रोगचिन्ता–शङ्का–मातुल–एतेषां विचारो विधीयते। तत्र चोर–क्षत–विघ्न–क्लेश–नाभि–उदरदेश–मधुरादिषडुपदंश–आदीनां विचारस्य न निर्देशः। सप्तमभवातः विवाह–स्त्रीपतिविचार–सूप–दधि–गुड–क्षीर–गमनागमन–कामदेवार्ति–मूत्राशय–नष्टधन–आदीनां फलं कथ्यते–इति ग्रन्थकाराभिमतम्।[१४९] युद्ध–

---

[१४६] बन्धुभवने बन्धूनगृहमातृजलात्मवृद्धिभोज्यादीन् ।

स्कन्धासनशयनसुखान्यधो जलं ब्रूयात् ।। सर्वार्थ.४.५४

[१४७] सुतभवनात्सुतबुद्धिमन्त्रिणानपि मन्त्रभोजनपितृभावान् ।

चोदरप्रवेशं विवेकशक्तिं च निर्दिशेन्मतिमान् ।। सर्वार्थ. ५.१

[१४८]अरिभवनादरिचोरक्षतविघ्नक्लेशनाभ्युदरदेशान् ।

उपदंशान् ग्रहराश्युदितान् वदेत्प्राज्ञः ।। सर्वार्थ. ५ षष्ठभावः १

[१४९] युवतिपदादुद्वाहं भार्यापतिसूपदधिगुडक्षीरम् ।

व्यापार–इति द्वयोः समुल्लेखो बृहद्यवनजातके विशिष्टः। तथापि तत्र विवाह–सूप–दधि–गुड–क्षीर–कामदेवार्ति–मूत्राशय–नष्टधन–आदीनां फलं वेङ्कटेश–दृष्ट्याधिकम्। अष्टमस्थानतो जीवन–मरण–गुह्यस्थान–मरणहेतु–अन्नसुख–भृति–दंश–परिभव–इत्यादीन् प्राज्ञश्चिन्तयेत्।[९५०] नद्युत्तार–विषमदुर्ग–शस्त्र–आदीनां बृहद्यवने समुल्लेखो विशिष्टः। तथापि तत्र गुह्यस्थान–अन्नसुख–भृति–दंश–परिभव–इत्यादीनां न विचारः। गुरु–भाग्य–पिता–पौत्र–दया–तपः–लाभ–ऊरुस्थान–मनः–सहभोजी–दान–योगसाधना–मातुल–स्वामि–इत्यादीनामपि नवमभावतः फलं विचारणीयमिति सर्वार्थचिन्तामणिकारः। [९५१] बृहद्यवनदृष्ट्या धर्मक्रियासु मनःप्रवृत्तिः–भाग्योदयः–निर्मलशीलं–तीर्थयात्रा–पुराणप्रणयः–एतेषां दर्शनं कर्तव्यमिति विशेषः। दशमस्थानात् ग्रन्थकारमतेन प्रवृत्ति–आज्ञा–कीर्ति–वृष्टि–प्रवास–पूर्त–सन्मान–कर्माजीव–जानुस्थान–दास–आदीनि द्रष्टव्यानि।[९५२] बृहद्यवनानुसारेण व्यापार–मुद्रा–नृपमान–राज्य–पितृप्रयोजन–महत्पदप्राप्ति –एतानि दशमस्थानाद् विलोकनीयानि सन्ति। द्वयोर्भिन्नता सुस्पष्टा। लाभस्थानात्धनप्राप्ति–पाद–वामकर्ण–केश–कुब्जता–ज्येष्ठभ्राता–धन–इत्यादीनां

---

आगमगमनमदर्ति ब्रूयान्मूत्राशयं च नष्टधनम् ।। सर्वार्थ. ६.१

[९५०] मरणाज्जीवितमरणं गुह्यस्थानं च मरणहेतुं च ।

अन्नसुखं भृतिदंशं परिभवपि चिंतयेत्प्राज्ञः ।। सर्वार्थ. ७.१

[९५१] शुभभवनाद्गुरुभाग्यं पितृपौत्रयातपःप्राप्तिम् ।

ऊरुस्थानं स्वातं सहभोक्तृन्दानयोगमपि विद्यात् ।। सर्वार्थ. ७ नवमभावः १

[९५२] दशमात्प्रवृत्तिमाज्ञां कीर्तिं वृष्टिं प्रवासपूर्तादीन् ।

मानं कर्माजीवं जानुस्थानं च निर्दिशेद्दासान् ।। सर्वार्थ. ८.१

फलं व्यक्तव्यमिति ग्रन्थकाराभिमतम्।[९५३] बृहद्यवने तु भिन्नमेव प्रतिपादनम्। तत्र गज–अश्व–हेम–अम्बर–रत्न–जात–आंदोलिका–मङ्गलमण्डलादीनां लाभः प्रतिपादितः। व्ययभावात् व्यय–नरकपतन–वैकल्य–वामाक्षि–चरणयुगल–शयनस्थान–एते पदार्था विवेचनीया इति वेङ्कटेशः।[९५४] अत्रापि बृहद्यवनदृष्ट्या हानि–दान–व्यय–दण्ड–बन्धनादीनि व्ययभावतश्चिन्तनीयानीति।

### ७ भावफलाध्यायः -

लोमशसंहितान्तर्गते भावफलाध्याये ८८ अनुष्टुप्श्लोकेषु प्रत्येकभावे भावेशस्यैव फलं वर्ण्यते। तत्र राशिफलं, ग्रहस्थितिः, दृष्टिः, उच्च–नीच–मित्र–शत्रु–मूलत्रिकोण– इत्यादीनां बृहद्–वृद्धयवनसदृशो विचारो न दृश्यते।

### ८ भावप्रकाशः -

जीवनाथदैवज्ञविरचिते भावप्रकाशे तृतीयेऽध्याये तन्वादिभावानां विलोकनीयानि कथितानि। प्रथमभावे जातिः, आयुः, सुखं, दुःखं, अङ्कादिकं, वर्णः, विज्ञानं, निद्रा, आलयम् - एतानि विलोकनीयानि जीवनाथदृष्ट्या।[९५५] विज्ञानं, निद्रा, आलयम्- एतानि विशिष्टानि सन्ति। अन्यत् सर्वं बृहद्यवनेन समानम्। जीवनाथविचारेण द्वितीयेन सुवर्णमुक्तादिधातूनां क्रय–विक्रयो द्रष्टव्यः।[९५६] एतदपि बृहद्यवनेन समानम्। तृतीयभावाद् भ्रातृभृत्यादिकं

---

[९५३] आयेनार्थावाप्तिं पादावपि वामकर्णचिन्तां च ।
जातावपि कचकुब्जाज्ज्येष्ठान्ब्रूयाद्धनन्यासाम् ।। सर्वार्थ. ८ लाभभावः १

[९५४]व्ययभवनाव्ययमखिलं पतनं नरके च वैकल्यम् ।
वामाक्षिचरणयुगलं शयनस्थानं विनिर्दिशेत्प्राज्ञः ।। सर्वार्थ. ८ व्ययभावः १

[९५५] जातिरायुःसुखं दुःखमङ्कादिकं वर्णविज्ञाननिद्रालयान्यङ्गतः।

[९५६] स्वर्णमुक्तादिकानां क्रयो विक्रयः कोशतो भ्रातृभृत्यादिकम्।।भा.प्र. ३.१

चिन्तनीयम्-इति जीवनाथः।[१५७] बृहद्यवनसदृशमेतत्। तथापि यवनेन पराक्रमस्याप्युल्लेखः कृतः। चतुर्थभावात् सुहृदः, सुखं, आलयः, निधिसंस्थानं, कृषिः, मातृसौख्यं, नववाहनं, वाटिकागमः, गृहलाभः, प्रवासश्च चिन्तनीयः - इति जीवनाथेन कथितम्।[१५८] एतद् वर्णनं विस्तृतम्। बृहद्यवनेन केवलं सृहृद्-गृह-ग्राम-चतुष्पद-क्षेत्र-उद्यमानामेव निर्देशः कृतः। पञ्चमभावतः पुत्र- मन्त्र-वचनप्रवीणता-गद्य-पद्य-बुद्धिमत्ता-एतेषां चिन्तनं कार्यमिति जीवनाथः।[१५९] गर्भस्थितिः, नीतिसंस्था - एतौ द्वौ बृहद्यवने विशिष्टौ। षष्ठभावाद् जीवनाथदृष्ट्या मातुलसौख्यं, शत्रुः, चतुष्पदः, व्रणानि, भयं, युद्धं, विलोकनीयम्।[१६०] चिन्ता-शङ्का-इति द्वौ बृहद्यवने विशिष्टौ। तेन च युद्धस्य नोल्लेखः कृतः। सप्तमभावाद् जायाप्राप्तिः, वणिक्कर्म, अङ्गनायुद्धं, मन्मथकला-एतानि विलोकनीयानि जीवानाथमतेन।[१६१] बृहद्यवनजातके रणाङ्गणस्य गमनप्रमाणस्य च विशिष्टोल्लेखः। अष्टमस्थानाद् जीवनाथमतेन रोग-युद्ध-मरण-शत्रु-सैन्य-नदीतरणभयादिकं विचारणीयं कथितम्। [१६२] विषमदुर्गं, शस्त्रम्, आयुः, सङ्कटं चेति विलोकनीयं बृहद्यवनेन विशेषेण कथितम्। नवमभावाद् देवालय-जलाशय-पुण्यतीर्थगमन-प्रपा-मार्गसङ्गमन-भाग्योदय-धर्मकार्यादिकं पश्येदिति

---

[१५७] कोशतो भ्रातृभृत्यादिकम्।। भा.प्र.३.१

[१५८] सुहृदः सुखमालयं तुरीये निधिसंस्थानकृषिस्वमातृसौख्यम्।
नववाहनवाटिकागमादेर्गृहलाभं च विचिन्तयेत्प्रवासम्।। भा.प्र. ३.२

[१५९] पुत्रमन्त्रवचनप्रवीणता गद्यपद्यमतिवृद्धिमङ्गजातम्। भा.प्र. ३.३

[१६०] मातुलादरिचतुष्पदव्रणव्रातभीतिसमरादि चिन्तयेत्।। भा.प्र.३.३

[१६१] अङ्गनागमवणिक्क्रियाङ्गनायुद्धमन्मथकलाश्च सप्तमात् । भा.प्र. ३.४

[१६२]रोगयुद्धमरणारिवाहिनीनिम्नगातरणभीतिरष्टमात् ।। भा.प्र. ३.४

जीवनाथः।[९६३] बृहद्यवनदृष्ट्या विमलं शीलं पुराणैः प्रणयश्च भाग्यस्थानाद् विलोकनीयः। दशमभावाद् राज्यलाभः, पितृसौख्यं, वर्षणं, राज्ञःसंसर्गात् धनवृद्धिः, मुद्रिकाप्राप्तिः, पदवीप्राप्तिः,कार्यसिद्धिः-एतानि द्रष्टव्यानि।[९६४] बृहद्यवने व्यापारस्य जीवनाथेन वर्षणस्य च कृत उल्लेखो विशिष्टतरः। जीवनाथेन कथितं यद् लाभस्थानतः सस्य-यान-स्त्री-नवाम्बर-ज्ञान-वाहनसुखादिकं विलोकनीयम्।[९६५] बृहद्यवने शब्दभेदः,अर्थतो साम्यम्। व्ययस्थानाद् सद्व्ययः,अभीष्टचिन्तनं, वैरिरोधः, कृषिः, दानम्-इत्यादिकं चिन्तनीयं जीवनाथमतेन।[९६६] बृहद्यवने दण्डः, बन्धनं, विलोकनीयौ कथितौ व्ययस्थानात्। अभीष्टचिन्तनं, वैरिरोधः, कृषिः-एतानि जीवनाथमतेन विशिष्टानि।

---

[९६३] देवतालयजलाशयादिकं पुण्यतीर्थगमनं प्रपादिकम् ।

मार्गसङ्गमनभाग्यवर्द्धनं धर्मकृत्यमपि धर्मतो वदेत् ।। भा.प्र. ३. ५

[९६४]राज्यलाभजनकाम्बुवर्षणं क्षोणिपालकुलवित्तवर्द्धनम् ।

मुद्रिकाप्तिपदवीपदाप्तयः कार्यसिद्धिरपि कर्मभावतः ।। भा.प्र. ३. ६

[९६५] सस्ययानललनानवाम्बरज्ञानवाहनसुखानि लाभतः । भा.प्र. ३.७

[९६६] सद्व्ययादिकमभीष्टचिन्तनं वैरिरोधकृषिदानमन्तिमात् ।। भा.प्र. ३.७

## विविधग्रन्थानां विषये तुलनात्मकं कोष्टकम्-

| ग्रन्थनाम | प्रथमभावः विलोकनीयानि |
|---|---|
| १ बृहद्यवनजातकम् | रूपं, वर्णः, चिह्नं, जातिः,अवस्थाप्रमाणं, सुखदुःखानि, साहसम् |
| २ मानसागरी | रूपं, वर्णः, चिह्नं, जातिः,अवस्थाप्रमाणं, सुखदुःखानि, साहसम् |
| ३ बृहत्पराशरहोराशास्त्रम् | तनु–रूप–ज्ञान–वर्ण–बलाबल–प्रकृति–सुख–दुःखम् |
| ४ जातकपारिजातः | वर्ण–आकृति–लक्षण–यशः–गुण–स्थान–सुख–दुःख–प्रवास–तेजः–बलाबलम् |
| ५ षट्पञ्चाशिका | सौख्यं,आयुः,वयः,जातिः,आरोग्यं,लक्षणं,गुणं,क्लेशः, आकृतिः, रूपं, वर्णः |
| ६ सर्वार्थचिन्तामणिः | लग्नस्य विलोकनीयानि न कथितानि। |
| ७ भावप्रकाशः | जातिः, आयुः, सुखं, दुःखं, अङ्कादिकं, वर्णः, विज्ञानं, निद्रा, आलयम् |
| **ग्रन्थनाम** | **द्वितीयभावः** |
| १ बृहद्यवनजातकम् | सुवर्णादिधातूनां क्रय–विक्रयः, सुवर्णरत्नादीनां कोशेऽपि संग्रहः |
| २ मानसागरी | सुवर्णादिधातूनां क्रय–विक्रयः, सुवर्णरत्नादीनां कोशसंग्रहः |
| ३ बृहत्पराशरहोराशास्त्रम् | कुटुम्ब–धनधान्य–शत्रु–मृत्यु–धातुरत्नादिकं |
| ४ जातकपारिजातः | वित्तं, नेत्रं, मुखं, विद्या, वाक्, कुटुम्बं, भोजनम् |
| ५ षट्पञ्चाशिका | मुक्ताफलं, माणिक्यं, रत्नानि धातवः, धनं, अम्बराणि, अश्वकार्यं, अध्वविज्ञानम्। |
| ६ सर्वार्थचिन्तामणिः | मुखं, वाणी, दक्षिणनेत्रं, विद्या, धनं, भोगविशेषाः, दासाः, मित्राणि |
| ७ भावप्रकाशः | सुहृदः सुखमालयं निधिसंस्थानकृषिस्वमातृसौख्यम्, नववाहनवाटिकागमादेर्गृहलाभं प्रवासं च |

| ग्रन्थनाम | तृतीयभावः |
|---|---|
| १बृहद्यवनजातकम् | सहोदरः, दासवर्गः, पराक्रमः, उपजीविका, जनविचारः |
| २ मानसागरी | ज्येष्ठ–अनुज–विचारः, पराक्रमः, साहसं, कण्ठस्वरः, श्रवणं, आभरणं, वस्त्रं, धैर्यं, वीर्यं, बलं, मूलफलाशनम्– |
| ३बृहत्पराशरहोराशास्त्रम् | पराक्रम–भृत्य–भ्राता–उपदेश–यात्रा–पित्रोर्मरणमित्यादिकम् |
| ४ जातकपारिजातः | ज्येष्ठ–अनुज–विचारः, पराक्रमः, साहसं, कण्ठस्वरः, श्रवणं, आभरणं, वस्त्रं, धैर्यं, वीर्यं, बलं, मूलफलाशनम्– |
| ५ षट्पञ्चाशिका | भगिनी, भ्राता, भृत्यः, सेवकः |
| ६ सर्वार्थचिन्तामणिः | भ्राता–पराक्रम–औषध–सहाय–कण्ठ–हृदय–दक्षिणकर्ण–भक्ष्यविशेष–मूल–आदीनां |
| ७ भावप्रकाशः | भ्रातृभृत्यादिकं चिन्तनीयम् |
| **ग्रन्थनाम** | **चतुर्थं स्थानम** |
| १बृहद्यवनजातकम् | ग्रामः, चतुष्पदः, क्षेत्रम्, उद्यमः |
| २ मानसागरी | ग्रामः, चतुष्पदः, क्षेत्रम्, उद्यमः |
| ३बृहत्पराशरहोराशास्त्रम् | बान्धव–वाहन–मातृसुख–निधि–क्षेत्र–गृह–आरामादिकं |
| ४ जातकपारिजातः | विद्या, जननी, सुखं, सुगन्धः, गौः, बन्धुः, मनोगुणानि, राज्यं, यानं, भूमिः, मन्दिराणि। |
| ५ षट्पञ्चाशिका | वाटिका, खलकं, क्षेत्रं, महौषधिः, निधिः, विवरादिप्रवेशः |
| ६ सर्वार्थचिन्तामणिः | बान्धव–गृह–माता–जल–उन्नति–भोज्य–वाहन–हृदय–स्कन्ध–आसन–शयन–सुख–पातालजल–इत्यादीनि। |
| ७ भावप्रकाशः | सुहृदः, सुखं, आलयः, निधिसंस्थानं, कृषिः, मातृसौख्यं, नववाहनं, वाटिकागमः, गृहलाभः, प्रवासश्च |
| **ग्रन्थनाम** | **पञ्चमं स्थानम्** |
| १बृहद्यवनजातकम् | बुद्धिः, प्रबन्धः, मन्त्रः, विद्या, विनयः, गर्भस्थितिः, नीतिसंस्थाः। |
| २ मानसागरी | बुद्धिः, प्रबन्धः, मन्त्रः, विद्या, विनयः, गर्भस्थितिः, नीतिसंस्थाः। |

| | |
|---|---|
| ३बृहत्पराशरहोराशास्त्रम् | यन्त्र–मन्त्र–विद्या–बुद्धि–प्रबन्धक–पुत्र–राज्यापभ्रंशादिकम्। |
| ४ जातकपारिजातः | देवः, राज्ययोगः, पुत्रयोगः, पितृयोगः, बुद्धिः, पुण्यम्। |
| ५ षट्पञ्चाशिका | गर्भः, अपत्यं, शिष्यः, मन्त्रः, विद्या, बुद्धिः, प्रबन्धः। |
| ६ सर्वार्थचिन्तामणिः | सुत–बुद्धि–मन्त्री–मन्त्र–भोजन–पितृभाव–हृदय–उदरप्रवेश–विवेकशक्तिः। |
| ७ भावप्रकाशः | पुत्र– मन्त्र– वचनप्रवीणता–गद्य–पद्य–बुद्धिमत्ता |
| **ग्रन्थनाम** | **षष्ठं स्थानम्** |
| १बृहद्यवनजातकम् | अरिसमूहं, क्रूरकर्म, रुग्जचिन्तां, शङ्कां, मातुलस्य च विचारः। |
| २ मानसागरी | अरिसमूहं, क्रूरकर्म, रुग्जचिन्तां, शङ्कां, मातुलस्य च विचारः। |
| ३बृहत्पराशरहोराशास्त्रम् | मातुल–मृत्युशंका–शत्रु–व्रण–सपत्नीमाता–इत्यादिकम्। |
| ४ जातकपारिजातः | रोगः, शत्रुः, व्यसनं,क्षतम्। |
| ५ षट्पञ्चाशिका | चौरभीतिः, रिपुसंग्रामः, खरः, उष्ट्रः, क्रूरकर्म, मातुलः, रोगः, भृत्यः |
| ६ सर्वार्थचिन्तामणिः | अरि–चोर–क्षत–विघ्न–क्लेश–नाभि–उदरदेश–मधुरादिषडुपदंशः |
| ७ भावप्रकाशः | मातुलसौख्यं, शत्रुः, चतुष्पदः, व्रणानि, भयं, युद्धं, |
| **ग्रन्थनाम** | **सप्तमं स्थानम्** |
| १बृहद्यवनजातकम् | रणाङ्गणम्, वणिक्क्रिया, स्त्रीविचारः, गमनप्रमाणम् |
| २ मानसागरी | रणाङ्गणम्, वणिक्क्रिया, स्त्रीविचारः, गमनप्रमाणम् |
| ३बृहत्पराशरहोराशास्त्रम् | जाया–यात्रा–पदप्राप्ति–वाणिज्य–स्वदेहमरणादिकं |
| ४ जातकपारिजातः | भाग्यं, प्रभावः, गुरुः, धर्मः, तपः, शुभं |
| ५ षट्पञ्चाशिका | वाणिज्यं, व्यवहारः, विवादः, गमनागमनं, कलत्राणि |
| ६ सर्वार्थचिन्तामणिः | विवाह–स्त्रीपतिविचार–सूप–दधि–गुड–क्षीर–गमनागमन–कामदेवार्ति–मूत्राशय–नष्टधनम् |
| ७ भावप्रकाशः | जायाप्राप्तिः, वणिक्कर्म, अङ्गनायुद्धं, मन्मथकला |

| **ग्रन्थनाम** | **अष्टमं स्थानम्** |
|---|---|
| १बृहद्यवनजातकम् | नदी–उत्तार:, अतिविषमदुर्गं, शस्त्रम्, आयु:, संकटम् |
| २ मानसागरी | नदी–उत्तार:, अतिविषमदुर्गं, शस्त्रम्, आयु:, संकटम् |
| ३बृहत्पराशरहोराशास्त्रम् | आयु:–मृत्यु–गुदरोग–भगन्दर–पूर्वजन्मवृत्त–आदिकं |
| ४ जातकपारिजात: | आर्युदाय:,अरिष्टहेतु: |
| ५ षट्पञ्चाशिका | नद्युत्तार:, अध्ववैषम्यं, दुर्गे शत्रुसङ्कटं, नष्टं, दुष्टं, युद्धं, व्याधि:, छिद्रं |
| ६ सर्वार्थचिन्तामणि: | जीवन–मरण–गुह्यस्थान–मरणहेतु–अन्नसुख–भृति–दंश–परिभवादिकम् |
| ७ भावप्रकाश: | रोग–युद्ध–मरण–शत्रु–सैन्य–नदीतरणभयादिकं |
| **ग्रन्थनाम** | **नवमं स्थानम्** |
| १बृहद्यवनजातकम् | धर्मक्रियायां मनप्रवृत्ति:, भाग्योदय:, विमलं शीलं, तीर्थप्रयाणं,पुराणै: प्रणय: |
| २ मानसागरी | धर्मक्रियायां मनप्रवृत्ति:, भाग्योदय:, विमलं शीलं, तीर्थप्रयाणं,पुराणै: प्रणय: |
| ३बृहत्पराशरहोराशास्त्रम् | भाग्य–श्याल–भ्रातृपत्नी–तीर्थयात्रा–आदिकं |
| ४ जातकपारिजात: | भाग्यं, प्रभाव:, गुरु:, धर्म:, तप:, शुभं |
| ५ षट्पञ्चाशिका | वापी, कूप:, तडाग:, प्रपा, देवगृहं, दीक्षा, यात्रा, मठ: |
| ६ सर्वार्थचिन्तामणि: | गुरु–भाग्य–पिता–पौत्र–दया–तप:–लाभ–ऊरुस्थान–मन:–सहभोजी–दान–योगसाधना–मातुल–स्वामी |
| ७ भावप्रकाश: | देवालय– जलाशय– पुण्यतीर्थगमन–प्रपा–मार्गसङ्गमन–भाग्योदय–धर्मकार्यादिकं |
| **ग्रन्थनाम** | **दशमं स्थानम्** |
| १बृहद्यवनजातकम् | व्यापार:, मुद्रा, नृपमान:, राज्यप्रयोजनं, पितुर्महत्पदप्राप्ति: |
| २ मानसागरी | व्यापार:, मुद्रा, नृपमान:, राज्यप्रयोजनं, पितुर्महत्पदप्राप्ति: |
| ३बृहत्पराशरहोराशास्त्रम् | राज्य–आकाशवृत्ति–गान–पिता–ऋण–प्रवास–इत्यादिकं |
| ४ जातकपारिजात: | १३) आज्ञा, मानं, विभूषणानि, वसनं, व्यापार:, निद्रा, |

| | |
|---|---|
| | कृषिः, प्रव्रज्या, आगमः, कर्म, जीवनं, यशः, विज्ञानं, विद्या |
| ५ षट्पञ्चाशिका | राज्यं, मुद्रा, परं पुण्यं, स्थानं, तातः, प्रयोजनं, वृष्ट्यादिः, व्योमवृत्तान्तः |
| ६ सर्वार्थचिन्तामणिः | प्रवृत्ति–आज्ञा–कीर्ति–वृष्टि–प्रवास–पूर्त–सन्मान–कर्माजीव–जानुस्थान–दासा; |
| ७ भावप्रकाशः | राज्यलाभः, पितृसौख्यं, वर्षणं, राज्ञःसंसर्गात् धनवृद्धिः, मुद्रिकाप्राप्तिः, पदवीप्राप्तिः,कार्यसिद्धिः |
| **ग्रन्थनाम** | **एकादशं स्थानम्** |
| १बृहद्यवनजातकम् | गजाश्वहेमवस्त्ररत्नवाहनादिमङ्गलमण्डलानि लाभश्च |
| २ मानसागरी | गजाश्वहेमवस्त्ररत्नवाहनादिमङ्गलमण्डलानि लाभश्च |
| ३बृहत्पराशरहोराशास्त्रम् | नानावस्तुभव–पुत्र–स्त्री–पशुसमृद्धि–आदिकस्यायस्य विचारः |
| ४ जातकपारिजातः | धनप्राप्तिविचारः |
| ५ षट्पञ्चाशिका | गजाश्वयानानि, वस्त्राणि, सस्यं, काञ्चनं, कन्यकाः, विद्यालाभः, धनलाभश्च |
| ६ सर्वार्थचिन्तामणिः | धनप्राप्ति–पाद–वामकर्ण–केश–कुब्जता–ज्येष्ठभ्राता–धनम् |
| ७ भावप्रकाशः | सस्य–यान–स्त्री–नवाम्बर–ज्ञान–वाहनसुखादिकं |
| **ग्रन्थनाम** | **द्वादशं स्थानम्** |
| १बृहद्यवनजातकम् | हानिः, दानं, व्ययः, दण्डः, बन्धनम् |
| २ मानसागरी | हानिः, दानं, व्ययः, दण्डः, बन्धनम् |
| ३बृहत्पराशरहोराशास्त्रम् | व्ययः शत्रुवृत्तान्तश्च |
| ४ जातकपारिजातः | दूराटनं, दुर्गतिं, दातृत्वं, शयनादिसौख्यं, विभवं, वित्तक्षयं |
| ५ षट्पञ्चाशिका | त्यागः,भोगः, विवादः, दानं, इष्टकार्यं, कृषिकर्मणि च व्ययः |
| ६ सर्वार्थचिन्तामणिः | व्यय–नरकपतन–वैकल्य–वामाक्षि–चरणयुगल–शयनस्थान– |
| ७ भावप्रकाशः | सद्व्ययः,अभीष्टचिन्तनं, वैरिरोधः, कृषिः. |

# षष्ठं प्रकरणम्

# उपसंहारः

## षष्ठं प्रकरणम्

## उपसंहारः

विविधानि शास्त्राणि संस्कृतसाहित्ये प्रसिद्धानि सन्ति। चतुर्दशसु अष्टादशसु वा विविधविद्यासु ज्योतिषशास्त्रस्य प्राचीनकालतोऽतीव व्यवहारिकं महत्त्वम्। प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ। ज्योतिषामयनं चक्षुः-इति पाणिनिशिक्षायां वेदस्य चक्षुरूपेण तस्य प्रतिपादनम्। यज्ञादीनां सुयोग्यकालं निर्णयस्य प्रयोजनत्वेन प्रारब्धमिदं कालनिर्णायकं शास्त्रं वेदादारभ्य सर्वग्रन्थेषु विवर्णितं दरीदृश्यते। वेदेषु वेदाङ्गज्योतिषे रामायणे महाभारते विविधपुराणेषु ज्योतिषस्य विवेचनं प्राप्यते। खगोलविद्या, फलज्योतिषस्य च तेषु विस्तृतं वर्णनं दृश्यते। वस्तुतस्तु सिद्धान्तः,संहिता,होरा इति त्रिविधरूपेण शास्त्रीयग्रन्थेषु निरूपणं मिलति। प्रश्नविद्याशकुनादिद्वारा केचन ज्योतिषस्य पञ्चविधत्वं प्रतिपादयन्ति। तत्रापि होराशास्त्रस्य व्यवहारिकजीवने बहु महत्त्वम्। होराशास्त्रमेव जातकमिति कथ्यते। तस्यैव ताजिकमित्यपरा शाखा। होराशास्त्रस्य जातकस्य वा यवनेषु बहु विस्तार आसीत्। अत एव यवनस्य जातकस्याध्ययने मया प्रयत्नः कृतः। बृहद्यवनजातकं वृद्धयवनजातकं च - इति ग्रन्थद्वयं मया प्राच्यविद्यामन्दिरं, वडोदरा- इत्यस्य ग्रन्थभाण्डागारे मया समुपलब्धम्। बृहद्यवनजातके केवलं द्वादशभावानां फलनिरूपणं समुपलभ्यते । वृद्धयवनजातकेऽपि विविधाध्यायेषु विषयोऽयं निरूपितो मीनराजेन। एतयोर्द्वादशभावविचाराणां सुसूक्ष्मं पद्धतिपुरस्सरमध्ययनं कृत्वा तेषां परस्परं साम्यवैधर्म्यविवेचनपूर्वकं जातकस्यान्यग्रन्थानां साकं यथाशक्यं तौलनिकपदार्थ-प्रतिपादनेन जातकफलादेशसिद्धान्तनिदर्शने प्रथममेव प्रयत्नोऽयं विधीयते। ममेद-मध्ययनं षट्सु प्रकरणेषु चतुस्सु परिशिष्टसहितेषु विभक्तोऽस्ति।

तत्र प्रथमप्रकरणे ज्योतिषशास्त्रस्य व्याख्या, व्याप्तिः, महत्त्वम् –इत्यादिकं प्रतिपादयता मया तस्य त्रिविधत्वं पञ्चविधत्वं च स्पष्टीकृतम्। वेदेषु खगोलस्य फलज्योतिषस्य च कथं प्रचलनमासीदिति मन्त्रोद्धरणपुरस्सरं प्रतिपादितम्। रामायण–महाभारत–पुराणेषु च ज्योतिषविषयाः प्रतिपादिताः सन्तीति संक्षेपतो निर्दिष्टम्। सिद्धान्तस्य संहितायाश्च विषयान् निर्दिश्य तेषां स्वल्पः परिचयः प्रदत्तः। मम विषयो जातकस्य होराशास्त्रस्य वा सम्बद्धो वर्तते, अत एव जातकशब्दस्य होरायाश्च विवेचनपूर्वकं प्राचीनानां २०९ जातकग्रन्थानां परिचयः प्रथमवारमेव विविधग्रन्था–नामाधारेण यथाशक्यं मूलग्रन्थावलोकनपूर्वकं प्रदत्तोऽस्मिन् प्रकरणे।जातकस्य सम्बन्धस्ताजिकेन साकं वर्तते। अत एव जातकेन साकं ७० ताजिकग्रन्थानामपि यथा शक्यं परिचयः प्रदत्तोऽस्ति प्रथमे प्रकरणे।

द्वितीयप्रकरणे प्रथमं संहिताकाराणां ज्योतिषशास्त्रप्रवर्तकानां गणनासु यवनस्य यवना–चार्यस्य वा निर्देशो वर्तते– इति प्रतिपाद्य यवनशब्दस्य स्पष्टीकरणं कृतम्। पाणिनिसूत्रे कालिदासवाङ्मये पुराणादिषु च यवनस्योल्लेखो यवनस्य प्राचीनत्वं द्योतयति। ज्योतिषशास्त्रस्य मूर्धन्यः प्रवर्तको वराहमिहिरो यवनस्य सादरं सम्मानपूर्वकं समुल्लेखं करोति। तेन बृहत्संहितायां बृहज्जातके योगयात्रायां लघुजातके च विविधसंदर्भेषु यवनस्य निर्देशः कृतः। वराहमिहिरात्पूर्वकाले यवनानां बहु प्रचार आसीत्। बृहज्जातके तु विविधयावनशब्दानां सम्प्रयोगो दरीदृश्यते। भट्टोत्पलेनापि बृहत्संहितायाः, बृहज्जातकस्य लघुजातकस्य च टीकायां बहून्युद्धरणानि यवनस्य यवनेश्वरस्य यवना–चार्यस्य वा प्रदत्तानि सन्ति। कल्याणवर्मविरचितायां सारावल्यां, राजमार्तण्डे, अद्भुत–सागरे च यवनस्य विचाराणां श्लोकसंग्रहः प्राप्यते। प्रथमवारमेव मया सर्वेषां यवनस्योद्धरणानां संग्रहः कृतः। एतैः यवनस्य जातकस्य मतानां

परिशीलनं कर्तुं शक्यते। स्फुजिध्वजस्य यवनजातकस्य समुल्लेखो विचारश्च म.म.काणेमहोदयैः प्रतिपादितः। स ग्रन्थो मया न प्राप्तः। किन्तु यवनमतानुसारि ग्रन्थद्वयं बृहद्यवनजातकं मीनराजविरचितं वृद्धयवनजातकं च मया प्राप्तम्। ग्रन्थयोर्द्वयोः परिचयः प्रकरणे-ऽस्मिन् सविस्तरं प्रदत्तः।

तृतीयप्रकरणे मया बृहद्यवनजातकस्य द्वादशभावफलविचारस्य विवेचनं कृतम्। अयं ग्रन्थो द्वादशफलस्य बहु सम्यक्तया प्रतिपादनं करोति। प्रत्येकभावे नाम- लग्न-धन-सहज-सुख-सुत-रिपु-जात-मृत्यु-भाग्य-कर्म-लाभ-व्यय- भावेषु कानि विलोकनीयानि सन्ति। तेषां विवेचनं प्राप्यते। अनन्तरं तत्तद्भावे मेषादिराशिषूदितेषु फलं विवर्ण्यते। सूर्यादिग्रहाणां विविधभावे स्थिते किं फलं सूच्यते- तद्वर्णितम्। सूर्यादि-ग्रहाणां विविधभावेषु दृष्टिः सम्भाव्यते। तस्या दृष्टेः किं फलं जातकेन प्राप्यते। तस्य स्पष्टीकरणमत्र विधीयते। प्रत्येकभावस्य भावेशो नाम भावाधिपतिः कस्मिन् स्थाने स्थितः, तदनुरूपं जातकेन विशिष्टं फलं प्राप्यते। एतादृग्विवेचनान्तरं बृहद्यवने वर्ष-संख्या विविधभावे प्रतिपाद्यते। तथा च विचाररूपेण केचन् विशिष्टाः सिद्धान्ताः प्रतिपादिताः सन्ति। अयं ग्रन्थो जातकस्य फलादेशस्याधारभूतो वर्तते। नवीन-ज्योतिषाध्ययनकर्तृ ृणां कृते प्राथमिको बहु मार्गदर्शको भवेत्। एवं मयात्र बृहद्यवन-जातकस्य विविधाध्यायेषु समागतानां द्वादशभावविषयाणां विवेचनम्, प्रत्येकस्य विषयस्य स्पष्टीकरणं च ग्रन्थाधारेण ससंदर्भं मया कृतम्।

चतुर्थे प्रकरणे वृद्धयवनजातकस्य विविधाध्यायेषु समागतानां द्वादशभावविषयाणां विवेचनम्, प्रत्येकस्य विषयस्य स्पष्टीकरणं च मया कृतम्। वृद्धयवनजातके २४ तः ३६ अध्यायपर्यन्तं द्वादशाध्यायेषु द्वादशभावानां विवरणं सम्प्राप्यते। प्रथमं लग्नाध्याये द्वादशराशीणां फलं, षड्वर्गफलं, षड्बलफलं,

विविधयोगाः, ग्रहफलेषु उच्च–नीच–मित्र–शत्रु–इत्यादिदृष्ट्या वृद्धयवने विचारः क्रियते। एवमेव द्वितीयादिद्वादशभावेषु स्थितानां ग्रहाणां फलं तेषाम् उच्च–नीच–मित्र–शत्रु–मूलत्रिकोण–नवांश–दृष्ट्या किं भवतीति प्रत्येकभावे विस्तृतरूपेण विचार्यते। अनन्तरं ३७तमेऽध्याये प्रत्येकभावस्य भावेशस्य द्वादशभावेषु स्थितेषु पृथक्तया विविच्यते। तथा ३८तमेऽध्याये प्रत्येकभावे स्थितानां मेषादिद्वादशराशीणां फलं पृथक्तया प्रतिपाद्यते। इत्थमयं ग्रन्थः पूर्वतनस्य बृहद्यवनजातकस्य पूरकरूपो विस्तारकश्च संदृश्यते। तस्य विवरणं प्रकरणेऽस्मिन् ग्रन्थाधारेण संदर्भपुरस्सरं प्रदत्तं मया।

पञ्चमे प्रकरणे मया बृहद्यवनजातकवृद्धयवनजातकयोर्द्वादशभावविचाराणां तुलनात्मक–मध्ययनं प्रस्तुतम् । तयोः परस्परं साम्यवैधर्म्यप्रदर्शनपुरःसरमध्ययनं प्रस्तुतम्। मानसागरीजातकग्रन्थोऽतीवोपयुक्तो ग्रन्थ आधुकिककाले। तत्रस्थद्वादश–भावविचाराणां बृहद्यवनजातकवृद्धयवनजातकयोर्द्वादश– भावविचाराणां साकं तुलना प्रस्तुता। तथा च बहवो जातकग्रन्था द्वादशभावफलविवरणं कुर्वन्ति। तेषु बृहज्जातकं, सारावली, बृहत्पाराशरहोराशास्त्रम्, जातकपारिजातः, षट्पञ्चाशिका, सर्वार्थ–चिन्तामणिः, लोमश–संहितान्तर्गतो भावफलाध्यायः, भावप्रकाशः –एते ग्रन्था मया तुलनात्मकाध्ययनार्थं स्वीकृताः। तेषां बृहद्यवनजातकस्य वृद्धयवनजातकस्य च विचाराणां साकं मूलग्रन्था–वलोकनपूर्वकं ससंदर्भं यथाशक्यं तौलनिकमध्ययनं मयात्र प्रस्तुतम्।

षष्ठे प्रकरणेऽत्र समग्रस्याध्यायनस्य फलितं प्रत्येकप्रकरणस्य निष्कर्षरूपं वर्ण्यते। बृहद्यवनस्य वृद्धयवनस्य च द्वादशभावफलवर्णने गुणदोषविवेचन-पूर्वकमाधुनिककाले जातकफलादेशे किं परिगणितुं शक्यते- इत्यस्य विवेकपुरस्सरं प्रतिपादने प्रयत्नोऽत्र विधीयते।

निष्कर्षरूपेणमेदं वक्तुं शक्यते, यत्-

१ बृहद्यवनजातके प्रत्येकभावे विलोकनीयानि, द्वादशभावे मेषादिराशीणां फलम् , द्वादशभावेषु स्थितग्रहाणां फलम, भावेशफलम्, ग्रहाणां दृष्टिफलम्, राहुकेतुफलविचारः- एते बिन्दवो महत्त्वपूर्णाः समीचीनाश्च सन्ति।

किन्तु तेन द्विग्रहाणाम्, अनेकग्रहाणां युतौ विचारो न प्रस्तुतः। तथा च तेन उच्च-नीच-मित्र-शत्रु-शुभ-पाप-केन्द्रादि-त्रिकोण-षड्वर्ग-बलाबल विविधयोग-विचारो न प्रस्तुतः।

२ वृद्धयवनजातके- द्वादशभावे मेषादिराशीणां फलम्, द्वादशभावेषु स्थितग्रहाणां फलम, ग्रहाणां दृष्टिफलम्, भावेशफलम्, उच्च-नीच-मित्र-शत्रु-षड्वर्ग-बलाबल-विविधयोगादिविचारो प्रस्तुतः।

किन्तु तेन राहुकेतुफलविचारः न कृतः, द्विग्रहाणाम्, अनेकग्रहाणां युतौ विचारो न प्रस्तुतः। तेन प्रत्येकभावे विलोकनीयानि न वर्णितानि।

| **राशयः- भावाः!** | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| प्रथमः | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| द्वितीयम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| तृतीयम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| चतुर्थम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| पञ्चमम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| षष्ठम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| सप्तमम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| अष्टमम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| न्नवमम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| ध्समम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| एकादशं | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
| द्वादशम् | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |

प्रथमं प्रत्येकभावे का राशिर्वर्तते, तदनुसारं विचारः करणीयः

प्रत्येकभावे को ग्रहो वर्तते, तदनुसारं विचारः करणीयः

| **ग्रहाः- भावाः!** | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| प्रथमः | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| द्वितीयम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| तृतीयम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| चतुर्थम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| पञ्चमम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| षष्ठम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| सप्तमम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| अष्टमम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| न्नवमम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| ध्समम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| एकादशं | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |
| द्वादशम् | रविः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः | राहुः | केतुः |

भावेशानुसारं विचारः करणीयः

| राशयः–<br>भावाः! | मेषः | वृषभः | मिथुनः | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुंभः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| प्रथमम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| द्वितीयम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| तृतीयम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| चतुर्थम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| पञ्चमम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| षष्ठम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| सप्तमम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| अष्टमम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| न्नवमम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| ध्समम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| एकादशं | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |
| द्वादशम् | भौमः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | भौमः | गुरुः | शनिः | शनिः | गुरुः |

१. न केवलं भावतः,अपितु १ भावतः २ चन्द्रतः, ३ सूर्यतः ४ प्रश्नसमयतश्च फलकथनविचारः कर्तुं शक्यते। एतेषु चन्द्रतो विचारो गौरीजातके प्राप्यते, स विचारार्हः। तथा च षट्पञ्चाशिकायां प्रश्नसमयतः फलादेशस्य विचारः क्रियते, स त्वनुभवगम्यः। सूर्यतोऽपि विचारः कर्तुं शक्यते। वस्तुतस्तु प्रत्येकग्रहस्य भावस्य वा स्वस्थानात् विविध–चतुर्थ–अष्टम–एकादशादिषु स्थानेषु स्थितेषु फलविचारः करणीयः स्यात्। अत्रापि उच्च–नीच–मित्र–शत्रु–बलाबल–षड्वर्ग–ग्रहदृष्ट्यादिविचारो भवितुमर्हति।

२. राहु–केत्वोर्विचारं केचन ग्रन्थकाराः कुर्वन्ति। किन्तु हर्षल–नेप्च्युन–प्लुटो–इत्याधुनिकग्रहाणां विचारं प्रायेण फलादेशे न कुर्वन्ति। हर्षल–नेपच्युन–प्लुटो–विषये विचारो ग्रन्थकारैर्न कृतः। आधुनिकेन श्रीनिवास महादेवजी पाठकमहोदयेन केवलं हर्षलस्याथवा प्रजापतेर्विचारो स्वपुस्तके –हर्षल अथवा प्रजापति –नामके कृतः, स विचारणीयः।

३. फलादेशे दशा–अन्तर्दशा–प्रत्यन्तरदशा–विदशा–उपदशा–इत्यादीनां महत्त्वं विचारणीयम्। प्रायेण जना अष्टोत्तरीं, विंशोत्तरीं वा अनुसरन्ति। पराशरमतेन – विंशोत्तरी ग्राह्या स्यात्– नाष्टोत्तरी।

४. विविधग्रहाणां, विविधभावानां च शरीरस्य विविधभागोपरि आधिपत्यं वर्ण्यते। तस्यापि विचारः फलादेशे करणीयः। यथा–फलदीपिकायां –

शिरोवक्त्रोरोहृज्जठरकटिबस्तिप्रजनन–
स्थलान्यूरूजान्वोर्यगलमिति जङ्घे पदयुगम्।
विलग्नात्कालाङ्गान्यलिझषकुलीरान्तिममिदं
भसन्धिर्विख्याता सकलभवनान्तानपि परे।। १.४

१ शिरः २ वक्त्रम्, ३ उरुः ४ हृद् ५जठरम् ६ कटिः ७ बस्तिः ८ प्रजननम् ९ ऊरू १० जानुद्वयम् ११जङ्घा १२ पदयुगम्

५. विविधग्रन्थेषु नैकानि विलोकनीयानि वर्णितानि। तेषां सम्यक्तया समन्वयं कृत्वा, आधुनिककालोपयोगी प्रशिक्षणे व्यवसायचयने च सुयोग्यं मार्गदर्शनं स्यादिति, विवेकपूर्वकं विवेचनं फलस्य करणीयं स्यात्।

६ समग्रतया विचार्यमाणे विलोकनीयानि द्वादशभावानामित्थं कल्पयितुं शक्यन्ते।

**१ लग्नम्-**

शारीरिकी शक्तिः, स्वभावः, व्यक्तित्वम्, ज्ञानम्, आयुष्यम्, मनोबलम्, मानसिकता, रूपम्, वर्णः, तेजः, चारित्र्यम्, संतोषः, आरोग्यम्, बाह्यस्वरूपम्, जन्मसमयस्य स्थितिः,सूर्योदयकालः, पुत्रस्य भाग्यम्, भाविजन्म, प्रकृतिः(वातपित्तकफादिकं), पितुर्माता, मातुः पिता, वर्णः, चिह्नं, जातिः,कारकः सूर्यः, मस्तकम्

**२ द्वितीयस्थानम्-**

धनभवनम्, कुटुम्बस्थानम्, वाणी, मुखम्, जिह्वा, धनम्, कुटुम्बम्, सुखम्, दैवम्, परंपरिकसम्पत्तिः, धनसंचयः, दक्षिणनेत्रम्, भोजनस्वादः, आहारः, दन्ताः,कर्णः, गण्डः,विद्या, कारकः-गुरुः

**३ तृतीयस्थानम्-**

भातृभवनम्, भ्रातृ-भगिनी-सम्बन्धः, साहसम्, पराक्रमः, परदेशगमनम्, क्रीडाप्रावीण्यम्, मित्राणि, कार्यसाफल्यम्, सामाजिक-सम्बन्धः, अनुवेश्मनिवासिनः, स्कन्धः, आर्थिकव्यवहारः(शेरापणम्), कारको भौमः

**४ चतुर्थस्थानम्-**

मातृस्थानम्, सुखभवनम्, मातृसुखम्, स्थावरम्, जङ्गमं, अर्थसंग्रहः, गृहजीवनम्, अध्ययनेन उपाधिः, श्वशुरः, अन्तःकरणम्, उरःप्रदेशः, पृष्ठम्, कृषिः, वाहनसौख्यम्, कूपः, जलं, पातालं,उद्यानं, मध्यरात्रिः,क्षेत्रं,कारकः-भौमः, चन्द्रः

५ **पञ्चमस्थानम्–,**

पुत्रभवनम्, संतानविचार:, संचितकर्म, सहाध्यायिन:, क्रीडाकौशल्यम्, धनप्राप्ते: संभावना, आकस्मिकधन–प्राप्ति:, विद्या, बुद्धि:,मन्त्र:,शिष्य:, प्रेम, व्यभिचार:, मेधा, पूर्वसुकृतम्, पितर:,अध्ययनक्षेत्रं, उदरं,कारक: –गुरु:

६ **षष्ठस्थानम्–**

शत्रुभवनम्, सेवाकार्यम्, मातुलपक्ष:, रोग:, दु:खम्, ऋणम्, आज्ञाकरा: सेवका:, संकटम्,दारिद्र्यम्, न्यायिक–विवाद:, द्वेषिण:, स्पर्धका:,कटि:,कारक:– शनि:,भौम:

७ **सप्तमस्थानम्–**

सहस्त्रीभवनम्, कलत्रम्, पति:, पत्नी, साहचर्यम्, सहकारिभाव:, दाम्पत्य–जीवनम्,प्रणयसुखम्,कामवासना, स्वाकृष्टा जना:, कामकलाज्ञानम्, प्रेयसी, दाम्पत्योर्मनोमेलनम्, सागरप्रवास:, न्यायिकव्यवहार:, स्पर्धका:, दत्तकपुत्र:, सामाजिकजीवनम्, बस्ती,पण्यव्यवहार कारक:–शुक्र:

८ **अष्टमस्थानम्–**

मृत्युस्थानम्,आकस्मिकधनम्, श्वसुराद् धनम्,संकटम्,पराभव:, शल्यकर्म, मृत्यु:, चिन्ता, पारितोषिकम्, जीवनसहचर्या लाभ:, जननेन्द्रियरोगा:, कारक:–शनि:.

९ **नवमस्थानम्-**

भाग्यभवनम्, भाग्यम्, धर्मः, पितृधनम्, धनपुनःप्राप्तिः, परदेशगमनम्, दानम्, कीर्तिः,धर्मकार्ये व्ययः, भाग्योदयः, पुनर्जन्म, तीर्थयात्रा,गुरुः, जङ्घा,कारकग्रहः-गुरुः

१० **दशमस्थानम्-**

कर्मभवनम्, अधिकारपदम्,अध्ययनम्, राज्यात् पितृतो वा लाभः, सेवाकार्यम्-व्यवसायः, शीलम्, समृद्धिः, सफलता, पितृसुखम्, प्रतिष्ठा, आजीविका, कीर्तिः,कर्मभूमिः,आदर-सत्कारः, सामाजिक-जीवनम्, उच्चपदप्राप्तिः, श्वशूः, पितृस्वभावः, जानुः, मध्यदिनं, कारकग्रहाः-सूर्यः,गुरुः,शनिः,बुधः।

११ **एकादशस्थानम्-**

लाभभवनम्, सेवायां व्यवसाये धनप्राप्तिः, धनप्राप्ति-इच्छा, आयचिन्ता, स्त्री-पुरुषमित्राणि,लाभहानी, रत्नानि, समृद्धिः,वस्त्राणि, आर्थिकलाभः, आश्रयदाता, ज्येष्ठभ्राता,पादौ, कारकग्रहः-गुरुः

१२ **द्वादशस्थानम्-**

व्ययभवनम्,व्ययः, धनहानिः, हानिः,मोक्षः, ऋणम्,शैयासुखम्, अनीति- व्यवसायः, व्यवहारे व्यर्थवितण्डा, बन्धनम्, दण्डः, दीर्घकालीनरुग्णता, विवाहबाह्यसंबन्धाः, गुप्तशत्रवः, पितृभगिनी, पितृव्यः,कुसंस्कारः, कारकग्रहः- शनिः,गुरुः।

बृहद्यवनजातकवृद्धयवनजातकयोर्द्वादशभाववविरणस्य तुलनात्मकमध्ययनस्य महाशोध–प्रबन्धस्य मुख्यो विषयः। तदर्थं प्रकाशितस्य बृहद्यवनजातकस्य तथा प्राच्यविद्यामंदिरप्रकाशितस्य मीनराजकृतस्य वृद्धयवनजातकस्य ग्रन्थस्य च मूलरूपेणाध्ययनं मया प्रथममेव कृतम्। अत्र शपथपूर्वकमुद्घोष्यते यत्–अस्मिन् महाप्रबन्धे मया विविधानां प्रकाशिताप्रकाशितानां मूलभूतानां तथा चानुवादसहितानां ग्रन्थानां, पुस्तकानां , कोशग्रन्थानां च प्रमाणभूतायाः सामग्र्याः सम्यक्तया विवेकबुद्ध्या सुयोग्यस्थानेषु समुपयोगः कृतः, तस्य यथास्थाने सन्दर्भग्रन्थसूच्यां टिप्पण्यां च ऋणनिर्देशः कृतोऽस्ति। तथापि महाप्रबन्धे सर्वं मम प्रतिपादनं, निष्कर्षा निर्णयाश्च सम्पूर्णतया मौलिकाः स्वकीयाश्च सन्ति। एतादृशमध्ययनं न केनाप्यद्यावधि विहितमिति मम संशोधनं नावीन्यपूर्णं ज्ञानवर्धकं चास्तीति सविनयं–हृदयपूर्वकं निवेद्यते । बृहद्यवनजातकस्य वृद्धयवनजातकस्य तथा च विविधगौरीजातकादिजातकग्रन्थानां गुर्जरभाषायां, हिन्दीभाषायां, आङ्गभाषायां च अनुवादकरणे मम मनीषा वर्तते। द्विशताधिकानां जातकग्रन्थानां ताजिक–ग्रन्थानां च यथाशक्यं संकलनं कृत्वा परिचयात्मकेतिहासलेखने मम दृढो निश्चयः।

इत्थं मम संशोधनं वर्तते। ज्योतिषशास्त्रीयजातकग्रन्थयोर्बृहद्यवनजातक–वृद्धयवनजातकयोर्द्वादशभावविचाराणां मूलग्रन्थाधारेणाध्ययनं तयोस्तुलनात्मकं विवेचनं मया प्रथमवारमेव विहितमिति विनम्रतया विनिवेद्यते।

# प्रथमं परिशिष्टम्

# बृहद्यवनजातकस्य

# द्वादशभावविवरणश्लोकाः

# बृहद्यवनजातकम् ।

## १

## प्रथमोऽअध्याय

द्वादशभावेषु ग्रहभवनेशसहितफलानि लिख्यन्ते । तत्रादौ तनुभवनम् ।

अमुकाख्यममुकदैवममुकग्रहयुतममुकग्रहावलोकितं न वेति ।

### तत्र विलोकनीयानि ।( १.१ )

रूपं तथा वर्णविनिर्णयश्च
चिह्नानि जातिर्वयसः प्रमाणम् ।
सुखानि दुःखान्यपि साहसं च
लग्ने विलोक्यं खलु सर्वमेतत् ।। १ ।।

### लग्नफलम् ।( १.२ )

मेषोदये जन्म यदा भवेज्व
स्वपित्तरोगं स्वजनापमानम् ।
दुष्टैर्वियोगं कलहं च दुःखं
शस्त्राभिघ्यातं च धनक्षयं च ।। १ ।।

वृषोदये श्वेततनुर्मनुष्यः
श्लेष्माधिकः कोधपरः कृतघ्नः ।
सुमन्दबुद्धिः स्थिरतासमेतः
पराजितः स्त्रीभृतकः सदैव ।। २ ।।

तृतीयलग्ने पुरुषोऽतिगौरः
स्त्रीवित्तचिन्तापरिपीडिताङ्गः ।
दूतः प्रसन्नः प्रियवाग्विनीतः
समृद्धियोगी च विचक्षणश्च ।। ३ ।।

कर्कोदये गौरवपुर्मनुष्यः

पित्ताधिकः पुष्टतनुः प्रगल्भः ।

जलावगाहानुरतोऽतिबुद्धिः

शुचिः क्षमी धर्मरुचिः सुखी स्यात् ।।४।।

सिंहोदये पाण्डुतनुर्मनुष्यः

पित्तानिलाभ्यां परिपीडिताङ्गः ।

प्रियामिषोऽरण्यचरः सुतीक्ष्णः

शूरः प्रगल्मः सुतरां नरो हि ।।५ ।।

कन्याविलग्ने कफपित्तयुक्तो

भवेन्मनुष्यः सुखकान्तिमाश्च ।

श्लेष्मार्दितः स्त्रीविजनः सुभीरु-

र्मायाधिकः कामकदर्थिताङ्गः ।।६ ।।

तुलाविलग्ने च भवेन्मनुष्यः

श्लेष्मान्वितः सत्यपरः सदैव ।

पुण्यप्रियः पार्थिवमानयुक्तः

सुरार्चने तत्पर एव कल्पः ।।७ ।।

लग्नेऽष्टमे कोपपरो न सत्यो

भवेन्मनुष्यो नृपपूजिताङ्गः।

गुणान्वितः शास्त्रकथानुरक्तः

प्रमर्दकः शत्रुगणस्य नित्यम् ।।८।।

चापोदये राज्ययुतो मनुष्यः

कार्यप्रधृष्टो द्विजदेवभक्तः ।

तुरङ्गयुक्तः सुहृदैः प्रयुक्त-

स्तुरङ्गजङ्घश्च भवेत्सदैव ।।९ ।।

मृगोदये तोषरतः सुतीव्रो

भीरुः सदा पापरतश्च धूर्तः ।

श्लेष्मानिलाभ्यां परिपीडिताङ्गः

सुदीर्घगात्रः परवञ्चकश्च ।। १० ।।

घटोदये सुस्थिरतासमेतो

वाताधिकः स्तेयनिवेशदक्षः ।

सुस्निग्धशत्रुप्रमदास्वभीष्टः

सिद्धानुरक्तो जनवल्लभश्च ।। ११ ।।

मीनोदये पापरतो धनाढ्

यो भवेन्मनुष्यः सुरतानुकूलः ।

सुपण्डितः स्थूलतनुः प्रचण्डः

पित्ताधिकः कीर्तिसमन्वितश्च ।। १२ ।।

## अथ ग्रहफलम् ( १.३ )

### सूर्यफलम्

लग्नेऽर्केऽल्पकचः कियालसतनुः क्रोधी प्रचण्डोन्नतो

मानी लोचनरुक्सुकर्कशतनुः शूरोऽक्षमी निर्घृणः ।

फुल्लाक्षः शशिभे क्रिये स्थितिहरः सिंहे निशान्धः पुमान्

दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां भवेत् ।। १ ।।

### चन्द्रफलम्

दाक्षिण्यरूपधनभोगगुणैर्वरेण्य-

श्चन्द्रे कुलीरवृषभाजगते विलग्ने ।

उन्मत्तनीचबधिरो विकलश्च मूकः

शेषे पुमान् भवति हीनतनुर्विशेषात् ।। २ ।।

**भौमफलम्**

अतिमतिभ्रमतां च कलेवरं

क्षतयुतं बहुसाहससंगतम् ।

तनुभृतां कुरुते तनुसंस्थितो-

ऽवनिसुतो गमनागमनानि च ।। ३ ।।

**बुधफलम्**

शान्तो विनीतः सुतरामुदारो

नरः सदाचाररतोऽतिधीरः ।

विद्वान्कलावान्विपुलात्मजश्च

शीतांशुसूनौ जनने तनुस्थे ।। ४ ।।

**गुरुफलम्**

विद्यासमेतोऽमिमतो हि राज्ञां

प्राज्ञः कृतज्ञो नितरामुदारः ।

नरो भवेच्चारुकलेवरश्च

तनुस्थिते देवगुरौ बलाढ्ये ।। ५ ।।

**भृगुफलम्**

बहुकलाकुशलो विमलोक्तिकृ-

त्सुवदनामदनानुभवः पुमान् ।

अवनिनायकमानधनान्वितो

भृगुसुते तनुभावमुपागते ।। ६ ।।

**शनिफलम्**

प्रसूतिकाले नलिनीशसूनौ

स्वोच्चत्रिकोणर्क्षगते विलग्ने ।

कुर्यान्नरं देशपुराधिनाथं

शेषर्क्षसंस्थे सरुजं दरिद्रम् ।।७ ।।

**राहुफलम्**

लग्ने तमो दुष्टमतिस्वभावं

नरं च कुर्यात्स्वजनानुवञ्चकम् ।

शीर्षव्यथां कामरसेन युक्तं

करोति वादैर्विजयं सरोगम् ।।८ ।।

**केतुफलम्**

केतुर्यदा लग्नगः क्लेशकर्ता

सरोगाद्विभोगाद्भयं व्यग्रता च ।

कलत्रादिचिन्ता महोद्वेगता च

शरीरेऽपि बाधा व्यथा मातुलस्य ।।९ ।।

**अथ तनुभवनेशफलम् ( १.४ )**

तनुपतिस्तनुगो मदनानुगो

गतरुजं कुरुते बहुजीवितम् ।

अतिबलो नृपतेः कुलमन्त्रिणं

सुखविलासयुतं सधनं सदा ।।१ ।।

तनुपतिर्धनभावगतो भवे-

द्धनयुतं पृथुदीर्घशरीरिणम् ।

विलघुजीवितमन्त्रकुटुम्बिनं

विविधधर्मयुतं कुरुते नरम् ।। २ ।।

तनुपतिः सहजे सहजप्रदो

भवति मित्रयुतोऽपि पराक्रमम् ।

बलहतश्च सदा न पवित्रतां

शुभवचः शुभदृष्टिवशान्नृणाम् ।। ३ ।।

सुखगते तनुते तनुपे सुखं

विविधभक्ष्यविलाससुपूजितम् ।

नृपतिपूज्यतमं जननीसुखं

गजरथाश्वसुखं सुरसाशिनम् ।। ४ ।।

तनुपतिः सुतगस्तनुते सुता-

न्विनयधर्मयुतान्बहुजीवितान् ।

विदितमिश्रखलः शुभकर्मणां

भवति गानकलासु रतो नरः ।। ५ ।।

रिपुगतस्तनुपः सरिपुं नरं

सहजमायुसुतं सुखमातुलम् ।

पशुकृतं जननीसुखसभृतं

कृपणमेव धनैर्विविधैर्युतम् ।। ६ ।।

प्रथमलग्नपतिर्मनुजः स्त्रियं

सुखधनैः शुभशीलविलासिनम् ।

सविनयं वनितोपयुतं च हि

सफलरूपयुतं कुरुते सदा ।। ७ ।।

प्रथमभावपतिर्मृतिगो मृतिं

विदधते कृपणं धनवञ्चकम् ।

विविधाकष्टयुतं शुभदृष्टितो

भवति मानवपुः कृतवान् सुधीः ।। ८ ।।

तनुपस्तनुते तपसा युतं

सहजमित्रवदान्यविदेशकृत् ।

सुखसुशीलनिरेकयशोनिधि-

र्नृपतिपूज्यतमो मनुजो नृणाम् ।। ९ ।।

दशमधामगते तनुनायके

जनकमातृसुखं नृपतेः समम् ।

सकलभोगसुखं शुभकर्मणां

कविवरं गुरुपूजनकं वरम् ।। १० ।।

सुबहुजीवित आयगते नर-

स्तनुपतौ शुभभाव्समन्विते ।

गजरथाश्वसकोशनृपात्सुखं

विविधकीर्तिविवेकविचारणः ।। ११ ।।

तनुपतिर्व्ययगः कटुवाक्पुमा-

न्खलसमागमदाहकरो घृणी ।

व्ययकरः सहजः परदेशगः

सहजगोत्ररिपुर्ह्यरिसंयुतः ।। १२ ।।

## अथ दृष्टेः फलम् ( १. ५ )

### रविदृष्टिफलम्

तनुगृहे यदि सूर्यनिरीक्षिते
श्रमति देशविदेशमसौ सदा ।
सुकृतभाग्यफलं सुकृतक्षयं
गृहसुखं च करोति निपीडितम् ।। १ ।।

### चन्द्रदृष्टिफलम्

तनुगृहे यदि चन्द्रनिरीक्षिते
विकलतां च करोति नरस्य हि ।
तदनु मार्गमते च जलं सदा
सरलता सुकलाक्रयशोभितः ।। २ ।।

### भौमदृष्टिफलम्

आद्यभावसदने कुजेक्षिते
पित्तकोपग्रहणीरुजः सद्रा ।
अङ्घिनेत्रविकलं करं नरं
जीवितोऽपि तनयादिनाशनम् ।। ३ ।।

### बुधदृष्टिफलम्

तनुगृहे यदि चन्द्रसुतेक्षिते
वणिजराजकुले पुरुषोन्नतिः ।
स्वजनसौख्ययुतः प्रसवः स्त्रिय-
स्तदनु जीवचिरायुकरो भवेत् ।। ४ ।।

**गुरुदृष्टिफलम्**

तनुगृहे यदि देवपुरोहिते

गृहसुखं प्रचुरं खलु भाग्यवान् ।

सकलवित्तगृहे ग्रहसंबले

व्ययकरश्च चिरायुयुतो भवेत् ।।५ ।।

**भृगुदृष्टिफलम्**

सम्पूर्णदृष्टिर्यदि जन्मलग्ने

शुको यदा स्यात्तनुरुत्तमा च ।

नानार्थसंभोगकलत्रमौख्यं

सौन्दर्यरूपं खलु भाग्ययुक्तः ।।६ ।।

**शनिदृष्टिफलम्**

तनुगृहे यदि मन्दनिरीक्षिते

तनुसुखं न करोति नरः सदा ।

अनिलपीडितवातरुजी भवे-

न्न च गुणाधिक आलयकृद्भवेत् ।।७ ।।

अथ तनोर्ग्रहवर्षसंख्याफलम्

सप्तविंशति चन्द्रमाः सुखकरं सूर्यस्तिथिः पीडनं

भौमो बाण अरिष्टकालकदशं कीर्तिं बुधो यच्छति ।

प्रजामष्टमवत्सरे सुरगुरुर्दैत्येश्वरः सप्तभूः

दारान्यः परतः शरार्कितमसारिष्टं करोति ध्रुवम् ।।८ ।।

## अथ विचारः ।( १. ६ )

विलोकिते सर्वखगैर्विलग्ने

लीलाविलासैः सहितो बलीयान् ।

कुले नृपालो विपुलायुरेवा-

भयेन युक्तोऽरिकुलस्य हन्ता ।। १ ।।

सौम्यास्त्रयो लग्नगता यदि स्युः

कुर्वन्ति जातं नृपतिं विनीतम् ।

पापास्त्रयो दुःखदरिद्रशोकै-

र्युतं नितान्तं बहुभक्षकं च ।। २ ।।

लग्नादद्यूनषडष्टकेऽपि च शुभाः पापैर्न युक्तेक्षिताः

मन्त्री दण्डपतिः क्षितेरधिपतिः स्त्रीणां बहूनां पतिः ।

दीर्घायुर्गदवर्जितो गतभयः सौन्दर्यसौख्यान्वितः

सच्छीलो यवनेश्वरैर्निगदितो मर्त्यः प्रसन्नः सदा ।। ३ ।।

मेषे शशाङ्कः कलशे शनिश्च भानुर्धनुःस्थश्च भृगुर्मृगस्थः ।

परस्य वित्तं न कदापि भुङ्क्ते स्वबाहुवीर्येण नरो वरेण्यः ।। ४ ।।

चतुर्षु केन्द्रेषु भवन्ति पापा

वित्तस्थिताश्चापि च पापखेटाः ।

नरो दरिद्रो नितरां निरुक्तो

भयंकरश्चात्मकुलोद्भवानाम् ।। ५ ।।

सुतास्थितो वा यदि मूर्तिवर्ती

बृहस्पती राज्यगतः शशाङ्कः ।

नरस्तपस्वी विजितेन्द्रियश्च

स्याद्राजसो बुद्धिविराजमानः ।। ६ ।।

कन्यायां च तुलाधरे सुरगुरुर्मेषे वृषे वा भृगुः
सौम्यो वृश्चिकराशिगः शुभखगैदृष्टः कुले श्रेष्ठताम् ।
नूनं याति नरो विचारचतुरश्चौदार्यजातादरो
नित्यानन्दमयो गुणैर्वरतरो निष्ठापरो वित्तवान् ।।७ ।।

षष्ठे ससौरौ भवतो बुधारौ
नरो भवेच्चौरपरो नितान्तम् ।
कुकर्मसामर्थ्यविधेर्विशेषा-
त्परान्नपाणिः कुगुणस्थितश्च ।।८ ।।

प्रसूतिकाले किल यस्य जन्तोः
कर्केऽर्कजश्चेन्मकरे महीजः ।
चौर्यप्रसङ्गोद्भवचण्डदण्ड
शाखादिदण्डाश्च भवन्ति नूनम् ।।९ ।।

कुम्भे च मीने मिथुनाभिधाने
शरासने स्युर्यदि पापखेटाः ।
कुचेष्टितः स्यात्पुरुषो नितान्तं
वज्रेण नूनं निधनं हि तस्य ।।१० ।।

यस्य प्रसूतौ किल नैधनस्थः
सौम्यग्रहः सौम्यनिरीक्षितश्च ।
तीर्थान्यनेकानि भवन्ति तस्य
नरस्य सम्यङ्मतिसंयुतश्च ।।११ ।।

बुधत्रिभागेन युते विलग्ने
केन्द्रस्थचन्द्रेण निरीक्षिते च ।
राजान्वये यद्यपि जातजन्मा
स्यान्नीचकर्मा मनुजः प्रकामम् ।।१२ ।।

भानुर्द्वितीये भवने शनिश्च

निशोथिनीशो गगनाश्रितश्च ।

भूनन्दने चैव मदे तदानीं

स्यान्मानवो हीनकलेवरश्च ।। १३ ।।

पापान्तराले च भवेत्कलावा-

न्कलार्कसूनुर्मदनालयस्थः ।

कलेवरं स्याद्विकलं च तस्य

श्वासक्षयप्लीहकगुल्मरोगैः ।। १४ ।।

शशी दिनेशस्य यदा नवांशे

भवेद्दिनेशः शशिनो नवांशे ।

एकत्र संस्थौ यदि तौ भवेतां

लक्ष्मीविहीनो मनुजः स नूनम् ।। १५ ।।

व्ययेऽरिभावे निधने धने च

निशाकरारार्कशनैश्चराः स्युः ।

बलान्वितास्ते त्वनिलाधिकत्वा-

त्तेजोविहीने नयने प्रकुर्युः ।। १६ ।।

धनव्ययस्थानगताश्च शुक्रो

वक्रोऽथवा कर्णरुजं करोति ।

नक्षत्रनाथो यदि तत्र संस्थो

दृग्दोषकारी कथितो मुनीन्द्रैः ।। १७ ।।

यदि भवन्ति हि कार्श्यतनु-

र्भवेत्तनुगता रविराहुकुजार्कजाः ।

रुधिरपाण्डुपराः परतापदाः

शुभतमा गददानकरा विदुः ।। १८ ।।

तनुगतं खलखेचरमन्दिरं

त्रिदशपूज्यशशाङ्कसमन्वितम् ।

शिरसि घातगदानिलशूलयु-

ग्भवति नातिबलो जठराग्निना ।। १९ ।।

गुरुशशाङ्कबुधास्तु जितास्तनौ

वपुषि पुष्टिकराः शुभकान्तिदाः ।

गदविनाशकराः कथिता बुधै-

रतिखलाः कृशतापकराः परम् ।। २० ।।

एते हि योगाः कथिता मुनीन्द्रैः

सान्द्रं बलं यस्य नभश्चरस्य ।

कल्प्यं फलं तस्य च पाककाले

सुनिर्मला यस्य मतिस्तु तेन ।। २१ ।।

**इति भावविवरणं समाप्तम्।। १ ।।**

**२**

## अथ द्वितीयं धनभवनम् ।

---

अमुकाख्यममुकदैवत्यममुकग्रहयुतममुकदृष्ट्या चात्र विलोकितं तथा स्वस-मिना दृष्टं वा युतं न वेति ।।

**तत्र विलोकनीयानि ।( २.१ )**

स्वर्णादिधातुक्रयविक्रयश्च

रत्नादिकोशेऽपि च संग्रहश्च ।

एतत्समस्तं परिचिन्तनीयं

धनाभिधाने भवने सुधीभिः ।। १ ।।

## अथ धनभावे लग्नफलम् ।( २.२ )

मेषे धनस्थे कुरुते मनुष्यं

धनैश्च पूर्ण विविधैः प्रसूतैः ।

भाग्याधिकं भूरिकुटुम्बयुक्तं

चतुष्पदाढ्यं बहुपण्डितज्ञम् ।। १ ।।

वृषे धनस्थे लभते मनुष्यः

कृषिप्रयासेन धनं सदैव ।

अनाभिघातश्च चतुष्पदाढ्यं

तथा हिरण्यं मणिमुक्तकार्थम् ।। २ ।।

तृतीयलग्ने धनगे मनुष्यो

धनं लभेत्स्त्रीजननश्च नित्यम् ।

रूप्यं तथा काञ्चनजं प्रभूतं

दयाधिकं पुष्टिभिरेव सख्यः ।। ३ ।।

चतुर्थराशिर्धनगो मनुष्यो

धनं लभेद् वृक्षजमेव नित्यम् ।

जायोद्भवं सत्सुखमिष्टभोज्यं

नयार्जितं प्रीतिकरं सुतानाम् ।। ४ ।।

सिंहे धनस्थे लभते मनुष्यो

धनान्तपारं नृजनोत्तमांशम् ।

सर्वोपकारप्रवणं प्रभूतं

स्वविक्रमोपर्जितमेव नित्यम् ।। ५ ।।

कन्योदये वित्तगते मनुष्यो

धनं लभेद्भूमिपतेः सकाशात् ।

हिरण्यरूप्ये मणिमुक्तजातं

मजाश्वनानाविधवित्तजं च ।। ६ ।।

तुले धनस्थे बहुपुण्यजातं

धनं मनुष्यो लभते प्रभूतम् ।

पाषाणजं मृण्मयभूमिजातं

सस्योद्भवं कर्मजमेव नित्यम् ।। ७ ।।

धनेऽलिलग्ने प्रभवे च यस्य

स्वधर्मशीलं प्रकरोति नित्यम् ।

विलासिनीकामपरः सदैव

विचित्रवाक्यं द्विजदेवभक्तम् ।। ८ ।।

धनुर्धरे वित्तगते मनुष्यो

धनं लभेत्स्थैर्यविधानजातम् ।

चतुष्पदाढ्यं विविधं यशश्च

रणोद्भवं धर्मविधानलब्धम् ।। ९ ।।

मृगे धनस्थे लभते मनुष्यो

धनं प्रपञ्चैर्विविधैरुपायैः ।

निजेच्छयाथो वशकृन्नृपाणां

कृषिक्रियाभिश्च विदेशसङ्गात् ।। १० ।।

घटे धनस्थे लभते मनुष्यो

धनं प्रभूतं फलपुष्पजातम् ।

जलोद्भवं साधुजनस्य भोज्यं

महाजनोऽर्थं च परोपकारैः ।। ११ ।।

मत्स्ये धनस्थे लभते मनुष्यो

धनं प्रभूतैर्नियमोपवासैः ।

विद्याप्रभावान्निधिसङ्गमाच्च

मातापितृभ्यां समुपार्जितं च ।। १२ ।।

## अथ ग्रहफलम् । ( २.३ )

**सूर्यफलम् ।**

धनसुतोत्तमवाहनवर्जितो

हतमतिः सुजनोज्झितसौहृदः ।

परगृहोपगतो हि नरो भवे-

दिनमणिर्द्रविणे यदि संस्थितः ।। १ ।।

सुखात्मजद्रव्ययुतो विनीतो

भवेन्नरः पूर्णविधौ द्वितीये ।

क्षीणे स्खलद्वाग्विधनोऽल्पबुद्धि-

र्न्यूनाधिकत्वे फलतारतम्यम् ।। २ ।।

**भौमफलम् ।**

अधनतां कुजनाश्रयतां तथा

विमतितां कृपयातिविहीनताम् ।

तनुभृतां विदधाति विरोधितां

धननिकेतनगोऽवनिनन्दनः ।। ३ ।।

**बुधफलम् ।**

विमलशीलयुतो गुरुवत्सलः

कुशलताकलितार्थमहासुखः ।

विपुलकान्तिसमुन्नतिसंयुतो

धननिकेतनगे शशिनन्दने ।। ४ ।।

**गुरुफलम् ।**

सद्रूपविद्यागुणकीर्तियुक्तः

संत्यक्तवैरो नितरां गरीयान् ।

त्यागी सुशीलो द्रविणेन पूर्णो

गीर्वाणवन्द्ये द्रविणोपयाते ।। ५ ।।

**भृगुफलम् ।**

सदन्नपानाभिरतं नितान्तं

सद्वस्त्रभूषाधनवाहनाढ्यम् ।

विचित्रविद्यं मनुजं विदध्या-

द्धनोपपन्नो भृगुनन्दनोऽयम् ।। ६ ।।

**शनिफलम् ।**

अन्यालयस्थो व्यसनाभिभूतो

जनोज्झितः स्यान्मनुजश्च पश्चात् ।

देशान्तरे वाहनराजमान्यो

धनाभिधाने भवनेऽर्कसूनौ ।। ७ ।।

**राहुफलम् ।**

धनगते रविचन्द्रविमर्दने

मुखरताङ्कितभावयुतो भवेत् ।

धनविनाशकरो हि दरिद्रतां

स्वसुहृदां न करोति वचोग्रह्यम् ।। ८ ।।

**केतुफलम् ।**

धने केतुगे धान्यनाशं धनं च

कुटुम्बाद्विरोधो नृपाद् द्रव्यचिन्ता ।

मुखे रोगता सन्ततं स्यात्तया च

यदा स्वे गृहे सौम्यगेहे च सौख्यम् ।। ९ ।।

इति धनभावे ग्रहफलम् ।

**अथ धनभवनेशफलम् ।( २. ४ )**

द्रव्याधिपे लग्नगते धनी स्या-

द्व्यापारवृत्तिः कृपणोऽतिभोगी ।

सुखान्वितो भूपतिसत्कृतो भवे-

त्सुकर्मकृत्सुन्दरनेत्रपत्नी ।। १ ।।

द्रव्याधिपे द्रव्यगते धनी स्या-

त्पुमान्मवेल्लाभयुतोऽपि मन्त्री ।

कुटुम्बयुक्तो मणिरत्नभोगी

विभूषितो भोगयुतो जितेन्द्रियः ।। २ ।।

धनाधिपे भ्रातृगते खलः स्या-

त्सोद्वेगयुग्भातृसुखेन हीनः ।

सूर्योद्भवे भ्रातृगते विरोधी

चौरः कुजे चार्कसुते विबन्धुः ।। ३ ।।

धनाधिपे तुर्यगते धनी स्या-

न्मातुर्गुरोर्लब्धधनः सतेजाः ।

आयुष्यवान्सौम्यखगैः सदैव

क्रूरैर्दरिद्रो बहुरोगभाक्स्यात् ।। ४ ।।

धनाधिपे पञ्चमगे सुतानां

सौख्यं भवेल्लाभसमन्वितं च ।

सौम्यैरुदारः कृपणः खलैश्च

दुःखान्वितं दुष्टसुतं विदध्यात् ।। ५ ।।

धनाधिपे षष्ठगृहे रिपुघ्नं

सदा नरं सञ्चयकारकं च ।

बलाभिभूतैः खचरैः शुभैश्च

पापैर्दरिद्रः सरिपुः खलः स्यात् ।। ६ ।।

धनाधिपे सप्तमगे सुरूपं

चिन्तान्वितं संग्रहणी धनी स्यात् ।

भार्याविलासेन युतः सुताढ्यः

क्रूरान्विते हीनसुतो नरः स्यात् ।। ७ ।।

धनाधिपो मृत्युगतः करोति

मनाक्कलिं घातकरं स्वदेहे ।

उत्पन्नभुग्भोगयुतं सुरूपं

धनाधिपं भावयुतं पुमांसम् ।। ८ ।।

धर्माश्रिते द्रव्यपतौ स दाता

प्रसिद्धभाग्यः सबलो व्रती स्यात् ।

पुण्ये रतिः सौम्ययुतः खलेन

हीनो दरिद्रः कृपणः खलः स्यात् ।। ९ ।।

द्रव्याधिनाथो दशमे यदि स्या-

न्नरेन्द्रमान्यः सुभगो यशस्वी ।

मातुः पितुर्भक्तियुतः सुभोगी

खलेऽन्यथा स्यात्पितृमातृवैरी ।। १० ।।

लाभाश्रितो द्रव्यपतिः श्रियः पति-

र्मन्त्री नृपस्य व्यवहारदक्षः ।

व्यापारयुक्तः पुरुषो यशस्वी

लाभान्वितो भोग्यपरः सुखी च ।। ११ ।।

विदेशगो द्रुष्टमना व्ययाश्रितो

द्रव्यधिपः पापरतो जडात्मा ।

कापालिको म्लेच्छजनाभिसक्तः

क्रूरोऽतिचौरो बलवान्नरः स्यात् ।। १२ ।।

## अथ धनभावे दृष्टिफलम् ।( २.५ )

### सूर्यदृष्टिफलम् ।

धनगृहे सति भास्करवीक्षिते

पितृधनः पितृनाशकरश्च हि ।

स्वपराक्रमजीविचतुष्पदा-

त्सुखकरोऽपि च गुह्यनिपीडनम् ।। १ ।।

कुटुम्बभावे यदि चन्द्रदृष्टि:

कुटुम्बसौख्यं ह्यतुलं करोति ।

स्ववंशवृद्धिं स्वशरीरपीडां

जलाद्भयं लोहभयं समाष्टके ।। २ ।।

**भौमदृष्टिफलम्**

कुटुम्बगेहे यदि भौमदृष्टि:

कुटुम्बसौख्यं न भवेन्नरस्य हि ।

द्रव्यस्य प्राप्तेर्विलयो दिने दिने

गुदोदरे व्याधिरुगर्दित: स्यात् ।। ३ ।।

**बुधदृष्टिफलम् ।**

धनगृहे सति चन्द्रसुतेक्षिते

धनसुखं ह्यतुलं च भवेत्सदा ।

तदनु भाग्ययुतो बहुजीवित:

सकलभोगविलासयुतो नर: ।। ४ ।।

**गुरुदृष्टिफलम् ।**

धनगृहेऽमरपूजितवीक्षिते

धनचयं प्रकरोति नर: सदा ।

बहुलभाग्ययुत: शुभबुद्धिमा-

न्स्वजनपूर्णसुखं प्रकरोति हि ।। ५ ।।

**भृगुदृष्टिफलम् ।**

धनगृहे सति शुक्रनिरीक्षिते

धनसुखं च करोति दिने दिने ।

स्वजनसौख्यकरो नितरां सदा

श्रमकरः स्वजनारिविनाशकः ।। ६ ।।

**शनिदृष्टिफलम् ।**

धनगृहे सति मन्दनिरीक्षिते

धनविनाशकरस्वजनो रिपुः ।

तदनु वर्षत्रयोदशकष्टकृ-

त्सलिलतो भयमप्यथ वायुजम् ।। ७ ।।

**राहुदृष्टिफलम् ।**

कुटुम्बभावे यदि राहुदृष्टिः

कुटुम्बसौख्यं न करोति पुंसाम् ।

जलाद्भयं चैव चतुर्दशेऽब्दे

तथाष्टमे वर्ष उपैति मृत्युम् ।। ८ ।।

**इति दृष्टिफलम् ।**

## अथ धनभावे ग्रहाणां वर्षसंख्या ।( २. ६ )

अत्यष्टिवर्षहानी रविमीनो धनेन्दुभाब्दे प्रपीडितमसृङ्नवाब्दे स्वनाशं

षट्त्रिंशकैर्धनकृतिं विदधे गुरुमाब्दे भूपमान**मुशना** हि खषष्टिलक्ष्मीम् ।। १ ।।

## अथ विचारः ।( २ .७ )

भानुभूतनयभानुतनूजैश्चेद्धनस्य भवनं युतदृष्टम् ।

जायते हि मनुजो धनहीनः किं पुनः कृशशशोक्षितयुक्तम् ।। १ ।।

धनालयस्थौ किल मङ्गलेन्दू

इन्द्वीक्षितो मन्दविलोकितश्च ।

निर्धनस्थानगतः करोति

धनाभिवृद्धिं हि बुधेन दृष्टः ।। २ ।।

धने दिनेशोऽतिधनानि नूनं

करोति मन्देन च वीक्षितो वा ।

शुभाभिधाना धनभावसंस्था

नानाधनाभ्यागमनानि कुर्युः ।। ३ ।।

गीर्वाणवन्द्यो द्रविणोपयातः

सौम्येक्षितः स्याद्द्रविणं करोति ।

सौम्येन दृष्टो धनभावसंस्थः

सोमस्य सूनुर्धनहानिदः स्यात् ।। ४ ।।

धनस्थितो ज्ञेन विलोकितश्च

कृशः शशाङ्कोऽपि धनादिकानाम् ।

पूर्वार्जितानां कुरुते विनाशं

नवीनवित्तप्रतिबन्धनं च ।।५ ।।

वित्तस्थितो दैत्यगुरुः करोति

वित्तागमं सोमसुतेन दृष्टः ।

स एव सौम्यग्रहयुक्तदृष्टः

प्रकृष्टवित्ताप्तिकरो नराणाम् ।। ६ ।।

अत्र धने पापदृष्ट्यधिकत्वाद्धनहानिः सौम्याधिकदृष्ट्या भवेद्धनप्राप्तिः ।।

**३**

## अथ तृतीयभावं सहजम् ।

---

अमुकाख्यममुकदैवत्यममुकग्रहयुतं स्वस्वामिना दृष्टं वा न दृष्टमन्यैः शुभाशुभैर्ग्रहैर्दृष्टं युतं न वेति ।।

### तत्र विलोकनीयम् । ( ३. १ )

सहोदराणामथ किंकराणां

पराक्रमाणामुपजीविनां च ।

विचारणा जातकशास्त्रविद्भि-

स्तृतीयभावे नियमेन कार्या ।। १ ।।

### सहजभावे लग्नफलम् ( ३.२ )

तृतीयसंस्थे प्रथमे च राशौ

मित्रं द्विजातेश्च भवेन्मनुष्यः ।

परोपकारप्रवणः शुचिश्च

प्रभूतविद्यो नृपपूजिताङ्गः ।। १ ।।

वृषे तृतीये लभते मनुष्यो

मित्रं नरेन्द्रं प्रचुरं प्रतापम् ।

सुवित्तदं भूरि यशोनिधानं

शूरं कविं ब्राह्मणवित्तरक्षम् ।। २ ।।

तृतीयसंस्थे मिथुने च लग्ने

करोति मर्त्यं वरयानयुक्तम् ।

स्त्रीवल्लभं सर्वमुदारचेष्टं

कुलाधिकं पूज्यतमं नृपाणाम् ।। ३ ।।

कुलीरराशौ सहजे प्रयाते

मित्रं लभेत्सद्गुणवल्लभत्वम् ।

कृषीवलं धर्मकथानुक्तं

सदा सुशीलं सुमहत्प्रतिष्ठम् ।। ४ ।।

सिंहे तृतीये लभते मनुष्यः

शूद्रं कुमित्रं परवित्तलुब्धम् ।

वधात्मकं पापकथानुरक्तं

सदार्थयुक्तं जनगर्हितं च ।। ५ ।।

तृतीयभावे किल कन्यकाख्ये

शास्त्रानुरक्तं मधुजं सुशीलम् ।

नानासुहृत्संस्थितमल्पकोपं

प्रियातिथिं देवगुरुप्रभक्तम् ।। ६ ।।

तृतीयसंस्थे हि तुलाभिधाने

मैत्री भवेत्पापरतैर्मनुष्यैः ।

त्याज्यात्मकस्तोककथानुरक्तः

सार्द्धं च भृत्यैश्च सुतार्थयुक्तः ।। ७ ।।

अलौ तृतीये भवने नरस्य

मैत्री सदा पापयुतैर्नरेन्द्रैः ।

म्लेच्छैः कृतघ्नैः कलहानुरक्तै-

र्लज्जाविहीनैर्मनुजैर्हि रौद्रैः ।।८ ।।

चापे तृतीये लभते मनुष्यो

मैत्रीं सुशूरैर्नृपसेवकैश्च ।

वित्तेश्वरैर्धर्मपरैः प्रसन्नैः

कृपानुरक्तैर्बहुकोविदैश्च ।।९ ।।

मृगस्तृतीये च नरस्य यस्य

करोति सौख्यं सततं सुखाढ्यम् ।

नित्यं सुहृद्देवगुरुप्रसक्तं

महाधनं पण्डितमप्रमेयम् ।।१० ।।

कुम्भे तृतीये लभते मनुष्यो

मैत्रीं व्रतज्ञैर्बहुकीर्तियुक्तैः ।

क्षमाधिकैः सत्यपरैः सुशीलै-

र्गीतप्रियैः साधुपरैः खलैश्च ।।११ ।।

तृतीयभावे स्थितमीनराशौ

नरं प्रसूते बहुवित्तयुक्तम् ।

पुत्रान्वितं पुण्यधनैरुपेतं

प्रियातिथिं सर्वजनाभिरामम् ।।१२ ।।

**इति सहजे लग्नफलम्।**

## अथ ग्रहफलम् ( ३.३ )

**सूर्यफलम्**

प्रियंवदः स्याद्धनवाहनाढ्यः
सुकर्मयुक्तोऽनुचरान्वितश्च ।
मितानुजः स्यान्मनुजो बलीया-
न्दिनाधिनाथे सहजेऽधिसंस्थे ।। १ ।।

**चन्द्रफलम् ।**

हिंस्रः सगर्वः कृपणोऽल्पबुद्धि-
र्भवेन्नरो बन्धुजनाश्रयश्च ।
दयामयाभ्यां परिवर्जितश्च
द्विजाधिराजे सहजप्रसूतौ ।। २ ।।

भौमफलम्

भूपप्रसादोत्तमसौख्यमुच्चैः
कथारतश्चारुपराकमश्च ।
धनानि च भातृसुखातिहानि-
र्भवेन्नराणां सहजे महीजे ।। ३ ।।

**बुधफलम् ।**

साहसी च परिवारजनाढ्य-
चित्तशुद्धिरहितो हतसौख्यः ।
मानवः कुशलवान् हितकर्ता
शीतभानुतनुजेऽनुजसंस्थे ।। ४ ।।

**गुरुफलम् ।**

सौजन्यहन्ता कृपणः कृतघ्नः

कान्तासुतप्रीतिविपाचितश्च ।

नरोऽग्निमान्द्याबलतासमेतः

पराक्रमे शुक्रपुरोहितेऽस्मिन् ।।५ ।।

**भृगुफलम् ।**

सहजगे सहजैः परिवारितो

भृगुसुते पुरुषापुरुषैर्नतः ।

स्वजनबन्धुविबन्धनतां गतः

सततमाशुगतिर्गतिविक्रमः ।।६ ।।

**शनिफलम् ।**

राजमान्यशुभवाहनयुक्तो

ग्रामपो बहुपराक्रमशाली ।

पालको भवति भूरिजनानां

मानवो रविसुतेऽनुजसंस्थे ।।७ ।।

**राहुफलम् ।**

न सिंहो न नागो भुजाविक्रमेण

प्रतापीह सिंहीसुते तत्समत्वम् ।

तृतीये जगत्सोदरत्वं समेति

प्रभावेऽपि भाग्यं कुतो यत्र केतुः ।।८ ।।

**केतुफलम् ।**

शिखी विक्रमे शत्रुनाशं च वादं
	धनस्यापि लाभं भयं मित्रतोऽपि ।
करोतीह नाशं सदा बाहुपीडां
	भयोद्वेगतां मानवोद्वेगतां च ।। ९ ।।

**इति ग्रहफलम् ।**

**अथ सहजभवनेशफलम् । ( ३.४ )**

सहजपतौ लग्नगते स्त्रीस्वादलम्पटः स्वजनभेदैः ।
	सेवां करोति मित्रैर्भवेत्कटुकरः पण्डितः पुरुषः ।। १ ।।
यदि धनगे सहजेशे भिक्षुर्धनाल्पजीवितः पुरुषः ।
	बन्धुविरोधी क्रूरैः सौम्यैः पुनरीश्वरः खवरैः ।। २ ।।
सहजगते सहजपतौ नृपमन्त्री सौहृदेऽतिनिपुणश्च ।
	गुरुपूजननिरतो वै नृपतो लाभं परं नरं कुरुते ।। ३ ।।
भ्रातृपतौ तुर्यगते पितृमोदसुखमुदयकृत्तेषाम् ।
	मातुर्वैरकरश्च पापैः पित्रर्थभक्षकः पुरुषः ।। ४ ।।
सहजपे सुतगे बहुबान्धवैः
	सुतसहोदरपालधनी सुखी ।
विषयभुक्परकार्यकरः क्षमी
	ललितमूर्तिरसौ चिरजीवितः ।। ५ ।।
रिपुगते सहजाधिपतौ भवे-
	न्नयनरोमयुतो रिपुमान् भवेत् ।
सहजसज्जनतोऽपि च दुष्टता
	क्रययुतोऽथ रुजा परिपीडितः ।। ६ ।।

युवतिवैरकृदल्पपराक्रमी

सहजभावपतौ मदगे नरः ।

सुभगसुन्दररूपवतीसती-

युवतिपापगृहेषु रतो भवेत् ।। ७ ।।

सहजपेऽष्टमगे सरुषो नरो

मृतसहोदरमित्रजनः खलैः ।

शुभखगः शुभताधनुयुग्भवे-

त्स्वयमपि प्रचुरामयवान्भवेत् ।। ८ ।।

सहजभावपतौ नवमस्थिते

सहजवर्गरतोऽपि वनाश्रयः ।

भवति बालयुतोऽथ पराक्रमी

शुभमतिः खलखेटगृहेऽन्यथा ।। ९ ।।

सहजपे दशमे च नृपात्सुखं

पितृजनैः कुलवृद्धजनाश्रयः ।

बहुसुभाग्ययुतो नयनोत्सवो

भवति मित्रयुतोऽतितरां शुचिः ।। १० ।।

सहजपे शुभलाभपराक्रमी

भगवत्सुतबन्धुभिरन्वितः ।

नृपतिनाभिमतो विजयी नरो

बहुलभोगयुतो निपुणः सदा ।। ११ ।।

व्ययगते सहजे व्ययवाञ्छुचि-

र्निजसुहृद्रिपुरल्पपराक्रमी ।

शुभसमागमतोऽपि शुभं भवे-

त्खलखगैर्जननीनृपतेर्भयम् ।। १२ ।।

**इति सहजभवनेशफलम् ।**

## अथ दृष्टिफलम् ।( ३ . ५ )

### सूर्यदृष्टिफलम् ।

तृतीयगेहे रविवीक्षिते च
सहोदरं पूर्वसुखं विनश्यति ।
पराक्रमे वाभिभवः स्वभाग्ये
नृपाद्भयं चैव न संशयोऽत्र ।। १ ।।

### चन्द्रदृष्टिफलम् ।

सहजगे यदि चन्द्रविलोकिते
भगिनिजन्मकरो न पराक्रमी ।
प्रथमपूर्वधनेन सुखं धनं
तदनु चोत्तरगे सफलार्थदः ।। २ ।।

### भौमदृष्टिफलम् ।

तृतीयभावे यदि भौमदृष्टिः
पराक्रमे सिद्धिमुपैति नूनम् ।
देशान्तरे राजगृहे च मान्यं
सहोदराणां च विनाशनं स्यात् ।। ३ ।।

### बुधदृष्टिफलम् ।

सहजगे द्विजराजसुतेक्षिते
सहजसौख्ययुतश्च नरः सदा ।
वणिजकर्मरतोऽत्र विचक्षणो
नरवरः खलु तीर्थकरोद्यमी ।। ४ ।।

**गुरुदृष्टिफलम् ।**

सुरगुरुर्यदि विक्रममीक्षते
　　सहजसौख्ययुतः पुरुषो भवेत् ।
पितृधनं पितृवर्जितगर्वितः
　　स्वजनबन्धुरतोऽथ च कीर्तिमान् ।। ५ ।।

**भृगुदृष्टिफलम् ।**

सहजगे सति भार्गववीक्षिते
　　सहजसौख्ययुतश्च नरः सदा ।
तदनु पुष्टियुतः किल कन्यका-
　　जनिविदेशगतो नृपपूजितः ।। ६ ।।

**शनिदृष्टिफलम् ।**

यदि पराक्रमगं शनिवीक्षितं
　　बहुपराक्रमवान्बलवान्भवेत् ।
सहजपक्षसुसौख्यविनाशकः
　　फलविपाकदशासु फलं न हि ।। ७ ।।

**राहुदृष्टिफलम् ।**

तृतीयगे राहुनिरीक्षिते च
　　पराक्रमात्सिद्धिमुपैति नूनम् ।
नानार्थसौख्यं बहुपुत्रदुःखं
　　चौराग्निसर्पान्न च राजतो भयम् ।। ८ ।।

**इति सहजभावे दृष्टिफलम् ।**

## सहजभावे वर्षसंख्या ( ३ .६ )

सूर्यो धनं नखमिते सहजे विधुश्च

त्र्यब्देऽनुजाक्षिति सुतोऽनुजमुच्च विश्वे ।

ज्ञोऽर्काब्दवित्तविलयं गुरुतोऽभ्रनेत्रै-

र्मित्राप्तरत्ननखत: प्रकरोति चार्थम् ।। १ ।।

**अथ विचार: ।**

पापालयं चेत्सहजं समस्तै:

पापै: समेतं प्रतिलोकितं च ।

भवेदभाव: सहजोपलब्धे-

स्तद्वैपरीत्येन तदाप्तिरेवम् ।। २।।

नवांशका ये सहजालयस्था:

कलानिधिक्षोणिसुतानुदृष्टा: ।

तावन्मिता: स्यु: सहजा भगिन्य-

श्चान्येक्षिता वै परिकल्पनीया: ।। ३ ।।

कुजेन दृष्टे रविजे तनूजा

नश्यन्ति जाता: सहजा हि तस्य ।

दृष्टे च तस्मिन्**गुरु**भार्गवाभ्यां

शश्वच्छुभं स्यादनुजेषु नूनम् ।। ४ ।।

सौम्येन भूमीतनयेन दृष्ट:

करोति दृष्टिं रविजोऽनुजानाम् ।

शशांकवर्गे सहजे कुजेन

दृष्टे सरोगा: सहजा भवेयु: ।। ५ ।।

दिवामणौ पुण्यगृहे स्वगेहे
संदेह एवानुजजीवितस्य ।
एक: कदाचिच्चिरजीवितश्च
भ्राता भवेद्भूपतिना समान: ।। ६ ।।
चन्द्रमा: पापयुक्तश्च सहजस्थो यदा भवेत् ।
भातृनाशककरो योगो यदि नो वीक्षित: शुभै: ।। ७ ।।
यदि खलै: सहजे च खला ग्रहा:
शुभग्रहै: सहिताश्च विलोकिता: ।
न हि भवन्ति सहोदरबान्धवा
बहुविधाग्रजपक्षविघातयुक् ।। ८ ।।
शुभनिजेशयुतेक्षितमग्निभं
भवति ज्येष्ठसहोदरसौख्यभाक् ।
स्वपतिना न युतं शुभनेक्षितं
न सुखमन्यसहोदरजं तदा ।। ९ ।।
यदि खला: प्रबला: खलमध्यगं
खलयुतेक्षितमग्रजहं तदा ।
न हि कनिष्ठसहोदरजं सुखं
भवति ज्येष्ठसुखं न तु जायते ।। १० ।।
प्रथमजातशिशुस्तरणिग्रह-
स्तदनु हन्ति शिशुं लघुकर्मज: ।
धरणिजो लघुबालकघातकृ-
द्बहुखला यदि हन्ति च भार्गवात् ।। ११ ।।
रविराहू भातृहणौ चन्द्रे च भगिनीसुखम् ।
शन्याराराहव: षष्ठे भातृनाशकरो गुरु : ।। १२ ।।

**इति सहजभावविवरणं संपूर्णम् ।।**

# ४

## अथ चतुर्थे सुखभवनम् ।

अमुकाख्यममुकदैवत्यममुकग्रहयुतं स्वस्वामिना दृष्टं वा न दृष्टं तथान्यैः शुभाशुभैर्ग्रहैर्दृष्टं युतं न वेति ।

### तत्र विलोकनीयानि ।( ४. १ )

सुहृद्गृहं ग्रामचतुष्पदं वा
क्षेत्रोद्यमालोकनके चतुर्थे ।
दृष्टे शुभानां शुभयोगतो वा
भवेत्प्रवृद्धिर्नियमेन तेषाम् ।। १ ।।

### सुखभवनलग्नफलम् ( ४.२ )

मेषे सुखस्थे लभते सुखं च
चतुष्पदेभ्योऽथ विलासिनीभ्यः ।
भोगैर्विचित्रैः प्रचुरान्नपानैः
पराक्रमोपार्जितसर्वभौमैः ।। १ ।।
वृषे सुखस्थे लभते सुखानि
नरोऽतिमान्यो विविधैश्च मान्यैः ।
शौर्येण भूपालनिषेवणेन
विप्रोपचारैर्नियमैर्व्रतैश्च ।। २ ।।
तृतीयराशौ सुखभे सुखानि
लभेन्मनुष्यः प्रमदाकृतानि ।
जलावगाहैर्वनसेवया च
प्रभूतपुष्पाम्बरसेवकांश्च ।। ३ ।।

कुलीरराशौ हि यदा सुखस्थे

नरं सुरूपं सुभगं सुशीलम् ।

स्त्रीसंमतं सर्वगुणैः समेतं

विद्याविनीतं जनवल्लभं च ।। ४ ।।

सिंहे सुखस्थे न सुखं मनुष्यः

प्राप्नोति योऽसौ प्रचुरः प्रकोपात् ।

कन्याप्रसूतिं कुटिलप्रसङ्गो

नरो भवेच्छीलविवर्जितश्च ।। ५ ।।

कुमित्रसङ्गं धनसंश्रयं च

कन्यागृहे दुर्मतिमान्मनुष्यः ।

पैशून्यसङ्गाल्लभते सुखानि

चौर्येण युद्धेन च मोहनेन ।। ६ ।।

तुले सुखस्थे च नरस्य यस्य

करोति सौख्यं शुभकर्मदक्षम् ।

विद्याविनीतं सततं सुखाढ्यं

प्रसन्नचितं विभवैः समेतम् ।। ७ ।।

अलौ चतुर्थे च यदा भवेत्तं

सुतीक्ष्णभावं परभीतियुक्तम् ।

प्रभूतसेवं गतवीर्यदक्षं

परैः सुरक्ष्यं च गुणैर्विहीनम् ।। ८ ।।

चापे सुखस्थे लभते मनुष्यः

सुखं सदा संगरसेवनं च ।

सत्कीर्तिरेवं हरिसेवनं च

सद्भावसम्पन्नतयान्वितश्च ।। ९ ।।

मृगे सुखस्थे सुखभाङ्मनुष्यः

सदा भवेत्तापनिवेशनेन ।

उद्यानवापीतटसंगमेन

मित्रोपचारैः सुरतप्रधानैः ।। १० ।।

घटे सुखस्थे प्रमदानिधाना-

त्प्राप्नोति सौख्यं विविधं मनुष्यः ।

मिष्टान्नपानैः फलशाकपत्रै-

र्विदग्धवाक्यैः कटुसाह्यकारी ।। ११ ।।

मीने सुखस्थे तु सुखं मनुष्यः

प्राप्नोति सौख्यं जलसंश्रयेण ।

शनैश्चरे देवसमुद्भवैश्च

यानैः सुवस्त्रैः सुधनैर्विचित्रैः ।। १२ ।।

## अथ ग्रहफलम् । ( ४.३ )

**सूर्यफलम् ।**

सौख्येन यानेन हिते रतस्य

नितान्तसत्प्रेमयुतप्रवृत्तिः ।

चलन्निवासं कुरुते मनुष्यः

पातालशाली नलिनीविलासी ।। १ ।।

**चन्द्रफलम् ।**

जलाश्रयोत्पन्नधनोपलब्धिं

कृष्यङ्गनावाहनसूनुसौख्यम् ।

प्रसूतिकाले कुरुते कलावा-

न्पातालसंस्थो द्विजदेवभक्तम् ।। २ ।।

**भौमफलम् ।**

दुःखं सुहृद्वाहनतः प्रवासा-

त्कलेवरे रुग्बलताबलित्वम् ।

प्रसूतिकाले किल मङ्गलेऽस्मिन्

रसातलस्थे फलमुक्तमाद्यैः ।। ३ ।।

**बुधफलम् ।**

पुत्रसौख्यसहितं बहुमित्रं

मन्दवादकुशलं च सुशीलम् ।

मानवं किल करोति सुलीलं

शीतदीधितिसुतः सुखसंस्थः ।। ४ ।।

**गुरुफलम् ।**

सन्माननानाधनवाहनाद्यैः

संजातहर्षः पुरुषः सदैव ।

नृपानुकम्पासमुपात्तसंपत्

स्वर्गाधिपे मन्त्रिणि भूतलस्थे ।। ५ ।।

**भृगुफलम् ।**

मित्रक्षेत्रे ग्रामसद्वाहनानां

नाना सौख्यं वन्दनं देवतानाम् ।

नित्यानन्दं मानवानां प्रकुर्या-

दैत्याचार्यस्तुर्यभावस्थितश्चेत् ।। ६ ।।

**शनिफलम्**

पित्तेन विक्षीणबलं कुशीलं
शीलेन युक्तं कुरुते मनुष्यम् ।
मालिन्यभाजं मनसस्तनोति
रसातलस्थो नलिनीशजन्मा ।। ७ ।।

**राहुफलम् ।**

चतुर्थे भवने चैव मित्रभातृविनाशकृत् ।
पितुर्मातुः क्लेशकारी राहौ सति सुनिश्चितम् ।। ८ ।।

**केतुफलम् ।**

चतुर्थे च मातुः सुखं नो कदाचि-
त्सुहृद्धर्मतः पितृतो नाशमेति ।
शिखी बन्धुहीनः सुखं स्वोच्चगेहे
स्थिरत्वं न कुर्यात्सदा व्यग्रतां च ।। ९ ।।

**अथ सुखभवनेशफलम् ।( ४.४ )**

सुखपतौ सुखवाहनभोगवां-
स्तनुगते तनुते धवलं यशः ।
जनकमातृसुखौघकरं परं
सुभगलाभयुतं निरुजं वपुः ।। १ ।।
सुखपतौ धनगे खलखेचरैः
पितृविरोधकरः कृपणः शुचिः ।
शुभखगैः पितृभक्तिधनाश्रयः
शुभयुतः श्रुतिशास्त्रविशारदः ।। २ ।।

सुखपतौ सहजालयगे क्षमो

पितृसुहृज्जननीकलिकारक : ।

रथमहीवृषभादिसुखान्वितः

शुभखगैर्बहुमित्रयुतो नरः ।। ३ ।।

सुखपतौ सुखगे सुखसन्निधौ

नृपसमो धनवान् बहुसेवकः ।

पितृसुखं बहुलं जनमान्यता

रथगजाश्वशुभैः सुखभाङ्नरः ।। ४ ।।

सुखपतौ बहुजीवितवान्नरः

सुतगते सुतयुक्तसुधीर्नरः ।

शुभवशात्सुखभोगधनान्वितः

श्रुतिधरोऽतिपवित्रविलेखकः ।। ५ ।।

भवति मातृपतौ रिपुगे नरो

रिपुयुतोऽपि अनर्थविनाशकः ।

खलखगोऽपि कलङ्कितमातुलो

भवति सौम्यखगैर्धनसंचयी ।। ६ ।

मदनगेऽम्बुपतौ च सुराकृति-

र्धनयुतो युवतीजनवल्लभः ।

स्मरयुतः सुभगः शुभखेचरैः

खलखगेऽतिखलः कठिनः पुमान् ।। ७ ।।

मृतिगते सरुजोऽम्बुपतौ नरः

सुखयुतः पितृमातृसुखाल्पकः ।

भवति वाहननाशकरः शुभे

खलखगेऽतिसमागमनाशकः ।। ८ ।।

नवमगे सुखपे बहुभाग्यावा-

न्पितृधनार्थसुहृन्मनुजाधिपः ।

भवति तीर्थकरो व्रतवान्क्षमी

सुनयनः परदेशसुखी नरः ।। ९ ।।

गगनगे सुखपे गृहिणीसुखं

जनकमातृकरो धनभुक्क्षमी ।

सुनयनः परतो नृपसम्मतः

खलखगैर्विपरीतफलं वदेत् ।। १० ।।

भवगतेन्दुपतौ पितृपालको

विविधलब्धियुतः शुभकृत्सदा ।

पितरि मातरि भक्तियुतो नरः

प्रचुरजीवितरोगविवर्जितः ।। ११ ।।

व्ययगते सुखपे पितृनाशको

यदि विदेशगतो जनको भवेत् ।

भवति दुष्टखगैर्युतजातकः

शुभखगैः पितृसौख्यकरः सदा ।। १२ ।।

## अथ सुखभावे ग्रहदृष्टिफलम् । ( ४.५ )

### सूर्यदृष्टिफलम् ।

विलोकिते चापि चतुर्थगेहे

सूर्यः करोत्येव हि मातृपीडाम् ।

बन्धुक्षयं चैव यशः सुखं च

लाभार्थदं पुण्ययशः सदैव ।। १ ।।

**चन्द्रदृष्टिफलम् ।**

तुरीयगे शीतकरे च दृष्टे

बन्धुक्षयं चैव यश: सुखं च ।

लाभार्थदं पुण्ययश: सवायु:

पित्रादिलोकान्न करोति सौख्यम् ।। २ ।।

**भौमदृष्टिफलम् ।**

तुर्यभावगृह अरिवीक्षिते

मातृकष्टमथ तुर्यवर्षके ।

भूपतेर्भवति भूमित: सुखं

दर्शनेन च रिपुर्विनश्यति ।। ३ ।।

**बुधदृष्टिफलम् ।**

बुधेक्षिते यद्यथ तुर्यभावे

मातुश्च प्रचुरं सौख्यं करोति ।

राज्यादिसौख्यं धनवर्धनं च

पितुर्धनं चैव हि कामलुब्ध: ।। ४ ।।

**गुरुदृष्टिफलम् ।**

हिबुकसद्मनि चार्यनिरीक्षिते

जनकमातृसुखं त्वतुलं भवेत् ।

गजरथाश्वयुतोऽथ च पण्डित:

स्वजनवर्गभवं त्वतुलं यश: ।। ५ ।।

**भृगुदृष्टिफलम् ।**

संपूर्णदृष्टिर्यदि तुर्यभावे
शुक्रस्तदा मातृसुखं करोति ।
कर्माधिको द्रव्ययुतो नरः स्या-
द्यशश्च सौख्यं बहुवाहनोत्थम् ।। ६ ।।

तुर्यभाव भवने शनीक्षिते
तातमातृमरणं भवेन्नृणाम् ।
जन्मतो हि खलु तुर्यवर्षके
षोडशेऽथ गदतो महद्भयम् ।। ७ ।।

**राहुदृष्टिफलम् ।**

चतुर्थगेहे तमसा निरीक्षिते
मातुः सुखं नैव करोति तस्य ।
कर्मोदयं म्लेच्छकुलाज्जयं च
व्यथोदरे स्याच्च नरस्य दारुणा ।। ८ ।।

**अथ ग्रहवर्षसंख्या । ( ४.६ )**

तुर्ये रविर्मनुमिते कलहं हि चन्द्रो
द्विब्द्यब्दपुत्रमसृगष्टसहोदरार्तिम् ।
ज्ञो वित्तहा यमयमैर्गुरुराकृतौ स्वं
शुक्राम्बुजे सुखमथो कुजवच्छनिश्च ।। १ ।।

## अथ विचारः ( ४.७ )

अखिलाः सुखभावगता यदा

जननिसौख्यकरा भवन्ति ते ।

शुभविलोकनतः खलु पीडनं

जठरवातगदं रविजोऽब्रवीत् ।। १ ।।

हिबुकगाः खलु सौम्यखगा यदा

हृदयरोगकराः परतापदाः ।

नृपतिभीतिकरा अतिदुःखदाः

पवनगुल्मकराश्च जलार्तिदाः ।। २ ।।

सुखगृहं यदि भौमयुतं तथा

खलखगैः सहजेऽपि स एव चेत् ।

भवति वह्निकृतो जठरे गदो

ज्वरसमीरणवह्निगदव्यथा ।। ३ ।।

लग्ने चैर यदा जीवो धने सौरिश्च संस्थितः ।

राहुश्च सहजे स्थाने तस्य माता न जीवति ।। ४ ।।

लग्ने पापो व्यये पापो धने सौम्योऽपि संस्थितः ।

सप्तमे भवने पापः परिवारक्षयंकरः ।। ५ ।।

सौम्यदृष्ट्यधिकत्वात्तु मातुर्धनसुखं भवेत् ।

पापदृष्ट्यधिकत्वात्तु मातृकष्टं सुखं न हि ।। ६ ।।

## ५

## अथ सुतभवनं पञ्चमम् ।

अमकाख्यममुकदैवत्यममुकग्रहयुतं स्वस्वामिना दृष्टं वा न दृष्टम् ।

### तत्र विलोकनीयानि ।( ५. १ )

बुद्धिप्रबन्धात्मजमन्त्रविद्या-
विनेयगर्भस्थितिनीतिसंस्थाः ।
सुताभिधाने भवने नराणां
होरागमज्ञैः परिचिन्तनीयाः ।। १ ।।

### तत्र लग्नफलम् ।( ५. २ )

मेषे सुतस्थे लभते मनुष्यः
प्रायेण पुत्रान्विधनांस्तथा च ।
सुरात्सुखं नित्यकृता मुदः स्युः
पापानुरक्तः कुलवित्तयुक्तः ।। १ ।।
वृषे सुतस्थे लभते मनुष्यः
प्राप्नोति कन्याः सुभगाः सुरूपाः ।
अपत्यहीना बहुकातियुक्ताः
सदानुरक्ता निजभर्तृधर्मे ।। २ ।।
तृतीयराशौ सुतगे मनुष्यः
प्राप्नोति पत्या निजसौख्यधर्मान् ।
गीतानि सद्गानि गुणाधिकानि
प्रभासमेतानि बलाधिकानि ।। ३ ।।

कर्कः सुतस्थो जनयेन्मनुष्यं
शीतस्वभावं जलकेलिरक्तम् ।
पुत्रान्वितं प्राप्तियशोधिकं च
स्त्रीवल्लभं कामरतेन युक्तम् ।। ४ ।।
सिंहः सुतस्थो जनयेन्मनुष्या-
न्क्रूरस्वभावान्नयनीतिहीनान् ।
मांसप्रियान्स्त्रीजनकान्सुतीव्रा-
न्विदेशभाजः क्षुधया समेतान् ।। ५ ।।
कन्या यदा पञ्चमगा तदा स्या-
त्कन्या नराणां तनयैर्विहीना ।
पतिप्रिया पुण्यपरा प्रगल्भा
प्रशान्तपापा प्रियभूषणा च ।। ६ ।।
तुला यदा पञ्चमगा नराणां
तदा सुशीलानि मनोहराणि ।
भवत्यपत्यानि सुरूपकाणि
क्रियासमेतानि शुभेक्षितानि ।। ७ ।।
कीटे सुतस्थे जनयेत्तु योनौ
पुत्रान्मनुष्यः सुभगान्सुशीलान् ।
अज्ञातदोषान्प्रणयेन युक्ता-
न्सक्तश्च धर्मे सततं मनुष्यः ।। ८ ।।
चापे सुतस्थे जनयेन्मनुष्यः
पुत्रांश्च पापन्कुमतीन्कुरूपान् ।
गम्भीरचेष्टान्मतिसत्ययुक्ता-
न्पुत्रान्मनुष्यो जनयेत्प्रसिद्धान् ।। ९ ।।

मृगे सुतस्थे जनयेन्मनुष्यः

सुतान्विचित्रान् हयलुब्धलक्षान् ।

धानुष्कचर्यान् हतशत्रुपक्षा-

न्सेवाप्रियान्पार्थिवमानयुक्तान् ।। १० ।।

कुम्भे सुतस्थे जनयेन्मनुष्यः

प्रसन्नमूर्तीन्धनधान्ययुक्तान् ।

नष्टात्मजान्भूरिगुणैरुपेता-

न्कुपुत्रतः कष्टमथ प्रयाति ।। ११ ।।

मीने सुतस्थे सति हास्ययुक्ता-

न्पुत्रान्मनुष्यो लभते सुवर्यान् ।।

रोगैर्वियुक्तान्सुतरां सुरूपा-

न्सुहास्यतास्त्रीसहता सदैव ।। १२ ।।

## अथ ग्रहफलम् ।( ५. ३ )

### सूर्यफलम् ।

स्वल्पापत्यं शैलदुर्गेशभक्तिं

सौख्येन युक्तं विविधार्थयुक्तम् ।

भ्रान्तस्वातं मानवं हि प्रकुर्या-

त्सूनुस्थाने भानुमान्वर्तमानः ।। १ ।।

### चन्द्रफलम् ।

जितेन्द्रियः सत्यवचाः प्रसन्नो

धनात्मजावाप्तसमस्तसौख्यः ।

सुसंग्रही स्यान्मनुजः सुशीलः

प्रसूतिकाले तनयालयेऽब्जे ।। २ ।।

**भौमफलम् ।**

कफानिलव्याकुलता कलत्रा-

न्मित्राच्च पुत्रादपि सौख्यहानिः ।

मतिर्विलोमा विपुलो जयश्च

प्रसूतिकाले तनयालयस्थे ।। ३ ।।

**बुधफलम् ।**

पुत्रसौख्यसहितं बहुमित्रं

मित्रवादकुशलं च सुशीलम् ।

मानवं किल करोति सुरूपं

शीतदीधितिसुतः सुतसंस्थः ।। ४ ।।

**गुरुफलम् ।**

सन्मन्त्रपुत्रोत्तममन्त्रशस्त्र-

सुखानि नानाधनवाहनानि ।

बृहस्पतिः कोमलवाग्विलासं

नरं करोत्यात्मजभावसंस्थः ।। ५ ।।

**भृगुफलम् ।**

सुकलकाव्यकलाभिरलंकत-

स्तनयवाहनधान्यसमन्वितः ।

सुरपतिर्गुरुगौरवभाङ्नरो

भृगुसुते सुतसद्मनि संस्थिते ।। ६ ।।

**शनिफलम् ।**

सुजर्जरक्षीणतरं वपुश्च

धनेन हीनत्वमनङ्गहीनम् ।

प्रसूतिकाले नलिनीशपुत्रः

पुत्रे स्थितः पुत्रभयं करोति ।। ७ ।।

**राहुफलम् ।**

सुते सद्मनि स्याद्यदा सैहिकेयः

सुतेच्छा चिरं चित्तसंतापनीया ।

भवेत्कुक्षिपीडा मृतिः क्षुत्प्रबोधा-

द्यदि स्यादयं स्वीयवर्गेण दृष्टः ।। ८ ।।

**केतुफलम् ।**

यदा पञ्चमे जन्मतो यस्य केतुः

स्वकीयोदरे वातघातादिकष्टम् ।

स्वबुद्धिव्यया सन्ततिस्वल्पपुत्रः

सदाधेनुलाभादियुक्तो भवेच्च ।। ९ ।।

**अथ सुखभवनेशफलम् । ( ५. ४ )**

लग्ने गते सन्ततिपे सुतानां

सुखं सुविद्यारतिमन्त्रसिद्धिः ।

शास्त्राणि जानाति सुकर्मकारी

रामाङ्गयुक्तः खलु विष्णुभक्तः ।। १ ।।

सुतेशे गते द्रव्यभावे नरः स्या-

त्कुलेशाप्तवित्तः कुटुम्बे विरोधी ।

भवेद्धानिकारी जनो भोगसक्तः

शुभैर्जीवपुत्रो भवेद् द्रव्यनाथः ।। २ ।।

सुतेशेगते विक्रमे विक्रमी स्या-

त्सुहृच्छान्तियुक्तो वचोमाधुरीयुक् ।

शुभे खेटयुक्ते शुभप्राप्तिकारी

मनःकार्यसिद्धिः सुखी शान्तनम्रः ।। ३ ।।

सुतपतिः कुरुते सुखभावगो

जनकभक्तिकरं कुशलं नरम् ।

तदनु पूर्वजकर्मकरं सदा

कविजने वसुवस्त्रनिरूपणम् ।। ४ ।।

तनयभावपतिस्तनयस्थितो

मतियुतं वचनं प्रबलं जनम् ।

बहुलमानयुतं पुरुषोत्तमं

प्रवरलोकवरं कुरुते नरम् ।। ५ ।।

रिपुगतस्तनयाधिपतिर्यदा

रिपुजनाभिरतं कुरुते नरम् ।

स्थिततनुं बहुदोषयुतं सदा

धनसुतै रहितं खलखेचरैः ।। ६ ।।

मदनगस्तनयस्थलनायकः

सुभगपुत्रवती दयिता सदा ।

स्वजनभक्तिरता प्रियवादिनी

सुजनशीलवती तनुमध्यमा ।। ७ ।।

सुतपतौ निधनस्थलगे नरः

कुवचनाभिरतो विगताङ्गकः ।

भवति चण्डरुचिश्चपलो नरो

गतधनो विकलः शठतस्करः ।। ८ ।।

सुकृतभावगतस्तनयाधिपः

समवितर्कविभाजनवल्लभः ।

सकलशास्त्रकलाकुशलो भवे-

न्नृपतिदत्तरथाश्वयुतो नरः ।। ९ ।।

दशमगः कुरुते सुतनायको

नृपतिकर्मकरं सुखसंयुतम् ।

विविधलाभयुतं प्रवरं नरं

प्रवरकर्मकरं वनितारतम् ।। १० ।।

सुतपतिर्भवगः सुखसंयुतं

प्रकुरुते सुतमित्रयुतं नरम् ।

प्रवरगानकलाप्रवरं विभुं

नृपतितुल्यकुलं च सदैव हि ।। ११ ।

व्ययगतो व्ययकृत्सुतनायको

विगतपुत्रसुखं खचरैः खलैः ।

सुतयुतं च शुभैः कुरुते नरं

स्वपरदेशगमागमनोत्सुकम् ।। १२ ।।

अथ दृष्टिफलम् ।(५. ५)

**रविदृष्टिफलम् ।**

सुतगृहे यदि सूर्यनिरीक्षिते
प्रथमसंततिनाशकरश्च हि ।
तदनु पीडितवातयुतः सदा
गृहभवाल्पसुखः कथितः सदा ।। १ ।।

चन्द्रदृष्टिफलम् ।

सुतस्थानगा चन्द्रदृष्टिर्यदा स्या-
त्प्रसूते सुखं मित्रजन्यं सदैव ।
नरेन्द्रादितुल्यः स्ववंशे प्रधानो-
ऽप्यथैवान्यदेशे क्रये जीवितं च ।। २ ।।

**भौमदृष्टिफलम् ।**

सुतगृहे यदि भौमनिरीक्षिते
प्रथमसंततिनाशकरश्च हि ।
जठरगः खलु वह्निरथाधिको
भोजने भ्रमति चैव गृहे गृहे ।। ३ ।।

**बुधदृष्टिफलम् ।**

संपूर्णदृष्टिर्यदि पञ्चमे च
बुधो यदा स्यात्तनयाप्रसूतिः ।
चतुष्टयान्ते खलु पुत्रजन्म
सुकीर्तिरैश्वर्ययुतो नरो हि ।। ४ ।।

**गुरुदृष्टिफलम् ।**

सन्तानभावे गुरुपूर्णदृष्टिः
सन्तानसौख्यं प्रचुरं करोति ।
शास्त्रेषु नैपुण्यमथो च लक्ष्मीं
विद्यां धनं वै चिरजीवितं च ।। ५ ।।

**भृगुदृष्टिफलम् ।**

सुतगृहं यदि काव्यनिरीक्षितं
तनयजन्म पुनश्च सुता भवेत् ।
द्रविणवान्खलु धान्यसुसंचयी
पठति शास्त्रमथापि च सौख्यभाक् ।। ६ ।।

**शनिदृष्टिफलम् ।**

सुतगृहं यदि मन्दनिरीक्षितं
सुतसुखं न करोति नरस्य हि ।
स्थिरमना यशआमयवृद्धिभा-
क्स्वकुलधर्मरतश्च चिरं भवेत् ।। ७ ।।

**राहुदृष्टिफलम् ।**

सुतगृहं यदि राहुनिरीक्षितं
सुतसुखं न करोति नरस्य हि ।
तदनु भाग्ययुती नृपतेर्जयः
श्रमकृता विफलापि हि भारती ।। ८ ।।

## अथ वर्षसंख्या ।( ५.६ )

रविर्भयं पितृमृतिर्नवमे च चन्द्रः

षष्ठेऽग्निभीर्धरणिजोऽनुजहा शराब्दे ।

मातुःक्षयं रसयमेऽपि च रिष्टमातु-

र्ज्ञे मातुलार्तिमुशना शरवर्षलक्ष्मीम् ।। १ ।।

## अथ विचारः ।( ५. ७ )

लग्ने द्वितीये यदि वा तृतीये

विलग्ननाथे प्रथमे सुतः स्यात् ।

तुर्ये स्थितेऽस्मिंश्च सुतो द्वितीयः

पुत्री सुतो वित्तयुतो नरः स्यात् ।। १ ।।

सुताभिधानं भवनं शुभानां

योगेन दृष्ट्या सहितं विलोक्यम् ।

सन्तानयोगं प्रवदेन्मनीषी

विपर्ययत्वेन विपर्ययं च ।। २ ।।

सन्तानभावो निजनाथदृष्टः

सन्तानलब्धिं शुभदृष्टियुक्तः ।

करोति पुंसामशुभैः प्रदृष्टः

स्वस्वाम्यदृष्टो विपरीतमेव ।। ३ ।।

व्ययं वित्तं तृतीयं वा लग्नेशः पश्यताद्यदि ।

तुर्यलग्नं पञ्चमस्थः पुरः पुत्रस्य जन्म च ।। ४ ।।

द्विदेहसंस्था भृगुभौमचन्द्राः

सन्तानमादौ जनयन्ति नूनम् ।

एते पुनर्धन्विगता न कुर्युः

पश्चात्तथादौ गदितं महद्भिः ।।५ ।।

सन्तानभावे गगनेचराणां

यावन्मितानामिह दृष्टिरस्ति ।

स्यात्सन्ततिर्वित्तमथो वदन्ति

नोचोच्चमित्रारिगृहे स्थितानाम् ।।६ ।।

नवांशसंख्याप्यथवाङ्कसंख्या

दृष्ट्या शुभानां द्विगुणा च संख्या ।

क्लिष्टा च पापग्रहदृष्टियोगा-

न्मिश्रं च मिश्रग्रहदृष्टिरत्र ।।७ ।।

सुताभिधाने भवने यदि स्या-

त्खलस्य राशिः खलखेटयुक्तः ।

सौम्यग्रहैकेन न वीक्षितश्च

सन्तानहीनो मनुजस्तदानीम् ।।८ ।।

कविः कलत्रे दशमे मृगाङ्कः

पातालयाताश्च खला भवन्ति ।

प्रसूतिकाले च यदि ग्रहास्तदा

सन्तानहीनं जनयन्ति नूनम् ।।९ ।।

सुते सितांशे च सितेन दृष्टे

बहून्यपत्यानि विधोरपीदम् ।

दासीभवान्यात्मजभावनाथे

यावन्मितेंशे शिशुसंमितिः स्यात् ।।१० ।।

शुक्रेन्दुवर्गेण युते सुताख्ये
युतेक्षिते वा भृगुचन्द्रमोभ्याम् ।
भवन्ति कन्या: समराशिवर्गे
पुत्राश्च तस्मिन्विषमाभिधाने ।। ११ ।।
मन्दस्य राशि: सुतभावसंस्थो
मन्देन युक्त: शशिनेक्षितश्च ।
दत्तात्मजाप्ति: शशिवद्बुधेऽपि
क्रीत: सुतस्तस्य नरस्य वाच्य: ।। १२ ।।
मन्दस्य वर्गे सुतभावसंस्थे
निशाकरेणापि सुवीक्षिते च ।
दिवाकरेणाथ नरस्य तस्य
पुनर्भवासम्भवसूतिलब्धि: ।। १३ ।।
शनेर्गणे सद्मनि पुत्रभावे
बुधेक्षिते वै रविभूमिजाभ्याम् ।
पुत्रो भवेत्क्षेत्रभवोऽथ बौधे
गणेऽपि गेहे रविजेन दृष्टे ।। १४ ।।
नवांशका: पञ्चभावसंस्था
यावन्मितै: पापखगै: प्रदृष्टा: ।
नश्यन्ति गर्भा: खलु तत्प्रमाणा-
श्चेदीक्षणं नो शुभखेचराणाम् ।। १५ ।।
भूनन्दतो नन्दनभावयातो
जातं च जातं तनयं हि हन्ति ।
दृष्टो यथा चित्रशिखण्डिजेन
भृगो: सुतेन प्रथमश्च जीवेत् ।। १६ ।।

झषधनुर्धरपञ्चमभावगः
प्रसवसौख्यफलं न हि दृश्यते ।
मृतप्रजः खलु पञ्चमगे गुरौ
तदिह दृष्टिफलं शुभमश्नुते ।। १७।।

सुतपतिरिह केन्द्रे पापगः पापदृष्टो
भवति गतिगरिष्ठः शास्त्रवेत्ता च शूरः ।
लिपिकरणप्रवीणः संततेश्चापि दुःखं
कृतहरिशिवपूजः संततिं वै लभेत ।। १८ ।।

सुतपतिरस्तगतो वा पापयुतः पापवीक्षितो वापि ।
संततिबाधां कुरुते केन्द्रे पापान्विते चन्द्रे ।। १९ ।।

तुलामीनमेषे वृषे दैत्यपूज्ये
धनी राजमानी कलाकौतुकी च ।
त्रयोऽस्यात्मजा वै चिरंजीविताश्च
भवेद्वत्सरे वह्निभीतिर्द्वितीये ।। २० ।।

एकः पुत्रो रवौ पुत्रस्थाने चन्द्रे सुताद्वयम् ।
भौमे पुत्रास्त्रयो वंश्या बुधे पुत्रीचतुष्टयम् ।। २१ ।।

गुरौ मर्मे सुताः पञ्च षट् पुत्रा भृगुनन्दने ।
शनौ च गर्भपातः स्याद्राहौ गर्भो भवेन्न हि ।। २२ ।।

सौम्यदृष्ट्यधिके संतानसुखं पापदृष्ट्यधिके संतानपीडा ।।२३ ।।

६

## अथ षष्ठं रिपुभवनम् ।

अमुकाख्यममुकदैवत्यममुकग्रहयुतं स्वस्वामिना दृष्टं वा न दृष्टमन्यैः शुभाशुभैर्ग्रहैर्दृष्टं युतं न वेति ।।

### तत्र विलोकनीयानि ।( ६. १ )

वैरिव्रातक्रूरकर्मामयानां चिन्ता-
शङ्कामातुलानां विचारः ।
होरापरिवारपारं प्रयातै-
रेतत्सर्वं शत्रुभावे विचिन्त्यम् ।। १ ।।

### लग्नफलम् ।( ६. २ )

मेषे रिपुरते प्रभवन्ति पुंसां
चतुष्पदां सौख्ययुता प्रसिद्धिः ।
प्रसन्नचेता रिपुघातवाश्च
कार्ये विनाशश्च नरस्य लोके ।। १ ।।

चतुष्पदार्थे प्रभवेत्तु वैरं
सदा नराणां वृषभे रिपुस्थे ।
अपत्यवर्गोऽपि गतोऽङ्गनानां
रुङ्गाभिमानं निजबन्धुवर्गे ।। २ ।।

तृतीयराशौ रिपुगे नराणां
वैरं भवेत्स्त्रीजनितं सदैव ।
तथा नराणां सहितं च चापै-
र्वणिग्जनैर्नीचजनानुरक्तः ।। ३ ।।

कर्के रिपुस्थे सहजैश्च युक्तो

भवेन्मनुष्यश्च सुतादियुक्तः ।

समो द्विजेन्द्रैश्च वराधिपैश्च

महाजनेनैव विरोधकर्ता ।। ४ ।।

सिंहे रिपुस्थे प्रभवेच्च वैरं

पुत्रैः समं बन्धुजनेन नित्यम् ।

धनोत्थमार्तस्य विनिर्जितस्य

यद्वा मनुष्यस्य वराङ्ग**नाभिः** ।। ५ ।।

कन्यास्थितः शत्रुगृहे स्ववैरं

कार्यं स्वधर्मस्य नरस्य साधोः ।

स्वबन्धुवर्गाच्च निजालपस्थो

रिपुव्रजोऽपि प्रभवेन्नराणाम् ।। ६ ।।

तुलाधरे शत्रुगृहे नरस्य नाथे

स्थितस्य प्रभवेच्च वैरम् ।

दुश्चारिणभिश्च सुताङ्गनाभि-

र्वेश्याभिरेवाश्रमवर्जिताभिः ।। ७ ।।

कौर्प्ये रिपुस्थे प्रभवेत्तु वैरं

सार्द्धं द्विजिह्वैश्च सरीसृपैश्च ।

व्यालैर्मृगैश्चोरगगैर्नराणां

भवेत्स्वधान्यैश्च विलासिभिश्च ।। ८ ।।

चापे रिपुस्थे च भवेद्धि वैरं

शरैः समेतं च सरावकैश्च ।

सदा मनुष्यैश्च हयैश्च हस्तिभिः

पुनस्तथान्यैः परवञ्चनैश्च ।। ९ ।।

मृगे रिपुस्थे च भवेच्च वैरं

सदा नराणां धनसम्भवञ्च ।

मित्रैः समं साधुमहाजनेन

प्रभूतकालं गृहसम्भवेन ।। १० ।।

कुम्भे रिपुस्थे च तथार्थहेतो-

र्नराधिपेनैव जलाश्रयैश्च ।

वापीतडागादिभिरेव नित्यं

क्षेत्रादितो वै पुरुषैः सुशीलैः ।। ११ ।।

मीने रिपुस्थे च भवेन्नराणां

वैरं च नित्यं सुतवस्तुजातम् ।

स्त्रीहेतुकं स्वीयजनेषु नूनं

पितुः परैः साकमथातिवैरम् ।। १२ ।।

**।। इति रिपुलग्नफलम् ।।**

## अथ ग्रहफलम् । ( ६. ३ )

### सूर्यफलम् ।

शश्वत्सौख्येनान्वितः शत्रुहन्ता

सत्त्वोपेतश्चारुयानो महौजाः ।

पृथ्वीभर्तुः स्यादमात्यो हि मर्त्यः

शत्रुक्षेत्रे मित्रसंज्ञो यदि स्यात् ।। १ ।।

**चन्द्रफलम् ।**

मन्दाग्निः स्यान्निर्दयः कोपयुक्तो

लौल्योपेतो निष्ठुरो दुष्टचित्तः ।

रोषावेशोन्त्यन्तसंजातशत्रुः

शत्रुक्षेत्रे रात्रिनाथे नरः स्यात् ।। २ ।।

**भौमफलम् ।**

प्राबल्यं स्याज्जाठराग्नेर्विशेषा-

दोषावेशः शत्रुवर्गेऽपि शान्तिः ।

सद्भिः सङ्गो धर्मिभिः स्यान्नराणां

गोत्रैः पुण्यस्योदयो भूमिसूनौ ।। ३ ।।

**बुधफलम् ।**

वादप्रीतिः सामयो निष्ठुरात्मा

नानारातिव्रातसंतप्तचित्तः ।

नित्यालस्यव्याकुलः स्यान्मनुष्यः

शत्रुक्षेत्रे रात्रिनाथात्मजे स्यात् ।। ४ ।।

**गुरुफलम् ।**

सद्गीतनृत्यादृतचित्तवृत्तिः

कीर्तिप्रियोथो निजशत्रुहन्ता ।

आरम्भकालोद्यमकृन्नरः स्या-

त्सुरेन्द्रमन्त्री यदि शत्रुसंस्थः ।। ५ ।।

**भृगुफलम् ।**

अभिमतो न भवेत्प्रमदाजने
ननु मनोभवहीनतरो नरः ।
विबलताकलितः किल संभवे
भृगुसुतेऽरिगतेऽरिभयान्विनः ।। ६ ।।

**शनिफलम् ।**

विनिर्जितारातिगणो गुणज्ञः
स्वज्ञातिजानां परिपालकश्च ।
पुष्टाङ्गयष्टिः प्रबलोदराग्नि-
र्नरोऽर्कपुत्रे सति शत्रुसंस्थे ।। ७ ।।

**राहुफलम् ।**

बलोद्बुद्धिहानिर्धनं तद्वशे च
स्थितो वैरभावेऽपि येषां तनूनाम् ।
रिपूणामरण्यं दहेदेकराहुः
स्थिरं मातुलं मानसं नो पितृभ्यः ।। ८ ।।

**केतुफलम् ।**

शिखी यस्य षष्ठे स्थितो वैरिनाशो
भवेन्मातृपक्षाच्च तन्मानभङ्गः ।
चतुष्पात्सुखं सर्वदा तुच्छमेव
निरोगो गुदे लोचने रोगयुक्तः ।। ९ ।।

## अथ रिपुभवनेशफलम् ।( ६. ४ )

रिपुपतौ रिपुहा तनुगे यदा
 विगतवैरभयः सबलः सदा ।
स्वजनकष्टप्रदश्च पुमान्सदा
 बहुचतुष्पदवाहनभोगवान् ।। १ ।।

रिपुपतौ द्रविणे चतुरो नरः
 कठिनताधनसंग्रहणे क्षमः ।
निजपदप्रवरो विदितश्चलो
 गदयुतः कृशगात्रयुतो नरः ।। २ ।।

सहजगे रिपुभावपतौ क्षमी
 खलरतः कुरुते बहुकर्मकः ।
पितृभुजाप्तधनव्ययकारको
 बहुलकोपभरः सहजोज्झितः ।। ३ ।।

सुखगतेऽरिपतौ पितृपक्षपः
 कलहवान्वपुषा च रुजान्वितः ।
तदनु तातधनेन युतो बली
 जननिसौख्ययुतश्चपलः स्मृतः ।। ४ ।।

रिपुपतौ तनयस्थलगे भवे-
 त्पितृसुताद्यतिवादकरः प्रियः ।
मृतसुतश्च खलग्रहयोगतः
 शुभयुतोऽपि धनाद्भुत एव सः ।। ५ ।।

निजगृहे रिपुभावपतौ नरो

रिपुगतः कृपणश्च खलोज्झितः ।

स तु निजस्थललब्धसुखः सदा

भवति जन्मरतः पशुयोषितः ।। ६ ।।

अरिपतौ मदने खलसंयुते

प्रचरकामभरावनितायुतः ।

बहुलवादकरो विषसेवकः

शुभखगैर्बहुलाभसुतान्वितः ।। ७ ।।

ग्रहणिरुग्रिपुनाथयुतेऽष्टमे

विषधरान्मरणं विषतो वधः ।

मरणदो विधुरेव रविर्नृपा-

द्रुसितौ नयनेषु विपत्प्रदौ ।। ८ ।।

नवमगेऽरिपतौ खलसंयुते

चरणभङ्गकरः सुकृतोज्झितः ।

विविधवादकरश्च स वै प्रियो

न च धनं न सुखं न सुतः सदा ।। ९ ।।

अरिगृहाधिपतिर्दशमे यदा

जननवैरकरश्चपलः खलः ।

भवति पालकपुत्रयुतः शुभै-

र्जनकहा जगतीपरिपालकः ।। १० ।।

भवगतेऽरिपतौ खलसंगमो

रिपुजनान्मरणं खलु जायते ।

नृपतिचौरजनाद्धनहानिकृ-

च्छुभखगैः सततं शुभकृद्भवेत् ।। ११ ।।

व्ययगते च चतुष्पदवाजिनां

रिपुपतौ धनधान्यसुखक्षयः ।

गमनबुद्धिनिरन्तरमेव य-

दिननिशं च धनाय कृतोद्यमः ।। १२ ।।

**इति रिपुभवनेशफलम् ।**

**अथ ग्रहदृष्टिफलम् ।( ६. ५ )**

**सूर्यदृष्टिफलम् ।**

रिपुगृहेऽथ च सूर्यनिरीक्षिते

रिपुविनाशकरश्च नरः सदा ।

भवति दक्षिणनेत्ररुजार्दितः

खलु सुखं न भवेज्जननीजनम् ।। १ ।।

**चन्द्रदृष्टिफलम् ।**

अरिगृहे सति चन्द्रनिरीक्षिते

रिपुविवृद्धिकरः सततं नृणाम् ।

क्षयकफार्तिरुजो मदनक्षयं

गुरुयुतो बहुरोगयुतो भवेत् ।। २ ।।

**भौमदृष्टिफलम् ।**

भौमदृष्टिसमवेक्षिते रिपौ

वैरिनाशनकरो नरस्य हि ।

मातुलीयसुखनाशनः सदा

लोहशस्त्ररुधिराग्निपीडनम् ।। ३ ।।

**बुधदृष्टिफलम् ।**

षष्ठे गृहे चन्द्रसुतेन वीक्षिते
विशेषतो मातुलजं च सौख्यम् ।
परापवादी परकर्मकारी
नानारिपुद्वेषकरश्च सः स्यात् ।। ४ ।।

**गुरुदृष्टिफलम् ।**

रिपुगृहे सुरमन्त्रिनिरीक्षिते
रिपुविवृद्धिमहाक्षयकारकः ।
स्थितिविनाशकरः स भवेन्नरः
परिकरोति च मातुलजं सुखम् ।। ५ ।।

**भृगुदृष्टिफलम् ।**

अरिगृहे सति शुक्रनिरीक्षिते
भवति मातुलजं सुखमद्भुतम् ।
स्वयमरीह भवेज्जनपूजितो
रिपुविवृद्धिविनाशकरोऽपि हि ।। ६ ।।

**शनिदृष्टिफलम् ।**

रिपुगृहे सति मन्दनिरीक्षिते
रिपुविनाशकरः स च मातुलैः ।
चरणनेत्रमुखे व्रणपीडितः
परुषवाग्ज्वरमेहनिपीडितः ।। ७ ।।

**राहुदृष्टिफलम् ।**

अरिगृहे सति राहुनिरीक्षिते

रिपुविनाशकरो मनुजो भवेत् ।

खलवशाद्धनहानिकरो नरः

सकलसद्गुणवान्विनयान्वितः ।। ८ ।।

**अथ ग्रहवर्षसंख्या ( ६. ६ )**

सूर्यस्त्रीणि च वत्सराणि हि सुखं षड् वै हिमांशुर्मृतिं

भौमो वै जिनसंमिते प्रददते पुत्रं च सप्तत्रिके ।

सौम्यः शत्रुभयं मृतिं सुरगुरुः खाब्धौ च शत्रोर्भयं

शुक्रो भूयुगवत्सरे रिपुमृतिं सौरिः सुतं वै जिने ।। १ ।।

**अथ विचारः । ( ६. ७ )**

दृष्टिर्युतिश्चेत्खलखेचराणा-

मरातिभावे रिपुनाशनं स्यात् ।

शुभग्रहाणां प्रतिदृष्टितोऽत्र

शत्रूद्गमोऽप्यामयसंभवः स्यात् ।। १ ।।

षष्ठे क्रूरो नरो यातः शत्रुपक्षविमर्दकः ।

षष्ठे सौम्ये सदा रोगी षष्ठे चन्द्रस्तु मृत्युदः ।। २ ।।

षष्ठे सोम्ये ग्रहे रोगी दीर्घायुर्मातुलात्सुखम् ।

पापग्रहे भवेच्चैव शत्रुमातुलनाशकृत् ।। ३ ।।

**इत्यरिभावविवरणम् ।।**

## ७

## अथ सप्तमं जायाभवनम् ।

अमुकाख्यममुकदैवत्यममुकग्रहयुतं स्वस्वामिना दृष्टं युतं वान्यैरपि शुभाशुभैर्ग्रहैर्दृष्टं युतं न वेति ।।

### तत्र विलोकनीयानि ।( ७. १ )

रणाङ्गणश्चापि वणिक्क्रिया च
जायाविचारं गमनप्रमाणम् ।
शास्त्रप्रवीणैर्हि विचारणीयं
कलवभावे किल सर्वमेतत् ।। १ ।।

### अथ लग्नफलम् ।( ७. २ )

मेषेऽस्तसंस्थे हि भवेत्कलत्रं
क्रूरं नराणां चपलस्वभावम् ।
पापानुरक्तं कुजनप्रशंसं
वित्तप्रियं स्वार्थपरं सदैव ।। १ ।।

वृषेऽस्तसंस्थे च भवेत्कलत्रं
सुरूपदन्तं प्रणतं प्रशान्तम् ।
पतिव्रतं चारुगुणेन युक्तं
लक्ष्म्याधिकं ब्राह्मणदेवभक्तम् ।। २ ।।

तृतीयराशौ सति वै कलत्रे
कलत्ररत्नं सधनं सुवृत्तम् ।
रूपान्वितं सर्वगुणोपपन्नं
विनीतवेषं गुरुवर्जितं च ।। ३ ।।

कर्केऽस्तसंस्थे च मनोहराणि

सौभाग्ययुक्तानि गुणान्वितानि ।

भवन्ति सौम्यानि कलत्रकाणि

कलङ्कहीनानि च संमतानि ।। ४ ।।

सिंहेऽस्तसंस्थे च भवेत्कलत्रं

तीव्रस्वभावं चपलं सुदुष्टम् ।

विहीनवेषं परसद्मरक्तं

वक्रस्वनं स्वल्पसुतं कृशं च ।। ५ ।।

कन्यास्तसंस्थे च भवन्ति दाराः

स्वरूपदेहास्तनयैर्विहीनाः ।

सौभाग्यभोगार्थनयेन युक्ताः

प्रियंवदाः सत्यधनाः प्रगल्भाः ।। ६ ।।

तुलेऽस्तसंस्थे गुणगर्विताङ्ग्यो

भवन्ति नार्यो विविधप्रकाराः ।

पुण्यप्रिया धर्मपराः सुदन्ताः

प्रभूतपुत्राः पृथुलाङ्गयुक्ताः ।। ७ ।।

कीटेऽस्तसंस्थे च कलासमेता

भवन्ति भार्याः कृपणा नराणाम् ।

सुकुत्सिताङ्ग्यः प्रणयेन हीना

दौर्भाग्यदोषैर्विविधैः समेताः ।। ८ ।।

चापेऽस्तसंस्थे च भवेत्कलत्रं

सदा नराणां पुरुषाकृतिः स्म ।

सुनिष्ठुरं भक्तिनयेन हीनं

प्रशान्तिसौख्यं मतिवर्जितं च ।। ९ ।।

मृगेऽस्तसंस्थे च भवेत्कलत्रं

धर्मध्वजं सत्सुतया समेतम् ।

परिव्रतं चारुगुणेन युक्तं

सौभाग्ययुक्तं सुगुणान्वितं च ।। १० ।।

कुम्भेऽस्तसंस्थे च भवेत्कलत्रं

स्थिरस्वभावं पतिकर्मरक्तम् ।

देवद्विजप्रीतियुतं प्रकृष्टं

धर्मध्वजं सर्वसुखैः समेतम् ।। ११ ।।

मीनेऽस्तसंस्थे च विकारयुक्तं

भवेत्कलत्रं कुसुतं कुबुद्धि ।

अधर्मशीलं प्रणयेन हीनं

सदा नरानां कलहप्रियं च ।। १२ ।।

**इति कलत्रे लग्नफलम्।**

## अथ ग्रहफलम् ।( ७. ३ )

### सूर्यफलम् ।

स्त्रिया विमुक्तो हतकार्यकीर्ति-

र्भयामयाभ्यां सहितः कुशीलः ।

नृपप्रकोपार्तिकृशो मनुष्यः

सीमन्तिनीसद्मनि पद्मिनीशे ।। १ ।।

**चन्द्रफलम् ।**

महाभिमानी मदनातुरः स्या-

न्नरो भवेत्क्षीणकलेवरश्च ।

धनेन हीनो विनयेन चन्द्रे

चन्द्राननास्थानविराजमाने ।। २ ।।

**भौमफलम् ।**

नानानर्थव्यर्थचित्तोपसर्ग-

वैरिव्रातैर्मानवं हीनदेहम् ।

दारापत्यानन्तदुःखाप्रतप्तं

दारागारेऽङ्गारकोऽयं करोति ।। ३ ।।

**बुधफलम् ।**

चारुशीलविभवैरलंकृतः

सत्यवाक्सुनिरतो नरो भवेत् ।

कामिनीकनकसूनुसंयुतः

कामिनीभवनगामिनीन्दुजे ।। ४ ।।

**गुरुफलम् ।**

शास्त्राभ्यासे सक्तचित्तोविनीतः

कान्तापित्रात्यन्तसंजातसौख्यः ।

मन्त्री मर्त्यः कार्यकर्ता प्रसूतौ

जायाभावे देवपूज्यो यदि स्यात् ।। ५ ।।

**भृगुफलम् ।**

बहुकलाकशलो जलकेलिकृ-

द्रतिविलासविधानविचक्षण: ।

अधिकृतां तु नटीं बहु मन्यते

सुनयनाभवने भृगुनन्दने ।। ६ ।।

**शनिफलम् ।**

आमयेन बलहीनतां गतो

हीनवृत्तिजनाचित्तसंस्थित: ।

कामिनीभवनधान्यदु:खित:

कामिनीभवनगे शनौ नर: ।। ७ ।।

विनाशं चरेत्सप्तमे सैंहिकेय:

कलवादिनाशं करोत्येव नित्यम् ।

कटाहो यथा लोहजो वह्नितप्त-

स्तथा सोऽतिवादान्न शान्तिं प्रयाति ।। ८ ।।

**केतुफलम् ।**

शिखी सप्तमे चाध्वनि क्लेशकारी

कलत्रादिवर्गे सदा व्यग्रता च ।

निवृत्तिश्च सौख्यस्य वै चौरभीति-

र्यदा कीटग: सर्वदा लाभकारी ।। ९ ।।

**इति सप्तमभावे ग्रहफलम् ।**

## अथ सप्तमभवनेशफलम् ।( ७. ४ )

मदपतिस्तनुगः कुरुते नरं

सकलभोगयुतं च गतव्यथम् ।

बहुकलत्रसुखी न हि मानुषो

दलितवैरिजनः प्रमदोत्सुकः ।। १ ।।

मदपतौ धनगे वनिता खला

भवति वित्तवती सुखवर्जिता ।

स्वपतिवाक्यविलोपकरी मदा-

मतिमती स्वयमात्मजवर्जिता ।। २ ।।

मदपतौ सहजस्थलगे स्वयं

बलयुतो निजबान्धववल्लभः ।

भवति देवरपरपक्षयुताबला

स्मरमदा दयितागृहगाः खलाः ।। ३ ।।

स्मरपतिस्तनुते सुखभावगो

विबलिनं पितृवैरकरं खलम् ।

भवति वा दयितापरिपालकः

स्वपतिवाक्ययुता महिला सदा ।। ४ ।।

मदपतिस्तनये तनयप्रदः

सुभगसौख्यकरः सुखसंयुतः ।

भवति दुष्टवधस्तनयैर्युतः

खलखगैर्दयितापरिपालकः ।। ५ ।।

गतवया विपदां तु निषेवको

रिपुगते रुचिरं हि चिरं वपुः ।

मदपतौ दयितादयितः खलु

क्षयगदेन युतः खलखेचरैः ।। ६ ।।

प्रमदभावपतौ निजमन्दिरे

गतरुजं हि नरं परमायुषम् ।

परुषवाग्रहितो ह्यतिशीलवा-

न्भवति कीर्तियुतः परदारगः ।। ७ ।।

निधनगे तु कलत्रपतौ नरः

कलहकृद्गृहिणीसुखवर्जितः ।

दयितया निजया न समागमो

यदि भवेदथवा मृतभार्यकः ।। ८ ।।

मादपतिर्नवमे यदि शीलवा-

न्खलखगैः कुरुते हि नपुंसकम् ।

तपसि तेजनि सुप्रथितो नरः

प्रमदया निजया सह वैरकृत् ।। ९ ।।

दशमगे मदपे नृपदोषदः

कुवचनः कपटी चपलो नरः ।

श्वशुरदुष्टजनानुचरः खलै-

र्निजवधूजनयोर्न हि हर्षकृत् ।। १० ।।

भवगते तु कलत्रपतौ सदा

स्वदयिता प्रियकृच्च तथा सती ।

अनुचरी स्वधवस्य सुशीलिनी

पशुमतिः कलया पितृसंशया ।। ११ ।।

मदपतिर्व्ययगस्तनुवे व्ययं

स्वदयितागृहबन्धुविवर्जितः ।

भवति लौल्यवती खलवाक्यदा

व्ययपरा गृहतस्करयुक्तता ।। १२ ।।

## अथ दृष्टिफलम् । ( ७. ५ )

### सूर्यदृष्टिफलम् ।

संपूर्णदृष्टिं यदि कामभावे

सूर्यश्च कुर्यान्मदनक्षयं च ।

जायाविनाशं खलु शत्रुपीडां

नरो भवेत्पाण्डुरदेहवर्णः ।। १ ।।

### चन्द्रदृष्टिफलम् ।

जायागृहे शीतकरेण दृष्टे

सौंदर्यभार्या गुणशालिनी च ।

चापल्ययुक्ता गजगामिनी च

परापवादे निपुणा कुशीला ।। २ ।।

### भौमदृष्टिफलम् ।

जायागृहे भौमनिरीक्षिते च

जायाविनाशं कुरुते च पुंसाम् ।

बास्तौ तथा व्याधिनिपीडितश्च

स्त्रीतो विवादो गमने महाभयम् ।। ३ ।।

**बुधदृष्टिफलम् ।**

जायागृहे चन्द्रसुतेन दृष्टे
        जायासुखं चैव करोति पुंसाम् ।
जीवेच्चिरं सोऽद्भुतगात्रधारी
        कलाधिशाली धनधान्यभोगी ।। ४ ।।

**गुरुदृष्टिफलम् ।**

कलत्रभावेऽमरपूजितेक्षिते
        जायासुखं पुत्रसुखं नरस्य ।
व्यापारलाभो महती प्रतिष्ठा
        धनेन धर्मेण च संयुतोऽयम् ।। ५ ।।

**भृगुदृष्टिफलम् ।**

कलत्रभावेऽसुरपूजितेक्षिते
        जायासुखं पुत्रसुखं करोति ।
प्रभूतपुत्रं यदि सौम्ययुक्तो
        व्यापारसौख्यं विमलां च बुद्धिम् ।। ६ ।।

**शनिदृष्टिफलम् ।**

जायागृहे मन्दनिरीक्षिते च
        जायाविनाशः खलु मृत्युतुल्यः ।
पाण्डुव्यथा चाथ तनौ च पुंसां
        ज्वरातिसारग्रहणीविकारः ।। ७ ।।

**राहुदृष्टिफलम् ।**

यदि कलत्रगृहे तमवीक्षिते

मदविवृद्धिरथो मनुजस्य वै ।

स्ववचनं हि सदैव तु साधये-

त्तमदशासमये म्रियतेऽङ्गना ।। ८ ।।

**इति सप्तमभावे ग्रहदृष्टिफलम् ।**

**अथ वर्षसंख्या । ( ७. ६ )**

स्त्रीनाशकृद्युगगुणै रविरिन्दुरेव

मृत्युं च तिथ्यसृगथाग्निभयं मुनीन्दौ ।

शशिजः कलत्रे स्त्र्याप्तिं गुरुर्यमयमैर्मनुके ।

सितः स्त्रीवर्षे राहुशनिकेतवः स्त्रीकष्टकराः ।। १ ।।

**अथ विचारः । ( ७. ७ )**

मूर्तौ कलत्रे च नवांशको वा

द्विषट्कभागस्त्रिलवः शुभानाम् ।

अनेन योगेन हि मानवानां

स्यादङ्गनानामचिरादवाप्तिः ।। १ ।।

सौम्यैर्युक्तं सौम्यभं सौम्यदृष्टं

जायास्थानं देहिनामङ्गनाप्तिः ।

कुर्यान्नूनं वैपरीत्यादभावं

मिश्रत्वेन प्राप्तिकाले प्रलापः ।। २ ।।

लग्नाद्व्यये वा रिपुमन्दिरे वा

दिवाकरेन्दू भवतस्तदानीम् ।

शुभेक्षितौ तौ हि कलत्रगेहे

भार्या तदैकां प्रवदेन्नरस्य ।। ३ ।।

गण्डान्तकालेऽपि कलत्रभावे

भृगोः सुते लग्नगतेऽर्कजाते ।

वन्ध्यापतिः स्यान्मनुजस्तदानीं

शुभेक्षितं नो भवनं खलेन ।। ४ ।।

व्ययालये वा मदनालये वा

खलेषु बुद्ध्यालयगे हिमांशौ ।

कलत्रहीनो मनुजस्तनूजै-

र्विवर्जितः स्यादिति वेदितव्यम् ।। ५ ।।

प्रसूतिकाले च कलत्रभावे

यमस्य भूमीतनयस्य वर्गे ।

ताभ्यां प्रदृष्टे व्यभिचारिणी स्या-

द्भर्तापि तस्या व्यभिचारकर्ता ।। ६ ।।

शुक्रेन्दुपुत्रौ च कलत्रसंस्थौ

कलत्रहीनं कुरुते मनुष्यम् ।

शुभेक्षितौ तौ वयसो विरामे

कामं च रामां लभते मनुष्यः ।। ७ ।।

शुक्रेन्दुजीवशशिजैः सकलैस्त्रिभिश्च

द्वाभ्यां युतं मदगृहं तु तथैककेन ।

आलोकितं विषमभैरिदमेव नूनं

यर्ह्यङ्गना भवति नुश्च खलस्वभावा ।। ८ ।।

चन्द्राद्विलग्नाच्च खला: कलत्रे

हन्यु: कलत्रं बलयोगतस्ते ।

चन्द्रार्कपुत्रौ च कलत्रसंस्थौ

पुनश्च तौ स्त्रीपरिलब्धिदौ स्त: ।। ९ ।।

कलत्रभावेशनवांशतुल्या

नार्यो ग्रहालोकनतो भवन्ति ।

एकैव भौमार्कनवांशके च

जामित्रभावे च बुवार्कयोर्वा ।। १० ।।

शुक्रस्य वर्गेण युते कलत्रे

बाह्वङ्गनाप्तिर्भृगुवीक्षणेन ।

शुक्रेक्षिते सौम्यगणेऽङ्गनानां

बाहुल्यमेवाशुभवीक्षणान्न ।। ११ ।।

महीसुते सप्तमगेहयाते

कान्ताावियुक्त: पुरुषस्तदा स्यात् ।

मन्देन दृष्टे म्रियतेऽपि लब्ध्वा

शुभग्रहालोकनवर्जितेऽस्मिन् ।। १२ ।।

पत्नीस्थाने यदा राहु: पापयुग्मेन वीक्षित: ।

पत्नीयोगस्तदा न स्याद्भूत्वापि म्रियतेऽचिरात् ।। १३ ।।

षष्ठे च भवने भौम: सप्तमे राहुसंभव: ।

अष्टमे च यदा सौरिस्तदा भार्या न जीवति ।। १४ ।।

सप्तदशभावस्यैक्यं कृत्वा संख्यास्ति या खलु ।

तत्संख्याकैगतैर्वर्षैर्विवाहो भवति ध्रुवम् ।। १५ ।।

अथवा यत्र वर्षे तु गुरुदृष्टिस्तदोद्वहः ।

कुजदृष्टिस्तु यद्वर्षे तत्र कष्टं विनिर्दिशेत् ।। १६ ।।

कलत्रभावाधिपतेर्हि वाच्या

मूर्तिः कलत्रस्य वयःप्रमाणम् ।

विलग्ननाथेन सखित्वमस्ति

पतिव्रता भक्तियुता सदा सा ।। १७ ।।

सौम्याधिक्ये स्त्रीसुखं क्रूराधिक्ये स्त्रीमरणं नेष्टं च ।।

**।। इति जायाभावविवरणम् ।।**

## ८

## अथाष्टमं मृत्युभवनम् ।

---

अमुकाख्यममुकदैवत्यममुकग्रहयुतं स्वस्वामिना दृष्टं युतं वान्यैरपि शुभाशुभैर्ग्रहैर्न वेति ।।

### तत्र विलोकनीयानि ।( ८. १ )

नद्युत्तारात्यन्तवैषम्यदुर्गं

शस्त्रं चायुः सङ्कटं चेति सर्वम् ।

रन्ध्रस्थाने सर्वथा कल्पनीयं

प्राचीनानामाज्ञया जातकज्ञैः ।। १ ।।

### लग्नफलम् ।( ८. २ )

मेषेऽष्टमस्थे निधनं नरस्य

भवद्विदेशे कुरुते स्थितस्य ।

पदार्थवीक्षानिकषायितत्वं

महाधनित्वं त्वतिदुःखितत्वम् ।। १ ।।

वृषेऽष्टमस्थे च भवेन्नराणां

मृत्युर्गृहे श्लेष्मकृताद्विकारात् ।

महाशयाद्वा च चतुष्पदाद्वा

रात्रौ तथा दुष्टजनैर्महाभयम् ।। २ ।।

तृतीयराशौ हि भवेन्नराणां

मृत्युस्थितेऽन्तश्च कनिष्ठसङ्गात् ।

प्लीहोद्भवाद्वा रससंभवाद्वै

गुदस्य रोगादथवा प्रमादात् ।। ३ ।।

कर्केऽष्टमस्थे च जलोपसर्गा-

त्कीटात्तथातीव हि भीषणाद्वा ।

भवेद्विनाशः परहस्ततो वा

विदेशसंस्थस्य नरस्य चैव ।। ४ ।।

सिंहेऽष्टमस्थे च सरीसृपाद्वै

भवेद्विनाशो मनुजस्य सम्यक् ।

बालोद्भवो वापि वनाश्रितो वा

चौरोद्भवो वाथ चतुष्पदोत्थः ।। ५ ।।

कन्या यदा चाष्टमगा विलासा-

त्सदा स्ववित्तान्मनुजस्य घातः ।

स्त्रीणां हि हन्ता विषमासनस्थः

स्त्रीभिः कृतो वा स्वगृहाश्रिताभिः ।। ६ ।।

तुलाधरे चाष्टमगे च मृत्यु-

र्भवेन्नराणां विपदौषधाद्वै ।

निशागमे चाथ चतुष्पदाद्वा

कृतोपवासादथ वा प्रलापात् ।। ७ ।।

स्थानेऽष्टमे चाष्टमराशिसङ्गा-

न्नृणां विनाशोपवनोद्भवेन ।

रागेण वा कीटसमुद्भवेन

स्वस्थानसंस्थेन कुलोद्भवेन वा ।। ८ ।।

चापेष्टमस्थे च भवेन्नराणां

मृत्युर्निजस्थाननिवासिना ध्रुवम् ।

गुह्योद्भवेनोपगुदोद्भवेन

रोगेण वा कीटचतुष्पदैश्च ।। ९ ।।

मृगोष्टमस्थश्च नरस्य यस्य

विद्यान्वितो मानगुणैरुपेतः ।

कामी च शूरोऽथ विशालवक्षाः

शास्त्रार्थवित्सर्वकलासु दक्षः ।। १० ।।

घटेऽष्टमस्थे तु भवेद्विनाशो

वैश्वानरात्सङ्गमजाच्च रोगात् ।

नानाव्रणैर्वा जलजैर्विकारैः

श्रमैः कृतैर्वापरसंश्रयाद्वा ।। ११ ।।

मीनेऽष्टमस्थे तु जनस्य मृत्यु-

र्भवेदतीसारकृताच्च कष्टात् ।

पित्तज्वराद्वाथ मरुज्ज्वराद्वै

पित्तप्रकोपादथवा च शस्त्रात् ।। १२ ।।

**।। इत्यष्टमे लग्नफलम् ।।**

## अथ ग्रहफलम् ।( ८. ३ )

**सूर्यफलम् ।**

नेत्राल्पत्वं शत्रुवर्गाभिवृद्धि-

बुद्धिभ्रंशः पूरुषस्यातिरोषः ।

अर्थाल्पत्वं कार्श्यमङ्गे विशेषा-

दायु:स्थाने पद्मनीप्राणनाथे ।। १ ।।

**चन्द्रफलम् ।**

नानारोगैः क्षीणदेहोतिनिस्व-

श्चौरारातिक्षोणिपालाभितप्तः ।

चित्तोद्वेगैर्व्याकुलो मानवःस्या-

दायु:स्थाने वर्तमाने हिमांशौ ।। २ ।।

**भौमफलम् ।**

वैकल्यं स्यान्नेत्रयोर्दुर्भगत्वं

रक्तात्पीडा नीचकर्मप्रवृत्तिः ।

बुद्धेरान्ध्यं सज्जनानां च निन्दा

रन्ध्रस्थाने मेदिनीनदनश्चेत् ।। ३ ।।

**बुधफलम् ।**

भूपप्रसादाप्तसमस्तसिद्धि-

र्नरो विरोधी सुतरां स्ववर्गे ।

सर्वप्रयत्नैः परतापहन्ता

रन्ध्रे भवेच्चन्द्रसुतः प्रसूतौ ।। ४ ।।

**गुरुफलम् ।**

प्रेष्यो मनुष्यो मलिनोऽतिदीनो

विवेकहीनो विनयोज्झितश्च ।

नित्यालसः क्षीणकलेवरश्चे-

दायुर्निशेषे वचसामधीशः ।।५ ।।

**भृगुफलम् ।**

प्रसन्नमूर्तिर्नृपलब्धमानः

सदा हि शङ्कारहितः सगर्वः ।

स्त्रीपुत्रचिन्तासहितः कदाचि-

न्नरोऽष्टमस्थानगते सिताख्ये ।।६ ।।

कृशतनुर्नन नु दद्रुविचर्चिको

विभवतोद्भवदोषविवर्जितः ।

अलसतासहितो हि नरो भवे-

न्निधनवेश्मनि भानुसुते स्थिते ।।७ ।।

**राहुफलम् ।**

नृपैः पण्डितैर्वन्दितोऽनिन्दितश्च

सकृद्भाग्यलाभः सकृद्भ्रंश एव ।

धनं जातकं तज्जनाश्च त्यजन्ति

श्रमग्रन्थिरुग्रन्ध्रगश्चेद्धि राहुः ।।८ ।।

**केतुफलम् ।**

गुदं पीड्यते वा जनैर्द्रव्यरोधो

यदा कीटके कन्यके युग्मके वा ।

भवेच्चाष्टमे राहुछायात्मजेऽपि

वृषं चाभियाते सुतार्थस्य लाभः ।। ९ ।।

**अथाष्टमभवनेशफलम् ।( ८. ४ )**

मृतिपतिस्तनुगो बहुदुःखकृ-

द्भवति वा बहुरुष्टविवादकृत् ।

यदि नरो नृपतेर्लभते धनं

मदयुतो बहुदुःखसमन्वितः ।। १ ।।

निधतपे धनगे चलजीवितो

बहुलशास्त्रयुतोऽपि च तस्करः ।

खलखगैश्च शुभं न गदान्वितो

नृपतितो मरणं हि सुनिश्चितम् ।। २ ।।

सहजगेऽष्टमपे सहजैः स्वयं

स च विरोधकरोऽथ सुहृज्जनैः ।

कठिनवाक्यपरश्चपलः खलो

भवति बन्धुजनेन विवर्जितः ।। ३ ।।

मृतिपतौ सुखभावगते नरो

जनकसंचितवैभवनाशकत् ।

गदयुतश्च सुते जनकेऽथवा

कलह एव मिथश्च सदैव हि ।। ४ ।।

मरणभावपतिस्तनये स्थित-

स्तनयनाशकरश्च सदैव हि ।

यदि खलैरशुभं स च धूर्तराट्

शुभखगैश्च शुभं सुतवृद्धिभाक् ।।५ ।।

मृतिपती रिपुभावगतो यदा

रविमहीतनयौ च विरोधकृत् ।

विधुयुतश्च विरोधकरो बुधे

भृगुशनी बहुरोगकरावुभौ ।।६ ।।

मदनगेऽष्टमपेऽपि च गुह्यरु-

क्कृपणदुष्टकुशीलजनप्रियः ।

खलखगैर्बहुपापविरोधकृ-

त्प्रमदया क्षितिजेन च शाम्यति ।।७ ।।

मृतिपतौ मृतिगे व्यवसायकृ

द्गदगणेन युतः शुभवाक्छुचिः ।

कितवकर्मकरः कपटी नरः

कितवकर्मणि ना विदितः कुले ।।८ ।।

सुकृतगेऽष्टमभावपतौ जनो

भवति पापरतः खलु हिंसकः ।

खलु सुहृन्मुखपूज्य इतस्ततो

भवति मित्रगणेन विवर्जितः ।।९ ।।

मृतिपतौ दशमस्थलमाश्रिते

नृपतिकर्मकरोऽपि समः खलैः ।

भवति कर्मकरश्च नरः सदा

प्रियजनै रहितः खलु दुःखितः ।।१० ।।

भवमतोऽष्टमपः खलु चाल्पतो

भवति पुष्टियुतः परतः सुखी ।

शुभखगैर्बहु जीवति युक्खलै-

र्भवति नीचजनैश्च समन्वितः ।। ११ ।।

व्ययगते मृतिपे च कठोरवा-

ग्भवति तस्करकर्मकरः शठः ।

विकलकर्मकरो निपुणः खलो

मृतिमितश्च मृगाङ्कसुभक्षणात् ।। १२ ।।

**अथ ग्रहदृष्टिफलम् ।( ८. ५ )**

**सूर्यदृष्टिफलम् ।**

द्युमणिवीक्षितमष्टमकं गृहं

गुदरुजार्तिकरं च नरस्य हि ।

पितृपरेण व्रतेन विवर्जितो

नृपतिपीडित अन्यरतः स्त्रियाः ।। १ ।।

**चन्द्रदृष्टिफलम् ।**

संपूर्णदृष्टिर्यदि रन्ध्रगेहे

विधोस्तु कुर्यात्खलु मृत्युतुल्यम् ।

व्याधिर्भयं चैव जलादिकष्टं

तथात्यरिष्टं धनधान्यनाशनम् ।। २ ।।

**भौमफलम् ।**

रन्ध्रं गृहं भौमनिरीक्षितं च

हर्षस्तथा बास्तिविशेषपीडा ।

लोहाद्भयं वा धनधान्यनाशो

मार्गे भयं तस्करतो धनव्ययः ।। ३ ।।

अष्टमं हि भवनं बुधेक्षितं

मृत्युनाशनकरो नरः सदा ।

राजवृत्तिकृषिकर्मजीवित-

श्चान्यदेशगमनं च तस्य हि ।। ४ ।।

**गुरुदृष्टिफलम् ।**

रन्ध्रवेश्म सुरपूजितेक्षितं

मृत्युतुल्यरुक्छरदि चाष्टमे ।

राजतो भयमथान्यतो भवे-

द्द्रव्यहीनपुरुषो मतिक्षयः ।। ५ ।।

**भृगुदृष्टिफलम् ।**

रन्ध्रे गृहे शुक्रनिरीक्षिते च

रन्ध्रे सदा व्याधिविवर्धनं च ।

कष्टेन साध्यो भवतीह चार्थः

कुबुद्धितोऽनर्थकर सदा नरः ।। ६ ।।

**शनिदृष्टिफलम् ।**

मृत्युभावगतमन्ददर्शनं

वारितो भवति लोहतो भयम् ।

जन्मतो हि नखवत्सरे भवे-

न्मृत्युतुल्यमथवा रुजो भयम् ।। ७ ।।

**राहुदृष्टिफलम् ।**

निधनवेश्मनि राहुनिरीक्षिते

वंशहानिबहुदु:खितो नरः ।

व्याधिदुःखपरिपीडितोऽथवा

नीचकर्म कुरुतेऽत्र जीवितः ।। ८ ।।

**अथ ग्रहवर्षसंख्या ।( ८. ६ )**

छिद्रे त्रयो मृतिमितो हिमगुः षडब्दे

नाशं कुजस्तु विपदाक्षियमेऽथ सौम्यः ।

मन्वब्दके हि धनधान्यविनाशकारी

गुरुरिन्दुरामैः रोगं सितो दशागमे स्वपराक्रमं च।। १ ।।

**अथ विचारः ।( ८. ७ )**

चतुर्थस्थो यदा भानुः शशिना च विलोकितः ।

यदि नो वीक्षितः सौम्यैर्मरणं तस्य निर्दिशेत् ।। १ ।।

अष्टमाधिपतिर्यत्र तदङ्कं त्रिगुणीकृतम् ।

अष्टमाङ्केन संयुक्तं चोदयेत्स्फुटमायुषः ।। २ ।।

दिनकरप्रमुखैर्निधनाश्रितै-

भर्वति मृत्युरिति प्रवदेत्क्रमात् ।

अनलतो जलतः करवालतो

ज्वरबलेन रुजा क्षुधया तृषा ।। ३ ।।

**।। इत्यष्टमभावविवरणं समाप्तम् ।।**

**९**

**अथ भाग्यभावो नवमः ।**

---

अमुकाख्यममुकदैवतममुकग्रहयुतं च स्वस्वामिना दृष्टं युतं वाऽन्यैः शुभाशुभैर्ग्रहैर्न वेति ।

**तत्र विलोकनीयानि ।( ९. १ )**

धर्मक्रियायां मनसः प्रवृत्ति-

र्भाग्योपपत्तिर्विमलं च शीलम् ।

तीर्थप्रयाणं प्रणयः पुराणैः

पुण्यालये सर्वमिदं प्रदिष्टम् ।। १ ।।

**तत्रादौ लग्नफलम् ।( ९. २ )**

धर्मस्थितं चैव हि मेषलग्नं

चतुष्पदोऽर्थं प्रकरोति धर्मम् ।

तेषां प्रदानेन तु पोषणेन

दयाविवेकेन च पालनेन ।। १ ।।

वृषे च धर्मे तु गते मनुष्यो

धनी च कुर्याद्बचनं प्रभूतम् ।

विचित्रदानैर्बहुलप्रदानै-

र्विभूषणाच्छादनभोजनैश्च ।। २ ।।

तृतीयराशी प्रकरोति धर्मे

धर्मे मतिं तस्य नरस्य चैव ।

अभ्यागताद्वै द्विजभोजनाच्च

दीनानुकम्पाश्रयणाच्च नित्यम् ।। ३ ।।

व्रतोपवासैर्विषमैर्विचित्रै-

र्धर्मं नरः संकुरुते सदैव ।

धर्माश्रिते चैव चतुर्थराशौ

तीर्थाश्रयाद्वा वनसेवया च ।। ४ ।।

आसंस्थितेऽङ्के खलु सिंहराशौ

धर्मं परेषां प्रकरोति मर्त्यः ।

स्वधर्महानिश्च क्रियाभिरेव

सुतीर्थसंपद्विनयैर्विहीनः ।। ५ ।।

धर्मस्थितः स्याद्यदि षष्ठराशिः

स्त्रीधर्मसेवी मनुजो भवेद्वै ।

विहीनभक्तिर्बहुजिष्णुता च

पाखण्डमाश्रित्य तथान्यपक्षम् ।। ६ ।।

तुलाधरे धर्मगते मनुष्यो

धर्मं करोत्येव सदा प्रसिद्धः ।

देवद्विजानां परितोषणाच्च

जनानुरागेण तथाद्भुतः सः ।। ७ ।।

धर्माश्रितोऽलिश्च भवेद्यदा वै

पाखण्डधर्मं कुरुते मनुष्यः ।

पीडाकरश्चैव तथा जनानां

भक्त्या विनीत: परितोषणेन ।।८ ।।

चापे तथा धर्मगते मनुष्य:

करोति धर्मं द्विजपोषणं च ।

स्वेच्छान्वितोऽथो सविनिर्मिता च

प्रभूततोष: प्रथितस्त्रिलोके ।।९ ।।

धर्माश्रिते वै मकरे मनुष्यो

धर्मात्प्रतापी खलु जायते च ।

पश्चाद्विरक्ति: खलु कामिनीषु

कौल्यं समाश्रित्य सदा च पक्षम् ।।१० ।।

कुम्भे च धर्मं प्रगते हि धर्मं

पुंसां विधत्ते सुरसङ्घजातम् ।

वृक्षाश्रयोत्थं च तथाशिषं च

आरामवापीप्रियता सदैव ।।११ ।।

धर्माश्रिते चैव हि मीनराशौ

करोति धर्मं विविधं नृलोके ।

देवालयारामतडागजातं

तीर्थाटनैश्चाथ मखैर्विचित्रै: ।।१२ ।।

## अथ ग्रहफलम् ।( ९. ३ )

**सूर्यफलम् ।**

धर्मकर्मनिरतश्च सन्मतिः
पुत्रमित्रजसुखान्वितः सदा ।
मातृवर्गविषमो भवेन्नरो
धर्मगे सति दिवाकरे खलु ।। १ ।।

**चन्द्रफलम् ।**

कलत्रपुत्रद्रविणोपपन्नः
पुराणवार्ताश्रवणानुरक्तः ।
सुकर्मसत्तीर्थपरो नरः स्या-
द्यदा कलावान्नवमालयस्थः ।। २ ।।

**भौमफलम् ।**

हिंसाविधाने मनसः प्रवृत्तिं
धरापतेर्गौरवतोपलब्धिम् ।
क्षीणं च पुण्यं द्रविणं नराणां
पुण्यस्थितः क्षोणिसुतः करोति ।। ३ ।।

**बुधफलम् ।**

बुध उपकृतिधाता चारुजातादरो यो-
ऽनुचरधनसुपुत्रैर्हर्षयुक्तो विशेषात् ।
विकृतियुतमनस्को धर्मपुण्यैकनिष्ठो
ह्यमृतकिरणजन्मा पुण्यभावे यदा स्यात् ।। ४ ।।

**गुरुफलम् ।**

नरपतेः सचिवः सुकृती पुमा–

न्सकलशास्त्रकलाकलनादरः ।

व्रतकरो हि नरो द्विजतत्परः

सुरपुरोधसि वै नवमस्थिते ।।५ ।।

**भृगुफलम् ।**

अतिथिगुरुसुरार्चातीर्थयात्रोत्सवेषु

पितृकृतधनसंघात्यन्तसंजाततोषः ।

मुनिजनसमवेषो जातिमान्यः कृशश्च

भवति नवमभावे संस्थिते भार्गवेऽस्मिन् ।।६ ।।

**शनिफलम् ।**

धर्मकर्मरहितो विकलाङ्गो

दुर्मतिर्हि मनुजो विमनाः सः ।

संभवस्य समये हि नरस्य

भाग्यसद्मनि शनौ स्थिरचित्तः ।।७ ।।

**राहुफलम् ।**

तमोऽङ्गीकृतं न त्यजेद्वा व्रतानि

त्यजेत्सोदरान्नैव चाति प्रियत्वात् ।

रतिः कौतुके यस्य तस्यास्ति भाग्ये

शयानं सुखं बन्दिनो बोधयन्ति ।।८ ।।

**केतुफलम् ।**

यदा धर्मगाः केतवो धर्मनाशं
सुतीर्थे मतिं म्लेच्छतो लाभवृद्धिम् ।
शरीरे व्यथा बाहुरोगं विधत्ते
तपोदानतो हास्यवृद्धिं करोति ।। ९ ।।

**इति ग्रहफलम् ।**

## अथ नवमभवनेशफलम् ।( ९. ४ )

तनुगते नवमाधिपतौ गुरौ
सुरविनायकपूजनतत्परः ।
सुकृतवान्कृपणो नृपकर्मकृ-
त्स्मृतियुतो मितभुक्स नरः शुचिः ।। १ ।।
नवमपे धनभावगते व्रती
स तु सुशीलसुतश्च नरः शुचिः ।
गतियुतश्च चतुष्पदपीडितो
व्यययुतः शमसाधनतत्परः ।। २ ।।
सुकृतपे सहजस्थलगे तथा
भवति रूपयुतो जनवल्लभः ।
स्वजनबन्धुजनप्रतिपालको
विदितकर्मकरो यदि जीवितः ।। ३ ।।
हिबुकभावगते सुकृतेश्वरे
बुधसुहृत्पितृपूजनतत्परः ।
भवति तीर्थरतः सुरभक्तिमा-
न्निखिलमित्रपरः स समृद्धिमान् ।। ४ ।।

सुकृतपे तनयस्थलगे यदा

सुरमहीसुरभावयुतो नरः ।

प्रकृतिसुन्दरतामतिमान्नरो

मधुरवाक्तनयाश्च भवन्ति हि ।।५ ।।

नवमपे रिपुगे रिपुसंयुतः

प्रणयकद्विकलः कथितः शुचिः ।

विकृतदर्शनभाक्स तथा खलो

भवति निन्दितकीर्तियुतो नरः ।।६ ।।

नवमपे मदगे वनितासुखं

वचनकृच्चतुरा धनसंयुता ।

भवति रागवती किल सुन्दरी

सुकृतकर्मरता बहुशीलिनी ।।७ ।।

भवति दुष्टतनुर्जनवञ्चको

मृतिगते सुकृताधिपतौ यदा ।

खलजनः सुकृतै रहितः शठो

विट्सखश्च तथैव नपुंसकः ।।८ ।।

सुकृतभावपतिर्नवमे स्थितौ

भवति बन्धुजनैः सहितः शुचिः ।

अरुचितश्च विवादकरो जनो

गुरुसुहृत्स्वजनेषु रतः सदा ।।९ ।।

नृपतिकर्मकरो नृपवित्तयु-

क्सुकतकर्मकरो जननीपरः ।

विदितकर्मकरः सुकृताधिपो

गगनगे पुरुषो भवति ध्रुवम् ।।१० ।।

भवति कर्मकरो बहुनायक:

सुकृतवान्बहुदानपर: पुमान् ।

धनपतिर्नृपतेर्बहुवित्तभु-

क्सुकृतपे भवगेहगते सदा ।। ११ ।।

व्ययगत: सुकृताधिपतिर्यदा

भवति मानयुत: परदेशग: ।

मतियुतस्त्वतिसुन्दरदेहयु-

ग्यदि खलाच्च खगादिह धूर्तक: ।। १२ ।।

इति नवमभावाधिपतिफलम् ।

**अथ दृष्टिफलम् ।( ९. ५ )**

**सूर्यदृष्टिफलम् ।**

नवमभाव इहैव निरीक्षिते

दिनकरेण सुखं न भवेत्स्त्रिया: ।

तदनु पापरतो न तपो यदा

तदनु वृद्धतनौ सकलं सुखम् ।। १ ।।

**चन्द्रदृष्टिफलम् ।**

धर्मसद्मनि तु चन्द्रवीक्षिते

चान्यदेशगतराजपुत्रक: ।

बन्धुसौख्यमपि चार्थतो

दयाद्रव्यहीनपुरुषो यश: क्वचित् ।। २ ।।

**भौमदृष्टिफलम् ।**

भाग्यनामभवने कुजेक्षिते
भाग्यवृद्धिरपि वै नरस्य हि ।
शालकेन सह सत्यनाशनं
धर्मयुक्तमपि चोग्रतासुखम् ।। ३ ।।

**बुधदृष्टिफलम् ।**

भाग्यसद्म यदि चेन्दुजेक्षिते
पुत्रसौख्ययुगथो च भाग्यवान् ।
अन्यदेशगतराजपूजितो
मानुषो भवति सन्ततं सुखी ।। ४ ।।

**गुरुदृष्टिफलम् ।**

भाग्ये यथा देवपुरोहितेक्षिते
धर्मप्रवृद्धिः सुखराज्यकामः ।
शास्त्रेषु नैपुण्यमथो सदा भवे-
त्स निर्गुणो राजधनान्वितः सदा ।। ५ ।।

**भृगुदृष्टिफलम् ।**

भाग्यसद्म यदि भार्गवेक्षितं
भाग्यवृद्धिमथवा करोति हि ।
अन्यदेशगतजीविकायुत-
श्चान्यदेशनृपतेर्जयः सदा ।। ६ ।।

**शनिदृष्टिफलम् ।**

भाग्यभाव इनसूनुवीक्षिते

तस्य भाग्यवशतो यशो भवेत् ।

बन्धुहीनः परदेशतः सुखी

धर्महीनः पुरुषः पराक्रमी ।। ७ ।।

**राहुदृष्टिफलम् ।**

नवमसद्म हि राहुनिरीक्षितं

नववधूषु विलासयुतः सदा ।

निजसहोदरतोऽतिनिपीडनं

सुतसुतार्थयुतश्च नरः सुखी ।। ८ ।।

**इति दृष्टिफलम् ।**

**अथ वर्षसंख्या ।( ९.६ )**

तीर्थञ्च धर्मकृदिनो नवमेथ चन्द्र-

स्तीर्थं नखेसृगिह वातभयं च चक्रे ।

गोक्ष्यब्दमातमृतिमिन्दुसुतोऽथ जीव-

स्तिथ्यब्दके पितृमृतिं च सितोऽत्र लक्ष्मीम् ।। १ ।।

शनिराहुकेतुभिर्वर्षतातभयम् ।

## अथ विचारः ।( ९. ७ )

मूर्तेश्चापि निशापतेश्च नवमो भाग्यालयः कीर्तितः तत्स्वस्वामियुतेक्षितः प्रकुरुते भाग्यं स्वदेशोद्भवम् ।

चेदन्यैर्विषयान्तरेऽत्र शुभदाः स्वोच्चादिगाः सर्वदा कुर्युभाग्यविवर्धनन्तु विबला दुःखोपलब्धिं पराम् ।। १ ।।

भाग्येश्वरो भाग्यगतो ग्रहश्चे-

द्योवाधिवीर्यो नवमं प्रपश्येत् ।

यस्य प्रसूतौ स च भाग्यशाली

विलासयुक्तो बहुलार्थयुक्तः ।। २ ।।

चेद्भाग्यगामी खचरः स्वगेहे

सौम्येक्षितो यस्य नरस्य सूतौ ।

भाग्याधिशाली स्वकुलावतंसो

हंसो यथा मानसराजमानः ।। ३ ।।

पूर्णेन्दुयुक्तो रविभूमिपुत्रौ

भाग्यस्थितौ सत्त्वसमन्वितौ च ।

वंशानुमानात्सचिवं नृपं च

कुर्वन्ति ते सौम्यदृशा विशेषात् ।। ४ ।।

स्वोच्चोपगो भाग्यगृहे नभोगो

नरस्य योगं कुरुते स लक्ष्म्या ।

सौम्येक्षितोऽसौ यदि भूमिपालं

दन्तावलोत्कृष्टविलासशीलम् ।। ५ ।।

द्वाविंशे रविणा फलं हि कथितं चन्द्रे चतुर्विंशति-

रष्टाविंशति भूमिनन्दनसमा दन्ताश्च सौम्ये स्मृताः ।

जीवे षोडश पञ्चविंशति भृगौ षट्त्रिंश सौरौ स्मृताः

कर्मेशो यदि कर्मगः फलमिदं लाभोदये संस्मृतम् ।। ६ ।।

**इति भाग्यभावविवरणं समाप्तम्**

**१०**

## अथ दशमभावविचारः ।

अथ दशमं कर्मभवनममुकाख्यममुकदैवतममुकग्रहयुतं स्वस्वामिना युतं दृष्टं च वान्यैः शुभाशुभैर्ग्रहैर्दृष्टं युतं न वेति ।। १ ।।

### तत्र विलोकनीयानि ।( १०. १ )

व्यापारमुद्रानृपमानराज्यं

प्रयोजनं चापि पितुस्तथैव ।

महत्पदाप्तिः खलु सर्वमेत-

द्राज्याभिधाने भवने विचार्यम् ।। १ ।।

### तत्र लग्नफलम् ।( १०. २ )

मेषाभिधः कर्मगृहे यदि स्या-

त्करोति कर्मप्रवरं सुहृष्टम् ।

पैशुन्यरूपं च नृपानुरक्तं

सुनिन्दितं साधुजनस्य लोके ।। १ ।।

वृषेऽम्बरस्थे प्रकरोति कर्म

व्ययात्मकं साधुजनानुकम्पम् ।

द्विजेन्द्रदेवातिथिपूजकं च

ज्ञानात्मकं प्रीतिकरं सतां च ।। २ ।।

युग्मेऽम्बरस्थे प्रकरोति मर्त्यः

कर्म प्रधानं गुरुभिः प्रदिष्टम् ।

कीर्त्यान्वितं प्रीतिकरं जनानां

प्रभासमेतं कृषिजं सदैव ।। ३ ।।

कर्केऽम्बरस्थं प्रकरोति मर्त्यः

कर्म प्रपारामतडागजातम् ।

विचित्रवापीतरुवृन्दजं च

कूपादिधर्मैकपरं सदैव ।। ४ ।।

सिंहेऽम्बरस्थे कुरुते मनुष्यो

रौद्रं सपापं विकृतं च कर्म ।

सपौरुषं प्रापणमेव नित्यं

वधात्मकं निन्दितमेव पुंसाम् ।। ५ ।।

नभःस्थलस्थस्त्वथ षष्ठराशिः

करोति कर्मज्ञमितो मनुष्यम् ।

स्त्रीराजभारो जववान्निरुक्च

सुरूपयोषिन्नितरां धनी च ।। ६ ।।

तुलाधरे व्योमगते मनुष्यो

वाणिज्यकर्मप्रचुरं करोति ।

धर्मात्मकं चापि नयेन युक्तं

सतामभीष्टं परमं पदं च ।। ७ ।।

कीटेऽम्बरस्थो प्रकरोति कर्म

पुमान्सुदुष्टैः पुरुषैः समानम् ।

पीडाकरं देवगुरुद्विजानां

सुनिर्दयं नीतिविवर्जितं च ।। ८ ।।

चापेऽम्बरस्थे प्रकरोति कर्म

सेवात्मकं चौर्ययुतं मनुष्यः ।

परोपकारात्मकमोजसाढ्यं

नृपात्मकं भूरियशःसमेतम् ।। ९ ।।

मृगेऽम्बरस्थे प्रचुरप्रतापं

कर्मप्रधानं कुरुते मनुष्यम् ।

सुनिर्दयं बन्धुवधैः समेतं

धर्मेण हीनं खलसम्मतं च ।। १० ।।

घटेऽम्बरस्थे च करोति कर्म

प्रयाणसक्तं परवञ्चनार्थम् ।

पाखण्डधर्मान्वितमिष्टलोभा-

द्विश्वासहीनं जनताविरुद्धम् ।। ११ ।।

मीनेऽम्बरस्थे च करोति मर्त्यः

कुलोचितं कर्म गुरुप्रदिष्टम् ।

कीर्त्यान्वितं सुस्थिरमादरेण

नानाद्विजाराधनसंस्थितं च ।। १२ ।।

**इति कर्मभावे लग्नफलम् ।**

## अथ ग्रहफलम् ।( १०. ३ )

**सूर्यफलम् ।**

सद्बुद्धिवाहनधनागमनानि नूनं
भूपप्रसादसुतसौख्यसमन्वितानि ।
साधूपकारकरणं मणिभूषणानि
मेषूरणे दिनमणिः कुरुते नराणाम्।। १ ।।

क्षोणीपालादर्थलब्धिर्विशाला
कीर्तिर्मूर्तिः सत्त्वसन्तोषयुक्ता ।
चञ्चल्लक्ष्मीः शीलसंशालिनी स्या-
न्मानस्थाने यामिनीनायकश्चेत् ।।

**भौमफलम् ।**

विश्वंभराप्राप्तिमथो धनित्वं
सत्साहसं परजनोपकृतौ प्रयत्नम् ।
चञ्चद्विभूषणमणिद्रविणागमांश्च
मेषूरणे धरणिजः कुरुते नराणाम् ।। ३ ।।

**बुधफलम् ।**

ज्ञातात्यन्तश्रेष्ठकर्मा मनुष्यो
नानासंपत्संयुतो राजमान्यः ।
चञ्चल्लीलावाग्विलासाविशाली
मानस्थाने बोधने वर्तमाने ।। ४ ।।

**गुरुफलम् ।**

सद्राजचिह्नोत्तमवाहनानि

मित्रात्मजश्रीरमणीसुखानि ।

यशोविवृद्धिर्बहुधा जगत्यां

राज्ये सुरेज्ये विजयं नराणाम् ।।५ ।।

**भृगुफलम् ।**

सौभाग्यसन्मानविराजमान:

कान्तासुतप्रीतिरतीव नित्यम् ।

भृगो: सुते राज्यगते नर: स्या-

त्स्नानार्चनध्यानविराजमान: ।।६ ।।

**शनिफलम् ।**

राज्ञ: प्रधानमतिनीतियुतं विनीतं

संग्रामचन्दनपुराद्यधिकारयुक्तम् ।

कुर्यान्नरं सुखवरं द्रविणेन पूर्णं

मेषूरणे हि तरणेस्तनुज: करोति ।।७ ।।

**राहुफलम् ।**

धनाद्यूनता न्यूनता च प्रतापे

जनैर्व्याकुलोऽसौ सुखं नातिशेते ।

सुहृद्दु:खदग्धो जलाच्छीतलत्वं

पुन: खे तमो यस्य स कूरकर्मा ।।८ ।।

**केतुफलम् ।**

पितुर्नो सुखं कर्मगो यस्य केतुः

स्वयं दुर्भगो मातृनाशं करोति ।

तथा वाहनैः पीडितोरुर्भवेत्स

यदा वैणिकः कन्यकास्थोऽसितेष्टः ।। ९ ।।

**अथ दशमभवनेशफलम् ।( १०. ४ )**

दशमपे तनुगे जननीसुखं

पितरि भक्तिपरः सुखसंयुतः ।

खलखगैर्बहुदुःखपरः खलो

जनकवञ्चनकृच्च सुखान्वितः ।। १ ।।

भवति वित्तगते गगनाधिपे

जनकमातृसुखं शुभखेचरैः ।

कठिनदुष्टवचस्तनुभुङ्नरः

सुतनुकर्मकरो धनवान्भवेत् ।। २ ।।

स्वजनमातृविरोधकरः सदा

बहुलसेवककर्मकरो भवेत् ।

तदनु मातुलपुत्रसुखोल्पको

न हि समर्थवपुः पृथुकर्मणि ।। ३ ।।

दशमपेऽम्बुगते नितरां सुखी

पितरि मातरि पोषणतत्परः ।

सकललोकदशामपि तापकृ-

न्नृपतिसंभवलाभविभूषितः ।। ४ ।।

भवति सुन्दरकर्मकरो नरो

नृपतिलाभयुतोऽप्यतिभोगवान् ।

विमलगानकलाकुशलः स्मृतो

गगनपे सुतगेऽल्पसुखी नरः ।।५ ।।

रिपुगृहे दशमाधिपतौ गदी

नृपतिवैरकरश्च विवादकृत् ।

प्रबलकामपरोऽप्यथ भाग्यतो

रिपुगणाद्यदि जीवति जीवति ।।६ ।।

सुतवती बहुरूपसमन्विता

रमणमातरि भक्तिसमन्विता ।

भवति तस्य जनस्य निरन्तरं

प्रियतमाम्बरपे दयितां गते ।।७ ।।

अतिखलोऽनृतवाक्कपटी नर-

स्तदनु चोरकलाकुशलः सदा ।

जननिपीडनतापकरः सदा

दशमपे निधने तनुजीवितः ।।८ ।।

भवति ना सुभगस्तनुजः सदा

शुभसहोदरमित्रपराक्रमी ।

दशमपे नवमस्थलगे नरः

सततसत्यवचा वसुशालितः ।।९ ।।

जननिसौख्यकरः शुभदः शुभो

भवति मातृकुलेषु रतः सुधीः ।

अतिपटुः प्रबलो दशमाधिपे

स्वगृहगे नृपमानधनान्वितः ।।१० ।।

विजयलाभयुतः प्रमदान्वितः

परपराजयतो वसुलाभवान् ।

सुतसुतानुगतो भवगे गृहे

दशमपे बहुभृत्ययुतो नरः ।। ११ ।।

नृपतिकर्मकरो निजवीर्ययु-

ग्जननिसौख्यविवर्जितवक्रधीः ।

दशमपे व्ययगे परदेशवा-

न्व्ययपरश्च तथा सुभगः स्वयम् ।। १२ ।।

**इति दशमाधिपफलम् ।**

## अथ दृष्टिफलम् । ( १०. ५ )

**सूर्यदृष्टिफलम् ।**

कर्मसद्मनि रवेर्यदि दृष्टिः

कर्मसिद्धिसहितः स नरः स्यात् ।

आद्य एव वयसि म्रियतेऽम्बिका

स्वीयसद्मनि तथोच्चगते सुखम् ।

**चन्द्रदृष्टिफलम् ।**

कर्मसद्मनि सतीन्दुवीक्षिते

स्याच्चतुष्पदकुलोपजीवकः ।

पुत्रदारधनसौख्यदो नृणां

पितृबन्धुसुखधर्मवर्जितः ।। २ ।।

**भौमदृष्टिफलम् ।**

कर्मभावभवनेक्षके कुजे

सर्वसिद्धिसमुपस्थितिः सुखम् ।

आत्मविक्रमदशागमे नृणां

जायते खलु महोदयो नरः ।। ३ ।।

**बुधदृष्टिफलम् ।**

दशमभावगृहे बुधवीक्षिते

कर्मजीविककविताकरो नरः ।

राजमान्यनृपपूजितः सदा

सौख्यदः पितृधनान्वितोद्यमी ।। ४ ।।

कर्मसद्मनि सुरेज्यवीक्षिते

कर्मसिद्धिरथ राजमन्दिरे ।

पुत्रदानधनवर्जितः सुखी

दिव्यहर्म्यसुखपूर्वजाधिकः ।। ५ ।।

**भृगुदृष्टिफलम् ।**

कर्मसद्मनि भृगुप्रतिवीक्षिते

जीविका निजपुरे नृपालये ।

उत्तमाङ्गपरिपीडितो जनः

पुत्रबन्धुसुखमद्भुतं सदा ।। ६ ।।

**शनिदृष्टिफलम् ।**

दशमपद्मनि सौरिविलोकिते

पितृविनाशकरो हि नरस्य तु ।

प्रतनुमातृसुखं न च जीवति

यदपि जीवति भाग्ययुतो नरः ।। ७ ।।

सिंहीसुतः कर्मगृहं च पश्यति

कर्मसिद्धिमतुलां करोति च ।

बाल्यभावसमये पितुर्मृति-

र्मातृसौख्यमपि चाल्पमेव हि ।। ८ ।।

## अथ वर्षफलम् ।( १०. ६ )

एकोनविंशति वियोगमिनोऽम्बरस्थ-

श्चन्द्रस्त्रिवेदधनकृत् क्षितिजो भवर्षे ।

शस्त्राद्भयं विदि हि गोकुशरद्धनं च

जीवोऽर्कके धनमथो भृगुजोऽत्र सौख्यम् ।। १ ।।

शनिराहुकेतुभिः शस्त्रभयं चास्ति ।। २ ।।

## अथ विचारः ।( १०. ७ )

तनोः सकाशाद्दशमे शशाङ्के

वृत्तिर्भवेत्तस्य नरस्य नित्यम् ।

नानाकलाकौशलवाग्विलासैः

सर्वोद्यमैः साहसकर्मभिश्च ।। १ ।।

तनोः सकाशाद्दशमे बलीया
न्स्याज्जीवितं तस्य खगस्य वृत्त्या ।
बलान्विताद्वर्गपतेस्तु यद्वा
वृत्तिर्भवेत्तस्य खगस्य पाके ।। २ ।।
दिवामणिः कर्मणि चन्द्रतन्वो-
र्द्रव्याण्यनेकोद्यमवृत्तियोगात् ।
सत्त्वाधिकत्वं नरनायकत्वं
पुष्टत्वमङ्गे मनसः प्रमोदः ।। ३ ।।
लग्नेन्दुतः कर्मणि चेन्महीजः
स्यात्साहसक्रौर्यनिषादवृत्तिः ।
नूनं नराणां विषयाभिसक्ति-
र्दूरे निवासः सहसा कदाचित् ।। ४ ।।
लग्नेन्दुतः कर्मगो रौहिणेयः
कुर्याद्द्रव्यं नायकत्वं बहूनाम् ।
शिल्पेऽभ्यासः साहसं सर्वकार्ये
विद्वद्वृत्त्या जीवनं मानवानाम् ।। ५ ।।
विलग्नतः शीतमयूखतो वा माने
मघोनः सचिवो यदा स्यात् ।
नानाधनाभ्यागमनानि पुंसां
विचित्रवृत्त्या नृपगौरवं च ।। ६ ।।

होरायाश्च निशाकराद्भृगुसुतो भेषुरणे संस्थितो नानाशास्त्रकलाविलास-विलसद्वृत्त्यादिशेज्जीवनम् ।
दाने साधुमतिं जयं विनयतां कामं धनाभ्यागमं
मानं मानवनायकादविरलं शीलं विशालं यशः ।।७ ।।

होरायाश्च निशाकराद्रविसुतः सूतौ खमध्यस्थितो

वृत्तिं हीनतरां नरस्य कुरुते कार्श्यं शरीरे सदा ।

खेदं वादभयं च धान्यवनयोर्हीनत्वमुच्चैर्मन-

श्चिन्तोद्वेगसमुद्भवेन चपलं शीलं च नो निर्मलम् ।।८ ।।

सूर्यादिभिर्व्योमखगैर्विलग्ना-

दिन्दोः स्वापाके क्रमशो विकल्प्या ।

अर्थोपलब्धिर्जनकाज्जनन्याः

शत्रोर्हिताद्भ्रातृकलत्रभृत्यात् ।।९ ।।

रवीन्दुलग्नास्पदसंस्थितांशे

पदैस्तु वृत्त्या परिकल्पनीयम् ।

सदौषधोर्णादितृणैः सुवर्णै-

र्दिवामणिर्वृत्तिविधिं विदध्यात् ।।१० ।।

नक्षत्रनाथोऽत्र कलत्रतश्च

जलाशयोत्पन्नकृशिक्रियादेः ।

कुजोऽग्निसात्साहमधातुशस्त्रैः

सोमात्मजः काव्यकलाकलापैः ।।११ ।।

जीवो द्विजन्माकरदेवधर्मैः

शुक्रो महिष्यादिकरौप्यरत्नैः ।

शनैश्चरो नीचतरप्रकारैः

कुर्यान्नराणां खलु कर्मवृत्तिम् ।।१२ ।।

कर्मस्वामी ग्रहो यस्य नवांशे परिवर्तते ।

तत्तुल्यकर्मणा वृत्तिं निर्दिशन्ति मनीषिणः ।।१३ ।।

मित्रारिगेहोपगतैर्नभोगै-

स्ततस्ततोऽर्थः परिकल्पनीयः ।

तुङ्गे त्रिकोणे स्वगृहे पतङ्गे

स्यादर्थसिद्धिर्निजबाहुवीर्यात् ।। १४ ।।

लग्नार्थलाभोपगतैः सवीर्यैः

शुभैर्भवेद्धूधनसौख्यमुच्चैः ।

उदीरितं पूर्वमुनिप्रवर्यै-

र्बलानुसारात्परिचिन्तनीयम् ।। १५ ।।

**११**

## अथैकादशभावफलम् ।

अथैकादशलाभभवनममुकाख्यममुकदैवत्यममुकग्रहयुतं न वा । स्वामिना दृष्टं युतं न वान्यैः शुभाशुभैर्ग्रहैर्दृष्टं न वेति ।।

### तत्र विलोकनीयानि ।( ११. १ )

गजाश्वहेमाम्बरत्नजात-

मान्दोलिकामङ्गलमण्डलानि ।

लाभः किलास्मिन्नखिलैर्विचार्य-

मेतत्तु लाभस्य गृहे ग्रहज्ञैः ।। १ ।।

### तत्रादौ लग्नफलम् ।( ११. २ )

लाभाश्रिते सत्यथ मेषराशौ

चतुष्पदोत्थं प्रकरोति लाभम् ।

तथा नराणां नृपसेवया च

देशान्तराराधितसत्प्रभुत्वम् ।। १ ।।

आयस्थिते वै वृषभे प्रलाभो
भवेन्मनुष्यस्य विशिष्टजातः ।
स्त्रीणां सकाशादथ सज्जनानां
कुसीदतोऽग्र्यात्क्षितितस्तथैव ।। २ ।।
तृतीयराशौ कुरुतेऽतिलाभं
लाभाश्रिते स्त्रीदयितं सदैव ।
वस्त्रार्थमुख्यासनयानजातं
सदा नराणां विविधप्रसिद्धिः ।। ३ ।।
लाभो भवेल्लाभगते च राशौ
नृणां चतुर्थे च वराङ्गनानाम् ।
सेवाकृषिभ्यां जनितः प्रभूत-
शास्त्रेण वा साधुजनोपकारात् ।। ४ ।।
लाभाश्रिते पञ्चमके च राशौ
भवेन्मनुष्यस्य च गर्हणाभिः ।
नानाजनानां वधबन्धनैश्च
व्यायामदेशान्तरसंश्रयाच्च ।। ५ ।।
कन्यात्मके लाभगते मनुष्यः
प्राप्नोति लाभं विधिधैरुपायैः ।
छलेन पापेन सुभाषणेन
परस्परैः शून्यकृतैर्विकारैः ।। ६ ।।
तुलाधरे लाभगते मनुष्यः
प्राप्नोति लाभं वनजैर्विचित्रैः ।
सुसाधुसेवाविनयेन नित्यं
सुसंस्तुतं मुख्यतया प्रभुत्वम् ।। ७ ।।

लाभाश्रिते चाष्टमके हि राशौ
　　प्राप्नोति लाभं मनुजोऽतिमुख्यम् ।
शास्त्रागमाभ्यां विनयेन पुंसां
　　नित्यं विवेकन तथाद्भुतेन ।। ८ ।।
लाभाश्रिते चैव धनुर्धरे च
　　नृपाद्धि मानं भजते मनुष्यः ।
सुसेवया वा निजपौरुषेण
　　मनुष्यकाराधनतोऽश्वतोऽपि ।। ९ ।।
लाभाश्रिते वै मकरेऽर्थलाभो
　　भवेन्नराणां जलयानयोगात् ।
विदेशवासान्नृपसेवया च
　　व्ययात्मको भूरितरः सदैव ।। १० ।।
आयस्थिते कुम्भधरे च लाभो
　　भवेन्नराणां जलयानयोगात् ।
विदेशवासान्नृपसेवया च
　　व्ययात्मको भूरितरः सदैव ।। १० ।।
आयस्थिते कुम्भधरे च लाभो
　　भवेन्नराणां जलयानयोगात् ।
त्यागेन धर्मेण पराक्रमेण
　　विद्याप्रभावात्सुसमागमेन ।। ११ ।।
लाभाश्रिते चान्तिमगे च राशौ
　　प्राप्नोति लाभं विविधं मनुष्यः ।
मित्रोद्भवं पार्थिवमानजातं
　　विचित्रवाक्यैः प्रणयेन नित्यम् ।। १२ ।।

**।। इति लाभभावे लग्नफलम् ।।**

## अथ ग्रहफलम् ।( ११. ३ )

**सूर्यफलम् ।**

गीतिप्रीतिं चारुकर्मप्रवृत्तिं
शश्वत्कीर्तिं वित्तपूर्तिं नितान्तम् ।
भूपात्प्राप्तिं नित्यमेव प्रकुर्या-
त्प्राप्तिस्थाने भानुमान्मानवानाम् ।। १ ।।

**चन्द्रफलम् ।**

सन्माननानाधनवाहनाप्तिः
कीर्तिश्च सद्भोगगुणोपलब्धिः ।
प्रसन्नता लाभविराजमाने
ताराधिराजे मनुजस्य नूनम् ।। २ ।।

**भौमफलम् ।**

ताम्रप्रवालविलसत्कलधौतरक्त-
वस्त्रागमं सुललितानि च वाहनानि ।
भूपप्रसादसुकुतूहलमङ्गलानि
दद्यादवाप्तिभवने हि सदावनेयः ।। ३ ।।

**बुधफलम् ।**

भोगासक्तोऽत्यन्तवित्तो विनीतो
नित्यानन्दश्चारुशीलो बलिष्ठः ।
नानाविद्याभ्यासकृन्मानवः स्या-
ल्लाभस्थाने नन्दने शीतभानोः ।। ४ ।।

**गुरुफलम् ।**

सामर्थ्यमर्थागमनं च नूनं

सद्रत्नवस्त्रोत्तमवाहनानि ।

भूपप्रसादं कुरुते नराणां

गीर्वाणवन्द्यो यदि लाभसंस्थः ।।५ ।।

**भृगुफलम् ।**

संगीतनृत्यादिरतो नितान्तं

नित्यं च वित्तगमनानि नूनम् ।

सत्कर्मधर्मागमचित्तवृत्ति-

र्भृगोः सुतो लाभगतो यदि स्यात् ।।६ ।।

**शनिफलम् ।**

कृष्णाभानामिन्द्रनीलादिकानां

नानाचञ्चद्वस्तुदन्तावलानाम् ।

प्राप्तिं कुर्यान्मानवानां प्रकृष्टां

प्राप्तिस्थाने वर्तमानोऽर्कसूनुः ।।७।।

**राहुफलम् ।**

लभेद्वाक्यतोऽर्थं चरेत्किंकरेण

व्रजेत्किं च देशं लभेत प्रतिष्ठाम् ।

द्वयोः पक्षयोर्विश्रुतः सत्प्रजावा-

न्नताः शत्रवः स्युस्तमो लाभगश्चेत् ।।८ ।।

**केतुफलम् ।**

सुभाषी सुविद्याधिको दर्शनीयः

सुभोगः सुतेजाः सुवस्त्रापि यस्य ।

भवेदौदरार्तिः सुता दुर्भगाश्च

शिखी लाभगः सर्वलाभं करोति ।। ९ ।।

**अथ लाभभवनेशफलम् ।( ११. ४ )**

भवति ना **सुभ**गः स्वजनप्रियः

कलित एव वदान्यकुपुत्रवान् ।

भवपतौ तनुगे च सुकृत्तमो

नृपतितो धनलाभकरः सदा ।। १ ।।

चापलजीवितमल्पसुखं तथा

भवपतिर्धनभावयुतो यदि ।

खलखगे त्वतितस्करतायुतः

शुभखगे धनवानतिजीवति ।। २ ।।

सहजवित्तयुतश्च सुबान्धवः

सहजवत्सल एव नरः सदा ।

सहजगे भवभावपतौ शुचिः

स्वजनमित्रजनानतिलाभदः ।। ३ ।।

अमितजीवनयुक् पितृपङ्क्तियुक्

तनयकर्मरतः सुभगः शुभः ।

सुकृतकर्मवशादतिलाभवा-

न्सुखगते भवभावपतौ भवेत् ।। ४ ।।

जनकसंयुतमातृजनप्रियः
सुतगते भवभावपतौ नरः ।
शुभखगैर्मितभुक्सुखसंयुतः
खलखगैर्विपरीतफलं लभेत् ।।५ ।।
रिपुयुतोऽपि हि दीर्घगदी
कृशश्चतुरताचतुरैः सह सम्मतः ।
रिपुगते भवपे च विदेशगो
मरणमेव च तस्करजं भयम् ।।६ ।।
प्रकृतिजोग्रतनुर्बहुसम्पदो
बहुलजीवियुतं बहुशीलयुक् ।
खलखगैर्बहुरोगयुतो नरः
शुभखगैर्बहुसौख्यसमन्वितः ।।७ ।।
बहुलरोगयुतश्च तथा शुभः
खचर एवमिदं ददते फलम् ।
भवपतौ मृतिगे रिपुवृन्दतो
विपुलवैरकरश्च नरः सदा ।।८ ।।
एकादशेशः सुकृते स्थितश्चे-
द्वहुश्रुतः शास्त्रविशारदश्च ।
धर्मप्रसिद्धो गुरुदेवभक्तः
क्रूरे च बन्धुव्रजवर्जितश्च ।।९ ।।
पितरि वैरयुतो जननीप्रियो
बहुलसद्धनकीर्तियुतो नरः ।
जननिपालनकर्मरतः सदा
भवपतिर्दशमस्थलगो यदा ।।१० ।।

बहुलजीवितमुग्धजनान्वितः

शुभवपुः खलु पुष्टियुतः सदा ।

अतिसुरूपसुवाहनवस्त्रयु-

क्स्वगृहगे भवभावपतौ नरः ।। ११ ।।

भवपतौ व्ययगे च खलो नर-

श्चपलजीवितवित्तयुतो नरः ।

भवति मानयुतो बहुकष्टदः

स्थितधनो बहुदुष्टमतिः खलः ।। १२ ।।

## अथ दृष्टिफलम् ।( ११. ५ )

**सूर्यदृष्टिफलम् ।**

लाभसद्मनि रवीक्षिते सति

प्राप्यते सकलवस्तु निश्चितम् ।

आधियुक्तसुतनाशकृत्सदा

कर्मजीवकसुबुद्धिमान्सदा ।। १ ।।

**चन्द्रदृष्टिफलम् ।**

लाभालये स्याद्यदि चन्द्रदृष्टि-

र्लाभार्थदो व्याधिविनाशनं च ।

चतुष्पदानां कनकस्य वृद्धिः

सर्वत्र लाभश्च न संशयोऽत्र ।। २ ।।

**भौमदृष्टिफलम् ।**

सत्यायभावे कुजवीक्षिते च

आयुर्विवृद्धिः स्त्रिया गर्भनाशः ।

वृद्धिकायसमये तृतीयके

पुत्रसौख्यमपि चतुष्पदात्सुखम् ।। ३ ।।

**बुधदृष्टिफलम् ।**

लाभालये चन्द्रजवीक्षिते सति

भाग्यवांश्च सकलार्थसौख्यमाक् ।

बुद्धिशास्त्रनिपुणोऽतिविश्रुतः

पुत्रिका भवन्ति तस्य पुष्कलाः ।। ४ ।।

**गुरुदृष्टिफलम् ।**

गुरोर्दृष्टिः पूर्णतरायभावे

आयुश्च पूर्णश्च नरः सदा स्यात् ।

पुत्रदारधनसौख्यतः सुखं

व्याधिहीनमपि कान्तिमाञ्जयी ।। ५ ।।

**भृगुदृष्टिफलम् ।**

लाभसद्मनि च शुक्रवीक्षिते

लाभवृद्धिसुखवित्तसंयुतः ।

ग्रामणीर्निजजनादिपालकः

पूर्ववृत्तिपरिपालने रतः ।। ६ ।।

**शनिदृष्टिफलम् ।**

यदायभावे रविसूनुदृष्टे

लाभस्तदा दुष्टखलाद्भवेच्च ।

पुत्रतश्च सुखमल्पकं भवे-

द्धान्यलाभयुगमथापि पण्डितः ।। ७ ।।

**राहुदृष्टिफलम् ।**

आयसद्म यदि राहुवीक्षित-

मायुपूरणकरं नरस्य हि ।

द्रव्यलाभमथ भूपवर्गतः

सुखमात्मवृद्धिनिरतो नरः सदा ।। ८ ।।

**अथ वर्षसंख्या ।( ११. ६ )**

लाभे रविर्जिनसमामितलाभमिन्दौ

भूपाच्च लाभमसृजो जिनवर्षलक्ष्मीम् ।

ज्ञः पञ्चवेदधनमीज्य इनाब्दलक्ष्मीं

शुक्रः करोति धनमार्किफलं कुजोक्तम् ।। १ ।।

शनिराहुकेतुभिर्जिनवर्षलाभः ।

**इति लाभभवनम् ।।**

## अथ भावविचारः ।( ११. ७ )

सूर्येण युक्तोऽथ विलोकितो वा

लाभालयस्तस्य गणोऽत्र चेत्स्यात् ।

भूपालतश्चौरकुलादथो वा

चतुष्पदाद्वा बहुधा धनाप्तिः ।। १ ।।

चन्द्रेण युक्तः प्रविलोकितो वा

लाभालयश्चन्द्रगणाश्रितश्चेत् ।

जलाशयस्त्रीगजवाजिवृद्धिः

पूर्णे भवेत्क्षीणतरे विनाशः ।। २ ।।

लाभालये मङ्गलयुक्तदृष्टे

प्रभूतभूषामणिहेमवृद्धिः ।

विचित्रयात्रा बहुसाहसैःस्या-

न्नानाकलाकौशलबुद्धियोगैः ।। ३ ।।

यज्ञक्रियासाधुजनानुयातो

राजश्रितोत्कृष्टकृशो नरः स्यात् ।

द्रव्येण हेमप्रचुरेण युक्तो

लाभे गुरोर्वर्गयुतेक्षणं चेत् ।। ४ ।।

लाभालये भार्गववर्गजाते

युक्तेक्षिते वा यदि भार्गवेण ।

वेश्याजनैर्वापि गमागमैर्वा

सद्रौप्यमुक्ताप्रचुरस्वलब्धिः ।। ५ ।।

लाभवेश्म शनिवीक्षितयुक्तः

तद्गणेन सहितं यदि पुंसाम् ।

नीलगोमहिषहस्तिहयाढ्यो

ग्रामवृन्दपुरगौरवमिश्रः ।। ६ ।।

युक्तेक्षिते लाभगृहे शुभैश्चे-

द्वर्गे शुभानां समवस्थितेऽपि ।

लाभो नराणां बहुधाथवास्मि-

न्सर्वग्रहैरेव निरीक्षमाणे ।। ७ ।।

## १२

## अथ द्वादशभावफलम् ।

द्वादशभावव्ययभवनममुकारुपममुकदैवत्यममुकग्रह्युतम् । स्वस्वामिदृष्टं न वान्यैः सर्वग्रहैः शुभाशुभैर्दृष्टं युतं न वेति ।।

### तत्र विलोकनीयानि ।( १२. १ )

हानिर्दानं व्ययश्चापि दण्डो बन्धनमेव च ।

सर्वमेद्व्ययस्थाने चिन्तनीयं प्रयत्नतः ।। १ ।।

### लग्नफलम् ।( १२. २ )

मेषे व्ययस्थे स्यात्पुंसां व्ययश्च तनुपीडनम् ।

स्वप्नशीलो नरो नित्यं लाभयुक्छुभसंयुते ।। १ ।।

वृषे व्ययस्थे व्यय एव पुंसां

भवेद्विचित्रो वरयोषितागमः ।

लाभो भवेत्तस्य सदैव पुंसां

सुधातुवादे विबुधैश्च सङ्गः ।। २ ।।

तृतीयराशौ व्ययगे नराणां

व्ययो भवेत्स्त्रीव्यसनात्मकैश्च ।

भूतोद्भवो वा सततं प्रभूत:

कुशीलता पापजनाश्रयाच्च ।। ३ ।।

कर्के व्ययस्थे द्विजदेवतानां

व्ययो भवेद्यज्ञसमुद्भवश्च ।

धर्मक्रियाभिर्विविधाभिरेव

प्रशस्यते साधुजनेन लोके ।। ४ ।।

सिंहे व्ययस्थे तु भवेन्नराणा-

मसद्व्ययो भूरितर: सदैव ।

रुगादिपीडा च कुकर्मसङ्गे

विद्याव्यय: पार्थिवचौरता च ।। ५ ।।

कन्याभिधे चान्त्यगते व्ययश्च

भवेन्मनुष्यस्य हि चाङ्गनोत्सवै: ।

विवाहमाङ्गल्यमखैर्विचित्रै:

सत्रै: सभाभिर्बहुसाधुसङ्गात् ।। ६ ।।

तुले व्ययस्थे सुरविप्रबन्धु-

श्रुतिस्मृतिभ्यश्च करो व्यवस्था ।

भवेन्नरोऽसौ नियमैर्यमैश्च

सुतीर्थसेवाभिरिति प्रसिद्ध: ।। ७ ।।

अलौ व्ययस्थे च भवेद्व्ययस्तु

पुंसां प्रमादेन विडम्बनाभि: ।

कुमित्रसेवाजनिता सुनिन्दा

धनव्ययश्चौरकृताधिकारात् ।। ८ ।।

चापे व्यास्थे बहुवञ्चनाभि-

व्र्ययो भवेत्पापजनप्रसङ्गात् ।

सेवाकृताद्वित्तधिया च पुंसां

कृषिप्रसङ्गात्परवञ्चनाद्वा ।। ९ ।।

मृगे व्ययस्थे च भवेन्नराणां

व्ययस्तु पानासवसस्यजातः ।

स्ववर्गपूजाजनितोऽन्यतस्तथा

कृषिकियाभिश्च धनव्ययोऽन्यथा ।। १० ।।

घटे व्ययस्थे सुरसिद्धविप्र-

तपस्विबान्दिव्रजतो व्ययस्तु ।

पुंसां भवेत्साधुजनानुरोधा-

च्छस्त्रप्रदिष्टागतितश्च भूरि ।। ११ ।।

मीने व्यायस्थे जलयानतो वा

कुसङ्गमाद्वा प्रभवेद्व्ययश्च ।

पुंसां कुमित्रासनतोऽपि जात-

स्तथा विवादेन निरन्तरेण ।। १२ ।।

**इति व्ययभावे लग्नफलम् ।**

## अथ दृष्टिफलम् ।( १२. ३ )

**सूर्यफलम् ।**

तेजोविहीने नयने भवेतां
तातेन साकं गतचित्तवृत्तिः ।
विरुद्धबुद्धिर्व्ययभावयाते
कान्ते नलिन्याः फलमुक्तमार्यैः ।। १ ।।

**चन्द्रफलम् ।**

हीनत्वं वै चारुशीलेन मित्रै-
र्वैकल्यं स्यान्नेत्रयोः शत्रुवृद्धिः ।
रोषावशः पूरुषाणां विशेषा-
च्छीतांशुश्चेद्द्वादशे वेश्मनि स्यात् ।। २ ।।

**भौमफलम् ।**

स्वमित्रवैरं नयनातिबाधां
क्रोधाभिभूतं विकलत्वमङ्गे ।
धनव्ययं बन्धनमल्पतेजो
व्ययस्थभौमो विदधाति नूनम् ।। ३ ।।

**बुधफलम् ।**

दयाविहीनः स्वजनैर्विभक्तः
सत्कार्यदक्षो विजितारिपक्षः ।
धूर्तो नितान्तं मलिनो नरः स्या-
द्व्ययोपपन्ने द्विजराजसूनौ ।। ४ ।।

**गुरुफलम् ।**

नानाचित्तोद्वेगसञ्जातकोपं
पापात्मानं सालसं त्यक्तलज्जम् ।
बुद्ध्याहीनं मानवं मानहीनं
वागीशोऽयं द्वादशस्थ: करोति ।।५ ।।

**भृगुफलम् ।**

सन्त्यक्तसत्कर्मविधिर्विरोधी
मनोभवाराधनमानसश्च ।
दयालुनासत्यविवर्जित: स्या-
त्काव्ये प्रसूतौ व्ययभावयाते ।।६ ।।

**शनिफलम् ।**

दयाविहीनो विधनो व्ययार्त:
सदालसो नीचजनानुरक्त: ।
नरोऽङ्गभङ्गोज्झितसर्वसौख्यो
व्ययस्थिते भानुसुते प्रसूतौ ।।७ ।।

**राहुफलम् ।**

तमो द्वादशे विग्रहे संग्रहेऽपि
प्रपातात्प्रपातोऽथ सञ्जायते हि ।
नरो भाम्यतीतस्ततो नार्थसिद्धि-
र्विरामे मनोवाञ्छितस्य प्रवृद्धि: ।।८ ।।

**केतुफलम् ।**

शिखी रिष्फगश्चारुनेत्रः सुशिक्षः
स्वयं राजतुल्यो व्ययं सत्करोति ।
रिपोर्नाशनं मातुलान्नैव शर्म
रुजा पीड्यते बस्तिगुह्यं सदैव ।। ९ ।।

**इति व्ययभावे ग्रहफलम् ।**

**अथ व्ययभावेशफलम् ।( १२.४ )**

तनुगते व्ययभावपतौ नरः
सुवचनः स्वसरूपविदेशगः ।
खलजनानुरतश्च विवादयु-
ग्युवातिभिः सहितोऽपि नपुंसकः ।। १ ।।
कृपणता कटुवाग्धनभावगे
व्ययपतौ विकलश्च विनष्टधीः ।
धरणिजे विधनं नृपतस्करा-
दपि च पापकरश्च चतुष्पदे ।। २ ।।
विगतबन्धुजनः खलपूजितो
व्ययपतौ सहजस्थलगे सति ।
धनयुतोऽपि भवेन्मनुजः क्षितौ
कृपणबन्धुजनानुरतः सदा ।। ३ ।।
कठिनकर्मयुतः शुभकर्मकृ-
द्व्ययपतौ सुखगे च सुखान्वितः ।।
सुतजनान्मरणं च दृढव्रती
दिविचरे स भवेदुपकारकः ।। ४ ।।

तनयगेऽपि खलस्तनयो भवे-

द्व्ययपतौ तनुतेऽथ खलान्विते ।

शुभखगेऽतिशुभं पितृकं धनं

भवति चापि समर्थतयान्वित: ।।५ ।।

व्ययपतौ रिपुगे कृपण: खल:

खलखगे नियतं नयनामयम् ।

परगृहाश्रयिणो भृगुपुत्रतो

गतसुत: शुभबुद्धियुतो भवेत् ।।६ ।।

भवति दुष्टमतिश्च गृहाग्रणी:

कपटदुष्टदुराचरण: खल: ।

खलखगे मदगे व्ययभावपे

खलखगे गणिकाधनवान्कुधी: ।।७ ।।

निधनो व्ययपेष्टकपालक:

सकलकार्यविवेकविवर्जित: ।

भवति निन्दित एव तथा शुभे

दिविचरे धनसंग्रहतत्पर: ।।८ ।।

सुकृतकृद्व्ययपे नवमाश्रिते

वृषभगोमहिषीद्रविण: सुधी: ।

भवति तीर्थविचक्षणपुण्ययु-

क्खलखगेऽपि च पापरतो नर: ।।९ ।।

सुतयुतो धनसंग्रहतत्पर:

परजनानुरत: परकार्यकृत् ।

व्ययपतौ दशमे जननीखलो

भवति दुर्वचनानुरत: सदा ।।१० ।।

धनयुतो बहुजीवितयुक्पुमा-

न्नातखलः प्रमदश्च उदारधीः ।

व्ययपतौ भवगे सति सत्यवा-

क्सकलकार्यकरः प्रियवाग्भवेत् ।। ११ ।।

भवति बुद्धियुतः कृपणः खलः

परनिवासरतः स्थिरकार्यकृत् ।

पशुजनैश्च रतो बहुभोजनो

व्ययपतौ व्ययगे सति मानवः ।। १२ ।।

इति व्ययभावेशफलम् ।

**अथ दृष्टिफलम् ।( १२. .५ )**

**सूर्यदृष्टिफलम् ।**

द्वादशे दिनकृता निरीक्षिते

स्थानभङ्गमपि चान्यवाहनम् ।

वाहनाच्च खलुशृङ्गिता भयं

द्वादशाब्दमथ कष्टजीवितम् ।। १ ।।

**चन्द्रदृष्टिफलम् ।**

व्ययगृहे सति चन्द्रनिरीक्षिते

पितृसुखं न करोति नरस्य हि ।

नयनचञ्चलता पटुता धन-

व्ययकरश्च सदानृतभाषकः ।। २ ।।

**भौमदृष्टिफलम् ।**

व्ययगृहे सति भौमनिरीक्षिते

पितृसुखं न करोति नरस्य हि ।

सकलशत्रुविनाशकरः सदा

तदपि चान्यजनाद्धि सुखक्षयम् ।। ३ ।।

**बुधदृष्टिफलम् ।**

व्ययगृहे शशिपुत्रनिरीक्षिते

व्ययकरश्च सदैव विवाहतः ।

स्वजनबन्धुविरोधमहर्निशं

हृदयदुष्टरुजा व्रणवातजा ।। ४ ।।

**गुरुदृष्टिफलम् ।**

व्ययगृहे सुरराजनिरीक्षिते

व्ययकरः सुरभूसुरकार्यकृत् ।

सकलकष्टकरो रिपुपीडितः

सकलस्वार्थपरः स च बुद्धिमान् ।। ५ ।।

**शनिदृष्टिफलम् ।**

व्ययगृहे सति मन्दनिरीक्षिते

धनविनाशकरो हि धनव्ययम् ।

सुतकलत्रसुखाल्पतयान्वितः

समरतो विजयी स भवेन्नरः ।। ६ ।।

**राहुदृष्टिफलम् ।**

व्ययगृहे सति राहुनिरीक्षिते

व्ययविवर्जितदानविवर्जितः ।

समरशत्रुविनाशकरः सदा

विफलता च सुखं प्रचुरं भवेत् ।। ७ ।।

**इति दृष्टिफलम् ।**

## अथ वर्षसंख्या ।( १२. ६ )

त्रिंशदष्टयुतं धनव्ययरविश्चन्द्रो जलपीडनं,

पञ्चवेदमितकुजो धनहरं बाणे व्ययं चन्द्रजः।

द्वाविंशत्पञ्चविंशे धनव्ययगुरुः शुक्रो,

धनं द्वादशे चत्वारिंशत्पञ्चसंयुततमः केतुः शनिर्हानिदः ।। १ ।।

## अथ व्ययभावविचारः ।( १२. ७ )

व्ययालये क्षीणबलः कलावा-

न्सूर्योऽथवा द्वावपि तत्र संस्थौ ।

द्रव्यं हरेद्भूमिपतिस्तु तस्य

व्ययालये वा कुजदृष्टयुक्ते ।। १ ।।

पूर्णेन्दुसौम्येज्यसिता व्ययस्थाः

कुर्वन्ति संस्थां धनसंचयस्य ।

प्रान्त्यस्थिते सूर्यसुते कुजेन

युक्तेक्षिते वित्तविनाशनं स्यात् ।। २ ।।

**इति द्वादशभावविवरणं संपूर्णम् ।**

# द्वितीयं परिशिष्टम्

# वृद्धयवनजातकस्य द्वादशभावविवरणश्लोकाः

## २४

## लग्नवर्गफलाध्याय:

**मेषलग्ने फलम्–**

मेषे विलग्ने तु भवेत्प्रसूत–

श्चण्डो धनी सर्वकलासु दक्ष: ।

स्वपक्षहन्ता बहुमन्युयुक्तो

मन्दमतिस्तीक्ष्णकर: सदैव ।। १ ।।

**वृषलग्ने फलम्–**

वृषे विलग्ने तु नर: प्रसूतो

मित्रं क्षमी हास्यरत: सुवाक्य: ।

विज्ञानयुक्तो गुरुलोकभक्त:

शूर: प्रधान: सुतलालसश्च ।।२।।

**मिथुनलग्ने फलम्–**

तृतीयलग्ने तु नरोऽभिजातो

विज्ञानविद्यागमशास्त्रलुब्ध: ।

स्वपक्षपूज्य: परपक्षहन्ता जितेन्द्रिय:

स्याद्बहुवित्तयुक्त: ।।३।।

**कर्कलग्ने फलम्–**

लग्ने कुलीरे यदि संप्रसूतो

नयप्रियोऽसृष्टरुगिष्टयोग: ।

सौभाग्ययुक्तो रतिलालसश्च

मन्त्रोपसेवी गुरुवत्सल: स्यात् ।।४।।

**सिंहलग्ने फलम्**-

सिंहे विलग्ने  तु भवेत्प्रसूतो

नरो विभागी रिपुमर्दनश्च ।

लग्ने विधत्ते विधनं मनुष्यं

बह्वाशिनं नित्यविमुक्तलज्जम् ।

निन्द्यं सतां नीचरतं कृतघ्नम् ।।५।।

**कन्यालग्ने फलम्**-

कन्याविलग्ने तु नरः प्रसूतो

विज्ञानविद्यागमशास्त्रलुब्धः ।

लुब्धो गुरूणां रतिलालसश्च

मानी च सौभाग्यगुणैश्च युक्तः ।।६।।

**तुलालग्ने फलम्**-

तुलाविलग्ने तु नरः प्रसूतः

स्वकर्मणा जीवति बुद्धिमांश्च ।

विद्वत्प्रियः सर्वकलास्वभिज्ञ-

श्चलस्वभावो वनिताजितश्च ।।७।।

**वृश्चिकलग्ने फलम्**-

जातो विलग्ने खलु वृश्चिके स्या-

च्चण्डोऽभिमानी पुरुषोऽतिशूरः ।

विज्ञानवान् काव्यकरः कृतज्ञः

स्यात् संविभागी बहुरोषचित्तः ।।८।।

**धनुर्लग्ने फलम्-**

धनुर्विलग्ने भवति प्रसूतः

कुलप्रधानः सुभगो मनुष्यः ।

शूरोऽर्थवान् भीतिपरः कृतज्ञो

बन्धूपभोग्यो द्रविणो वपुष्मान् ।।९।।

**मकरलग्ने फलम्-**

मृगस्य लग्ने पुरुषोऽभिजातः

स्यान्नीचकर्मा बहुभृत्यपुत्रः ।

लुब्धोऽलसः स्वात्मपरः कृतघ्नः

स्वकार्यनित्यो गुरुवत्सलश्च ।।१०।।

**कुम्भलग्ने फलम्-**

कुम्भस्य लग्ने पुरुषोऽभिजात-

श्चलस्भावः स्थिरसौहृदश्च ।

प्रभूतधान्यार्थयुतः प्रचण्डो

लुब्धोऽन्यनारीरतिलालसश्च ।।११।।

**मीनलग्ने फलम्-**

मीने विलग्नोपगतेऽभिजातः

प्रभूतवित्तद्रविणोऽल्पकेशः ।

त्यागात्मवान् शास्त्रविशारदश्च

न दीर्घसूत्रो न च मन्दबुद्धिः ।।१२।।

**लग्नगतहोराफलम्**-

होरा यदा वासरपस्य लग्ने
तदा प्रसूते बहुसौख्ययुक्तम् ।
विवेकिनं धर्मपरं कृतज्ञं
त्यागात्मकं सत्यरतं मनुष्यम् ।।१३।।

शीतांशुहोरा यदि जन्मकाले
पराङ्गनाभोगपरो नरश्च ।
शुभे शुभं तत्र च क्रूरयुक्ते
सम्भोगकाले न चिरप्रदिष्टम् ।।१४।।

**लग्नगतद्रेष्काणफलम्**

त्र्यंशो यदा वासरपस्य लग्ने
तदा सुतीव्रं जनयेन्मनुष्यम् ।
कलिप्रियं दानरतं विशालं
विद्वेषशीलं द्विजदेवतानाम् ।।१५।।

चन्द्रस्य लग्ने तु यदा त्रिभाग-
स्तदा प्रसूते सुखलाभवन्तम् ।
श्रियान्वितं भक्तिपरं गुरूणां
प्रख्यातकर्माणमुदारचेष्टम् ।।१६।

वह्न्यंशको भूमिसुतस्य लग्ने
करोति मर्त्यः क्षतजार्तदेहम्।
क्रूरस्वभावं हतबन्धुदारं
प्रतापहीनं विषयार्दितं च।।१७।।

तृतीयभागः शशिजस्य लग्ने

करोति सौम्यं सरुजं मनुष्यम् ।

न दीर्घसूत्रं न च वित्तहीनं

सत्याधिकं भूरिसुतं सदैव ।।१८।।

त्र्यंशो यदा देवपुरोहितस्य

लग्नं प्रयातः प्रकरोति मर्त्यम् ।

तेजस्विनं सर्वसुखाधिवासं

सुधर्मिणं प्रीतिकरं स्वपक्षम् ।।१९।।

द्रेष्काणसंस्थो भृगुजस्य लग्नो

वित्तान्वितं संजनयेन्मनुष्यम् ।

शास्त्रानुरक्तं गतरोगपापं

नृपप्रियं देवगुरुप्रसक्तम् ।।२०।।

शनैश्चरस्य त्रिविभागसंस्थो

लग्नः प्रसूते कृपणस्वभावम् ।

धनेन हीनं बहुदुःखयुक्तं

चलप्रतिज्ञं शठतासमेतम् ।।२१।।

**लग्नगतनवांशफलम्-**

लग्नस्य भागे नवमे विवस्वान्

नरं प्रसूते विजितं खलं च ।

नीचानुरक्तं वृजिनैः समेतं

जिह्मस्वभावं सततं विशीलम् ।।२२।।

नवांशको रात्रिपतेर्विलग्ने

करोति मर्त्यं बहुशोधनाढ्यम् ।

कृष्याप्तवित्तं सुतसौख्युक्तं

प्रियातिथिं सर्वजनप्रियं च ।।२३।।

नवांशको भूतनयस्य लग्ने

करोति मर्त्यं बहुदुःखयुक्तम् ।

पित्तज्वरासृक्परिपीडिताङ्गं

प्रतापहीनं सततं कुचैलम् ।।२४।।

लग्ने नवांशः शशिनन्दनस्य

करोति मर्त्यं बहुवित्तयुक्तम् ।

मेधाविनं सर्वसुखर्द्धिभाजं

विवेकिनं पण्डितमल्पवैरम् ।।२५।।

नवांशको देवपुरोहितस्य

लग्ने विधत्ते सुतवित्तसौख्यम् ।

नरातिगाढं कनकायभाजं

सदा नराणां नृपतेश्च पूज्यम् ।।२६।।

नवांशको भार्गवनन्दनस्य

लग्ने विधत्ते बहुपुत्रभोगम् ।

सुरूपचेष्टं गुणिनं समृद्धं

दिव्याङ्गनाभोगसुखं सदैव ।।२७।।

नवांशकः सूर्यसुतस्य लग्ने

नृणां विधत्ते बहुभूमिनाशम् ।

अर्थक्षयं न्यायमतात्तमुग्रं

प्रमोषणं चौरकृतं सदैव ।।२८।।

**लग्नगतद्वादशांशफलम्-**

सूर्यांशको वासरपस्य लग्ने

नरं प्रसूते बहुमन्युवश्यम् ।

लौल्यान्वितं धर्मसुखैर्विहीनं

निस्त्रिंशमुग्रं चपलस्वभावम् ।।२९।।

सूर्यांशको रात्रिपतेर्विलग्ने

करोति मर्त्यं बहुरत्नभाजम् ।

नानार्थलाभैः सहितं सुशीलं

कुलप्रधानं बहुमित्रयुक्तम् ।।३०।।

सूर्यांशको भूमिसुतस्य लग्ने

नरं प्रसूते रुधिरामयाढ्यम् ।

पामादिरोगैर्व्यसनैः समेतं

प्रपञ्चयुक्तं रणकातरं च ।।३१।।

सूर्यांशकः सोमसुतस्य लग्ने

नरं प्रसूते सुभगं सशीलम् ।

विद्यासु रक्तं गुरुदेवभक्तं

परैरधृष्यं रतलालसं च ।।३२।।

सूर्यांशको देवगुरोर्विलग्ने

करोति मर्त्यं बहुशास्त्ररक्तम् ।

जनानुरागेण युतं विनीतं

प्रभूतमित्रं रणकोविदं च ।।३३।।

सूर्यांशको भार्गवनन्दनस्य

लग्ने प्रसूते सुभगं मनुष्यम् ।

रूपान्वितं पार्थिवमानयुक्तं

प्रियातिथिं पुत्रधनैः समेतम् ।।३४।।

सूर्यांशको घस्रपनन्दनस्य

लग्ने प्रसूते रणरोगयुक्तम् ।

नरं कुशीलं निजबन्धुहीनं

शोकार्दितं हानियुतं सदैव ।।३५।।

**लग्नगतत्रिंशांशफलम्-**

त्रिंशांशको भूमिसुतस्य लग्ने

करोति मर्त्यं व्यसनाभिभूतम् ।

व्ययेन हीनं बहुवैरयुक्तं

प्रपूजितं भूपतिना सदैव ।।३६।।

त्रिंशल्लवः सूर्यसुतस्य लग्ने

करोति मर्त्यं परदेशरक्तम् ।

क्षुत्तृच्छ्रमार्तं बहुरोगयुक्तं

स्त्रीणामभीष्टं प्रणतारिपक्षम् ।।३७।।

त्रिंशांशको देवगुरोर्विलग्ने

नरं प्रसूते बहुशास्त्ररक्तम् ।

दृढप्रतिज्ञं दृढसाहसं च

सत्यात्मकं देवगुरुप्रसक्तम् ।।३८।।

त्रिंशांशकः सोमसुतस्य लग्ने

नरं प्रसूते सुखिनं समृद्धम् ।

सद्धर्मयुक्तं गुरुबन्धुमान्यं

मिताशिनं धर्मपरं कृतज्ञम् ।।३९।।

त्रिंशांशको भार्गवनन्दनस्य

लग्ने प्रसूते सदयं मनुष्यम् ।

लज्जान्वितं सत्यपरं कृतज्ञ-

मुदारचेष्टं सुखिनं सुरूपम् ।।४०।।

**स्थानबलिलग्नफलम्-**

लग्नं यदा स्थानबलेन युक्तं

तदा स्थानविवृद्धिदं स्यात् ।

करोति पूजां नृपलोकजातां

सौभाग्ययुक्तं च कलत्रलाभम् ।।४१।।

**दिग्बलिलग्नफलम्-**

लग्नं यदाशोत्थबलेन युक्तं

तदा प्रसूते गुणिनं मनुष्यम् ।

सर्वासु दिक्षु प्रकरोति लाभं

रोगारिनाशं प्रियतां च लोके ।।४२।।

**चेष्टाबलिलग्नफलम्-**

चेष्टाबलाढ्यं प्रकरोति लग्नं

नृणां सुचेष्टां प्रियमित्रलाभम् ।

मिष्टान्नपानं विविधं च लोके

चतुष्पदानामधिपत्यतां च ।।४३।।

**कालबलिलग्नफलम्-**

लग्नं यदा कालबलेन युक्तं

तदा नराणां प्रियलाभकारि ।

सदा तु पूजां नृपतेः सलोकं

रोगक्षयं साधुजनेन सख्यम् ।।४४।।

**षड्वर्गशुद्धलग्नफलम्-**

षड्वर्गशुद्धं यदि जन्मलग्नं

भवेच्छरीरे मनुजस्य सौख्यम् ।

सौभाग्ययुक्तं यदि पाणिपादं

कान्त्यान्वितं सर्वगुणैः समेतम् ।।४५।।

तदेव युक्तं यदि पापवर्गे

हीनं शिरालुं च विरुद्धगन्धम् ।

करालरूपं जटिलं नितान्तं

भवेत्सदा स्त्रीषु भयानकं च ।।४६।।

**अधिकाङ्गकाणयोगौ-**

षड्वर्गशुद्धं यदि सूर्यपुत्र-

भौमाश्रितं सम्भवते मनुष्यः ।

दुष्कर्मरूपो रविणा नु भूयः

काणोऽधिकाङ्गस्तु निरीक्षितं च ।।४७।।

**कर्ण-अक्षिविकारयोगः-**

भौमांशके सौम्यदृशा विहीने

भौमे व्ययस्थे निधनाश्रिते वा ।

भवेत्सकर्णाक्षिरुजो मनुष्यः

कृशोऽल्पवीर्यः सततं च दीनः ।।४८।।

**निशान्धादियोगः-**

सूर्यांशके सौम्यदृशा विहीने

सूर्ये व्ययस्थे निधनस्थिते वा ।

भवेन्निशान्धस्तु निशा प्रजातो

दिवाथवा तैमिरिको मनुष्यः ।।४९।।

**खल्वाटयोगः-**

पापा व्ययस्थाः प्रभवन्ति यस्य

सौम्या मृतिस्था रविणा यदा स्युः ।

खल्वाटकस्तत्र भवेत्प्रजातो

विपर्ययस्थाः शुचिवर्जितश्च ।।५०।।

**अतिरौद्रयोगः-**

क्लीबे व्ययस्थे त्वथ पञ्चमे च

लग्ने ग्रहे चैव भवेन्मनुष्यः ।

बृहत्तराकारधरोऽतिरौद्रो

ग्रहैश्च्युतेर्दृष्टिविवर्जितश्च ।।५१।।

**दृष्टिविकारयोगः-**

सिंहोदये सूर्ययुते कुदृष्टि-

चन्द्रे व्ययस्थे प्रभवेऽर्धदृष्टिः ।

कुजस्य लग्ने कुजसंश्रिते च

विरूपनेत्रः प्रभवेन्मनुष्यः ।।।५२।

**कुब्जवामनयोगः-**

पापा यदा लग्नगताः समस्ताः

सौम्याश्च सर्वेऽष्टमगा भवन्ति ।

कुब्जो भवेदत्र नरोऽभिजातो

विपर्ययाद्वामनकः प्रदिष्टः ।।५३।।

**जनककुष्ठरोगयोगः-**

पापाश्चतुर्था यदि नैधनस्थाः

सौम्या ग्रहाः स्वे जनकोऽत्र योगे ।

विमिश्रितैस्तैः प्रभवेन्मनुष्यः

पापांशकस्थैः स भवेच्च कुष्ठी ।।५४।।

**हृदयरोगयोगः-**

दुर्गन्धिवक्त्रो व्ययगैश्च पापै-

स्तृतीयगैः सौम्यवपुर्धरैश्च ।

पापांशकस्थैरथ हृद्गदः स्या-

त्सदा दरिद्रोऽरिगृहं प्रयातैः ।।५५।।

**प्रलम्बवृषणयोगः-**

पापांशके पापनिरीक्षिते च

पापे विलग्ने शुभदृष्टिहीने ।

भवेन्मनुष्यो वृषणैः प्रलम्बै-

र्जीवस्य दृष्ट्याधिकलिङ्ग एव ।।५६।।

सूर्ये सुखस्थे रविजेऽष्टमस्थे

स्ववर्गसंस्थे शशिजे तनुस्थे ।

शूरो भवेत्कान्तियुतो मनुष्यः

कलस्वनः सत्यरतः सुचक्षुः ।।५७।।

**गुरुनवांशगतलग्नफलम्-**

जीवांशके जीवयुते विलग्ने

भवेन्मनुष्यः सुभगः सुरूपः ।

स्त्रीणामभीष्टः सुरतेऽतुलश्च

प्रियंवदः गीतविचक्षणश्च ।।५८।।

शुक्रांशके शुक्रयुते विलग्ने

भोगी सुविज्ञः प्रणतो मनुष्यः ।

भवेत्सुरूपः सततं दयालुः

सुवेषवस्त्राभरणप्रियश्च ।।५९।।

सौम्ये विलग्ने शुभवक्त्रनेत्रः

शुभांसवक्षाः शुभजे नवांशे ।

चन्द्रस्य होरा शुभबाहुधात्री

त्रिंशांशकः सौम्यभवः सुशीलः ।।६०।।

**नवांशेन विभिन्नाङ्गनांगानां स्वभावस्य च विचारः-**

सूर्यांशके सौम्यसमुद्भवे च

नरो भवेच्छोभनजानुपार्श्वः ।

लग्नं शुभालोकितमिष्टवीर्य-

मोजो विधत्ते सततं नराणाम् ।।६१।।

पापो यदा नीचगतो विलग्ने

स्वभावसंस्थः शुभवर्जितश्च ।

स्याच्छ्यामदन्तः पुरुषोऽत्र जातः

क्रियाविहीनः पिशुनस्वभावः ।।६२।।

कन्यांशके सौम्यदृशा विहीने

विलग्नसंस्थे पुरुषोऽत्र जातः ।

कन्यारतो वाञ्छितपापयुक्तः

स्त्रीलम्पटः स्यात्सततं विलुब्धः ।।६३।।

शनैश्चरे सप्तमगे विलग्ने

यदा नवांशो धरणीसुतस्य ।

वृद्धाङ्गनानां निरतो मनुष्यः

सदा भवेत्कामनिपीडितात्मा ।।६४।।

यदा विलग्ने सधनुः शशाङ्को

नवांशके स्याद्रविनन्दनस्य ।

वेश्यानुरक्तं कुरुते मनुष्यं

सदातुरं पापरतं नृशंसम् ।।६५।।

सिंहांशके सूर्यसुते विलग्ने

भौमेन दृष्टे रविजेऽस्तसंस्थे ।

भवेन्नरो वक्रभगोऽत्र योगे

विपर्ययाद्वक्ररतानुरक्तः ।।६६।।

शनैश्चरे नीचगतेऽस्तसंस्थे

पापे विलग्ने शुभदृष्टिहीने ।

भवेन्मनुष्यः करतोऽक्षतेप्सुः

सदा विरक्तो वरयोषितानाम् ।।६७।।

धनाश्रिते भूतनये सुखस्थे

सौरे व्ययस्थेऽरिनवांशसंस्थे ।

उन्मत्तरूपोऽत्र भवेन्मनुष्यः

सर्वत्र निन्द्यः कृतविस्मृतश्च ।।६८।।

सूर्यात्त्रिकोणे यदि भूमिपुत्रः

शनैश्चरे सौम्यगृहाश्रिते च ।

तदा मनुष्यस्तु सुदीर्घजानु-

र्विरूपदेहः प्रियसाहसश्च ।।६९।।

व्रणार्दिताङ्गः सततं विरूपः

प्रजावियुक्तः पिशुनस्वभावः ।

शनैश्चरे मृत्युगते व्ययस्थे

भौमे भवेत्पापरतो मनुष्यः ।।७०।।

**लग्ने ग्रहदृष्टिफलम्–**

लग्नेऽर्कदृष्टे सुनृशंसचेष्टो

भवेन्मनुष्यः पुरुषस्वभावः ।

सदाभिमानी नतधर्मसंस्थो

रुजान्वितो द्वेषरतः सुशीलः ।।७१।।

चन्द्रेक्षिते धर्मपरो मनुष्यो

भवेद्विलग्ने वरयानभागी।

स्त्रीभोगभोगी प्रभयासमेतः

प्रियंवदः शास्त्रकथानुरक्तः ।।७२।।

कुजेक्षिते श्लेष्मविकारदोषैः

सम्पीड्यते रक्तसमुद्भवैश्च ।

लग्ने मनुष्यः परिभूतदेहः

सदातुरः शास्त्रसमन्वितश्च ।।७३।।

बुधेन दृष्टे सुरसत्यभागी

भवेन्नरः सत्यपरः सुशीलः ।

नरेन्द्रपूज्यः प्रथितः प्रसन्नः

प्रियंवदो दानपरोऽल्पकोपः ।।७४।।

लग्ने सुरेज्येन विलोकिते च

भवेन्नरो रत्नगजाश्वभाजः।

नानार्थलाभैः सहितः प्रगल्भः

प्रधानसेव्यो द्विजदेवभक्तः ।।७५।।

शुक्रेक्षिते सत्यपरो मनुष्यो

भवेन्नरः पुण्यपरः कृतज्ञः ।

यज्वा विवेकी सुदृढः प्रतापी

हतारिपक्षः प्रणतः प्रसन्नः ।।७६।।

सौरेण दृष्टोऽल्पसुखो विलग्ने

भवेन्मनुष्यः भयसंकुलात्मा ।

रोगान्वितः स्वल्पसुतोऽल्पवित्तो

नीचानुरक्तः सततं कृतघ्नः ।।७७।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**लग्नवर्गफलाध्यायश्चतुर्विंशः ।।२४।।**

२५

## लग्नस्थग्रहफलाध्यायः

**लग्नस्थ-उच्चसूर्यफलम्-**

तनुस्थितो वासरपः स्वतुङ्गे

तीव्रां तनुं संजनयेन्नराणाम् ।

तुङ्गांशके वा दृढतासमेतां

षड्वर्गशुद्धो बहुभार्यतां च ।।१।।

**लग्नस्थनीचसूर्यफलम्-**

नीचाश्रितस्तीक्ष्णकरस्तनुस्थः

कायं विधत्ते सरुजं सदैव ।

लावण्यहीनं भृशनीचभागे

खलस्य वर्गे त्वनये प्रयुक्तम् ।।२।।

**लग्नस्थमित्राश्रयसूर्यः**

मित्राश्रयस्थो यदि वासरेशो

मूर्तिं गतो दीर्घतरं प्रसूते ।

मित्रस्य भागे जटिलं नितान्तं

वर्गोत्तमे वाधिकशाखिनं च ।।३।।

**लग्नस्थशत्रुक्षेत्रसूर्यः-**

शत्रोर्गृहे वा यदि तीक्ष्णरश्मि-

र्लग्नाश्रितो हीनशरीरकं च ।

नरं प्रसूते त्वथ शत्रुभागे

हीनाक्षकोणं नयवर्जितं च ।।४।।

**लग्नस्थ -उच्चचन्द्रफलम्-**

चन्द्रे विलग्ने परिपूर्णदेह-

स्तुङ्गस्थितः सौम्यतनुं प्रसूते ।

तुङ्गस्य भागे सुमनोहरां च

षड्वर्गशुद्धो वरनेत्रयुक्ताम् ।।५।।

**लग्नस्थनीचचन्द्रफलम्-**

नीचाश्रितः क्षीणतनुः शशाङ्कः

काणां तनुं लग्नगतः प्रसूते ।

निशान्धकां नीचनवांशसंस्थः

पापोत्थवर्गे तिमिरेण युक्ताम् ।।६।।

**लग्नस्थमित्रराशिचन्द्रफलम्-**

मित्रगृहे शीतकरो विलग्ने

तनुं प्रसूते सुभगां मनोज्ञाम् ।

मित्रस्य भागे वरवक्त्रयुक्तां

वर्गोत्तमस्थः सुशरीरकान्तिम् ।।७।।

**लग्नस्थशत्रुक्षेत्रचन्द्रफलम्-**

निशान्धकं शत्रुगृहाश्रितस्तु

लग्नं गतः स्थूलरुहं प्रसूते ।

शत्रोर्विभागे पृथुदीर्घकं च

मूलत्रिकोणेषु शुभाधरौष्ठम् ।।८।।

**लग्नस्थ-उच्चमङ्गलफलम्-**

भौमः स्वतुङ्गे यदि मूर्तिसंस्थः

करोति संरक्तमनीषमर्त्यम् ।

तुङ्गांशके वा चिपिटस्वभावं

षड्वर्गशुद्धस्त्वथ कर्कशाख्यम् ।।९।।

**लग्नस्थनीचगतमंगलफलम्-**

नीचाश्रितो भूतनयो विलग्ने

करोति सान्द्रं मदनं सदैव ।

नीचांशके तैमिरिकं निशान्धं

पापस्य वर्गे त्वथ वक्रदृष्टिम् ।

मित्रांशके रोगसमेतदृष्टिं

वर्गोत्तमे दूरविलोकनं च ।।१०।।

**लग्नस्थशत्रुक्षेत्रमङ्गलः-**

शत्रोर्गृहे वा यदि भूमिपुत्रो

जनं प्रसूते बहुदृष्टिभाजम् ।

समीपदृष्टिं च नवांशके वा

मूलत्रिकोणे च जलार्द्रदृष्टिम् ।।११।।

**लग्नस्थ-उच्चबुधफलम्-**

बुधो विलग्ने यदि तुङ्गसंस्थो

नरं विधत्ते सुमुखोरुनासम् ।

तुङ्गांशके वा सुरदाधरौष्ठं

षड्वर्गशुद्धः सुशरीरकान्तिम् ।।१२।।

**नीचस्थबुधफलम्-**

नीचाश्रितो वा यदि सोमपुत्र-

स्तनुस्थितो वक्त्रकुगन्धभाजम् ।

नीचांशके दीर्घकरालजिह्वं

पापस्य वर्गे यदि दीर्घकर्णम् ।।१३।।

**लग्नस्थमित्रक्षेत्रबुधफलम्-**

मित्राश्रयस्थो यदि सोमपुत्रो

लग्नं गतः शुभ्रशिरोरुहं च ।

मित्रस्य भागे त्वथ शुभ्रदृष्टिं

वर्गोत्तमस्थः सुहनुं सदैव ।।१४।।

**लग्नस्थशत्रुग्रहबुधफलम्-**

शत्रोर्गृहे वा यदि सोमपुत्रः

करोति मर्त्यं तनुगः करालम् ।

शत्रोर्विभागे चपलस्वभावं

त्रिकोणगो रोगविवृद्धकायम् ।।१५।।

**लग्नस्थ-उच्चगुरुफलम्-**

सुरेज्यमन्त्री यदि तुङ्गसंस्थो

लग्ने मनोज्ञं जनयेन्मनुष्यम् ।

उच्चांशके वा शुभबाहुहस्तं

षड्वर्गशुद्धः शुभचर्मभाजम् ।।१६।।

**लग्नस्थनीचगुरुफलम्-**

नीचाश्रितो देवगुरुर्विलग्ने

खञ्जं प्रसूते निरुजं नितान्तम् ।

नीचांशके खञ्जननासकं च

पापस्य वर्गे च सुभूषणाढ्यम् ।।१७।।

**लग्नस्थमित्रक्षेत्रगुरुफलम्-**

मित्राश्रयस्थो यदि मूर्तिसंस्थो

गुरुः प्रसूते वरवस्त्रभाजम् ।

मित्रांशके वा सुकटिं सुनाभिं

वर्गोत्तमस्थः सुभगोदरं च ।।१८।।

**लग्नस्थशत्रुक्षेत्रगुरुफलम्-**

शत्रोर्गृहे वा यदि देवपूज्यो

मूर्तिस्थितः स्वोदरिकं प्रसूते ।

शत्रोर्विभागे त्वथ फुल्लमेव

मूलत्रिकोणे प्रजनयत्यलिङ्गम् ।।१९।।

**लग्नस्थ-उच्चशुक्रफलम्-**

शुक्रः स्वतुङ्गे यदि लग्नसंस्थः

सुरूपजानुं मनुजं प्रसूते ।

स्वच्चांशकस्थः सुभपाणिपादं

षड्वर्गशुद्धः सुविभक्तगात्रम् ।।२०।।

**लग्नस्थनीचशुक्रफलम्-**

नीचस्थितो वा यदि दानवेज्यो

मूर्तिस्थितः स्वल्पकचं प्रसूते ।

खल्वाटकं यदि नीचभागे

पापोत्थवर्गे वलिरोमभाजम् ।।२१।।

**लग्नस्थमित्रक्षेत्रशुक्रफलम्-**

मित्रगृहस्थो यदि दैत्यपूज्यः

सौभाग्ययुक्तं शुभकीर्तिभाजम् ।

नरं प्रसूते सुनखं विभागे

वर्गोत्तमस्थो बहुरूपिणं च ।।२२।।

**लग्नस्थशत्रुक्षेत्रशुक्रफलम्-**

शुक्रो यदा शत्रुगृहं प्रपन्नो

लग्नं गतः कुब्जतनुं प्रसूते ।

शत्रोर्विभागेऽतिकृशं विगन्धं

मूलत्रिकोणे नयनाभिरामम् ।।२३।।

**लग्नस्थ-उच्चशनिफलम्-**

शनैश्चरो मूर्तिगतः स्वतुङ्गे

लग्नं गतः श्यामतनुं मनुष्यम् ।

तुङ्गांशके स्वे त्वथ भिन्नवर्णं

षड्वर्गशुद्धस्त्वथ गौरगात्रम् ।।२४।।

**लग्नस्थनीचशनिफलम्-**

नीचस्थितः सूर्यसुतो विलग्ने

कासार्तमेवं जनयेन्मनुष्यम् ।

नीचांशकस्थः कफवातपातं

पापस्य वर्गे त्वथ पित्ततां च ।।२५।।

**लग्नस्थमित्रक्षेत्रशनिफलम्-**

मित्राश्रयस्थो यदि सूर्यसुनू-

र्लग्नस्थितो गौरवपुं प्रसूते ।

मित्रांशकस्थोऽस्थिवसापसारं

वर्गोत्तमस्थस्त्वथ पीवराङ्गम् ।।२६।।

**लग्नस्थशत्रुक्षेत्रशनिफलम्-**

शत्रोर्गृहस्थो रविजोऽतिरुष्यं

लग्नाश्रितः स्थूलनखं प्रसूते ।

सुस्थूलदन्तं रिपुभागसंस्थो

मूलत्रिकोणे तु सुदीर्घजानुम् ।।२७।।

स्वोच्चस्थितः स्वभवने क्षितिपालतुल्यो

लग्नेऽर्कजे भवति देशपुराधिनाथः ।

शेषेषु दुःखमदपीडित एव बाल्ये

दारिद्र्यकामव्यसनो मलिनोऽलसश्च ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**लग्नस्थग्रहफलाध्यायः पञ्चविंशः।।२५।।**

## २६

## धनभावफलाध्यायः

**द्वितीयभावस्थसूर्यफलम्-**

सूर्यो द्वितीये यदि तुङ्गसंस्थो

धनं प्रसूते नृपमानजातम् ।

उच्चांशके वा नृपसेवकं च

षड्वर्गशुद्धः शुभलोकदत्तम् ।।१।।

नीचाश्रितो वासरपो द्वितीये

पापार्जितं धर्मधनं प्रसूते ।

नीचांशकस्थः स्थलजं सदैव

पापस्य वर्गे त्वथ चौर्यजं च ।।२।।

मित्राश्रयस्थो दिनपो द्वितीये

करोति जातं धनधान्यसम्भवम् ।

मित्रस्य भागे त्वथ लोकजातं

वर्गोत्तमस्थः परदारजातम् ।।३।।

शत्रोर्गृहे वा यदि तीक्ष्णरश्मि-

र्द्वितीयगः स्वल्पधनं प्रसूते ।

शत्रोर्गृहस्थोऽधमसेवया च

मूलत्रिकोणे त्वथ भिक्षजं च ।।४।।

**धनस्थचन्द्रफलम्-**

चन्द्रो द्वितीये यदि तुङ्गसंस्थो

मुक्तामणिप्रायधनं प्रसूते ।

तुङ्गांशके वा कनकं च रुप्यं

षड्वर्गशुद्धो विविधं हिरण्यम् ।।५।।

नीचाश्रितः शीतकरः प्रसूते

द्वितीयगो वित्तमसद्व्ययं च ।

नीचस्य भागे तु व्ययेन हीनं

पापोत्थवर्गे च भयं वसूनाम् ।।६।।

मित्राश्रयस्थो यदि वा शशाङ्को

वित्तं प्रसूते सुतजं नराणाम् ।

मित्रस्य भागे कृषिकृत्प्रसूतं

वरोत्तमस्थः सुहृदर्जितं च ।।७।।

शत्रोर्गृहे वा यदि रात्रिनाथः

कोशाश्रितश्चौर्यधनं प्रसूते ।

तदंशके वाथ कुकर्मजातं

मूलत्रिकोणे त्वथ भार्यजोत्थम् ।।८।।

**धनस्थमङ्गलफलम्-**

भौमः स्वतुङ्गे यदि कोशगः

स्याद्युद्धोद्भवं संजनयेद्धनं च ।

उच्चांशके वातिकृशं च कष्टा-

त्षड्वर्गशुद्धः स्वजनोद्भवं च ।।९।।

नीचाश्रितो भूतनयस्तु नीचे

द्वितीयगो निर्धनमेव सूते ।

नीचांशके बह्वृणमेव नित्यं

पापोत्थवर्गे व्रणयुक्तदेहम् ।।१०।।

मित्रगृहे वा यदि भूमिपुत्रः

कोशाश्रितो मित्रबलेन जातम् ।

धनं प्रसूते सुहृदंशके च

वर्गोत्तमे देवगुरुप्रसादात् ।।११।।

शत्रोर्गृहे भूतनयो द्वितीये

धनं प्रसूते न कदाचिदेव ।

शत्रोर्विभागे ऋणपापसङ्गा-

न्मूलत्रिकोणे तु जनोपरोधात् ।।१२।।

**धनस्थबुधफलम्-**

सौम्यः स्वतुङ्गे यदि कोशसंस्थः

सदा धनं भूरिधनस्य धत्ते ।

तुङ्गांशके सस्यचतुष्पदोत्थं

षड्वर्गशुद्धो विविधैरुपायैः ।।१३।।

नीचाश्रितः सोमसुतो धनस्थो

निकृष्टवित्तं कुरुते नराणाम् ।

नीचांशकस्थो रिपुतोऽतिदैन्या-

त्पापोत्थवर्गे बहुवञ्चनाश्च ।।१४।।

मित्राश्रयस्थो यदि सोमपुत्रो

द्वितीयगो वाजिजमेव वित्तम् ।

धत्ते नराणां च सुहृद्विभागे

वर्गोत्तमे वा सुकृतिं प्रसूते ।।१५।।

बुधो यदा शत्रुगृहं प्रयातो

द्वितीयगः शत्रुनिषेवणेन ।

धनं भवेच्छत्रुविभागसंस्थे

स्वल्पं त्रिकोणे वरलोकजातम् ।।१६।।

**धनस्थबृहस्पतिफलम्-**

जीवो द्वितीये यदि तुङ्गसंस्थः

सदा धनं न्यायजितं प्रसूते ।

तुङ्गांशके च द्विजसाधुवृतं

षड्वर्गशुद्धो नृपसम्भवं च ।।१७।।

नीचाश्रितो देवगुरुर्द्वितीये

धनं प्रसूते परदारजातम् ।

नीचांशके चान्त्यजलोके जातं

पापस्य वर्गे बहुकष्टजातम् ।।१८।।

मित्राश्रयस्थो यदि देवमन्त्री

द्वितीयगो वस्त्रगजाश्वजं च ।

धत्ते तदंशे च कृषिप्रसूतं

वर्गोत्तमस्थः सुजनप्रदत्तम् ।।१९।।

यदा द्वितीयेऽरिगृहे सुरेज्यो

धनं विधत्तेऽरिनिषेवणेन ।

शत्र्वंशके शत्रुजनेन दत्तं

मूलत्रिकोणे निधिजं सदैव ।।२०।।

**धनस्थशुक्रफलम्**–

शुक्रो द्वितीये यदि तुङ्गसंस्थः

सदाक्षयं भूरिधनं प्रसूते ।

तुङ्गांशके पूर्वजसंचितं च

षड्वर्गशुद्धो द्वितयं नितान्तम् ।।२१।।

नीचाश्रितो दैत्यगुरुर्द्वितीये

धनं विधते श्रुतिजं नितान्तम् ।

द्यूतार्जितं नीचनवांशसंस्थः

पापस्य वर्गे परदेशसङ्गात् ।।२२।।

मित्राश्रयस्थो यदि दानवेज्यो

द्वितीयसंस्थो नृपजं विधत्ते ।

धनं तदंशे नृपपुत्रजातं

राज्ञीसमुत्थं यदि शुद्धवर्गे ।।२३।।

शुक्रो द्वितीये यदि शत्रुसंस्थः

धनं प्रसूते वरकर्मजातम् ।

शत्रोर्विभागे त्वथ दैत्यजातं

मूलत्रिकोणे स्वसुतार्जितं च ।।२४।।

**धनस्थशनिफलम्-**

शनिद्वितीये यदि तुङ्गसंस्थो

धनं प्रसूते तु कुकर्मजातम् ।

तदंशके कष्टविनिर्जितं च

षड्वर्गशुद्धो व्यसनोद्भवं च ।।२५।।

नीचं गतो भास्करजः प्रसूते

निःकिंचनं नित्यमनेकदुःखम् ।

नरं तदंशेऽन्त्यजवित्तभाजं

पापस्य वर्गे तु सुपापजं च ।।२६।।

मित्राश्रयस्थो यदि सूर्यपुत्रो

द्वितीयगः स्वस्थधनं प्रसूते ।

मित्रस्य भागे त्वथ मृण्मयं च

वर्गोत्तमस्थो जलजं सदैव ।।२७।।

सौरो यदा शत्रुगृहाश्रयस्थो

द्वितीयगः पापधनं प्रसूते ।

शत्रोर्विभागे बहुदासतोत्थं

मूलत्रिकोणे परपोषजं च ।।२८।।

सहस्रनाथो दिनपः प्रदिष्टो

लक्षाधिपो रात्रिकरः सदैव ।

शताधिपो भूतनयः सदैव

कोटीश्वरः सोमसुतः सदैव ।।२९।।

खर्वाधिनाथः सुरराजमन्त्री

शुक्रो ह्यसंख्यः शनिभौमतुल्यः ।

स्वतुङ्गगाः स्युर्यदि सर्व एव

अर्थान्तराले त्वनुपातजातम् ।।३०।।

स्ववर्गजं वित्तमहो दधन्ति

हित्वा हि शुक्रं बहुसङ्गजं च ।

स्वं स्वं धनं स्वासु दशासु सम्यक्

तुङ्गादिगा हि ग्रहजं प्रकृत्या ।।३१।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**धनभावफलाध्यायः षड्विंशः ।।२६।।**

## २७

## सहजभावफलाध्यायः

### तृतीयस्थसूर्यफलम्

तृतीयसंस्थो यदि वासरेशो

मित्रं नृपं तुङ्गगतो विधत्ते ।

तुङ्गांशके वा नृपसम्भवं च

षड्वर्गशुद्धस्त्वथ सार्वभौमम् ।।१।।

नीचाश्रितो नीचधनं विधत्ते

मित्रं तृतीये यदि तीक्ष्णरश्मिः ।

नीचांशके भिक्षुकपुत्रवैरं

पापस्य वर्गे त्वथ चारणं च ।।२।।

मित्राश्रयस्थो यदि वासरेशो

मित्रं द्विजेन्द्रं कुरुते तृतीये ।

मित्रांशकस्थो जनयेत्सुशीलं

वर्गोत्तमस्थोऽद्भुतशास्त्ररक्तम् ।।३।।

रविस्तृतीयेऽरिगृहं प्रयातो

मित्रं विधत्ते रिपुवर्जिताङ्गम् ।

द्विषद्विभागे गुणवर्जितं च

मूलत्रिकोणे पतिमेव शान्तम् ।।४।।

**तृतीयस्थचन्द्रफलम्-**

तृतीयगः शीतकरः प्रसूते
मित्रं स्वतुङ्गे कृपणस्वभावम् ।
तस्यैव भागे परतर्ककं च
षड्वर्गशुद्धः परदाररक्तम् ।।५।।

नीचाश्रितो रात्रिपतिस्तृतीये
मित्रं विधत्तेऽन्त्यजमेव नित्यम् ।
नीचस्य भागे त्वथ नर्तकं च
भण्डं च वर्गे खलसम्भवं च ।।६।।

मित्राश्रयस्थो यदि शीतरश्मि-
र्मित्रं प्रसूते परवञ्चकं च ।
मित्रस्य भागे बहुदोषजं च
वर्गोत्तमस्थो घृणया विहीनम् ।।७।।

तृतीयगः शीतकरो विधत्ते
नराधमं शत्रुगृहं प्रयातः ।
शत्रोर्विभागे बहुमाययाढ्यं
मूलत्रिकोणे परदाररक्तम् ।।८।।

**तृतीयस्थमङ्गलफलम्-**

भौमस्तृतीये यदि तुङ्गसंस्थो
मित्रं विधत्ते वरभूमिपालम् ।
तुङ्गांशके वा नृपतेरमात्यं
षड्वर्गशुद्धो द्वितयं सदैव ।।९।।

नीचाश्रितो भूतनयस्तृतीये

मित्रं विधत्ते बहुकामसक्तम् ।

नीचांशकस्थो भृतकं च वैद्यं

पापोत्थवर्गे व्यसनाभिभूतम् ।।१०।।

मित्राश्रयस्थो यदि भूमिपुत्र-

स्तृतीयगो भूरिसुखं प्रसूते ।

मित्रांशके वाक्षयजं कुमारं

वर्गोत्तमस्थः प्रचुरान्नपानम् ।।११।।

शत्रोर्गृहस्थो यदि भूमिपुत्रो

मित्रं प्रसूते सहजाश्रितं च ।

तस्यैव भागे च समृद्धिभाजं

मूलत्रिकोणे त्वथ दण्डनाथम् ।।१२।।

**तृतीयस्थबुधफलम्-**

सौम्यस्तृतीये यदि तुङ्गसंस्थो

मित्रं सदा शान्तमतिं प्रसूते ।

तुङ्गांशके कञ्चुकिनं सुमन्दं

षड्वर्गशुद्धः सुतरां कृतघ्नम् ।।१३।।

नीचाश्रितः सोमसुतस्तृतीये

मित्रं विधत्ते वृजिनैः समेतम् ।

गोपालकं नीचविभागसंस्थः

पापस्य वर्गे गतसौहृदं च ।।१४।।

मित्राश्रयस्थः शशिजस्तृतीये

मित्रं विधत्ते बहुकर्मभाजम् ।

मित्रास्य भागे त्वथ नापितं च

वर्गोत्तमस्थः खलु कुम्भकारम् ।।१५।।

शत्रोर्गृहस्थो यदि सोमपुत्रो

मित्रं तृतीये कुरुते सुनिन्द्यम् ।

तस्यैव भागे जनितातिगं च

मूलत्रिकोणेऽथ मलिम्लुचं च ।।१६।।

**तृतीयस्थगुरुफलम्-**

जीवस्तृतीये यदि तुङ्गसंस्थो

मित्रं विधत्ते विनयेन हीनम् ।

उच्चांशके दम्भपरं नृशंसं

षड्वर्गशुद्धस्तु तथाप्रजं च ।।१७।।

नीचाश्रितो देवगुरुस्तृतीये

मित्रं प्रसूते बहुवादितारम् ।

तदंशके द्यूतरतं सदैव

पापस्य वर्गे गतबन्धुवर्गम् ।।१८।।

जीवो यदा मित्रगृहे तृतीये

प्रसूतेऽतिकृशं च मित्रम् ।

मित्रांशके पण्यपरं प्रधानं

वर्गोत्तमस्थः कितवं सदैव ।।१९।।

तृतीयगो देवगुरुर्यदा च

शत्रोर्गृहे क्लीबसुखं विधत्ते ।

तदंशके शिल्पिनमप्रधानं

मूलत्रिकोणे पतितं निकृष्टम् ।।२०।।

**तृतीयस्थशुक्रफलम्**-

शुक्रो यदा तुङ्गगतस्तृतीये

तदा प्रसूते पतितं च मित्रम् ।

तुङ्गांशके वा नृपसेवकं च

षड्वर्गशुद्धः कलहप्रियं च ।।२१।।

नीचाश्रितो दैत्यगुरुस्तृतीये

मित्रं विधत्ते वधकं नृशंसम् ।

नीचांशके नीचकुलप्रसूतं

पापस्य वर्गे पतितं नृशंसम् ।।२२।।

मित्राश्रयस्थो भृगुजस्तृतीये

करोति मित्रं खलु भण्डमेव ।

मित्रांशके वारणमप्रशस्तं

वर्गोत्तमस्थः शबरं कृतघ्नम्।।२३।।

रिपोर्गृहे भार्गवजः प्रसूते

तृतीयगः क्रीडनकं च मित्रम् ।

तदंशके शिल्पिनमप्रशस्तं

मूलत्रिकोणेऽथ जनैर्निरस्तम् ।।२४।।

**तृतीयस्थशनिफलम्–**

सूर्यात्मजस्तुङ्गगतस्तृतीये

मित्रं विधत्ते वरभूमिपालम् ।

तुङ्गांशके वित्तपतिं प्रसिद्धं

षड्वर्गशुद्धो बहुशास्त्ररक्तम् ।।२५।।

नीचाश्रितः सूर्यसुतस्तृतीये

मित्रं प्रसूते मलिनस्वभावम् ।

नीचांशके वञ्चनतत्परं च

पापस्य वर्गे घृणया विहीनम् ।।२६।।

मित्राश्रयस्थः खलु सूर्यपुत्रो

मित्रं प्रसूते सचिवं नयज्ञम् ।

मित्रांशके वा गुणवित्तभाजं

वर्गोत्तमस्थः स्थितिमानयुक्तम् ।।२७।।

शनिर्यदा शत्रुगृहाश्रयस्थ–

स्तृतीयगः पापरतं च मित्रम् ।

धत्ते तदंशे वृजिनं सुदीनं

मूलत्रिकोणे विजितारिपक्षम् ।।२८।।

**मित्रादीनां संख्या–**

असंख्यमित्रः सविता प्रदिष्टो

दशाधिपः शीतकरस्तु नित्यम् ।

सहस्रमित्रः क्षितिजो बुधश्च

शताधिपो देवपुरोहितश्च ।।२९।।

अशीतिनाथो भृगुनन्दनश्च

सौरस्तु भौमेन मितोऽधिको वा ।

स्वतुङ्गराशौ यदि वर्त्तमानाः

सर्वेऽनुपातस्य वशाद्वदन्ति ।।३०।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**सहजभावफलाध्यायः सप्तविंशः ।।२७।।**

२८

## सुखभावफलाध्यायः

**चतुर्थस्थसूर्यफलम्-**

सुखस्थितो वासरपः स्वतुङ्गे

सुखं विधत्ते बहुकष्टजातम् ।

तुङ्गांशकस्थोऽणुसुखं कदाचि-

त्षड्वर्गशुद्धः परदारजं च ।।१।।

नीचाश्रितो वासपश्चतुर्थे

सुखं विधत्ते न कदाचिदेव ।

नीचांशके दुःखविमिश्रितं च

पापस्य वर्गे ऋणदुःखमिश्रम् ।।२।।

मित्राश्रयस्थो दिनकृच्चतुर्थे

सुखं विधत्ते वृजिनैः समेतम् ।

चौर्योद्भवं शत्रुविभागसंस्थो

वर्गोत्तमस्थोऽक्षजमेव नित्यम् ।।३।।

शत्रोर्गृहे वासरपश्चतुर्थे

युद्धे तु सौख्यं कुरुते नराणाम् ।

शत्रोर्विभागे परसेवया च

मूलत्रिकोणे वधबन्धजातम् ।।४।।

**चतुर्थस्थचन्द्रफलम्-**

सुखस्थितः शीतकरः स्वतुङ्गे

सुखं विधत्ते गजवाजिजातम् ।

तुङ्गांशके हेमसमुद्भवं च

षड्वर्गशुद्धो विविधं सदैव ।।५।।

नीचाश्रितः शीतकरः प्रसूते

सुखं सदा द्यूतजमेव पुंसाम् ।

नीचांशके भूरिकृषिप्रसूतं

पापस्य वर्गे बहुपापजातम् ।।६।।

मित्राश्रयस्थः खलु शीतरश्मिः

सुखस्थितो भूरिसुखं विधत्ते ।

सुतोद्भवं मित्रविभागसंस्थो

वर्गोत्तमस्थो वनितोद्भवं च ।।७।।

चतुर्थगो रात्रिपतिः प्रसूते

शत्रोर्गृहे सौख्यमनीतिजातम् ।

शत्रोर्विभागे कपटप्रसूतं

मूलत्रिकोणे त्वथ धर्मजातम् ।।८।।

**चतुर्थस्थमंगलफलम्-**

चतुर्थगो भूतनयः स्वतुङ्गे

सुखं विधत्ते परसूदनेन ।

तुङ्गांशकस्थः परबन्धनेन

षड्वर्गशुद्धः परवञ्चनेन ।।९।।

सुखाश्रितो भूमिसुतस्तु नीचे

सौख्यं कदाचिन्न करोति पुंसाम् ।

नीचांशकस्थः परपोषणेन

पापस्य वर्गे वधबन्धनेन ।।१०।।

मित्राश्रयस्थः क्षितिजश्चतुर्थे

सौख्यं विधत्ते परदेशयोगात् ।

मित्रांशकस्थः सुरतप्रसङ्गाद्

वर्गोत्तमस्थः परवित्तनाशात् ।।११।।

शत्रोर्गृहे स्याद्यदि भूमिपुत्र-

श्चतुर्थगः पुंश्चलजं च सौख्यम् ।

धत्ते तदंशे करयोनिजातं

मूलत्रिकोणे सुखमोहनाढ्यम् ।।१२।।

**चतुर्थस्थबुधफलम्-**

सौम्यः सुखस्थः सुखमेव धत्ते

महाजनोत्थं यदि तुङ्गसंस्थः ।

तुङ्गांशके पार्थिवजं च पुंसां

षड्वर्गशुद्धो व्ययमेव पुंसाम् ।।१३।।

नीचाश्रयस्थः शशिजो विधत्ते

चतुर्थगः क्लेशजमेव सौख्यम् ।

नीचांशकस्थः परसेवया च

पापस्य वर्गेऽतिविगर्हणेन ।।१४।।

मित्राश्रयस्थः शशिजश्चतुर्थे

सुखं विधत्ते वरपुत्रजातम् ।

मित्रांशकस्थस्तु कलत्रजातं

वर्गोत्तमस्थो दुहितोद्भवं च ।।१५।।

शत्र्वाश्रयस्थः शशिजश्चतुर्थे

सुखं विधत्ते क्रयविक्रयेण ।

तस्यैव भागे पशुपालनेन

मूलत्रिकोणे निजबान्धवोत्थम् ।।१६।।

**चतुर्थस्थगुरुफलम्**-

जीवश्चतुर्थे यदि तुङ्गसंस्थः

सुखं विधत्ते सकलं सदैव ।

तुङ्गस्य भागे च तथा तदर्धं

षड्वर्गशुद्धश्च सुधर्मयुक्तम् ।।१७।।

नीचाश्रितो देवगुरुश्चतुर्थे

सौख्यं विधत्ते बहुनीचसङ्गात् ।

नीचांशकस्थश्च विचित्रभावा-

त्पापस्य वर्गे परपोषणेन ।।१८।।

मित्राश्रयस्थे सुरराजपूज्ये

चतुर्थगे वंशजमेव सौख्यम् ।

भवेत्तदंशे बहुभृत्यजातं

वर्गोत्तमस्थे भगिनीसमुत्थम् ।।१९।।

शत्रोर्गृहस्थो यदि देवपूज्य-

श्चतुर्थगो नीचनिषेवणेन ।

सौख्यं विधत्तेऽथ तदंशके वा

मूलत्रिकोणे नृपसङ्गमेन ।।२०।।

**चतुर्थस्थशुक्रफलम्-**

शुक्रः स्वतुङ्गे यदि बन्धुसंस्थः

सुखं विधत्ते बहुवित्तजातम् ।

तुङ्गांशकस्थस्तु खरोष्ट्रजातं

षड्वर्गसिद्धश्च गजोद्भवं च ।।२१।।

नीचाश्रयस्थो यदि दैत्यमन्त्री

सुखं विधत्ते परनारिजातम् ।

नीचांशके चैव विलासिनीनां

पापस्य वर्गे गुरुपत्निसङ्गात् ।।२२।।

मित्राश्रयस्थो भृगुजश्चतुर्थे

सौख्यं विधत्ते बहुगोधनोत्थम् ।

मित्रांशकेऽजाविकमेव नित्यं

वर्गोत्तमस्थो महिषीसमुत्थम् ।।२३।।

शत्रोर्गृहस्थो यदि दैत्यपूज्यः

सुखं विधत्ते कुनिषेवणेन ।

तदंशके वा परदेशवासा-

न्मूलत्रिकोणे द्विजदेवसङ्गात् ।।२४।।

**चतुर्थस्थशनिफलम्-**

शनिः सुखस्थो यदि तुङ्गसंस्थः

सुखं विधत्ते मृगपक्षिनाशात् ।

तदंशके वामिषभक्षणेन

षड्वर्गशुद्धः कृषिकर्मजातम् ।।२५।।

नीचाश्रितो भास्करजः प्रसूते

चतुर्थगो मुक्तसुखं मनुष्यम् ।

नीचांशके लोकनिबन्धनेन

पापस्य वर्गे पररन्ध्रसङ्गात् ।।२६।।

मित्राश्रयस्थो यदि सूर्यसूनुः

सुखं विधत्ते स्वकलत्रभुक्तम् ।

मित्रांशके वा स्वकुटुम्बहीनं

वर्गोत्तमस्थः परपीडनेन ।।२७।।

शत्र्वाश्रयस्थो रविजः प्रसूते

सुखं चतुर्थे परवञ्चनेन ।

तदंशके मानुषविक्रयेण

मूलत्रिकोणे क्रयविक्रयेण ।।२८।।

**ग्रहसुखप्रदत्वम्-**

अनन्तसौख्यः सुरराजमन्त्री

शताधिपः सोमसुतः सितश्च ।

सहस्रपः शीतमयूखमाली

षष्ट्याधिपाः सूर्यशनैश्चरारा: ।।२९।।

स्वतुङ्गसंस्थास्त्वनुपाततश्च

सौख्यानि यच्छन्ति सदा ग्रहेन्द्राः ।

नीचाश्रिता हीनसुखा भवन्ति

षड्वर्गशुद्धश्च यथा स्वतुङ्गे ।।३०।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**सुखभावफलाध्यायोऽष्टाविंशः ।।२८।।**

## २९

## पञ्चमभावफलाध्यायः

**पञ्चमस्थसूर्यफलम्–**

तुङ्गाश्रितो वासरपः सुतस्थः

सुतान्विधत्तेऽल्पतरान् नृशंसान् ।

तुङ्गांशकस्थः सकलार्थसिद्धिं

षड्वर्गशुद्धः सुभगं मनोज्ञम् ।।१।।

नीचाश्रयस्थो दिनपः सुतस्थः

सुतान्प्रसूते च हि जातनष्टान् ।

नीचांशकस्थो विकलाङ्गभागान्

पापस्य वर्गे त्वथ गर्भनष्टान् ।।२।।

मित्राश्रयस्थो यदि तीक्ष्णरश्मिः

सुतान्प्रसूते पुरतः सुतीव्रान् ।

मित्रांशकस्थस्तु सुशीलवृत्ता–

न्वर्गोत्तमस्थो व्यसनाधिकांश्च ।।३।।

सुताश्रितः शत्रुग्रहे दिनेशः

सुतान्विधत्ते परदेशजातान् ।

शत्रोर्विभागे त्वथ जारजाता–

न्मूलत्रिकोणे गुणवर्जितांश्च ।।४।।

**पञ्चमस्थचन्द्रफलम्-**

सुताश्रितः शीतकरः स्वतुङ्गे

कन्याः प्रसूते विपुलायताक्ष्याः।

तुङ्गांशकस्थस्तु सुरूपयुक्ताः

षड्वर्गशुद्धः सुभगाः मनोज्ञाः ।।५।।

नीचाश्रितो रात्रिपतिः सुतस्थः

कन्याः प्रसूते च सुरूपयुक्ताः ।

नीचांशकस्थश्च कुबुद्धियुक्ताः

पापस्य वर्गे पररक्तभावाः ।।६।।

मित्राश्रयस्थः सुतगश्च चन्द्रः

कन्याः प्रसूते शुभशीलयुक्ताः ।

मित्रांशके शौचपराः सुदान्ताः

वर्गोत्तमे भर्तृपराः सदैव ।।७।।

शत्र्वाश्रयस्थः सुतगस्तु चन्द्रः

कन्याः प्रसूतेऽतिखलस्वभावाः ।

शत्रोर्विभागे तु सुकुत्सिताङ्गा

मूलत्रिकोणे नितरां प्रगल्भाः ।।८।।

**पञ्चमस्थमङ्गलफलम्-**

भौमः सुतस्थस्तनयान् विधत्ते

स्वतुङ्गसंस्थोऽल्पसुजीवितांश्च ।

तुङ्गस्य भागे बहुरोगभाजा-

न्षड्वर्गशुद्धः क्षतजार्द्रदेहान् ।।९।।

नीचाश्रितो भूतनयः सुतस्थः

सुतान्विधत्ते परदाररक्तान् ।

अदीर्घजीवांश्च तदंशकस्थः

पापस्य वर्गे बहुपापरक्तान् ।।१०।।

मित्राश्रयस्थः क्षितिजः सुतस्थः

सुतान्विधत्ते कृपणस्वभावान् ।

मित्रांशकस्थः कुविधिप्रसक्ता-

न्वर्गोत्तमस्थो विजितारिपक्षान् ।।११।।

शत्र्वाश्रयस्थः सुतगो महीजः

करोति पुत्रान् व्रणरुद्धदेहान् ।

तदंशकस्थः सततं कुचैला-

न्मूलत्रिकोणे परतर्ककांश्च ।।१२।।

**पञ्चमस्थबुधफलम्-**

बुधः स्वतुङ्गे यदि पञ्चमस्थः

सुतान्विधत्ते सुभगान्मनोज्ञान् ।

उच्चांशके वा विनयेन युक्ता-

न्षड्वर्गशुद्धो विनयेन हीनान् ।।१३।।

नीचाश्रितः सोमसुतः सुतस्थः

सुतान्विधत्ते बहुदुःखयुक्तान् ।

नीचांशकस्थस्त्वथ कन्यकां च

पापस्य वर्गे विकृतान्नृशंसान् ।।१४।।

मित्राश्रयस्थो यदि पञ्चमस्थः

करोति सौम्यो निरुजान्सुपुत्रान् ।

मित्रांशकस्थो बहुशास्त्ररक्ता-

न्वर्गोत्तमस्थो नयसारदक्षान् ।।१५।।

शत्र्वाश्रयस्थो यदि सोमपुत्रः

सुतान्विधत्ते बहुबन्धुपक्षान् ।

तदंशकस्थः पिशुनस्वभावा-

न्मूलत्रिकोणे गुरुदेवभक्तान् ।।१६।।

**पञ्चमस्थगुरुफलम्**-

जीवः स्वतुङ्गे यदि पञ्चमस्थः

पुत्रान्विधत्ते बहुजीवभाजान् ।

तदंशकस्थः सुभगान्मनोज्ञा-

न्षड्वर्गशुद्धः प्रियदर्शनांश्च ।।१७।।

नीचाश्रयस्थः खलु पञ्चमस्थो

जीवो विधत्ते तनयान्सुदुःखान् ।

तस्यैव भागे वृजिनैः समेता-

न्पापस्य वर्गे गतसौहृदांश्च ।।१८।।

मित्राश्रयस्थः सुतगः सुरेज्यः

सुतान्विधत्ते पतितान्सुरक्तान् ।

द्यूतप्रियान् तस्य विभागसंस्थो

मूलत्रिकोणेऽद्भुतविक्रमांश्च ।।१९।।

**पञ्चमस्थशुक्रफलम्-**

शुक्रः सुतस्थो निजतुङ्गसंस्थो

कन्याः प्रसूते सुभगा मनोज्ञाः ।

तुङ्गांशकस्थो बहुपुत्रयुक्ताः

षड्वर्गशुद्धः शुभरूपयुक्ताः ।।२०।।

नीचाश्रितो दैत्यगुरुः सुतस्थः

कन्याः प्रसूते विविधाः सुरूपाः ।

नीचांशकस्थः पररक्तचिन्ताः

पापस्य वर्गे कृपणस्वभावाः ।।२१।।

मित्राश्रयस्थो भृगुजः सुतस्थः

सुताः प्रसूते पतिभक्तियुक्ताः ।

मित्रांशके वा व्रतसत्ययुक्ता

वर्गोत्तमस्थः प्रभया समेताः ।।२२।।

शत्र्वाश्रयस्थो भृगुजः सुतस्थः

सुताः प्रसूते बहुपापयुक्ताः ।

तदंशके नष्टसुखाः कृतघ्ना

मूलत्रिकोणे हतशत्रुपक्षाः ।।२३।।

**पञ्चमस्थशनिफलम्-**

शनैश्चरः पञ्चमगः स्वतुङ्गे

पुत्रान्प्रसूते बहुशत्रुपक्षान् ।

तदंशके वा बहुरोगयुक्ता-

न्षड्वर्गशुद्धः सुतरां कृतघ्नान् ।।२४।।

नीचाश्रितः सूर्यसुतः सुतस्थः

सुतान् विधत्ते च स्वभावनष्टान् ।

तदंशके वा गतयौवनांश्च

पापस्य वर्गे बहुरोगभाजान् ।।२५।।

मित्राश्रयस्थो रविजः सुतस्थः

पुत्रान्विधत्ते कृषिकर्मसक्तान् ।

तदंशके वा पशुपालनोत्था-

न्वर्गोत्तमस्थो बहुलोकपांश्च ।।२६।।

शत्र्वाश्रयस्थो रविजः प्रसूते

सुतस्थितः कापुरुषांश्च पुत्रान् ।

तदंशके भूततमानतीव

मूलत्रिकोणे बहुपानभाजान् ।।२७।।

यदि भवति सुतर्क्षं युग्ममेवाबलानां

विषममथ नराणां प्रायशो जन्मदं स्यात् ।

युवतिपुरुषषण्ढा दृष्टितुल्या ग्रहेन्द्रा

बलमितपरिपाकं सन्ततेर्धारयन्ति ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**पञ्चमभावफलाध्याय एकोनत्रिंशः ।।२९।।**

# ३०

# रिपुभावफलाध्यायः

**षष्ठस्थसूर्यफलम्-**

स्वतुङ्गगो वासरपोऽरिसंस्थः

शत्रुं विधत्ते व्रतिनं सदैव ।

तुङ्गांशकस्थस्त्वथ विप्रमेव

षड्वर्गशुद्धो नृपतिं सदैव ।।१।।

नीचाश्रयस्थः सवितारिसंस्थः

शत्रुं विधत्ते कुमतिं कृतघ्नम् ।

नीचांशकस्थः प्रमदानुरक्तं

पापस्य वर्गे परतर्ककं च ।।२।।

सुहृद्गृहस्थः सवितारिसंस्थः

शत्रं विधत्ते वणिजानुरक्तम् ।

मित्रांशकस्थस्त्वथ गोजपालं

वर्गोत्तमस्थो बहुशिष्यभाजम् ।।३।।

शत्र्वाश्रयस्थो यदि तीक्ष्णरश्मिः

षष्ठे विधत्ते प्रमदासमुत्थम् ।

वैरं तदंशे त्वथ पुंश्चलीभि-

र्मूलत्रिकोणे च विलासिनीभिः ।।४।।

**षष्ठस्थचन्द्रफलम्-**

चन्द्रोऽरिसंस्थो यदि तुङ्गसंस्थः

शत्रुं विधत्ते बहुशास्त्ररक्तम् ।

उच्चांशके वा परदाररक्तं

षड्वर्गशुद्धोऽप्यथ पार्थिवं च ।।५।।

नीचाश्रितः शीतकरोऽरिसंस्थो

मित्रं न किंचित्कुरुते नराणाम् ।

नीचांशकस्थश्च बहुप्रकारं

वैरं स्ववर्णेन खलोत्थवर्गे ।।६।।

मित्राश्रयस्थो यदि शीतरश्मिः

षष्ठस्थितोऽरिं नृपतिं प्रसूते ।

मित्रांशकस्थस्तु नरेन्द्रपुत्रं

वर्गोत्तमस्थः सततं नृशंसम् ।।७।।

शत्र्वाश्रयस्थो यदि शीतरश्मिः

शत्रुं विधत्ते विकृतस्वभावम् ।

तस्यैव भागे ह्यथ सैन्यनाथं

मूलत्रिकोणे गुरुवत्सलं च ।।८।।

**षष्ठस्थमङ्गलफलम्-**

तुङ्गाश्रितो भूतयनस्तु षष्ठे

शत्रुं न पुंसां कुरुते कदाचित् ।

तुङ्गांशके चाथ सुदीनचेष्टं

षड्वर्गशुद्धः परदेशभाजम् ।।९।।

भौमोऽरिसंस्थो यदि नीचसंस्थः

शत्रुं विधत्तेऽन्त्यजमेव पुंसाम् ।

नीचांशके वा कृषिकर्मरक्तं

पापस्य वर्गे धनधान्यहीनम् ।।१०।।

मित्राश्रयस्थो यदि भूमिपुत्रः

षष्ठे प्रसूते तनयेन वैरम् ।

मित्रांशके वा त्वथ बान्धवेन

वर्गोत्तमस्थो निजमातुलेन ।।११।।

भौमोऽरिसंस्थो यदि शत्रुराशौ

रिपुं विधत्ते गुरुदेवतारिम् ।

तस्यैव भागे घृणया विहीनं

मूलत्रिकोणे प्रियसाहसं च ।।१२।।

**षष्ठस्थबुधफलम्-**

सौम्योऽरिसंस्थो यदि तुङ्गसंस्थः

शत्रुं विधत्ते विकृतस्वभावम् ।

तुङ्गांशके वा धनिनं विरूपं

षड्वर्गशुद्धः सुरतानुकूलम् ।।१३।।

बुधोऽरिसंस्थो यदि नीचराशौ

शत्रुं प्रसूते विकलं विनेत्रम् ।

काणं तदंशे विकृताङ्घ्रिदंष्ट्रं

पापस्य वर्गे द्विजघातरक्तम् ।।१४।।

मित्राश्रयस्थो यदि सोमपुत्रः

षष्ठे विधत्ते सचिवं हि मित्रम् ।

मित्रांशकस्थः सचिवस्य पुत्रं

षड्वर्गशुद्धः परदाररक्तम् ।।१५।।

शत्रोर्गृहस्थो यदि सोमपुत्रः

शत्रुं विधत्ते परवित्तरक्तम् ।

चौरं तदंशे सततं नृशंसं

मूलत्रिकोणे व्यसनाभिभूतम् ।।१६।।

**षष्ठस्थगुरुफलम्-**

जीवस्तुङ्गे यदि षष्ठसंस्थः

शत्रुं प्रसूते बहुदोषभाजम् ।

तुङ्गांशके वारिविवर्जितं च

षड्वर्गशुद्धः प्रमदानुकूलम् ।।१७।।

नीचाश्रये वा यदि देवपूज्यः

षष्ठे प्रसूतेऽल्पसुखं च सक्तम् ।

तदंशके वा बहुपानरक्तं

पापस्य वर्गे गुणवर्जितं च ।।१८।।

मित्राश्रयस्थो यदि देवमन्त्री

शत्रुं विधत्तेऽश्वपतिं प्रसिद्धम् ।

तदंशके वा खरगर्दभाढ्यं

वर्गोत्तमस्थः श्रुतवर्जितं च ।।१९।।

शत्र्वाश्रयस्थः कुरुते सुरेज्यः
शत्रुं विहीनं निजबन्धुवर्गे ।
शत्रोर्विभागे विनयेन हीनं
मूलत्रिकोणे बहुपुत्रपौत्रम् ।।२०।।

**षष्ठस्थशुक्रफलम्–**

शुक्रः स्वतुङ्गे यदि शत्रुसंस्थः
शुत्रं विधत्ते जितशत्रुपक्षम् ।
तुङ्गांशके वा जितशत्रुदारं
षड्वर्गशुद्धः प्रणतारिपक्षम् ।।२१।।

नीचाश्रयस्थो रिपुगोऽसुरेज्यः
शत्रुं प्रसूते बहुकन्यकाढ्यम् ।
नीचांशकस्थस्तु गजाधिनाथं
पापस्य वर्गे कृतपापसक्तम् ।।२२।।

मित्राश्रयस्थो रिपुगो विधत्ते
शुक्रो रिपुं बान्धववर्गमेव ।
तदंशके वा स्वकलत्रवर्गे
वर्गोत्तमस्थः श्वसुरं सदैव ।।२३।।

शत्र्वाश्रयस्थोऽरिगतस्तु शुक्रो
रिपुं प्रसूते सुतरां नृशंसम् ।
तस्यांशके व्याधिविवर्जिताङ्गं
मूलत्रिकोणे धनवर्जितं च ।।२४।।

**षष्ठस्थशनिफलम्-**

शनैश्चरः षष्ठगतः स्वतुङ्गे

परैर्विहीनं जनयेन्मनुष्यम् ।

तुङ्गांशके स्वल्परिपुं जितारिं

षड्वर्गशुद्धः सुनतं परैश्च ।।२५।।

नीचाश्रयस्थो यदि सूर्यपुत्रः

शत्रुं प्रसूते तरलं मनुष्यम् ।

नीचस्य भागे कनकाढ्यमेव

पापस्य वर्गे कृषिकर्मदक्षम् ।।२६।।

मित्राश्रयस्थो रविजोऽरिसंस्थः

शठं रिपुं स्वल्पतनुं प्रसूते ।

मित्रस्य भागे धनिनं प्रधानं

वर्गोत्तमस्थो बहुकर्मयुक्तम् ।।२७।।

शत्र्वाश्रयस्थो रविजो रिपुस्थः

शत्रुं प्रसूते सततं गतार्थम् ।

शत्रोर्विभागे सुतदारहीनं

मूलत्रिकोणे परसङ्गतं च ।।२८।।

**शत्रुसंख्याविचारः-**

दशाधिपस्तीक्ष्णकरः प्रदिष्टः

सहस्रनाथो रजनीपतिश्च ।

चक्रार्कजौ हीनपरौ सदैव

शेषास्तु चन्द्रेण समाः स्वतुङ्गे ।।२९।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**रिपुभावफलाध्यायस्त्रिंशः ।।३०।।**

# ३१

## सप्तमभावफलाध्यायः

**सप्तमस्थसूर्यफलम्-**

दिनाधिपः सप्तमगः स्वतुङ्गे

करोति भार्यां कलहप्रियां च ।

तुङ्गांशकस्थः परकर्मरक्तां

षड्वर्गशुद्धस्तु दरिद्रयुक्ताम् ।।१।।

नीचाश्रितः सप्तमगस्तु सूर्यो

भार्यां विधत्ते व्यभिचारिणीं च ।

नीचांशकस्थश्च सरोगयुक्तां

पापस्य वर्गे सततं कुशीलाम् ।।२।।

मित्राश्रयस्थो दिनपः कलत्रे

करोति भार्यां सुतरां नृशंसाम् ।

मित्रस्य भागे सुविहीनवित्तां

वर्गोत्तमस्थः सुरतप्रियां च ।।३।।

शत्र्वाश्रयस्थो यदि वासरेशः

करोति भार्यां व्यसनाभिभूताम् ।

शत्रोर्विभागे परहीनकृत्यां

मूलत्रिकोणे प्रियसाध्वसां च ।।४।।

**सप्तमस्थचन्द्रफलम्-**

चन्द्रस्तु कामे यदि तुङ्गसंस्थो

भार्यां विधत्ते सुभगां मनोज्ञाम् ।

तुङ्गांशके वा सुरदेवभक्तां

षड्वर्गशुद्धोऽतिमनोज्ञरूपाम् ।।५।।

निशाकरः कामगतः स्वनीचे

भार्यां विधत्ते बहुरोगभाजाम् ।

नीचांशके कुष्ठरुजा समेतां

पापस्य वर्गे पतिना विरुद्धाम् ।।६।।

मित्राश्रयस्थो यदि रात्रिनाथो

भार्यां प्रसूते प्रियवादिनीं च ।

मित्रांशके वा विनयेन युक्तां

वर्गोत्तमस्थो बहुकर्मयुक्ताम् ।।७।।

शत्र्वाश्रयस्थो यदि रात्रिनाथो

विरुद्धचेष्टां जनयेच्च भार्याम् ।

शत्रोर्विभागे विगतप्रभावां

मूलत्रिकोणे बहुकृत्यदक्षाम् ।।८।।

**सप्तमस्थमङ्गलफलम्-**

धरासुतः कामगतः स्वतुङ्गे

भार्यां विधत्ते गतरूपवित्ताम् ।

तुङ्गांशके वातिजराभिभूतां

षड्वर्गशुद्धः प्रथितप्रभावाम् ।।९।।

नीचाश्रयस्थः क्षितिजस्तु कामे

दारं विधत्ते प्रचुरप्रगल्भाम् ।

नीचांशके वा बहुशत्रुपक्षां

पापस्य वर्गे निजवर्गहीनाम् ।।१०।।

मित्राश्रयस्थः क्षितिजः कलत्रे

भार्यां प्रसूते लघुलोचनां च ।

मित्रस्य भागेऽल्पशिरोरुहाक्षीं

वर्गोत्तमस्थः प्रभुताविहीनाम् ।।११।।

शत्र्वाश्रयस्थो यदि भूमिपुत्रो

भार्यां विधत्ते कठिनस्वभावाम् ।

तदंशके वा हतबन्धुवर्गां

मूलत्रिकोणे परसङ्गतां च ।।१२।।

**सप्तमस्थबुधफलम्**-

कामाश्रयस्थः शशिजः स्वतुङ्गे

भार्यां विधत्तेऽद्भुतरूपयुक्ताम् ।

तुङ्गांशके वा बहुभोगयुक्तां

षड्वर्गशुद्धः कृतमण्डनां च ।।१३।।

नीचे च सौम्यः खलु सप्तमस्थः

करोति भार्यां कुनरानुरक्ताम् ।

नीचांशके वा व्यसनानुरक्तां

पापस्य वर्गे गुणवर्जितां च ।।१४।।

मित्राश्रयस्थो यदि सोमपुत्रो

दारं प्रसूते बहुपुत्रपौत्रम् ।

मित्रांशके वा प्रचुरान्नपानां

वर्गोत्तमस्थः प्रभया समेताम् ।।१५।।

शत्र्वाश्रयस्थो यदि कामगो ज्ञो

भार्यां विधत्तेऽर्थविवर्जितां च ।

तदंशके वा धनधान्यहीनां

मूलत्रिकोणे जनवल्लभां च ।।१६।।

**सप्तमस्थगुरुफलम्-**

जीवः कलत्रे यदि तुङ्गसंस्थः

करोति पत्नीं प्रियदर्शनां च ।

तुङ्गांशकस्थो बहुसौख्ययुक्तां

षड्वर्गशुद्धः सुकुलोद्भवां च ।।१७।।

नीचाश्रितो देवगुरुः कलत्रे

भार्यां विधत्ते न कुलोद्भवां च ।

नीचांशकस्थो बहुमानयुक्तां

पापस्य वर्गे पिशुनस्वभावाम् ।।१८।।

मित्राश्रयस्थो मदने सरेज्यो

भार्यां विधत्ते बहुसाधुमित्राम् ।

मित्रांशकस्थो मणिमौक्तिकाढ्यां

वर्गोत्तमस्थोऽतिविशुद्धकायाम् ।।१९।।

शत्र्वाश्रयस्थो मदने सरेज्यो

पत्नीं विधत्ते चपलस्वभावाम् ।

परांशकस्थोऽतिकठोरवाक्यां

मूलत्रिकोणे गुणवर्जितां च ।।२०।।

**सप्तमस्थशुक्रफलम्-**

शुक्रोच्चसंस्थो यदि सप्तमस्थो

भार्यां विधत्ते बहुमित्रपक्षाम् ।

तुङ्गांशकस्थो द्विजदेवभक्तां

षड्वर्गशुद्धस्तु पतिव्रतां च ।।२१।।

नीचाश्रितो दैत्यगुरुः कलत्रे

कलत्रमुच्चैः कुरुते प्रसन्नम्।

नीचांशकस्थस्तु सुरूपनेत्रां

पापस्य वर्गे घृणया विहीनाम् ।।२२।।

मित्राश्रयस्थः कुरुते च शुक्रः

कामे सुकामां सुभगां च भार्याम् ।

मित्रांशकस्थश्च सुशुद्धचिन्तां

वर्गोत्तमस्थो जनवल्लभां च ।।२३।।

शत्र्वाश्रयस्थो भृगुजस्तु कामे

भार्यां प्रसूते सुतरां प्रहीनाम् ।

तदंशकस्थोऽप्रकृतस्वभावां

मूलत्रिकोणे सुसमन्वितां च ।।२४।।

**सप्तमस्थशनिफलम्-**

शनैश्चरस्तुङ्गगतः कलत्रे

स्थूलं कलत्रं कुरुते नराणाम् ।

तुङ्गांशकस्थश्च सुकृष्णगात्रां

षड्वर्गशुद्धो बहुदुःखभाजाम् ।।२५।।

नीचाश्रितः कामगतस्तु कोणो

स्त्रियं प्रसूते विकरालगात्राम् ।

नीचांशकस्थश्च विहीनधर्मा

पापस्य वर्गे पररक्तचित्ताम् ।।२६।।

मित्राश्रयस्थः प्रकरोति सौरः

कामाश्रितः कोपपरं कलत्रम् ।

मित्रस्य भागे गुणवर्जिताङ्गां

वर्गोत्तमस्थोऽतिखलस्वभावाम् ।।२७।।

शत्र्वाश्रयस्थो रविजः कलत्रे

जायां प्रसूते बहुपापरक्ताम् ।

तस्यैव भागे पतिनिन्दितां च

मूलत्रिकोणे विधनां सदैव ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**सप्तमभावफलाध्याय एकत्रिंशः ।।३१।।**

## ३२

## मृत्युभावफलाध्यायः

**अष्टमस्थसूर्यफलम्-**

सूर्यो यदा मृत्यगतश्च तुङ्गे

मृत्युं विधत्तेऽग्निनिवेशनेन ।

भक्त्या तदंशे जनलज्जयैव

षड्वर्गशुद्धस्त्वथवा प्रमादात् ।।१।।

नीचांश्रितो वासरपोऽष्टमस्थे

मृत्युं विधत्ते वनपावकेन ।

नीचांशके दम्भनकर्मतश्च

पापस्य वर्गे तु प्रदीपनेन ।।२।।

मित्राश्रयस्थे दिनपोऽष्टमस्थो

मृत्यं विधत्ते विषभक्षणेन ।

मित्रांशकस्थश्च निबन्धनेन

वर्गोत्तमस्थो निशि तापसेन ।।३।।

शत्र्वाश्रयस्थो दिनपोऽष्टमस्थः

करोति मृत्युं रुधिरप्रकोपात् ।

तदंशके वा बहुकासशोषा-

न्मूलत्रिकोणे वनितापराधात् ।।४।।

**अष्टमस्थचन्द्रफलम्-**

चन्द्रोऽष्टमस्थो यदि तुङ्संस्थः

करोति मृत्यं सलिलप्रवेशात् ।

तुङ्गांशकस्थः करकाभिघाता-

त्षड्वर्गशुद्धस्त्वशनिप्रपातात् ।।५।।

नीचाश्रितो रात्रिपतिः करोति

छिद्रे विनाशं वनिताकरेण ।

नीचांशकस्थः कफपित्तदोषा-

त्पापस्य वर्गे त्वथ सन्निपातात् ।।६।।

मित्राश्रयस्थो रजनीपतिश्च

करोति मृत्यं जठरप्रकोपात् ।

तस्यैव भागे गुदरोगतश्च

वर्गोत्तमस्थः पशुपादघातात् ।।७।।

शत्र्वाश्रयस्थो विधुरेव धत्ते

मृत्युं नराणां बहुगुह्यरोगात् ।

तदंशकस्थः पशुशृङ्गसङ्गा-

न्मूलत्रिकोणे क्षयरोगतश्च ।।८।।

**अष्टमस्थमङ्गलफलम्-**

भौमोऽष्टमस्थो यदि तुङ्गसंस्थः

संग्राममृत्युं कुरुते नराणाम् ।

तुङ्गांशकस्थस्त्वथ शस्त्रघातैः

षड्वर्गशुद्धस्त्वथ गोग्रहेण ।।९।।

नीचाश्रितो भूतनयोऽष्टमस्थः

स्वहस्तमृत्युं कुरुते नराणाम् ।

नीचांशकस्थश्च निजायुधेन

पापस्य वर्गो द्विजपार्श्वतश्च ।।१०।।

मित्राश्रयस्थः क्षितिजोऽष्टमस्थः

करोति मृत्युं दृषदाश्रयेण ।

मित्रस्य भागे त्वथ गोष्ठसङ्गा-

द्वर्गोत्तमस्थस्त्वथ कूपपातात् ।।११।।

शत्र्वाश्रयस्थः क्षितिजोऽष्टमस्थो

भृगुप्रपाताच्च करोति मृत्युम् ।

तस्यांशकस्थस्त्वथ गुप्तिरोधा-

न्मूलत्रिकोणे विषभक्षणेन ।।१२।।

**अष्टमस्थबुधफलम्-**

सौम्योऽष्टमस्थो यदि तुङ्गसंस्थः

करेण मृत्युं प्रकरोति पुंसाम् ।

तुङ्गांशकस्थः कफजैर्विकारैः

षड्वर्गशुद्धोऽनिलसम्भवैश्च ।।१३।।

नीचाश्रयस्थोऽष्टमगस्तु सौम्यः

करोति मृत्यं व्रणवैकृतेन ।

नीचांशकस्थश्च महाभयेन

पापस्य वर्गे प्रियविप्रयोगात् ।।१४।।

मित्राश्रयस्थो यदि सोमपुत्रो

मृत्युं विधत्ते हृदयप्रकोपात् ।

मित्रस्य भागेऽक्षिरुजा नराणां

वर्गोत्तमस्थस्त्वथ गुह्यरोगात् ।।१५।।

शत्र्वाश्रयस्थः शशिजः प्रसूते

मृत्युं नराणां दृढबन्धनेन ।

तस्यैव भागे जठरोत्थरोगा-

न्मूलत्रिकोणेऽङ्घ्रिव्रणेन पुंसाम् ।।१६।।

**अष्टमस्थगुरुफलम्**-

जीवोऽष्टमस्थो यदि तुङ्गसंस्थो

मृत्युं विधत्ते विविधैश्च रोगैः।

तुङ्गांशकस्थस्त्वथ मूलरोगा-

त्षड्वर्गशुद्धः श्रवणप्रकोपात् ।।१७।।

गुरुः स्वनीचे यदि चाष्टमस्थो

मृत्युं विधत्ते स्वजनस्य हस्तात् ।

तस्यैव भागेऽथ विषाग्निसङ्गा-

त्पापस्य वर्गे त्वतिसारतश्च ।।१८।।

मित्राश्रयस्थो यदि देवमन्त्री

रन्ध्रे विनाशं कुरुते स्वभृत्यात् ।

तस्यैव भागे रुधिरप्रकोपा-

द्वर्गोत्तमस्थः सुरतानुसङ्गात् ।।१९।।

शत्र्वाश्रयस्थो यदि देवमन्त्री

रन्ध्रे विनाशं कुरुते सकोपात् ।

तस्यैव भागे शिरसः प्रकोपा-

न्मूलत्रिकोणे बहुभक्षणेन ।।२०।।

**अष्टमस्थशुक्रफलम्-**

शुक्रोऽष्टमस्थो यदि तुङ्गसंस्थः

पिपासयान्तं कुरुते नराणाम् ।

तुङ्गांशकस्थश्च मुखस्य शोषा-

त्षड्वर्गशुद्धो वरदुःखतश्च ।।२१।।

नीचाश्रितो दैत्यगुरुश्च रन्ध्रे

मृत्युं विधत्ते गुरुसन्निपातात् ।

नीचांशकस्थस्त्वथ वक्त्ररोगा-

त्पापस्य वर्गे वनसत्त्वतश्च ।।२२।।

मित्राश्रयस्थो भृगुजः प्रसूते

स्थानेऽष्टमे नाशमहिप्रसङ्गात् ।

मित्रांशकस्थो विषकण्टकेन

वर्गोत्तमस्थस्त्वथ लूतया च ।।२३।।

शत्र्वाश्रयस्थो भृगुजोऽष्टमस्थः

करोति मृत्युं विषकण्टकेन ।

तदंशकस्थः सुरतप्रकोपा-

न्मूलत्रिकोणे प्रचुरप्रकोपात् ।।२४।।

**अष्टमस्थशनिफलम्-**

शनैश्चरस्तुङ्गगतोऽष्टमस्थो

मृत्युं विधत्तेऽतिबुभुक्षया च ।

तुङ्गस्य भागे गुरुलङ्घनेन

प्रायोपवेशाद्रसवर्गशुद्धः ।।२५।।

नीचश्रितः सूर्यसुतोऽष्टमस्थो

मृत्युं विधत्ते निजवन्धुवर्गात् ।

तस्यैव भागे रिपुहस्ततश्च

पापस्य वर्गेऽत्र परीक्षयेण ।।२६।।

मित्राश्रयस्थो रविजः प्रसूते

मृत्युं महादद्रुकृतैर्विकारैः ।

तस्यैव भागे पिटकैश्च मृत्युं

वर्गोत्तमस्थो व्रणवैकृतेन ।।२७।।

शत्र्वाश्रयस्थो रविजोऽष्टमस्थो

मृत्युं विधत्ते हयपादघातात् ।

तस्यैव भागे करिणः प्रसङ्गा-

न्मूलत्रिकोणे खरतः सकाशात् ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**मृत्युभावफलाध्यायो द्वात्रिंशः ।।३२।।**

## ३३

## धर्मभावफलाध्यायः

---

**नवमस्थसूर्यफलम्-**

धर्माश्रितो वासरपः स्वतुङ्गे

धर्मं नृणां तापसमेव धत्ते ।

तुङ्गांशसंस्थस्त्वथ दम्भदं च

षड्वर्गशुद्धस्त्वथ लज्जया च ।।१।।

नीचाश्रयस्थो दिनपस्तु धर्मे

धर्मेण हीनं जनयेन्मनुष्यम् ।

नीचांशकस्थश्च कुकर्मरक्तं

पापस्य वर्गे परधर्मरक्तम् ।।२।।

मित्राश्रयस्थो दिनपस्तु धर्मे

कौलोत्थधर्मं कुरुते नराणाम् ।

मित्रांशके वैकृतिकं तथैव

वर्गोत्तमस्थोऽतिलघुप्रमाणम् ।।३।।

शत्र्वाश्रयस्थो दिनपस्तु धर्मे

कृतघ्नधर्मं कुरुते नराणाम् ।

तदंशकस्थस्त्वथ चौरजं च

मूलत्रिकोणेऽतिसुखोत्थमेव ।।४।।

**नवमस्थचन्द्रफलम्-**

चन्द्रः स्वतुङ्गे यदि धर्मसंस्थः

प्रसादधर्मं कुरुते नराणाम् ।

तदंशसंस्थश्च तडागजं च

षड्वर्गशुद्धो द्विजदानजं च ।।५।।

मित्राश्रयस्थो हिमगुश्च धर्मे

धर्मं विधत्ते स्वकुटुम्बदानात् ।

तदंशके मित्रजनोत्थमेव

वर्गोत्तमस्थोऽत्र समृद्धिदं च ।।६।।

शत्र्वाश्रयस्थो हिमगुश्च धर्मे

धर्मं प्रसूते विटपात्रदानात् ।

तदंशकस्थः प्रमदानुसङ्गा-

न्मूलत्रिकोणे बहुवित्तदानात् ।।७।।

**नवमस्थमङ्गलफलम्-**

भौमः स्वतुङ्गे यदि धर्मसंस्थो

धर्मं प्रसूते रणजं नराणाम् ।

तुङ्गांशकस्थः परसेवया च

षड्वर्गशुद्धो गुरुपोषणेन ।।८।।

नीचाश्रयस्थः क्षितिजस्तु धर्मे

धर्मं विधत्ते वधबन्धनेन ।

तदंशकस्थः परदारलाभा-

त्पापस्य वर्गे जनतापरोधात् ।।९।।

मित्राश्रयस्थः क्षितिजस्तु धर्मे

धर्मं विधत्ते सुहृदप्रकोपात् ।

तस्यैव भागे बहुकोपतश्च

वर्गोत्तमस्थः परसेवया च ।।१०।।

शत्र्वाश्रयस्थः क्षितिजस्तु धर्मे

धर्मं विधत्ते न कदाचिदेव ।

तदंशकस्थः सततं च चौर्यं

मूलत्रिकोणे वनितार्जितेन ।।११।।

**नवमस्थबुधफलम्-**

धर्माश्रितः सोमसुतः स्वतुङ्गे

धर्मं विधत्ते वरशत्रुजातम् ।

तदंशकस्थो द्विजदेवतानां

षड्वर्गशुद्धो व्रतपालनेन ।।१२।।

नीचाश्रयस्थः शशिजस्तु धर्मे

धर्मं प्रसूते कपटेन पुंसाम् ।

तदंशकस्थः कुहकप्रयोगैः

पापस्य वर्गेऽथ छलेन नित्यम् ।।१३।।

मित्राश्रयस्थः शशिजस्तु धर्मे

धर्मं प्रसूते गृहदानतश्च ।

मित्रांशके तापसमेव नित्यं

वर्गोत्तमस्थो बहुवस्त्रदानात् ।।१४।।

शत्र्वाश्रयस्थः शशिजस्तु धर्मे

धर्मं विधत्तेऽक्षविवर्जितं च ।

तस्यैव भागे गुरुलोकलाभा-

न्मूलत्रिकोणे बहुशान्तिमेव ।।१५।।

**नवमस्थगुरुफलम्-**

धर्माश्रितो देवगुरुः स्वतुङ्गे

धर्मं विधत्ते प्रचुरं सदैव ।

तदंशकस्थो गुरुसेवनोत्थं

षड्वर्गशुद्धोऽद्भुतमेव पुंसाम् ।।१६।।

नीचस्थितो देवगुरुश्च धर्मे

धर्मं विधत्ते कृतकं नराणाम् ।

नीचांशकस्थो गुरुणानुषङ्गा-

त्पापस्य वर्गे बहुतीर्थसङ्गात् ।।१७।।

मित्राश्रयस्थः सुरराजमन्त्री

धर्मं विधत्ते बहुधर्ममार्गात् ।

मित्रांशकस्थो वनितामतेन

वर्गोत्तमस्थस्तनयानुसङ्गात् ।।१८।।

शत्र्वाश्रयस्थः कुरुते सुरेज्यो

धर्मे नराणां सुनयेन धर्मम् ।

तदंशकस्थो गुरुपोषणेन

मूलत्रिकोणे घृणयानुरोधात् ।।१९।।

**नवमस्थशुक्रफलम्-**

शुक्रोच्चसंस्थो यदि धर्मसंस्थो

धर्मं प्रसूते वरदानजातम् ।

वस्त्रान्नजं तस्य विभागसंस्थ:

षड्वर्गशुद्धः पितृतर्पणेन ।।२०।।

नीचांशकस्थो भृगुजश्च धर्मे

धर्मं प्रसूते परदेशसङ्गात् ।

तदंशकस्थोऽध्वगलोकसङ्गा-

द्वर्गोत्तमस्थः सुमुखैरनेकैः ।।२१।।

मित्राश्रयस्थो भृगुजस्तु धर्मे

धर्मं विधत्तेऽल्पफलं नराणाम् ।

तस्यैव भागे च विनिश्चयेन

पापस्य वर्गे परवञ्चनेन ।।२२।।

शत्र्वाश्रयस्थो भृगुजश्च धर्मे

धर्मं प्रसूते परलोकसङ्गात् ।

तदंशकस्थोऽरिनिषेवणेन

मूलत्रिकोणे कृषिकर्मलाभात् ।।२३।।

**नवमस्थशनिफलम्-**

शनैश्चरस्तुङ्गगतस्तु धर्मे

धर्मं विधत्ते वयसि तृतीये ।

तदंशकस्थोऽल्पतरं परं च

षड्वर्गशुद्धस्त्वथ भक्तिबाह्यम् ।।२४।।

नीचाश्रितः सूर्यसुतस्तु धर्मे

धर्मेण हीनं जनयेन्मनुष्यम् ।

तदंशकस्थः परधर्मरक्तं

पापस्य वर्गे कलहोद्भवं च ।।२५।।

मित्राश्रयस्थोऽर्कसुतस्तु धर्मे

धर्मं विधत्ते सततं सुगर्हम् ।

तदंशकस्थश्च जयं सदैव

वर्गोत्तमस्थो नृपसेवया च ।।२६।।

शत्र्वाश्रयस्थोऽर्कसुतस्तु धर्मे

कृच्छ्रेण धर्मं जनयेत्सुसूक्ष्मम् ।

तदंशकस्थः परदर्शनोत्थं

मूलत्रिकोणे गुरुलब्धमानात् ।।२७।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**धर्मभावफलाध्यायस्त्रयस्त्रिंशः ।।३३।।**

# ३४

## कर्मभावफलाध्यायः

**दशमस्थसूर्यफलम्-**

कर्माश्रितस्तीक्ष्णकरः स्वतुङ्गे

करोति कर्म व्रतकृत्यमेव ।

तदंशकस्थो वधबन्धजं च

षड्वर्गशुद्धः सकलं कलाजम् ।।१।।

नीचाश्रितस्तीक्ष्णकरोऽम्बरस्थो

नृणां विधत्ते बहुदासकर्मे ।

तस्यैव भागे वणिजोद्भवं च

वर्गोत्तमस्थो वणिजप्रसूतम् ।।२।।

मित्राश्रयस्थो दिनकृत्खसंस्थः

करोति पुंसां कृषिजं च कर्म ।

मित्रस्य भागे कुनृपस्य सेवजं

पापस्य वर्गे वधबन्धजं सदा ।।३।।

शत्र्वाश्रयस्थो दिनपो नराणां

ददाति कर्माशुभमेव नित्यम् ।

तस्यैव भागे जनगर्दितं च

मूलत्रिकोणे खरसेवजं च ।।४।।

**दशमस्थचन्द्रफलम्–**

कर्माश्रितः शीतकरः स्वतुङ्गे
करोति कर्म प्रथितं नृलोके ।
तस्यैव भागे द्विजदेवजं च
षड्वर्गशुद्धो वरदानभाजम् ।।५।।

नीचाश्रितः शीतकरोऽम्बरस्थो
ददाति कर्मातिसलज्जमेव ।
तस्यैव भागे क्रयविक्रयोत्थं
पापस्य वर्गे व्यसनोद्भवं च ।।६।।

मित्राश्रयस्थो यदि शीतरश्मिः
कर्माश्रितः कर्म ददाति सौम्यम् ।
तस्यैव भागे बहुशास्त्रभाजं
वर्गोत्तमस्थो मखजं सदैव ।।७।।

शत्र्वाश्रयस्थोऽम्बरगो निशेशः
कर्म प्रसूते सुतरां नृशंसम् ।
तस्यैव भागे वनितोद्भवं च
मूलत्रिकोणे नृपदैत्यजातम् ।।८।।

**दशमस्थमङ्गलफलम्–**

भौमोऽम्बरस्थो यदि तुङ्गसंस्थो
युद्धोद्भवं कर्म ददाति पुंसाम् ।
तस्यांशके द्यूतसमद्भवं च
षड्वर्गशुद्धः स्मरजं नितान्तम् ।।९।।

नीचाश्रितो भूतनयोऽम्बरस्थः

कर्म प्रसूते परदारजातम् ।

तदंशकस्थो गणिकोद्भवं च

पापस्य वर्गे ह्युभयं सदैव ।।१०।।

मित्राश्रयस्थः क्षितिजोऽम्बरस्थः

कर्म प्रसूतेऽक्षसमुद्भवं च ।

तस्यांशकस्थो बहुभारजातं

वर्गोत्तमस्थः प्रणयेन हीनम् ।।११।।

शत्र्वाश्रयस्थः क्षितिजो नभोगः

कर्म प्रसूते बहुदैन्यजातम् ।

तस्यैव भागे त्वथ भिक्षजं च

मूलत्रकोणेऽम्बरकाष्ठजातम् ।।१२।।

**दशमस्थबुधफलम्-**

सौम्यः स्वतुङ्गे यदि कर्मसंस्थः

कर्म प्रसूते धनधान्यजातम् ।

तस्यैव भागे च चतुष्पदोत्थं

षड्वर्गशुद्धो गजवाजिजातम् ।।१३।।

नीचाश्रितः सोमसुतोऽम्बरस्थः

कर्म प्रसूते निजमेव पुंसाम् ।

तस्यैव भागे परदेशजातं

पापस्य वर्गे खलजं सदैव ।।१४।।

मित्राश्रयस्थ: शशिजोऽम्बरस्थ:

कर्म प्रसूते हयविक्रयोत्थम् ।

तस्यैव भागे रजतं नराणां

वर्गोत्तमस्थोऽद्भुतमन्त्रजातम् ।।१५।।

शत्र्वाश्रयस्थ: शशिजोऽम्बरस्थ:

कर्म प्रसूते बहुकष्टजातम् ।

तस्यैव भागे गुणवर्जितं च

मूलत्रिकोणे सुयशोद्भवं च ।।१६।।

**दशमस्थगुरुफलम्-**

जीवोऽम्बरस्थो यदि तुङ्गसंस्थो

ददाति कर्म प्रचुरं प्रधानम् ।

तदंशकस्थो द्विजपूजनोत्थं

षड्वर्गशुद्धः सुजनार्चनोत्थम् ।।१७।।

नीचाश्रितो देवगुरु: खसंस्थ:

करोति कर्माधमलोकसेव्यम् ।

तदंशकस्थोऽद्भुतचौर्यजातं

पापस्य वर्गेऽर्थविवर्जितं च ।।१८।।

मित्राश्रयस्थो दशमे सुरेज्य:

करोति कर्माणि शुभानि नित्यम् ।

तदंशसंस्थो नृपते: समुत्थं

वर्गोत्तमस्थो महिषीगवोत्थम् ।।१९।।

शत्र्वाश्रयस्थो दशमे सुरेज्यः

कर्म प्रसूते सततं कृतघ्नम् ।

तस्यैव भागे परवञ्चनेन

मूलत्रिकोणे नृपतेरभीष्टम् ।।२०।।

**दशमस्थशुक्रफलम्-**

तुङ्गाश्रयस्थोऽम्बरगो भृगुजश्च

कर्म प्रसूते जनवल्लभं च ।

तस्यैव भागे मणिमौक्तिकाढ्यं

षड्वर्गशुद्धः कनकोद्भवं च ।।२१।।

नीचाश्रयस्थः भृगुजः खसंस्थः

कर्म प्रसूते वनिताश्रितं च ।

तस्यैव भागेऽल्पसुखं नितान्तं

पापस्य वर्गे गुरुदुःखजं च ।।२२।।

मित्राश्रयस्थो भृगुजोऽम्बरस्थः

करोति कर्म प्रभुतासमेतम् ।

तस्यैव भागे निजबन्धुजातं

वर्गोत्तमस्थो बहुगौरवाढ्यम् ।।२३।।

शत्र्वाश्रयस्थो भृगुजोऽम्बरस्थः

कर्म प्रसूते विरजं नृशंसम् ।

तस्यैव भागे बहुचिन्तयाढ्यं

मूलत्रिकोणेऽनृतसंयुतं च ।।२४।।

**दशमस्थशनिफलम्-**

तुङ्गाश्रितः सूर्यसुतोऽम्बरस्थः

कर्म प्रसूतेऽतिमृदु स्थिरं च ।

तस्यैव भागे बहुशिल्पजं च

षड्वर्गशुद्धः प्रियसाध्वसं च ।।२५।।

नीचाश्रितः सूर्यसुतोऽम्बरस्थः

कर्म प्रसूते द्विजद्रोहजातम् ।

तस्यैव भागे नृपसेवजं च

पापस्य वर्गे सनृशंसरूपम् ।।२६।।

मित्राश्रितो भास्करजश्च स्वस्थः

करोति कर्म प्रभुताविहीनम् ।

तस्यैव भागे नृपसेवजं च

वर्गोत्तमस्थो मृगया समेतम् ।।२७।।

शत्र्वाश्रयस्थोऽर्कसुतोऽम्बरस्थः

कर्म प्रसूते बहुकष्टजातम् ।

तस्यैव भागे परपैशुनोत्थं

मूलत्रिकोणे भिषजोद्भवं च ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**कर्मभावफलाध्यायश्चतुस्त्रिंशः ।।३४।।**

३५

## लाभभावफलाध्यायः

**लाभस्थसूर्यफलम्-**

लाभाश्रितस्तीक्ष्णकरः स्वतुङ्गे

लाभं विधत्ते गजवाजिजं च ।

तस्यैव भागे महिषीसमुत्थं

षड्वर्गशुद्धः कनकोद्भवं च ।।१।।

नीचाश्रितो वासरपस्तु लाभे

लाभं विधत्ते जलपादपानाम् ।

तस्यैव भागे च कुधान्यकानां

पापस्य वर्गे परयोषितां च ।।२।।

मित्राश्रयस्थो दिनपस्तु लाभे

लाभं प्रसूते सुहृदां सदैव ।

मित्रांशकस्थः कुलयोषितानां

वर्गोत्तमस्थः प्रवरार्यकाणाम् ।।३।।

शत्र्वाश्रयस्थो दिनकृच्च लाभे

लाभं प्रसूते रथकम्बलानाम् ।

तदंशकस्थः खलमानवानां

मूलत्रिकोणे गुणिनां नितान्तम् ।।४।।

**लाभस्थचन्द्रफलम्-**

लाभाश्रितः शीतकरः स्वतुङ्गे

लाभं विधत्ते मणिमौक्तिकानाम् ।

तस्यैव भागे द्रविणान्नकानां

षड्वर्गशुद्धः प्रियमानुषाणाम् ।।५।।

नीचाश्रयस्थो हिमगुश्च लाभे

लाभं प्रसूते कुकलत्रकाणाम् ।

तदंशकस्थस्तु सुसेवकानां

पापस्य वर्गे परपैशुनानाम् ।।६।।

मित्राश्रयस्थो हिमगुश्च लाभे

लाभं विधत्ते बहुबान्धवानाम् ।

तस्यैव भागे नटनर्तकानां

वर्गोत्तमस्थः प्रवरार्थकानाम् ।।७।।

शत्र्वाश्रयस्थो हिमगुश्च लाभे

लाभं प्रसूते बहुकन्दजानाम् ।

तदंशकस्थो हि महीरुहाणां

मूलत्रिकोणे क्षितिमृद्गृहाणाम् ।।८।।

**लाभस्थमङ्गलफलम्-**

भौमः स्वतुङ्गे यदि लाभसंस्थो

लाभं विधत्ते च चतुष्पदानाम् ।

तस्यैव भागेऽत्र सुभक्षकाणां

षड्वर्गशुद्धो नृपमण्डलानाम् ।।९।।

लाभाश्रितो भूतनयस्तु नीचे

लाभं विधत्ते बहुचौर्यजातम् ।

तस्यैव भागे बहुवञ्चनोत्थं

पापस्य वर्गे वधबन्धजातम् ।।१०।।

मित्राश्रयस्थः क्षितिजस्तु लाभे

लाभं विधत्ते नृपलोकजातम् ।

तदंशकस्थस्तु महाजनोत्थं

वर्गोत्तमस्थो ह्युभयं सदैव ।।११।।

शत्र्वाश्रयस्थः क्षितिजस्तु लाभे

लाभं विधत्ते बहुवञ्चकानाम् ।

तस्यैव भागे परतर्कनानां

मूलत्रिकोणेऽद्भुतभूषणानाम् ।।१२।।

**लाभस्थबुधफलम्-**

सौम्यः स्वतुङ्गे यदि लाभसंस्थो

लाभं विधत्ते बहुशास्त्रजातम् ।

तस्यैव भागे विविधैरुपायैः

षड्वर्गशुद्धस्त्वथ सर्वविद्याम् ।।१३।।

लाभाश्रितः सोमसुतस्तु नीचे

लाभं विधत्ते बहुनीचसङ्गात् ।

तस्यैव भागे कृतकानुसङ्गा-

त्पापस्य वर्गेऽन्त्यजलोकपार्श्वात् ।।१४।।

मित्राश्रयस्थ: शशिजस्तु लाभे

लाभं विधत्ते वरलोकजातम् ।

तस्यैव भागे निजविद्ययातो

वर्गोत्तमस्थो व्यवहारतश्च ।।१५।।

शत्र्वाश्रयस्थ: शशिजस्तु लाभे

करोति लाभं वितथोपचारात् ।

तस्यैव भागे कपटैरनेकै-

र्मूलत्रिकोणे क्रयविक्रयाभ्याम् ।।१६।।

**लाभस्थगुरुफलम्-**

जीव: स्वतुङ्गे यदि लाभसंस्थो

नरेन्द्रलाभं कुरुते नराणाम् ।

तस्यैव भागे नृपसेवकानां

षड्वर्गशुद्ध: प्रचुरप्रभावात् ।।१७।।

नीचाश्रितो देवगुरुश्च लाभे

लाभं नराणां कुरुते धनं च ।

नीचांशकस्थो भृतकाह्वयानां

पापस्य वर्गे बहुकष्टतश्च ।।१८।।

मित्राश्रयस्थ: कुरुते सुरेज्यो

लाभं च लाभे रजतोद्भवं च ।

तस्यांशकस्थो बहुधातुजातं

वर्गोत्तमस्थ: सुजनोद्भवं च ।।१९।।

शत्र्वाश्रयस्थः कुरुते सुरेज्यो

लाभं च लाभे पुरुषाधमानाम् ।

तस्यैव भागे गुणवर्जितानां

मूलत्रिकोणे विविधात्मजानाम् ।।२०।।

**लाभस्थशुक्रफलम्-**

शुक्रः स्वतुङ्गे यदि लाभसंस्थो

लाभं प्रसूते सुतबान्धवोत्थम् ।

तस्यांशकस्थो नृपकन्यकोत्थं

षड्वर्गशुद्धो द्वितयस्य चास्य ।।२१।।

नीचाश्रयस्थो भृगुजस्तु लाभे

लाभं विधत्ते च कुपुत्रकानाम् ।

तदंशकस्थस्तु कुबुद्धिकानां

पापस्य वर्गे द्विजनिन्दितानाम् ।।२२।।

मित्राश्रयस्थो भृगुजस्तु लाभे

करोति लाभं वरवाहनानाम् ।

तस्यैव भागे वरसुन्दरीणां

वर्गोत्तमस्थः प्रियदर्शनानाम् ।।२३।।

शत्र्वाश्रयस्थो भृगुजश्च लाभे

करोति लाभं हतबान्धवानाम् ।

तस्यैव भागे गतसौहृदानां

मूलत्रिकोणे सुखिनां सदैव ।।२४।।

**लाभस्थशनिफलम्-**

शनिः स्वतुङ्गे यदि लाभसंस्थो

लाभं विधत्ते पुरुषोत्तमानाम् ।

तस्यैव भागे धनधान्यकानां

वर्गोत्तमस्थः प्रवरार्चितानाम् ।।२५।।

नीचाश्रितः सूर्यसुतस्तु लाभे

लाभं विधत्ते बहुपातकानाम् ।

तस्यैव भागे जनगर्हितानां

पापस्य वर्गे मतिवर्जितानाम् ।।२६।।

मित्राश्रयस्थोऽर्कसुतस्तु लाभे

लाभं विधत्ते बहुमित्रजातम् ।

तस्यैव भागे वनितासमुत्थं

वर्गोत्तमस्थः शुभकर्मलाभम् ।।२७।।

शत्र्वाश्रयस्थोऽर्कसुतस्तु लाभे

लाभं विधत्ते बहुवित्तजं च ।

तस्यैव भागे कृतिजं सदैव

मूलत्रिकोणे स्थिरधर्मजातम् ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**लाभभावफलाध्यायः पञ्चत्रिंशः ।।३५।।**

## व्ययभावफलाध्यायः

### व्ययस्थसूर्यफलम्-

व्ययस्थितो वासरपः स्वतुङ्गे

व्ययं विधत्ते गुरुलोकसङ्गात् ।

तस्यैव भागे गुरुसेवकानां

षड्वर्गशुद्धो द्विजदेवकार्यात् ।।१।।

नीचाश्रयस्थो व्ययगो दिनेशो

व्ययं प्रसूते कुजनात्कुसङ्गात् ।

तस्यैव भागे वनितानिरोधा-

द्वर्गोत्तमस्थो नृपसङ्गमाच्च ।।२।।

मित्राश्रयस्थो व्ययगो दिनेशो

व्ययं विधत्ते बहुमित्रकार्ये ।

तस्यैव भागे कुकलत्रतश्च

पापस्य वर्गेऽन्त्यजकारणेन ।।३।।

शत्र्वाश्रयस्थो व्ययगो दिनेशो

व्ययं विधत्ते गणिकानुसङ्गात् ।

तस्यैव भागे कुजनानुरागा-

न्मूलत्रिकोणे जनतः सदैव ।।४।।

**व्ययस्थचन्द्रफलम्-**

चन्द्रो व्ययस्थो यदि तुङ्गसंस्थो

व्ययं प्रसूतेऽक्षविदेवनेन ।

तस्यैव भागे क्रयविक्रयाभ्यां

षड्वर्गशुद्धो द्विजसेवनाच्च ।।५।।

नीचाश्रयस्थः शशभृद्व्ययस्थो

व्ययं प्रसूते परमारिसङ्गात् ।

तस्यैव भागे परलोकसङ्गा

त्पापस्य वर्गे बहुपापतश्च ।।६।।

मित्राश्रयस्थो व्ययगः शशाङ्को

व्ययं विधत्ते सुहृदां प्रसङ्गात् ।

तस्यैव भागे निजबन्धुमाना-

द्वर्गोत्तमस्थः प्रियसङ्गमाच्च ।।७।।

शत्र्वाश्रयस्थो व्ययगः शशाङ्को

व्ययं विधत्ते रिपुलोकतश्च ।

तस्यैव भागे बहुधा च सर्वं

मूलत्रिकोणे निजबन्धुतश्च ।।८।।

**व्ययस्थमङ्गलफलम्-**

भौमो व्ययस्थो यदि तुङ्गसंस्थो

व्ययं विधत्ते रणजैर्विकारैः ।

तस्यैव भागे परवञ्चनेन

षड्वर्गशुद्धो रणजाद्विकारात् ।।९।।

नीचाश्रयस्थ: क्षितिजो व्ययस्थो

व्ययं विधत्तेऽन्त्यजलोकसङ्गात् ।

तस्यैव भागे व्यसनैरनेकै:

पापस्य वर्गे खलसङ्गमेन ।।१०।।

मित्राश्रयस्थ: क्षितिजो व्ययस्थो

व्ययं विधत्ते वितथं नराणाम् ।

तस्यैव भागे पितृकर्मजातं

वर्गोत्तमस्थ: सुहृदानुरागात् ।।११।।

शत्र्वाश्रयस्थ: क्षितिजो व्ययस्थो

व्ययं प्रसूते च चतुष्पदोत्थम् ।

तस्यैव भागे बहुरोगतश्च

मूलत्रिकोणे वरबन्दितश्च ।।१२।।

**व्ययस्थबुधफलम्**-

सौम्यो व्ययस्थो यदि तुङ्गसंस्थो

व्ययं विधत्ते बहुगीतवाद्यै: ।

तस्यैव भागे गुणिनां प्रसङ्गा-

त्षड्वर्गशुद्धोऽग्निपरिग्रहेण ।।१३।।

नीचाश्रयस्थो व्ययगश्च सौम्यो

व्ययं प्रसूते धनसङ्गमेन ।

तस्यैव भागेऽधमलोकजातं

पापस्य वर्गे नृपलोकदानात् ।।१४।।

मित्राश्रयस्थ: शशिजो व्ययस्थो

व्ययं प्रसूते बहुमित्रसङ्गात् ।

तस्यैव भागे निजबान्धवानां

वर्गोत्तमस्थो व्रतिनां सदैव ।।१५।।

शत्र्वाश्रयस्थ: शशिजो व्ययस्थो

व्ययं प्रसूते सुतजं सदैव ।

तस्यैव भागे सुतदारजं च

मूलत्रिकोणे वरभोगतश्च ।।१६।।

**व्ययस्थगुरुफलम्-**

जीवो व्ययस्थो यदि तङ्गसंस्थो

व्ययं प्रसूते गुरुलोकदानात् ।

तस्यैव भागे गुरुसेवकानां

षड्वर्गशुद्धो निजबान्धवानाम् ।।१७।।

नीचाश्रितो देवगुरुर्व्ययस्थो

व्ययं सुवाते व्यवहारजातम् ।

तस्यैव भागे तु कुसीदजातं

पापस्य वर्गे वणिजोत्थमेव ।।१८।।

मित्राश्रयस्थो व्ययग: सुरेज्यो

व्ययं विधत्ते परवादतश्च ।

तस्यैव भागे परदेशसङ्गा-

द्वर्गोत्तमस्थ: प्रणयानुरोधात् ।।१९।।

शत्र्वाश्रयस्थो व्ययगः सुरेज्यो

व्ययं सुवाते व्यसनैर्विचित्रैः ।

तस्यैव भागे मतिविभ्रमेण

मूलत्रिकोणे सुरतोपरोधात् ।।२०।।

**व्ययस्थशुक्रफलम्**-

शुक्रो व्ययस्थो यदि तुङ्गसंस्थो

व्ययं प्रसूते व्रतजैर्विकारैः ।

तस्यैव भागे बहुशास्त्ररागा-

त्षड्वर्गशुद्धः प्रियसङ्गमेन ।।२१।।

नीचाश्रयस्थो भृगुजो व्ययस्थो

व्ययं विधत्ते नृपलोकसङ्गात् ।

तस्यैव भागे पररोषतश्च

पापस्य वर्गे दरतश्च नित्यम् ।।२२।।

मित्राश्रयस्थो भृगुजो व्ययस्थो

व्ययं विधत्ते बहुभक्षणेन ।

तस्यैव भागे बहुपानयोगा-

द्वर्गोत्तमस्थः क्षितिजैर्विकारैः ।।२३।।

शत्र्वाश्रयस्थो भृगुजो व्ययस्थो

व्ययं प्रसूते रणकर्मयोगात् ।

तस्यैव भागे जनविप्लवेन

मूलत्रिकोणे वितथोपचारैः ।।२४।।

**व्ययस्थशनिफलम्-**

मन्दो व्ययसस्थो यदि तुङ्गसंस्थो

व्ययं प्रसूतेऽधमकर्मजातम् ।

तस्यैव भागेऽधममित्रसङ्गा-

त्षड्वर्गशुद्धो निजबन्धुदोषात् ।।२५।।

नीचाश्रितः सूर्यसुतो व्ययस्थो

व्ययं प्रसूतेऽन्त्यजमानतश्च ।

तस्यैव भागेऽद्भुतवादसङ्गा-

त्पापस्य वर्गे निजबन्धनेन ।।२६।।

मित्राश्रयस्थो रविजः प्रसूते

व्ययं विधत्ते बहुमित्ररोधात् ।

तस्यैव भागे सुतदासदोषा-

द्वर्गोत्तमस्थः प्रणयप्रकोपात् ।।२७।।

शत्र्वाश्रयस्थोऽर्कसुतो व्ययस्थो

व्ययं प्रसूते करुणानुरोधात् ।

तस्यैव भागे बहुलौल्यदोषा-

मूलत्रिकोणे प्रियसङ्गमाच्च ।।२८।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**व्ययभावफलाध्यायः षट्त्रिंशः ।।३५।।**

## ३७

## भावेशफलम्

### लग्नेशभावफलम्

लग्नाधिपतिर्लग्ने नीरोगं दीर्घजीवितं कुरुते ।

अतिबलमवनिपतिं वा भूलाभसमन्वितं जातम् ।। १ ।।

लग्नपतिर्धनभवने धनवन्तं दीर्घजीवितं स्थूलम् ।

स्थानप्रधानमवनीशं सत्कर्मरतं नरं कुरुते ।। २ ।।

सहजगतो लग्नपतिः सद्बन्धुप्रवरं मित्रपरिकल्पितम् ।

धर्मरतं दातारं शूरं सबलं करोति नरम् ।। ३ ।।

लग्नेशस्तुर्यगतो नृपप्रियं प्रचुरजीवितं पुरुषम् ।

सलुब्धमित्रं पित्रोर्भक्तं सबहुभोजनं कुरुते ।। ४ ।।

पञ्चमगो लग्नपतिः सुभगं सत्याग[म]मीश्वरं विदितम् ।

बहुजीवितं सुगीतं सत्कर्मरतं नरं कुरुते ।। ५ ।।

रिंपुभवने लग्नेशो नीरोगं भूरिन[तं]सबलम् ।

कृपणं धनिनमरिध्नं सुकर्मपक्षान्वितं कुरुते ।। ६ ।।

प्रथमपतौ सप्तमगे तेजस्वी शीलवान् भवेत् पुरुषः ।

तद्भार्यापि सुशीला तेजः कलिता सुरूपा च ।। ७ ।।

लग्नपतावष्टमगे कृपणे धनसंचयः सुदीर्घायुः ।

क्रूरे खचरे कटुर्जल्पको मूर्खो भवत्येव ।। ८ ।।

मूर्तपतिर्यदि नवमे तदा भवेत् प्रवरबान्धवः सुकृतः ।

समसत्त्वश्च सुशीलः सुकृतख्यातः सुतेजस्वी ।। ९ ।।

प्रथमेशे दशमस्थे  नृपलाभः पण्डितः सुशीलश्च ।

गुरुमातृपूजनमतिर्नृपप्रसिद्धो नरो भवति ।। १० ।।

एकादशगस्तनुपः सुजीवितं सुतसमन्वितं विदितम् ।

तेजःकलितं पुरुषं कुरुते बलिनं नृसीदमपि च ।। ११ ।।

द्वादशगे मूर्तिपतौ कटुभाषी वादकारको मानी ।

सहगो विधिमिलितानां विदेशगो दत्तभुक्तो नरः ।। १२ ।।

**धनेशभावफलम्**

द्रव्यपतिर्लग्नगतः कृपणं व्यवसायिनं सुकर्माणम् ।

धनिनं श्रीपतिविदितं करोति नरमतुलभोगभुजम् ।। १३ ।।

धनपो धनभवनस्थो बहुवित्तं भोगभाजनं पुरुषम् ।

लाभाधिकात् सलोभं कुरुते पुरुषं सदा दक्षम् ।। १४ ।।

सहजगते तु धनेशे व्यवसायी गालिकरः कलाहीनः ।

चौरश्चलचित्तो वा भवति नरो नवकलाहीनः  ।। १५ ।।

तुर्यगते द्रविणपतौ पितृलाभपरः सदोदयः पुरुषः ।

दीर्घायुः क्रूरे पुनरम्बामरणं विनिर्देश्यम् ।। १६ ।।

कृपणं दुःखनिधानं धर्मरतं विपुलसत्त्वसंयुक्तम् ।

पुरुषं कठोरहृदयं तनयगतो धनपतिः कुरुते ।। १७ ।।

षष्ठगतो द्रविणपतिर्धनसङ्ग्रहतत्परं रिपुध्नं च ।

कुरुते दुःखसमेतं पापे धनवर्जितं पुरुषम् ।। १८ ।।

धनपे सप्तमगृहगे श्रेष्ठा वित्तविलासभोगवती ।

धनसङ्ग्रहणी भार्या क्रूरे खचरे भवति वन्ध्या ।। १९ ।।

धनपेऽष्टमभवनस्थेऽष्टकपाली चात्मघातकः पुरुषः ।

उत्पन्नभुग्विलासी परहिंसी भवति दैवपरः ।। २० ।।

धनपे धर्मगृहस्थे सौम्ये दानप्रसिद्धिभाग्भवति ।

क्रूरे दरिद्रभिक्षुकविडम्बवृत्तिस्तथा मनुजः ।। २१ ।।

दशमगृहस्थधनपे नरेन्द्रमान्यो भवेन्नृपाल्लक्ष्मीः ।

क्रूरग्रहेऽपि मातुः पितुश्च परिपालकः पुरुषः ।। २२ ।।

एकादशगः स्वपतिर्व्यवहारपरं श्रियः पतिं ख्यातम् ।

लोकौघप्रतिपालननिरतं कुरुते नरं जातम् ।। २३ ।।

द्वादशगे द्रविणपतावष्टकपाली विदेशनिरतश्च ।

दुष्कर्मा भिक्षुश्च क्रूरे सौम्ये च संग्राही ।। २४ ।।

**तृतीयेशभावफलम्**

सहजपतौ लग्नगते वादी स्त्रीलम्पटः स्वजनभेदी ।

सेवारतः सलोभी कूटकरो व्याधितः पुरुषः ।। २५ ।।

धनगृहगे सहजेशे भिक्षुर्निर्धनोऽल्पजीवितो मनुजः ।

बन्धुविरोधी क्रूरे सौम्ये पुनरीश्वरः खचरे ।। २६ ।।

सहजगतः सहजपतिः सहजसमत्वं सुहृच्छुभं सुजनम् ।

देवगुरुपूजनरतं नृपलाभपरं नरं कुरुते ।। २७ ।।

भ्रातृपतौ तुर्यगते पितृसोदरसुखकृदुदयकृत्तेषाम् ।

मात्रा सह वैरकरः पितृवित्तप्रभक्षकः पुरुषः ।। २८ ।।

दुश्चिक्यपतौ सुतगे सुबान्धवः सुतसहोदरैः पाल्यः ।

दीर्घायुर्भवति नरः परोपकारैकनिरतमतिः ।। २९ ।।

षष्ठगते सहजेशे बन्धुविरोधी च नयनरोगी च।

भूलाभी भवति भृशं कदाचिदपि रोगभयकलितः ।। ३० ।।

सप्तमगे सहजेशे नरस्य भार्या भवेत् प्रवररूपा ।

सौभाग्यवती साध्वी क्रूरे देवरगृहं याति ।। ३१ ।।

भ्रातृप्रभुरष्टमगः सरुजं मृतसोदरं नरं कुरुते ।

क्रूरे बाहुव्यङ्गं जीवति यद्यष्टवर्षाणि ।। ३२ ।।

धर्मगते सहजपतौ क्रूरे बन्धूज्झितस्तथा सौम्ये ।

सद्बान्धवश्च सुकृती सोदरभक्तो भवेन्मनुजः ।। ३३ ।।

दुश्चिक्येशे दशमे नृपपूज्यो मातृबन्धुपरिभक्त :।

उत्तमबन्धुर्बन्धुषु विनिश्चतो जायते मनुजः ।। ३४ ।।

लाभस्थः सहजेशः सुबान्धवं राजलाभिनं ख्यातम् ।

कुरुते बन्धुषु सेवाविधायिनं भोगनिरतं च ।। ३५ ।।

व्ययगे दुश्चिक्येशे मित्रविरोधी स्वबन्धुसन्तापी ।

दूरे वासितबन्धुर्विदेशगामी नरो भवति ।। ३६ ।।

**चतुर्थेशभावफलम्**

तुर्यपतिर्लग्नगतः पितृपुत्रौ स्नेहिलौ मिथः कुरुते ।

पितृपक्षवैरकलितं पितृनाम्ना भुवि प्रसिद्धं च ।। ३७ ।।

पातालपे धनस्थे क्रूरखगे पितृविरोधकृच्च शुभे ।

पितृपालकः प्रसिद्धः पितापि भुनक्ति च तल्लक्ष्मीम् ।। ३८ ।।

तुर्येशः सहजस्थः पितृमातृच्छेदकं विदितपितरम् ।

पित्रा सह कलहपरं पितृबान्धवघातकं पुरुषम् ।। ३९ ।।

तुर्यगते तुर्यपतौ पितुराज्ञारक्षकः सदा दृष्टः ।

विदितः पितृलाभकरो भवति सुकर्मा सुखी निधिपः ।। ४० ।।

सुतगे तुर्यगृहेशे पिता सलाभोद्गतश्च दीर्घायुः ।

भवति क्षितौ प्रसिद्धः सुसुतः सुतपालकः सोऽपि।। ४१ ।।

हिबुकपतौ रिपुसंस्थे पितुरर्थविनाशकः पितरि वैरी ।

पितृद्वेषकरः क्रूरे सौम्ये धनसंचयः सतनयः ।। ४२ ।।

अम्बुपतौ सप्तमगे क्रूरे चेश्वरं स्त्रीं न पालयति ।

सौम्ये पालयति पुनः कुलटान्तं कुजलवी कुरुतः ।। ४३ ।।

छिद्रगतस्तुर्यपतिः क्रूरो रोगान्वितं दरिद्रं च ।

दुष्कर्मरतं मन्युप्रियमथवा मानवं कुरुते ।। ४४ ।।

सुकृतगते तुर्यपतौ पितर्यसङ्गी समस्तविद्यावान् ।

पितृधर्मसङ्ग्रहपरः पितृनिरपेक्षो भवेन्मनुजः ।। ४५ ।।

पातालपेऽम्बरगते पापे सुतमातरं त्यजति जनकः ।

श्रयते चान्यां दयितां सौम्ये पुनरन्यसेवाकृत् ।। ४६ ।।

एकादशगे तुर्यपतौ पित्रोः पालकः सुकर्मा च।

पितृभक्तः प्रचुरायुः सौम्ये पुनरीश्वरो भवति ।। ४७ ।।

द्वादशगे तुर्यपतौ मृतः पिता वा विदेशगो वाच्यः ।

पुत्रस्य पापखचरे त्वन्यपितुर्जन्म निर्देश्यम् ।। ४८ ।।

**पञ्चमेशभावफलम्**

लग्नगतः पञ्चमपः प्रसिद्धमस्तोकतनयपरिकलितम् ।

शास्त्रविदं गीतविदं सुकर्मनिरतं नरं कुरुते ।। ४९ ।।

पञ्चमपतिर्धनस्थः क्रूरे खचरो धनोज्झितं कुरुते ।

गीतादिकलाकलितं कष्टभुजं स्थानकप्रचुरम् ।। ५० ।।

तनयपतिः सहजगतः सुमधुरवचं स्वबन्धुजनविदितम् ।

कुरुते स्थानं तदीयतनयाः परिपालयन्ति बन्धुम् ।। ५१ ।।

सुतपः पातालगतः पितृकर्माणं प्रपालितं पित्रा।

जननीभक्तं कुरुते क्रूरस्तु विरोधकृत् पित्रा ।। ५२ ।।

तनयगतस्तनयपतिर्मतिमन्तं मानिनं वचनकुशलम् ।

सुतयुक्तं प्रवरजनं प्रख्यातं मानवं कुरुते ।। ५३ ।।

पञ्चमपः शत्रुगतः शत्रुप्रतिमाङ्गसम्भवं हीनम् ।

रोगधनं धनरहितं क्रूरः खचरः करोति नरम् ।। ५४ ।।

तनयपतौ सप्तमगे सुसुते सुभगा स्वदेवगुरुभक्ता ।

प्रियवादिनी सुशीला नरस्य खलु जायते दयिता ।। ५५ ।।

सुतपे निधनगृहस्थः कुत्सितवाक् स्त्रीषु भवति भण्डः ।

नष्टा व्यङ्गाः सहजास्तत्पुत्राः सम्भवन्ति तथा ।। ५६ ।।

सुकृतगतस्तनयपतिः सुबोधविद्यं कविं सुगीतज्ञम् ।

नृतपूजितं सुरूपं नाटकरसिकं नरं कुरुते ।। ५७ ।।

सुतपतिरम्बरसंस्थो नृपकर्माणं नृपात् कलितलाभम् ।

सत्कर्मरतं प्रवरं जननीकृतसुखशतं तनुते ।। ५८ ।।

सुतनाथे लाभस्थे शूरः सुतवान् सुकृतभोगी च ।

गीतादिकलाकलितो नृपभाजी जायते जातः ।। ५९ ।।

पञ्चमपे द्वादशगे क्रूरः सुतविरहितः शुभे सुसुतः ।

सुतसन्तापपरः स्याद् विदेशगमनोद्यतो मनुजः ।। ६० ।।

**षष्ठेशभावफलम्**

षष्ठेशे लग्नगते नीरुक् सबलः कुटुम्बकष्टकरः ।

बहुपक्षो रिपुहन्ता भवति नरः शौचवचनधनः ।। ६१ ।।

शत्रुपतौ द्रविणस्थे दुष्टश्चतुरो हि सङ्ग्रहेऽनिष्टः ।

स्थानप्रवरो विदितः क्रूरो सव्याधितनुर्हतवित्तः ।। ६२ ।।

षष्ठपतिः सहजस्थः क्रूरः कुरुते सलोककष्टकरम् ।

जनकस्य तथा कष्टमरणं सङ्ग्रामतस्तस्य ।। ६३ ।।

षष्ठाधिपतिस्तुर्ये पितृतनयौ वैरिणो मिथः कुरुते ।

सरुक्पिता सोऽप्यसुतो लक्ष्मीं लभते नरः सुचिरम् ।। ६४ ।।

रिपुभवनपतौ सुतगे पितृसुतयोर्वैरता मृतिस्तु ततः ।

क्रूरे शुभे च निर्धनपदवी दुष्टश्च तज्जातः ।। ६५ ।।

रिपुभवनेशे रिपुगे नीरुग्वैरी सुखी कृपणरूपः ।

न हि जन्मतोऽपि सीदति स्थानकवासी भवति मनुजः ।। ६६ ।।

अहितपतौ सप्तमगे क्रूरा भार्या विरोधिनी चण्डा ।

तापकरी त्वथ सौम्ये वन्ध्या वा गर्भगलनपरा ।। ६७ ।।

शनेर्ग्रहणिका रुजो विषधरा धरानन्दना –

द्बुधाच्च विषदोषतः सपदि मृत्युरेणाङ्कतः ।

रवेर्मृगपतेर्भयं भवति रिष्टपादष्टमा –

द्गुरोर्नृपतितः स्वमानधनदोषवान् शुक्रतः ।। ६८ ।।

शत्रुपतिर्यदि नवमः क्रूरः खचरस्तदा भवेत् खञ्जः ।

बन्धुविरोधी शास्त्रं न मन्यते याचकः पुरुषः ।। ६९ ।।

अरिगृहपे दशमस्थे क्रूरे मातरि रिपुस्तथा दुष्टः ।

धर्मसुतपालकमतिर्मातुर्दोषैर्भवेद्वैरी ।। ७० ।।

वैरिपतौ लाभगते क्रूरे मरणं विपक्षतो भवति ।

तस्करकृतहानिः स्याच्चतुष्पदाल्लाभवान् मनुजः ।। ७१ ।।

षष्ठपतौ द्वादशगे चतुष्पदद्रव्यधान्यनाशकरः ।

गमनागमनं लक्ष्म्याः स दैवपरो नरो भवति ।। ७२ ।।

**सप्तमेशभावफलम्**

दयितेशो लग्नगतोऽशोकं निःस्नेहमन्यतमभार्यम् ।

भोगभुजं रूपयुतं जनयति दयितादलितवित्तम् ।। ७३ ।।

जायापतौ धनस्थे दुष्टा दयिता सुतोज्झिता भवति ।

वित्तं च कलत्रकरं स च तद्वदनो विसंज्ञश्च ।। ७४ ।।

सप्तमपे सहजगते आत्मबलो बन्धुवत्सलो दुःखी ।

देव(र)रता सुरूपा गृहिणी क्रूरे तु तद्गृहणा ।। ७५ ।

जायेशे तुर्यस्थे लोलः पितृवैरसाधकोऽस्नेही ।

अस्य पिता दुर्वाक्यस्तद्भार्या पालयेच्च पिता ।। ७६ ।।

सप्तमपतौ सुतस्थे सौभाग्ययुतः सुतान्वितः पुरुषः ।

प्रियया सह दुष्टमतिस्तत्तनयः पालयेद्दयिताम् ।। ७७ ।।

रिपुगृहगः कान्तेशः प्रियया सह वैरिणं सरुग्भार्यम् ।

दयितासङ्क्षयिणं क्रूरश्च मृत्युपदम् ।। ७८ ।।

सप्तमपे सप्तमगे परमायुः प्रीतिवत्सलः पुरुषः ।

निर्मलशीलसमेतस्तेजस्वी जायते सततम् ।। ७९ ।।

कान्तेशे निधनगते गणिकासु रतः करग्रहणरहितः ।

देवद्विजातिसक्तो न स्त्रीसेवाकरः पुरुषः ।। ८० ।।

सुकृतगते सप्तमपे तेजोवान् शीलवान् प्रियोऽप्येवम् ।

क्रूरे तु षण्ढरूपो लग्नेशवीक्षणे तपः प्रबलः ।। ८१ ।।

सप्तमपे दशमस्थे नृपदोषी लम्पटः कुवाक् कूटः ।

क्रूरे दुःखार्तः स्याच्छ्वश्रूवशगो भवेत् पुरुषः ।। ८२ ।।

लाभस्थे जायेशे भक्ता रूपान्विता सुशीला च ।

दयिता परिणीता स्यान्म्रियते सा च प्रसवसमये ।। ८३ ।।

सप्तमपे द्वादशगे गृहबन्धो नास्तिका भवेद्भार्या ।

सा लोला दुष्टगुणा रुग्वलिता तस्य पुरुषस्य ।। ८४ ।।

**अष्टमेशभावफलम्**

अष्टमपे लग्नगते बहुविघ्नो दीर्घरोगभृत् पुरुषः ।

नष्टानुवादनिरतो लक्ष्मीं लभते नृपतिवचसा ।। ८५ ।।

निधनपतौ धनलीनेऽल्पजीवितो वैरवान्नरश्चौरः ।

क्रूरे सौम्ये च शुभं किं तु क्षितिपालतो मरणम् ।। ८६ ।।

अष्टमपतौ तृतीये बन्धुविरोधी सुहृद्विरोधी च ।

व्यङ्गो दुर्वाग्लोलः सोदररहितो भवेन्मनुजः च ।। ८७ ।।

निधनेशे तुर्यगते पितरि रिपुः पितृगतां लभेल्लक्ष्मीम् ।

पितृपुत्रयोश्च युद्धं पिता च रोगान्वितो भवति ।। ८८ ।।

छिद्रपतौ तनयस्थे क्रूरे सुतविरहितः शुभे ससुतः ।

जातोऽपि नैव जीवति जीवत्यथ कितवकर्मरतः ।। ८९ ।।

छिद्रेशे रिपुसङ्गते दिनकरे भूभृद्विरोधी गुरौ ।

तुङ्गे सीदति दृष्टरोगकलितः शुक्रे सरोगो भृशम् ।

भौमे वक्षसि संहतोऽहिभयभृत्तुङ्गर्तिभूतः शनौ।

सौम्ये व्याधिभयं विधौ च मरणं सौम्येक्षिते नैव किम् ।। ९० ।।

मृत्यपतौ सप्तमगे गुह्यरुक्कुस्त्रीवल्लभो दुष्टः।

क्रूरे भार्याद्वेषी कलत्रदोषान्मृतिं लभते ।। ९१ ।।

निधनपतौ निधनगते व्यवसायी व्याधिवर्जितो नीरुक् ।

कितवकलाकलितवपुः कितवकुले जायते विदितः ।। ९२ ।।

मृतिनाथे नवमस्थे निःसङ्गी जीवघातकः पापी ।

निर्बन्धुर्निःस्नेही पूजाविमुखो मखव्यङ्गः ।। ९३ ।।

कर्मगते निधनेशे नृपकर्मा नीचकर्मनिरतश्च ।

अलसः क्रूरेऽन्यभवस्तनयो वा जीवति न तन्माता ।। ९४ ।।

लाभस्थे मृत्युपतौ बाल्ये दुःखी सुखी भवति पश्चात् ।

दीर्घायुः सौम्यखगे पापेऽल्पायुर्नरो भवति ।। ९५ ।।

व्ययस्थे (चा)ष्टमेशे क्रूरमनास्तस्करः शठो निर्घृणः ।

आत्मगतिर्व्यङ्गवपुर्मृतकः काकादिभिर्भक्ष्यः ।। ९६ ।।

**नवमेशभावफलम्**

लग्नस्थे नवमेशे देवान् गुरूंश्च मन्यते शूरः ।

कृपणः क्षितिपतिकर्मा स्वल्पग्रासी भवति मतिवान् ।। ९७ ।।

नवमाधिपतौ धनगे वृषगो विदितः सुशीलवान् सत्यः ।

सुकृती वदनव्यङ्गश्चतुष्पदोत्पन्नपीडावान् ।। ९८ ।।

सहजगते सुकृतपतौ रूपस्त्रीबन्धुवत्सलः पुरुषः ।

बन्धुस्त्रीरक्षणकृद्यदि जीवति बन्धुभिस्तदा रहितः ।। ९९ ।।

सुकृतेशे हिबुकस्थे पितृभक्तः पितृकृतेषु श्रद्धावान् ।

विदितो मर्त्यः सुकृती मैत्रे कर्मसु रतिर्भवति ।। १०० ।।

सुकृतगुहपे सुतस्थे सुकृती गुरुदेवपूजने निरतः ।

वपुषा सुन्दरमूर्तिः सुकृतसमेता भवन्ति सुताः ।। १०१ ।।

शत्रुप्रणतिपरायणधर्मरतिकलितं कलाविकलदेहम् ।

दर्शननिन्दानिरतं सुकृतपतिः षष्ठगः कुरुते ।। १०२ ।।

नवमपतौ सप्तमगे सत्यवती सुविनया सुरूपा च ।

शीलश्रीयुतदयिता सुकृतयुता जायते नियतम् ।। १०३ ।।

दुष्टौजस्तु विघाती गृहबन्धुविवर्जितः सुकृतरहितः ।

नवमेशे निधनगते क्रूरे षण्ढश्च स विज्ञेयः ।। १०४ ।।

सुकृतपतिः सुकृतस्थः स्वबन्धुभिः प्रीतमनुच्छ्रितं सत्त्वम् ।

दातारं देवगुरुस्वजनकलत्रादिषु च भक्तम् ।। १०५ ।।

नृपकर्माणं शूरं ख्यातं नृपलाभिनं स्वकर्मरतम् ।

मातुर्विध्नं कुरुते सुकृतपतिर्गगनगृहलीनः ।। १०६ ।।

दीर्घायुर्धर्मरपो धर्मेश्वरः स्नेहिलो नृपतिलाभी ।

सुकृतख्यातः सततं सुकृतविभौ लाभभवनस्थे ।। १०७ ।।

द्वादशगे सुकृतेशे मानी देशान्तरी सुरूपश्च ।

विद्यावान् शुभखेटे क्रूरे वा भवेज्जगति धूर्तः ।। १०८ ।।

**दशमेशभावफलम्**

दशमपतौ लग्नगते मातृवैरी पितृपूजकः सरलः ।

लोभासक्तश्च सुखी गतपितः पुरुषरता भवेन्माता ।। १०९ ।।

वित्तस्थे गगनपतौ मात्रान्यया लालितः सुतो भवति ।

लोभी मातरि दुष्टः स्वल्पग्रासः सुतनुकर्मा ।। ११० ।।

मातृस्वजनविरोधी सेवानिरतो न कर्मणि समर्थः ।

मातुलकपालितः स्याद् दशमपतौ सहजभवनस्थे ।। १११ ।।

दशमपतेऽम्बुगते निरतः सुखी पितरि मातरि पोषणपूजने ।

सकललोकदशाममृतायते नृपतिसम्भवलाभविभूषितः ।। ११२ ।।

शुभकर्मकोऽविडम्बी नृपलाभी गीतवाद्यनिरतः स्यात् ।

गगनपतौ तनयगते पालयति च तत्सुतं माता ।। ११३ ।।

अम्बरपे रिपुसंस्थे बाल्ये दुःखी हीनो भवेत्क्रूरे ।

पुरुषः पश्चादीशः परनरनियतास्तथा माता।। ११४ ।।

सुतवती शुभरूपसमन्विता रमणमातरि पालनलालसा ।

भवति तस्य नरस्य निरन्तरं प्रियतमाम्बरपे दयितागते ।। ११५ ।।

अम्बरपतिरष्टमगः क्रूरश्चौरं मृषान्वितं दुष्टम् ।

मातरि सन्तापकरं जनयति तनुजीवितं कितवम् ।। ११६।।

शुभशीलः सद्बन्धुः सन्मित्रो दशमपे नवमलीने ।

तन्मातापि सुशीला सुकृतवती सत्यवचनरता ।। ११७ ।।

गगनपतिर्गगनगतो जनयति जननीसुखप्रदं पुरुषम् ।

जननीकुलविपुलसुखं प्रकटघटनापटीयांसम् ।। ११८ ।।

मातर्यतिरिक्तपरस्तथा च सुतपक्षिणी सखिनी।

दीर्घायुर्मातुसुखः पुरुषो लाभाश्रितेऽम्बरपे ।। ११९ ।।

मात्रोज्झितो निजबलः शुभकर्मा नृपतिकर्मरतचेताः ।

व्योमपतौ व्ययसंस्थे देशान्तरगश्च पापखगे ।। १२० ।।

**एकादशेशभावफलम्**

स्वल्पायुर्बलकलितः शूरो दाता जनप्रियः सुभगः ।

लाभपतौ लग्नगते तुच्छाद्दोषान्मृतिं लभते ।। १२१ ।।

वित्तगते लाभपतावुत्पन्नभुगल्पभोजनोऽल्पायुः ।

अष्टकलापी चौरः क्रूरे सौम्ये च धनकलितः।। १२२ ।।

बन्धुस्त्रीपालनकः सुबान्धवो बन्धुवत्सलस्तु शुभे ।

लाभेशे सहजगते बन्धूनामाश्रयो रिपोश्छेत्ता ।। १२३ ।।

तुर्यस्थे लाभेशे दीर्घायुः पितरि भक्तिभाग्भवति ।

सामयिककर्मनिरतः स्वकर्मतो लाभवान् पुरुषः ।। १२४ ।।

तनयगतो लाभपतिः पितृपित्रौ स्नेहिलौ मिथः कुरुते ।

तुल्यगुणौ च परस्परतुच्छौ जीवी च भवति सुतः ।। १२५ ।।

लाभाधिपे षष्ठगते सुवैरः सुदीर्घरोगी चतुरङ्गसङ्ग्रही ।

मृतिं समाप्नोति च चौरहस्तात् क्रूरे विदेशान्तरसङ्गतो नरः ।। १२६ ।।

सप्तमगे लाभेशे तेजस्वी शीलसम्पदः पदवी ।

दीर्घायुर्भवति नरस्तथैकदयितापतिर्नियतम् ।। १२७ ।।

एकादशपेऽष्टमगे क्रूरेऽल्पायुः सुदीर्घरोगी च ।

जीवन्मृतश्च दुःखी भवति नरः सौम्यगगनचरे ।। १२८ ।।

एकादशेशे सुकृतालयस्थे बहुश्रुतः शास्त्रविशारदश्च ।

धर्मप्रसिद्धो गुरुदेवभक्तः क्रूरे च बन्धुव्रतवर्जितश्च ।। १२९ ।।

मातरि भक्तः सुकृती पितरि द्वेषी सुदीर्घतरजीवी ।

धनवान् जननीपालकनिरतो लाभाधिपे खगते ।। १३० ।।

लाभाधिपो लाभगतः करोति दीर्घायुषं पुष्कलपुत्रपुष्टम् ।

सत्कर्मकं रूपयुतं सुशीलं जनप्रमोदप्रवणं सुगीतम् ।।१३१ ।।

द्वादशगे लाभपतावुत्पन्नभुगस्थिरो भवति रोगी ।

उत्पातरतो मानी दाता दुःखी सदा पुरुषः ।। १३२ ।।

**व्ययेशभावफलम्**

व्ययनाथे लग्नगते विदेशगः सुवचनः सुरूपश्च ।

अपसङ्गवाददोषी भवति कुमारोऽथवा षण्ढः ।। १३३ ।।

व्ययनाथे वित्तगते कृपणः कटुवाग्विनष्टलाभलम्बः ।

भौमे गच्छति निधनं नृपतस्करवह्निभक्तभयतः ।। १३४ ।।

सहजगे द्वादशपे क्रूरेऽधनबान्धवः शुभे च धनी ।

तत्सोदरः सुकृपणो बन्धुषु दूरे सदा वसति ।। १३५ ।।

तुर्यगते व्ययनाथे कृपणो रोगोज्झितः सुकर्मा च ।

मृतिमाप्नोति सुतत्त्वं सत्तममनुजो महादुःखी।। १३६ ।।

द्वादशपतौ सुतस्थे क्रूरे सुतवर्जितः शुभे ससुतः ।

जनककमलाविलासी समर्थताविरहितः पुरुषः ।। १३७ ।।

षष्ठगते व्ययनाथे क्रूरे कृपणोऽक्षिदूषणः पुरुषः।

लभते मृतिमनुकरितो भृगुतनये भवति गतनयनः ।। १३८ ।।

द्वादशपे सप्तमगे दुष्टो दुश्चरितभृत् कपटवचनः।

क्रूरे न स्त्री सौम्ये स सौख्यं प्राप्नोति गणिकातः ।। १३९।।

व्ययनाथे निधनगतेऽष्टकपाली कार्यसाधनारहितः।

द्रोहमतिः सौम्यखगे धनसङ्ग्रहतत्परो भवति ।। १४० ।।

व्ययनाथे सुकृतगते तीर्थाभीष्टव्ययी व्ययनवृत्तिः ।

क्रूरे खचरे पापी निरर्थकं याति तद् द्रव्यम् ।। १४१ ।

व्ययनाथे गगनस्थे पररमणीपराङ्मुखः पवित्राङ्गः ।

सुतधनसङ्ग्रहनिरता दुवर्चनपरा भवति माता ।। १४२ ।।

लाभस्थे द्वादशपे द्रव्यपतिर्दीर्घजीवितो भवति ।

स्थानप्रवरो दाता विख्यातः सत्यवचनपरः ।। १४३ ।।

विभूतिमान् ग्रामनिवासवित्तः कार्पण्यबुद्धिः पशुसङ्ग्रही च ।

चेज्जीवति ग्रासयुतः सदा स्याद् व्ययाधिनाथे व्ययगेहलीने ।। १४४ ।।

**।। इति श्रीमीनराजकृते वृद्धयवनजातके**

**भावेशफलाध्यायः सप्तत्रिंशत्तमः ।। ३७।।**

## ३८

## भावगतराशिफलम्

### लग्नगतद्वादशराशिफलम्

मेषोदये रक्ततनुर्मनुष्यः सदाल्पबुद्धिः परनिर्जितश्च ।

पित्ताधिकः सर्वजनोपसेव्यः सर्वाशनोऽबुद्धिविचक्षणश्च ।। १ ।।

वृषोदये श्वेततनुर्मनुष्यः श्लेष्माधिकः क्रोधपरः कृतघ्नः ।

सुमन्दबुद्धिः स्थिरतासमेतः पराजितः स्त्रीभृतकैः सदैव।। २ ।।

तृतीयलग्ने पुरुषोऽतिगौरः स्त्रीरक्तचित्तो नृपपीडिताङ्गः ।

दूतः प्रसन्नः प्रियवाग्विनीतः सुमूर्धजो गीतविचक्षणश्च ।। ३ ।।

कर्कोदये गौरवपुर्मनुष्यः पित्ताधिकः कल्यतनुः प्रगल्भः ।

जलावगाहानुरतोऽतिबुद्धः शुचिः क्षमी धर्मरुचिः सुसेव्यः ।। ४ ।।

सिंहोदये पाण्डुतनुर्मनुष्यः पित्तानिलाभ्यां परिपीडिताङ्गः ।

प्रियामिषोऽरण्यरसः सुतीक्ष्णः शूरः प्रगल्भः सुतरां निरीहः ।। ५ ।।

कन्याविलग्ने कफपित्तयुक्तो भवेन्मनुष्यः शुभकान्तिभाजः ।

श्लेष्मप्रजः स्त्रीविजितोऽतिभीरुर्मायाधिकः कामकदर्थिताङ्गः ।। ६ ।।

तुलाविलग्ने च भवेन्मनुष्यः श्लेष्मान्वितः सत्यपरः सदैव ।

पण्यप्रियः पार्थिवमानयुक्तः सुरार्चने तत्पर एव कल्यः ।। ७ ।।

लग्नेऽष्टमे कोपपरो जराढ्यो भवेन्मनुष्यो नृपपूजिताङ्गः ।

गुणान्वितः शास्त्रकथानुरक्तः प्रमर्दकः शत्रुगणस्य नित्यम् ।। ८ ।।

धनूदये राजयुतो मनुष्यः कार्ये प्रधृष्यो द्विजदेवरक्तः ।

तुरङ्गयुक्तः सुहृदैः प्रयुक्तस्तुरङ्गजङ्घश्च भवेत् सदैव ।। ९ ।।

मृगोदये तोषरतः सुतीव्रो भीरुः सदा पण्यनिषेवकश्च ।

श्लेष्मानिलाभ्यां परिपीडिताङ्गः सुदीर्घगात्रः परवञ्चकश्च ।। १० ।।

घटोदये सुस्थिरतासमेतो वाताधिकः स्तेयनिषेवणोक्तः।

सुहृत्सुगात्रः प्रमदास्वभीष्टः शिष्टानुरक्तो जनवल्लभश्च ।। ११ ।।

मीनोदये तोषरतो मनुष्यो भवेद्विनीतः सुरतानुकूलः ।

सुपण्डितः स्त्रीदयितः प्रचण्डः पित्ताधिकः कीर्तिसमन्वितश्च ।। १२ ।।

**धनगतद्वादशराशिफलम्**

मेषे धनस्थे लभते मनुष्यो धनं सुपण्यैर्विविधैः प्रभूतः ।

चतुष्पदाढ्यः बहुबान्धवाढ्यः प्रयच्छति प्रीतिपरः सदैव ।। १३ ।।

वृषे धनस्थे लभते मनुष्यः कृषिप्रयत्नेन धनं सदैव ।

अन्नाभिधानं च चतुष्पदाख्यं तथा हिरण्यं मणिमुक्तिकोत्थम् ।। १४ ।।

तृतीयलग्ने धनगे मनुष्यो धनं लभेत् स्त्रीजनतश्च नित्यम् ।

रौप्यं तथा काञ्चनजं प्रभूतं हयाधिकं सुष्टुभिरेव सख्यम् ।। १५ ।।

चतुर्थराशिर्धनगो मनुष्यो धनं लभेद् वृक्षजमेव नित्यम् ।

जलोद्भवं यद्यदनिष्टभोज्यं नयार्जितं प्रीतिकरं सुतानाम् ।। १६ ।।

सिंहे धनस्थे लभते मनुष्यो धनं तथारण्यजनोत्थमाप्तम् ।

सर्वोपकारं प्रवणप्रभूतं स्वविक्रमोपार्जितमेव नित्यम् ।। १७ ।।

कन्योदये वित्तगते मनुष्यो धनं लभेद् भूमिपतेः सकाशात् ।

हिरण्यमुक्तामणियुक्तजातं गजाश्वनानाविधवित्तजं च ।। १८ ।।

तुले धनस्थे बहुपण्यजातं धनं भवेत् पुत्रजनैरुपेतम् ।

वित्ताहवं चाप्रतिमं प्रधानं स्वन्यायलब्धं गुरुलब्धशेषम् ।।१९ ।।

अलौ धनस्थे तृणकाष्ठजातं धनं मनुष्यो लभते प्रभूतम् ।

पाषाणजं मृण्मयमार्तिजातं सस्योद्भवं कर्मजमेव नित्यम् ।। २० ।।

धनुर्धरे वित्तगते मनुष्यो धनं लभेत् स्थैर्यविधानजातम् ।

चतुष्पदाढ्यं विविधं यशस्यं रसोद्भवं धर्मविधानलुब्धम् ।। २१ ।।

मृगे धनस्थे लभते मनुष्यो धनं प्रपञ्चैर्विविधैरुपायैः ।

सेवासमुत्थं च सदा नृपाणां कृषिक्रियाभिश्च विदेशसङ्गात् ।। २२ ।।

घटे धनस्थे लभते मनुष्यो धनं प्रभूतं फलपुष्पजातम् ।

जनोद्भवं साधुजनस्य भोज्यं महाजनोत्थं च परोपकारैः ।। २३ ।।

मत्स्ये धनस्थे लभते मनुष्यो धनं प्रभूतैर्नियमोपवासैः ।

विंद्याप्रभावान्निधिसङ्गमाच्च मातापितृभ्यां समुपार्जितं च ।। २४ ।।

**तृतीयगते द्वादशराशिफलम्**

तृतीयसंस्थे प्रथमे च राशौ मित्रं द्विजातिं च लभेन्मनुष्यः।

परोपकारप्रवणं शुचिं च प्रभूतविद्यं नृपपूजिताङ्गम् ।। २५ ।।

वृषे तृतीये लभते मनुष्यो मित्रं नरेन्द्रं प्रचुरप्रतापम् ।

सुवित्तदं भूरियशोनिधानं  शूरं कविं ब्राह्मणरक्तचित्तम् ।। २६ ।।

तृतीयराशौ सहजप्रयाते मित्रं लभेद्वैश्यगुरुप्रसेवम् ।

कृषीवलं धर्मकथानुरक्तं सदा सुशीलं सुरसंमतं च ।। २७ ।।

चतुर्थराशौ च तृतीयसंस्थे मैत्री भवेद् विप्रजनैः सदैव ।

शान्तैः सुधर्मैस्त्वनघैः कृतज्ञैर्देवद्विजाराधनतत्परैश्च ।। २८ ।।

सिंहे तृतीये लभते मनुष्यः शूद्रं कुमित्रं परवित्तलब्धम् ।

वधात्मकं पापकथानुरक्तं प्रचण्डवाक्यं जनगर्हितं च ।। २९ ।।

तृतीयसंस्थे प्रमदाभिधाने मैत्री भवेच्चैव वराङ्गनानाम् ।

विदेशतश्चारुविलासिनीभिः सुपुण्यरक्तो गुरुभक्तिकश्च ।। ३० ।।

तृतीयसंस्थे तु तुलाभिधाने मैत्री भवेत् पापपरैर्मनुष्यैः ।

लौल्यात्मकैर्लौल्यकथानुरक्तैः सार्धं मनुष्यस्य सुतार्थयुक्तैः ।। ३१ ।।

अलौ तृतीये लभते मनुष्यो मैत्रीं सदा पापजनैर्दरिद्रैः ।

कृतघ्नताढ्यैः कलहानुरक्तैर्व्यपेतलज्जैर्जनताविरुद्धैः ।। ३२ ।।

चापे तृतीये लभते मनुष्यो मैत्रीं सुशूरैर्नृपसेवकैश्च ।

वित्तेश्वरैर्धर्मपरैः प्रसन्नैः कृपानुरक्तैः रणकोविदैश्च ।। ३३।

मृगस्तृतीये च नरस्य यस्य करोति सौख्यं सततं सुखाढ्यम् ।

नित्यं सुहृद्देवगुरुप्रसक्तं महाधनं पण्डितमप्रमेयम् ।। ३४ ।।

कुम्भे तृतीये लभते मनुष्यो मैत्रीं व्रतज्ञैर्बहुकीर्तियुक्तैः ।

क्षमाधिकैः सत्यपरैः सुशीलैः गुणाधिकैः साधुकथानुरक्तैः ।।३५।।

मीने तृतीये लभते मनुष्यो मैत्रीं सदा हास्यपरैः सुमुग्धैः ।

कुशीलनैः क्रीडनकैः कुशीलैर्गीतप्रियैर्गोपपरैः खलैश्च।। ३६।।

## चतुर्थस्थद्वादशराशिफलम्

मेषे सुखस्थे लभते सुखं च चतुष्पदेभ्योऽथ विलासिनीभ्यः ।

भोगैर्विचित्रैः प्रचुरान्नपानैः पराक्रमोपार्जितमर्दनैश्च ।। ३७ ।।

वृषे सुखस्थे लभते सुखानि नरातिमान्यैर्विविधैश्च मान्यैः ।

शौर्येण भूपालनिषेवणेन विप्रोपचारैर्नियमैर्व्रतैश्च ।। ३८ ।।

तृतीयराशौ सुखगे सुखानि लभेन्मनुष्यः प्रमदाकृतानि ।

जलावगाहैर्वनसेवया च प्रभूतपुष्पाम्बरसेवनेन ।। ३९ ।।

कुलीरराशौ च यदा सुखस्थे, नरं सुरूपं सुभगं सुशीलम् ।

स्त्रीसंगतं सर्वगुणैः समेतं विद्याविनीतं जनवल्लभं च ।। ४० ।।

सिंहे सुखस्थे तु सुखं मनुष्यः प्राप्नोति जातु प्रचुरप्रकोपात् ।

दरिद्रतः शीलविपर्ययाच्च कुमित्रसङ्गाद्धनसंक्षयाच्च ।। ४१ ।।

कन्यागृहे बन्धुगृहे मनुष्यो प्राप्नोति सौख्यं प्रमदाभियोगात् ।

बह्वन्नपानान्नृपसेवनाच्च महोद्यमाद्धर्मनिषेवणाच्च ।। ४२ ।।

तुले सुखस्थे लभते मनुष्यः पैशुन्यसङ्गाल्लभते सुखानि ।

परोत्थछिद्रेक्षणकीर्तनेन चौर्येण युद्धेन च मोहनेन ।। ४३ ।।

अलौ चतुर्थे च सदा नितान्तं नरं सुतीक्ष्णं परभीतचित्तम् ।

प्रभूतसेवं गतवीर्यदर्पपरैः सुरक्षं मतिधैर्यहीनम् ।। ४४ ।।

चापे सुखस्थे लभते मनुष्यः सुखं सदा सङ्गरसेवनेन ।

तत्कीर्तनेनैव हयैर्विचित्रैः सेवासुखस्थेन निबन्धनेन ।। ४५ ।।

मृगे सुखस्थे सुखभाङ् मनुष्यः सदा भवेत्तोयनिषेवणेन ।

उद्यानवापीतटसङ्गमेन मित्रोपचारैः सुरतप्रधानैः ।। ४६ ।।

घटे सुखस्थे प्रमदाभिधानात् प्राप्नोति सौख्यं विविधं मनुष्यः ।

मिंष्टान्नपानैः फलशाकपत्रैर्विदग्धवाक्यैः कुहकानुकारैः ।। ४७ ।।

मीने सुखस्थे तु सुखं मनुष्यः प्राप्नोति सौख्यं जलसंश्रयेण ।

शनैस्तथा देवसमुद्भवैश्च स्थानैः सुवस्त्रैः सुधनैर्विचित्रैः ।। ४८ ।।

**पञ्चमगतद्वादशराशिफलम्**

मेषे सुतस्थे लभते मनुष्यः प्रायेण पुत्रान् विविधान् तथा च।

शूरान् सु]मुख्यान् विकृतान्तु चान्यान् पापानुरक्तान् कुलवित्तयुक्तान् ।। ४९।।

वृषे सुतस्थे लभते मनुष्यः प्राप्नोति कन्याः सुभगाः सुरूपाः ।

अपत्यहीना बहुकान्तियुक्ताः सदानुरक्ता निजभर्तृधर्मे ।। ५० ।।

तृतीयराशौ सुतगे मनुष्यः प्राप्नोत्यपत्यानि मनोहराणि ।

सुशीलयुक्तानि गुणाधिकानि प्रभासमेतानि बलाधिकानि ।। ५१ ।।

कर्के सुतस्थे जनयेन्मनुष्यः पुत्रान् प्रसिद्धान् सुतलालसांश्च ।

विस्तीर्णकीर्तीश्च महानुभावान् धनेन युक्तान् विनयेन युक्तान् ।। ५२ ।।

सिंहे सुतस्थे जनयेन्मनुष्यः क्रूरस्वभावान् नयनेन कान्तान् ।

मांसप्रियान् स्त्रीजनकान् सुतीव्रान् विदेशभाजान् क्षुधया समेतान् ।। ५३ ।।

कन्या यदा पञ्चमगा तदा स्युः कन्या नराणां तनयैर्विहीनाः ।

पतिप्रियाः पुण्यपराः प्रगल्भाः प्रशान्तपापाः प्रियभूषणाश्च ।। ५४ ।।

तुला यदा पञ्चमगा नराणां तदा सुशीलानि मनोहराणि ।

भवन्त्यपत्यानि सुरूपकाणि क्रियासमेतानि सुशिक्षितानि ।। ५५ ।।

कीटे सुतस्थे जनयेद्वियोनौ पुत्रान् मनुष्यः सुभगान् सुशीलान् ।

अज्ञातदोषान् प्रणयेन युक्तान् सदानुरक्तान् निजगोत्रधर्मे ।। ५६ ।।

चापे सुतस्थे जनयेन्मनुष्यः सुतान् विचित्रान् हयलब्धलक्षान् ।

धानुष्कचर्यान् क्षतशत्रुपक्षान् सेवाप्रियान् पार्थिवमानतुष्टान् ।। ५७ ।।

मृगे सुतस्थे जनयेन्मनुष्यः पुत्रान् मृगे पापमतीन् कुरूपान् ।

क्लीबान् कुभावान् विगतप्रभावान् सुनिष्ठुरान् विप्रविवर्जितांश्च ।। ५८ ।।

कुम्भे सुतस्थे स्थिरतासमेतान् गम्भीरचेष्टान् मतिसत्ययुक्तान् ।

पुत्रान् मनुष्यो जनयेत् प्रसिद्धान् नष्टात्मजान् कष्टसहान् प्रसूतान् ।। ५९ ।।

मीने सुतस्थे सलिलानुरक्तान् पुत्रान् मनुष्यो लभतेऽल्पवीर्यान् ।

रोगातुरान् पापरतान् कुरूपान् सुहास्यतास्त्रीसहितान् सदैव ।। ६० ।।

**षष्ठस्थद्वादशराशिफलम्**

मेषे रिपुस्थे प्रभवन्ति पुंसां चतुष्पदा मूर्खतराः सुरौद्राः ।

प्रसन्नतो म्लेच्छसमुद्भवाश्च कार्यं विना चैव नरस्य लोके ।। ६१ ।।

चतुष्पदार्थे प्रभवेत् प्रवैरं सदा नराणां वृषभे रिपुस्थे ।

असत्यमार्गेण तथाङ्गनानां सङ्गान्नितान्तं निजबन्धुवर्गे ।। ६२ ।।

तृतीयराशौ रिपुगे नराणां वैरं भवेत् स्त्रीजनितं सदैव ।

तथा नराणां सहितं च पापैर्वणिग्जनैर्नीचजनानुरक्तैः ।। ६३ ।।

कर्के रिपुस्थे हयसम्भवं च भवेन्मनुष्यस्य सदातुरस्य ।

समं द्विजेन्द्रैश्च नराधिपैश्च महाजनेनैव परानुरोधात् ।। ६४ ।।

सिंहे रिपुस्थे प्रभवेच्च वैरं पुत्रः समं बन्धुजनेन नित्यम् ।

धनोत्थमार्तस्य विनिर्जित[स्य] यद्वा मनुष्यस्य वराङ्गनाभिः ।। ६५ ।।

कन्यास्थिते शत्रुगृहे स्ववैरं समं सुताभिः प्रभवेन्नराणाम् ।

दुश्चारिणीभिश्च सुनिर्णयाभिर्वेश्याभिरेवाश्रयवर्जिताभिः ।। ६६ ।।

तुलाधरे शत्रुगृहे नरस्य निधिस्थितस्य प्रभवेच्च वैरम् ।

कार्यं सुधर्मस्य नरस्य साधोः स्वबन्धुवर्गाच्च निजालयस्य ।। ६७ ।।

कौर्पे रिपुस्थे च भ़वेच्च वैरी सार्धं द्विजिह्वैश्च सरीसृपैश्च ।

व्यालैर्मृगैश्चौरगणैर्नराणां सर्वैस्तथान्यैश्च बिलाश्रयैश्च ।। ६८ ।।

चापे रिपुस्थे च भवेद्धि वैरं शरैः समेतं च शरावरैश्च ।

सदा मनुष्यस्य हयैश्च हस्तिभिः पुनस्तथान्यैः परवञ्चनाच्च ।। ६९ ।।

मृगे रिपुस्थे प्रभवेच्च वैरं सदा नराणां धनसम्भवं च ।

मिंत्रैः समं साधुमहाजनेन प्रभूतकालं गृहसम्भवं च ।। ७० ।।

कुम्भे रिपुस्थे च तथार्थहेतोर्नराधिपेनैव जलाश्रयैश्च ।

वापीतडागादिभिरेव नित्यं क्षेत्रादितोऽन्यैः पुरुषैः कुचैलैः ।। ७१ ।।

मीने रिपुस्थे च भवेन्नराणां वैरं च नित्यं सुतवस्त्रजातम् ।

स्त्रीहेतुकं स्वीयभवापराणामपि प्रियाणामितरेतरं च ।। ७२ ।।

**सप्तमस्थद्वादशराशिफलम्**

मेषेऽस्तसंस्थे च भवेत्कलत्रं क्रूरं नराणां चपलस्वभावम् ।

पापानुरक्तं कठिनं नृशंसं वित्तप्रियं साध्यपरं सदैव ।। ७३ ।।

वृषेऽस्तसंस्थे च सुरूपदन्तं भवेत्कलत्रं प्रणतं प्रशान्तम् ।

पतिव्रताचारगुणेन युक्तं लज्जाधिकं ब्राह्मणदेवभक्तम् ।। ७४ ।।

तृतीयराशौ तु भवेत्कलत्रे कलत्रमुक्तं सुधनं सुवृत्तम् ।

सुखान्वितं सर्वगुणोपपन्नं विनीतदेशं गुणवर्जितं च ।। ७५ ।।

कर्केऽस्तसंस्थे च मनोहराणि सौभाग्ययुक्तानि गुणान्वितानि ।

भवन्ति सौम्यानि कलत्रकाणि कलङ्कहीनानि सुसंयतानि ।। ७६ ।।

सिंहेऽस्तसंस्थे च भवेत्कलत्रं तीव्रस्वभावं चपलं सुदुष्टम् ।

विहीनवेषं परसद्मरक्तं बह्वाशनं स्वल्पसुतं कृशं च ।। ७७ ।।

कन्येऽस्तसंस्थे च भवन्ति दाराः सुरूपदेहास्तनयैर्विहीनाः ।

सौभाग्यभोगार्थनयेन युक्ताः प्रियंवदाः सत्यधनाः प्रगल्भाः ।। ७८ ।।

तुलेऽस्तसंस्थे गुणगर्विताङ्गा भवन्ति नार्यो विविधप्रकाराः ।

पण्यप्रिया धर्मपराः सुदान्ताः प्रभूतपुत्राः प्रथिता विनीताः ।। ७९ ।।

कीटेऽस्तसंस्थे च रुजासमेता भवन्ति भार्याः कृपणा नराणाम् ।

सुकुत्सिताङ्गाः प्रणयेन हीना दौर्भाग्यदोषैर्विधयैः समेताः ।। ८० ।।

चापेऽस्तसंस्थे च भवेत्कलत्रं सदा नराणां पुरुषाकृतिं च।

सुनिष्ठुरं भक्तिनयेन हीनं प्रशान्तसौख्यं मतिवर्जितं च ।। ८१ ।।

मृगेऽस्तसंस्थे च भवेत्कलत्रं नृणां सुदुष्टं विगतस्वभावम् ।

विस्रस्तलज्जं परलोकरक्तं युद्धप्रियं दम्भसमन्वितं च ।। ८२ ।।

घटेऽस्तसंस्थे च भवेत्कलत्रं स्थिरस्वभावं पतिकर्मदक्षम् ।

देवद्विजानां सततं प्रहृष्टं धर्मध्वजं संशयतः समेतम् ।। ८३ ।।

मीनेऽस्तसंस्थे च विकारयुक्तं भवेत्कलत्रं कुमतिं कुपुत्रम् ।

स्वधर्मशीलं प्रणयेन हीनं सदा नराणां कलहप्रियं च ।। ८४ ।।

**अष्टमस्थद्वादशराशिफलम्**

मेषेऽष्टमस्थे निधनं नराणां भवद्विदेशे तु रुजान्वितानाम् ।

कथानुस्मृत्यर्थविसर्जितानां महाधनानामतिदुःखितानाम् ।। ८५ ।।

वृषेऽष्टमस्थे च भवेन्नराणां मृत्युगृहश्लेष्मकृताद्विकारात् ।

महासनाद्वाथ चतुष्पदाद्वा रात्रौ तथा हृष्टजनार्दितानाम् ।। ८६।।

तृतीयराशौ च भवेन्नराणां मृत्युस्थिते मृत्युरनिष्टसङ्गात् ।

प्लीहोद्भवो वा रससम्भवो वा गुदप्रकोपादथवा प्रमादात् ।। ८७ ।।

कर्केऽष्टमस्थे च जलोपसर्गात् कीटात्तथा चैव विभीषणाद्वा।

भवेद्विनाशः परहस्ततो वा विदेशसंस्थस्य नरस्य चैव ।। ८८ ।।

सिंहेऽष्टमस्थे च सरीसृपाच्च भवेद्विनाशो मनुजस्य सम्यक् ।

व्यालोद्भवो वापि वनाश्रितस्य चौरोद्भवो वाथ चतुष्पदोत्थः ।। ८९ ।।

कन्या यदा चाष्टमगा विलग्नात्तदा स्ववित्तान्मनुजस्य विन्द्यात् ।

स्त्रीणां हि हिंस्त्राद्विषमासनस्थात् स्त्रीणां कृतो वा स्वगृहाश्रितस्य ।।९० ।।

तुलाधरे चाष्टमगे च मृत्युर्भवेन्नराणां द्विपदोत्थ एव ।

निशागमे संस्थकृतोपवासान्निष्ठीविकोत्थोऽप्यथवा प्रतापात् ।। ९१ ।।

स्थानेऽष्टमस्थेऽष्टमराशिसङ्गान्नृणां विनाशो वदनोद्भवेन ।

रोगेण वा कीटसमुद्भवैश्च स्वस्थानसंस्थस्य विषोद्भवो वा ।। ९२ ।।

चापेऽष्टमस्थे प्रभवेन्नराणां मृत्युः स्वसंख्ये शरताडितानाम् ।

गुह्योद्भवेनापि गुदोद्भवेन चतुष्पदोत्थस्य विसंस्थितस्य ।। ९३ ।।

मृगेऽष्टमस्थे च नरस्य यस्य विद्यान्वितो मानगुणैरुपेतः ।

कामी च शूरोऽथ विशालवक्षाः शास्त्रार्थवित् सर्वकलासु दक्षः ।। ९४ ।।

घटेऽष्टमस्थेऽस्य भवेद्विनाशो वैश्वानरात् सद्मगतस्य जन्तोः ।

नानाव्रणैर्वा दवजैर्विकारैः श्रमात्तथा वा परसंश्रयाद्वा ।। ९५ ।।

मीनेऽष्टमस्थे प्रभवेच्च मृत्युर्नृणामतीसारकृताच्च कष्टात् ।

पित्तज्वराद्वा सलिलाश्रयाद्वा रक्तप्रकोपादथवा च शस्त्रात् ।। ९६ ।।

**नवमस्थद्वादशराशिफलम्**

धर्मस्थितेऽत्रैव हि मेषराशौ चतुष्पदोत्थं प्रकरोति धर्मम् ।

तेषां प्रदानेन च पोषणेन दयाविवेकेन सुपालनेन ।। ९७ ।।

वृषे च धर्मप्रगते मनुष्यो धर्मं करोत्येव धनप्रसूतम् ।

विचित्रदानैर्बहुगोप्रधानैर्विभूषणाच्छादनभोजनैश्च ।। ९८ ।।

तृतीराशौ प्रकरोति धर्मे धर्माकृतं सस्यकृतं सदैव ।

अभ्यागतोत्थं द्विजभोजनाद्वा दीनानुकम्पाश्रयमानसेन ।। ९९ ।।

व्रतोपवासैर्विषयैर्विचित्रैर्धर्मं नरः संकुरुते सदैव ।

धर्माश्रिते चैव चतुर्थराशौ तीर्थाश्रयाद्वा वनसेवया च ।। १०० ।।

तत्र स्थिते चाथ हि सिंहराशौ धर्मं परेषां प्रकरोति मर्त्यः ।

स्वधर्महीनं विक्रियाभिरेव सुतीर्थरूपं विनयेन हीनम् ।। १०१ ।।

धर्माश्रितः स्याद्यदि षष्ठराशिः स्त्रीधर्मसेवं कुरुते मनुष्यम् ।

विहीनभक्तिं बहुजन्मना च पाषण्डमाश्रित्य तथान्यपक्षम् ।। १०२ ।।

तुलाधरे धर्मगते मनुष्यो धर्मं करोत्येव सदा प्रसिद्धम् ।

देवद्विजानां परितोषणेन जनानुरागेण तथाद्भुतानाम् ।। १०३ ।।

धर्माश्रिते चाष्टमगे च राशौ पाषण्डधर्मं कुरुते मनुष्यः ।

पीडाकरं चैव तथा जनानां भक्त्या विहीनं परपोषणेन।१०४।।

चापे तथा धर्मगते मनुष्यः करोति धर्मं द्विजतर्पणोत्थम्।

सदन्वितं शास्त्रविनिर्मितं च प्रभूततोषं प्रथितं नृलोके।।१०५।।

धर्माश्रिते वै मकरे मनुष्यश्चापोत्थधर्मं कुरुते प्रतापम्।

पश्चाद्विरत्येव विडम्बनाभिः कौल्यं समाश्रित्य सदा च पक्षम्।।१०६।।

कुम्भे च धर्मप्रगते च धर्मं पुंसां विधत्ते सुरसंघजातम्।

वृक्षाश्रयोत्थं च तथा सिरक्तं च आरामवापीप्रजयं सदैव।।१०७।।

धर्माश्रिते चैव हि मीनराशौ करोति धर्मं विविधं नृलोके ।

सत्रप्रपारामतडागजातं तीर्थार्जनेनाथ मखैर्विचित्रैः ।। १०८ ।।

**दशमस्थद्वादशराशिफलम्**

कर्माश्रिते मुख्यतमे च राशौ करोति कर्म प्रवरं सुदुष्टम् ।

पैशुन्यरूपं विनयातिरक्तं सुनिन्दितं साधुजनस्य लोके ।। १०९।।

वृषेऽम्बरस्थे प्रकरोति कर्म व्ययात्मकं साधुजनानुरक्तम्

द्विजेन्द्रदेवातिथिभिर्विभक्तमाज्ञात्मकं प्रीतिकरं सतां च ।। ११० ।।

युग्मेऽम्बरस्थे प्रकरोति मर्त्यः कर्मप्रधानं गुरुभिः प्रदिष्टम् ।

कीर्त्यान्वितं प्रीतिकरं जनानां प्रभासमेतं कृषिजं सदैव ।। १११ ।।

कर्केऽम्बरस्थे प्रकरोति मर्त्यः कर्म प्रपारामतडागजातम् ।

विचित्रवापीतटघट्टजं च कृपाभिनिष्पन्नमकल्यकं च ।। ११२ ।।

सिंहेऽम्बरस्थे कुरुते मनुष्यो रौद्रं सपापं विकृतं च कर्म ।

सपौरुषं प्राणजमेव नित्यं वधात्मकं निन्दितमेव पुंसाम् ।। ११३ ।।

नभस्तलस्थे त्वथ षष्ठराशौ करोति कर्म ज्ञपितो मनुष्यः ।

स्त्रीराज्यभाजो जनताविरुद्धं कामात्मकं निन्द्यतमं नृलोके ।। ११४ ।।

तुलाधरे व्योमगते मनुष्यो वाणिज्यकर्म प्रचुरं करोति ।

धर्मात्मकं चापि नयेन युक्तं सतामभीष्टं परसंमतं च ।। ११५ ।।

कीटेऽम्बरस्थे प्रकरोति कर्म पुंसां सुदुष्टं जनसंमतं च ।

व्यथाकरं देवगुरुद्विजानां सुनिर्दयं नीतिविवर्जितं च ।। ११६ ।।

चापेऽम्बरस्थे च करोति कर्म सेवात्मकं चौर्ययुतं मनुष्यः।

परोपकारात्मकमोजसाढ्यं नृपात्मकं भूरियशःसमेतम् ।। ११७ ।।

मृगेऽम्बरस्थे च परोपतापं कर्म प्रधानं कुरुते मनुष्यः।

सुनिर्दयं बन्धुवधैः समेतं धर्मेण हीनं खलसंमतं च ।। ११८ ।।

घटेऽम्बरस्थे च करोति कर्म प्रायेण मर्त्यः परवञ्चनोत्थम् ।

पाषण्डधर्मान्वितमिष्टलोभाद्विश्वासहीनं जनताविरुद्धम् ।। ११९ ।।

कुलोचितं धर्मगुरुप्रदिष्टं कीर्त्यात्मकं सुस्थिरमादरेण ।

नानाद्विजाराधनसंस्थितं च मीनेऽम्बरस्थे प्रकरोति कर्म ।। १२० ।।

**लाभस्थद्वादशराशिफलम्**

लाभाश्रिते मुख्यतमे च राशौ चतुष्पदोत्थं प्रकरोति लाभम् ।

तथा नराणां नृपसेवया च देशान्तराराधनतः प्रभूतम् ।। १२१ ।।

आयस्थिते वै वृषभे प्रलाभो भवेन्मनुष्यस्य विशिष्टजातः।

स्त्रीणां सकाशात्वथ सज्जनानां कुसीदिनां धर्मकृतस्तथैव ।। १२२ ।।

तृतीयराशिः कुरुतेऽतिलाभं लाभाश्रितः स्त्रीदयितं सदैव ।

वस्त्रार्थपुष्पासनपानजातं सदा नराणां विविधं प्रसिद्धम् ।। १२३ ।।

लाभो भवेल्लाभगते च राशौ सदा चतुर्थे वरभाजनानाम् ।

सेवाकृषिभ्यां जनितः प्रभूतः शास्त्रेण वा साधुजनस्य पार्श्वात् ।। १२४ ।।

लाभाश्रिते पञ्चमभे च लाभो भवेन्मनुष्यस्य निर्गर्हणाभिः ।

नानाजनानां वधबन्धनैश्च व्यायामदेशान्तरसंश्रयाच्च ।। १२५ ।।

कन्यात्मके लाभगते मनुष्यः प्राप्नोति लाभं विविधैरुपायैः ।

शास्त्रागमाभ्यां विनयेन पुंसा नीत्या विवेकेन तथाद्भुतेन ।। १२६ ।।

तुलाधरे लाभगते मनुष्यः प्राप्नोति लाभं वणिजैर्विचित्रैः।

सुसाधुसेवाविनयेन नित्यं सुसंस्तुतं मुख्यतमं प्रभूतम् ।। १२७ ।।

लाभाश्रिते चाष्टमगे च राशौ प्राप्नोति लाभं मनुजोऽतिनिन्द्यम् ।

छलेन पापेन सुमोषणेन परस्य पैशुन्यकृतैर्विकारैः ।। १२८ ।।

लाभाश्रिते चैव धनुर्धरे च नृपार्थलाभं भजते मनुष्यः ।

स्त्रीसेवया वा निजपौरुषेण पुष्पाम्बराराधनजाश्वजोत्थम् ।। १२९ ।।

लाभाश्रिते वै मकरेऽर्थलाभो भवेन्नराणां जलयानयोगात् ।

विदेशवासान्नृपसेवनाद्वा व्ययात्मको भूरितरः सदैव ।। १३० ।।

आयस्थिते कुम्भधरे च लाभो भवेन्मनुष्यस्य च कर्मजातः ।

न्यायेन धर्मेण पराक्रमेण विद्याप्रभावात् सुसमागमेन ।। १३१ ।।

लाभाश्रिते चान्त्यभगे च राशौ प्राप्नोति लाभं विविधं मनुष्यः ।

मित्रोद्भवं पार्थिवमानजातं विचित्रवाक्यं प्रणयेन नित्यम् ।। १३२ ।।

**द्वादशभावगतराशिफलम्**

मेषे व्ययस्थे प्रवदेन्नराणां व्ययः सदाच्छादनभोजनैश्च ।

चतुष्पदानेकविवर्धनेन लाभेन नानाविधपौरुषेण ।। १३३ ।।

वृषे व्ययस्थे व्यय एव पुंसां भवेद्विचित्राम्बरयोषितानाम् ।

लाभेन रण्येन च कृत्रिमेण सुसाधुवादैर्विविधैः सदैव ।। १३४ ।।

तृतीयराशौ व्ययगे नराणां व्ययो भवेत् स्त्रीव्यसनात्मकैश्च ।

भूतोद्भवो वा सततं प्रभूतः कुशीलजः पापजनाङ्गनैश्च ।। १३५ ।।

कर्के व्ययस्थे द्विजदेवतानां व्ययो भवेद्यज्ञसमुद्भवैश्च ।

धर्मक्रियाभिर्विविधाभिरेव सुसंशितः साधुजनेन लोके ।। १३६ ।।

सिंहे व्ययस्थे तु भवेन्नराणामसद्व्ययो भूरितरः सदैव ।

रूपान्नजातश्च कुकर्मणा च निन्द्यः सतां पार्थिवचौरतो वा ।। १३७ ।।

कन्यात्मके चान्त्यगते व्ययश्च भवेन्मनुष्यस्य हि चाङ्गनोत्थः ।

विवाहमाङ्गल्यमखैर्विचित्रैः सूत्रैः प्रभाभिर्बहुसाधुसङ्गात् ।। १३८ ।।

तुले व्ययस्थे सुरविप्रबन्धुस्मृतिश्रुतिभ्यश्च कृतव्ययश्च ।

भवेन्नराणां नियमैर्यमैश्च सुतीर्थसेवाजनितः प्रसिद्धः ।। १३९ ।।

अलौ व्ययस्थे च भवेद्व्ययस्तु पुंसां प्रमादेन विडम्बिताभिः ।

कुमित्रसेवाजनितः सुनिन्द्यः कुबुद्धितश्चौरकृताधिकारात् ।। १४० ।।

चापे व्ययस्थे परवञ्चनाभिर्व्ययो भवेत् पापजनप्रसङ्गात् ।

सेवाकृतो वीतधिया च पुंसां कृषिप्रसङ्गात् परवञ्चनाद्वा ।। १४१ ।।

मृगे व्ययस्थे च भवेन्नराणां व्ययस्तु पानाशनसस्याजातः ।

स्ववर्गपूजानिरतस्तथाल्पः कृषीविहीनश्च विगर्हितश्च ।। १४२ ।।

घटे व्ययस्थे सुरसिद्धविप्रतपस्विनां बन्दिभवो व्ययश्च ।

पुंसां भवेत् साधुजनानुरोधाच्छास्त्रप्रदिष्टः प्रथितश्च भूरि ।। १४३ ।।

मीने व्ययस्थे जलपानतो वा कुसङ्गमाद्वा प्रभवेद्व्ययश्च ।

पुंसां कुपुत्राशनपानजातस्तथा विवादेन निरर्गलेन ।। १४४ ।।

ये स्थानचिन्तासु पुरा प्रदिष्टा योगा मया तान् परिहृत्य चैव ।

योगा विचिन्त्याः स्वधिया ततस्तु कार्या नराणां हि शुभाशुभैस्तैः ।। १४५ ।।

**।।इति श्रीमीनराजकृते वृद्धयवनजातके**

**भावगतराशिफलाध्यायोऽष्टत्रिंशः ।। ३८ ।।**

# तृतीयं परिशिष्टम्

# ज्योतिषशास्त्रीयग्रन्थेषूद्धृतानं यवनोक्तश्लोकानां सङ्ग्रहः ।

# तृतीयं परिशिष्टम्

## ज्योतिषशास्त्रीयग्रन्थेषूद्धृतानां यवनोक्तश्लोकानां सङ्ग्रहः।

**१ बृहत्संहितायां यवनः-**

म्लेच्छा हि यवनास्तेषु सम्यक शास्त्रमिदं स्मृतम्।

ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः।। बृ.सं. अ.२.१४

**२ बृहज्जातके यवनः-**

मययवनमणीत्थशक्तिपूर्वैर्दिवसकरादिषु वत्सराः प्रदिष्टाः ।

नवतिथिविषयाश्विभूतरुद्रदशसहिता दशभिः स्वतुङ्गभेषु।। बृ.जा.७.१

एकं द्वौ नवविंशतिधृतिकृती पञ्चाशदेषां क्रमा-

च्चन्द्रारेन्दुजशुक्रजीवदिनकृद्दैवाकरीणां समाः।

स्वैः स्वैः पुष्टफला निसर्गजनितैः पक्तिर्दशायाः क्रमा-

दन्ते लग्नदशा शुभेति यवना नेच्छन्ति केचित्तथा।। बृ.जा.८.९

प्राहुर्यवनाः स्वतुङ्गैः क्रूरैः क्रूरमतिर्महीपतिः।

क्रूरैस्तु न जीवशर्मणः पक्षे क्षित्यधिपः प्रजायते।। बृ.जा.११.१

नवदिग्वसवस्त्रिकाग्निवेदैगुणिता द्वित्रिचतुर्विकल्पजाः स्युः।

यवनैस्त्रिगुणा हि षट्शती सा कथिता विस्तरतोऽत्र तत्समासः।।

बृ.जा.१२.१

**३ लघुजातके यवनः-**

सूर्याद् द्वितीयमृक्षं वेशिस्थानं प्रकीर्तितं यवनैः।

तच्चेष्टाग्रहयुक्तं जन्मनि चेष्टासु च विलग्नम्।। ल.जा.१२.६

४ **योगयात्रायां यवनः-**

अङ्गेषु सूर्यो यवनेषु चन्द्रो भौमो ह्यवन्त्यां मगधेषु सौम्यः।

सिन्धौ गुरुर्भोजकटेषु शुक्रः सौरः सुराष्ट्रे विषये बभूव।।

म्लेच्छेषु केतुश्च तमः कलिङ्गे जातो यतोऽतः परिपीडितास्ते।

स्वजन्मदेशान् परिपीडयन्ति ततोऽभियोज्याः क्षितिपेन देशाः।।

– वराहमिहिरकृत–योगयात्रायां ३.१९–२०

३ **बृहत्संहिताया भट्टोत्पलटीकायां यवनः-**

यद्दानवेन्द्राय मयाय सूर्यः शास्त्रं ददौ सम्प्रणताय पूर्वम् ।

विष्णोर्वसिष्ठश्च महर्षिमुख्यो ज्ञानामृतं यत्परमाससाद ।।

पराशरश्चाप्यदिगम्य सोमाद् गुह्यं सूराणां परमाद्भुतं यत् ।

प्रकाशयाञ्चक्रुरनुक्रमेण महर्द्धिसन्तो यवनेषु तत्ते ।।

– बृ. सं. टी. २.३२

अब्दाश्रयं लक्षणमीरितं यद् ग्रहस्वभावप्रभवं जनानाम् ।

तदेव तन्मासदिनर्तषूक्तं तदीश्वरस्थानविकल्पितं च ।।

दिवाकराब्दे रणविग्रहोग्रक्षितीश्वरस्तीव्रविषज्वराग्निः ।

अवर्षशुष्कद्रुमशुष्कसस्यप्रचण्डवह्न्युग्रविषाक्षिरोगाः।।

– बृ. सं. टी. १९.१–३

सम्पन्नसस्यक्षुपशष्पशालिप्ररूढगुल्मो बहुवर्षधारः ।

रत्नौषधिस्नेहपटुप्रसेकश्चान्द्रो रतिस्त्रीसुखवर्धनोऽब्दः।।

– बृ. सं. टी.१९.४–६

रणप्रचण्डः क्षितिपोऽल्पसस्यो विशुष्कवारिद्रुमशष्पशीर्णः ।

अङ्गारकाब्दः प्रचुरोरगाग्निरातङ्कचौर्यक्षुदवृष्टिदृष्टः ।

– बृ. सं. टी.१९.७–९

सन्धानदानप्रयतः क्षितीशः स्वाध्यायतीर्थाध्वरभीर्द्विजौघः ।

निराधिरुङ्मध्यमसस्यवर्षो बौधः सुहृत्स्नेहविवर्धनोऽब्दः।।

– बृ. सं. टी.१९.११

सुवर्षयज्ञोत्सवसम्प्रदानो नीरुग्व्यथो धर्मपरोऽवनीशः ।

स्फीतानुतानैर्बहुसस्यकर्मा गुरोः स्वकर्मप्रयतप्रजोऽब्दः।।

– बृ.सं.टी.१९.१३–१५

पर्याप्तसौख्यस्फुटसस्यमेघाः प्ररूढवल्लीवरशष्पपुष्पः ।

कामप्रकामः क्षितिपो मुदाढ्यः शौक्रोऽङ्गनाहर्षवसुप्रदोऽब्दः।।

– बृ.सं.टी.१९.१६–१८

तुष्टाल्पवर्षः प्रबलानिलाग्निर्विपन्नसस्यश्चलितक्षितीशः ।

मृत्युक्षुधातङ्कभयोपजुष्टः शनैश्चरोऽब्दः पशुशूद्रगोघ्नः ।।

– बृ. सं. टी.१९.१९–२१

लग्नेषु जीवैन्दवभार्गवेषु पश्यत्सु चैतेषु गृहर्क्षमंशम् ।

राशावथो वा विचरे गृहस्थे गृहांशयोर्वा भृगुनन्दनेन्द्वोः ।।

जलाशये वा गृहमागतेंऽशे गृहे स्वनाथाश्रितलक्षिते वा ।

चन्द्रे शुभस्थे च शुभानि विन्द्याद्वास्तुप्रवेशादिनिवेशनानि ।।

– बृ. सं. टी. ९८.१६

हृद्रोगशोकाध्वविवाहदैन्यक्रोधक्षयव्याधिभयार्त्तिदोषान् ।

स्थाने शशाङ्कस्य रविः करोति व्यर्थश्रमोद्वेगमपि द्वितीये ।।

तृतीयसंस्थो धनमानधर्मस्थानासनप्रीतिसुखप्रदिऽर्कः ।।

चतुर्थगस्तु क्षतजप्रवृत्तिर्ज्वरामयो भेदविवादकारी ।।

नृपावमर्दात्मजबन्धुशोकव्याधिप्रदः पञ्चमसंस्थितोऽर्कः ।

आरोग्यसौख्यारिविनाशहर्षख्यातिक्रियासिद्धिकरश्च षष्टः ।।

जामित्रसंस्थो रुधिरप्रवृत्तिज्वरक्लमाजीर्णविषाध्वकारी।

सूर्योऽष्टमे स्त्रीसुतबन्धुदुःखव्याधिप्रदोपद्रवमृत्युकृत् स्यात् ।।

दैन्यस्थितिभ्रंशगुरुस्वबन्धुप्रद्वेषकृत् स्यान्नवमाश्रितोऽर्कः ।

मेषूरणस्थो द्विचतुष्पदस्त्रिहिरण्यरौप्याम्बरलाभकर्ता ।।

एकादशे स्थानयशःप्रहर्षमिष्टाशनारोग्यसुखप्रदोऽर्कः ।

स्थाने निरुक्तं शशिनो विधिज्ञैः क्रियाफलाघातकृदन्त्यराशौ ।।

– बृ. सं. टी.१०४.७

स्वस्थानगो भोजनगन्धमाल्यनारीसुहृद्वस्त्रप्रदः खलु स्यात् ।

चन्द्रो द्वितीयर्क्षगतस्तु तस्माद् बहुव्ययायासविवादकारी ।।

तृतीयगो वस्त्रहिरण्ययोषित्सुहृद्यशोभोजनदो हिमांशुः ।

स्वबन्धुपीडाधननाशजानि कुर्वीत दुःखानि चतुर्थसंस्थः ।।

धनक्षयाजीर्णरुगध्वदैन्यविक्षोभकृत् पञ्चमगः शशाङ्कः ।

शत्रुक्षयारोग्यसुखार्थसिद्धिं स्निग्धागमप्रीतिकरश्च षष्ठः ।।

जामित्रगः स्त्रीजनबन्धुशय्याहिरण्यभोज्याम्बरदः शशाङ्कः ।

क्षुद्व्याधिचिन्ताकलहार्थनाशो मृत्यक्षयोपद्रवदोऽष्टमस्थः ।।

धनक्षयारिव्ययमानभङ्गरोगादिकारी नवमः शशाङ्कः ।
मेषूरणस्थो बहुमानहर्षचेष्टाफलौदार्यविरोधकारी ।।
एकादशः स्निग्धविवाहशय्यास्त्रीभोजनप्राप्तिसुखार्थकारी ।
निशाकरो द्वादशगस्तु दैन्यमालस्यमीर्ष्यापचयं च कुर्यात् ।।

– बृ. सं. टी. १०४.१०

नृपानलव्यालविशाग्निशस्त्रव्याध्यर्थनाशी क्षयभङ्गकारी।
भौमः शशिस्थानगतो द्वितीये त्वनर्थसूयामिषवञ्चनाकृत्।।
ऐश्वर्यमानद्युतिहर्षकारी तृतीयसंस्थोऽन्नसुवर्णदश्च।
चतुर्थगस्तूदररुग्जरासृक्प्रवृतिर्निर्वेदकरो धराजः।।
सुतार्थनाशक्षतवैरमोषव्याधिप्रदः पञ्चमराशिसंस्थः।
षष्ठे कुजेऽरिक्षयमानहर्षप्रख्यापनारोग्यसमृद्धिकारी।।
जामित्रसंस्थो धनमित्रनाशक्लेशोदराक्ष्यामयरोगकृत् स्यात्।
भौमेऽष्टमे रुग्विषशत्रुशस्त्रक्षतक्षयोपद्रवदैन्यकारी।।
शस्त्रक्षताक्षेमसुवर्णनाशखेदाध्वकारी नवमो महीजः।
मेषूरणे व्याध्यदिशस्त्रचौरव्रणार्तिकृत् सिद्धिकरश्च पश्चात्।।
मानात्मजाज्ञाक्षितिताम्रहेमद्युतिप्रदो रुद्रपदेऽरिजिच्च।
स्त्रीविग्रहोद्वेजनपादरोगस्वजनावभङ्गश्रमदः कुजोऽन्त्ये।।

– बृ.सं.टी.१०४.१८

स्थाने शशाङ्कस्य शशाङ्कसूनुः सौभाग्यविद्यामतिमानहर्ता।
द्वितीयसंस्थस्त्वपवादशोकस्वैरक्रियामन्वतिदैन्यकारी।।
तृतीयगो बन्धुविरोधरोधव्यापत्तिकर्ता द्रविणस्य सौम्यः।
चतुर्थगो मानगुणप्रशंसाप्रमोदयोषिदवद्धनलाभकारी।।

नैष्ठान्यमुद्वेगमनर्थचर्यां कुर्याद् बुधः पञ्चमगोऽरतं च ।
षष्ठे विवृद्धिं मनसः प्रहर्षमुत्साहलाभोपचयं करोति।।
जामित्रगश्चान्द्रिरनिष्टमार्गसन्तापदैन्याद्रुचिरोधकारी।
स्यादष्टमस्थो विविधोपकारी बुद्धिप्रसादस्थितिसौख्यकर्ता।।
भङ्गापवादाध्वपरिश्रमान्तारायापकारी नवमर्क्षसंस्थः।
क्रियाप्रसिद्धिं दशमेऽर्थलाभं विस्रब्धमानं च बुधो ददाति।
एकादशे मानचतुष्पदस्त्रीचित्तार्थसौभाग्यविनोदकर्ता।
बुधोऽन्त्यराशौ विचरंश्च कुर्यादुद्वेजनं कार्यपरिश्रमं च।।

– बृ.सं.टी.१०४.२४

मोहार्थनाशस्थितमानभङ्गग्रामाध्वरुग्जातिविरोधवैरान्।
गुरुः शशिस्थानगतः करोति स्थानात्मजाज्ञाधनदो द्वितीये।।
गुरुस्तृतीये स्वजनार्थनाशक्रियाबधाध्वश्रमवञ्चनाकृत्।
विमानसेष्टापचयापवादबन्धुक्षयोद्वेगकारश्चतुर्थे।।
भृत्याम्बरस्थानसुवर्णमानपुत्रप्रदःपञ्चमगोऽरिजिच्च।
षष्ठे गुरुर्बन्धुविवादवैरत्रासप्रचेष्टाफलहानिकारी।।
जामित्रगः स्त्रीवसनान्नपानसौमुख्यसुस्फीतकलाध्वकर्ता।
जीवोऽष्टमस्थो वधभङ्गबन्धव्याधिश्रमानार्थविवादकारी।।
करोति जीवो नवमे सुतस्त्रीभूस्थानमानार्थसमृद्धिमग्र्याम्।
मेषूरणस्थोऽक्षिरुगिष्टहानिश्लेष्मामयायाससुतान्तकारी।।
एकादशेभूभवनात्मजस्त्रीहिरण्यधान्याम्बरवाहनानाम्।
धता गुरुर्द्वादशगोऽथ चन्द्राद्विदेशचर्याश्रमशोककारी।।

– बृ.सं.टी.१०४.३१

हिरण्यनारीरजतार्थविद्यासुताम्बरस्थानचतुष्पदानाम् ।
लाभं शशिस्थानमुपेत्य शुक्रः कुर्याद् द्वितीये तु वराङ्गनाप्तिम् ।।
मित्रान्नवस्त्रात्मजमानहर्षस्थानाङ्गनारोग्यकरस्तृतीये ।
शुक्रश्चतुर्थे धनपत्निपुत्रमित्रेष्टभाज्याम्बरगन्धदः स्यात् ।।
सुहृत्सुतोद्भूतिगुणप्रवृत्तिख्यातिप्रदः पञ्चमगोऽर्थदश्च ।
षष्ठे भृगुर्दैन्यविवादरोगद्वेषोद्भवान् मानवधांश्च कुर्यात् ।।
जामित्रसंस्थो भृगुजस्तृषाध्वस्त्रीहेतुकोद्वेगकुमित्रदः स्यात् ।
स्त्रीसौख्यविख्यापनमानहर्षप्रियागमाच्छादनदोऽष्टमस्थः ।।
सुहृद्गुरुस्त्रीधनधर्मविद्यायशोगुणाप्तिं नवमर्क्षसंस्थः ।
करोति शुक्रो दशमे सबन्धुसम्प्रीतिचेष्टाफलमानविघ्नान् ।।
एकादशे स्त्रीशयनान्नपानभूषारतिस्वेदगृहार्थकारी ।
भृग्वात्मजो द्वादशगस्तु चन्द्राद् भोग्यप्रदो वस्त्रविनाशकृच्च ।।

– बृ. सं. टी.१०४.३८

बन्धाध्वशस्त्रानिलरुग्विषार्तिं विडम्बनस्त्रीसुतवित्तनाशम्।
स्थाने विधत्ते शशिनोऽर्कपुत्रस्ततो व्ययायासकरो द्वितीये।।
तृतीयगोऽरिक्षयमानहर्षसौभाग्यबह्वागमदोऽर्कसूनुः।
चतुर्थगो बन्धुवधावमानच्छायाविधाताध्वभयार्तिकारी।।
स्थितिक्रियारम्भसुतार्थनाशस्वबन्धुविद्वेषविवादकारी।
शनैश्चरः पञ्चमगोऽथ षष्ठे शत्रुक्षयामोदसुतार्थदाता।।
छायाविधातश्रमगुह्यरोगस्त्रीमित्रनाशाध्वकृदर्कसूनुः।
जामित्रसंस्थोऽष्टमगोऽथ शोकक्षुद्बन्धुभृत्यव्यसनार्तिकारी।।

व्याध्यध्ववैरश्रमवित्तनाशक्षुत्क्लेशदः स्यान्नवमर्क्षसंस्थः।

ऐश्वर्यचेष्टाफलसञ्चयघ्नो मेषूरणे व्याध्यपकीर्त्तिकृच्च।।

यशःपरस्त्रीधनभृत्यलाभक्रियासमृद्धिस्थितिमानदस्तु।

एकादशे द्वादशगस्तु चेष्टानैपुण्यकीर्तिद्युतिमानहर्ता।।

– बृ.सं. टी.१०४.४५

द्विड्वेश्मगा नीचगृहस्थिता वा दुर्मार्गगाः सूर्यमनुप्रविष्टाः।

उक्तानि निघ्नन्ति शुभानि चैते फलान्यनिष्टान्यभिवर्धयन्ति।।

– बृ.सं. टी. १०४.५३

नृपप्रतिष्ठायुधयुद्धयोधहेमाग्निगोमूत्रभिषक्प्रयोगान् ।

रवेर्दिने वन्यमृगार्दनादि प्रशस्यते द्विड्भयकृच्च कर्म।।

– बृ.सं. टी.१०४.६०

स्त्रीसङ्गमालङ्करणाम्बरस्त्रगतिक्रियाहर्षसुखाश्रयांश्च।

कुर्वीत चन्द्रस्य दिने प्रदानयज्ञोत्सवान् रत्नरसार्जनं च।

– बृ.सं.टी.१०४.६०

वधावरोधावृतडिम्बभेदाः स्तेयादिशस्त्रादिविषप्रयोगाः।

दिने कुजस्य ध्वजिनीनिवेशाः कार्याः सुवर्णाजपशुक्रियाश्च।।

– बृ.सं.टी.१०४.६०

स्वाध्यायसेवालिपिलेख्यशिल्पव्यायाममनैपुण्यकलाविशेषाः।

इष्टिक्रियाः काञ्चनधातुयुक्तिवाग्युक्तिसन्धिप्रभुता बुधेऽह्नि।।

– बृ.सं.टी.१०४.६०

दिने गुरोर्धार्मिकपौष्टिकेज्याबाध्याभिधेयक्रतुमुण्डनादि ।

क्रियाश्रिता धर्मसुवर्णवस्त्रदेहाश्रयाश्चाश्वरथाश्रयाश्च।।

– बृ.सं. टी.१०४.६२

गान्धर्वविद्यामणिरत्नगन्धगोभूमिशय्याम्बरभूषणानाम्।

स्त्रीपण्यकोशोत्सवनन्दनानां क्रियाविधिः शुक्रदिने प्रशस्तः।।

– बृ.सं.टी.१४.६

विषाश्मशस्त्रत्रपुसीसलोहप्राकारबन्धावृतमारणानि ।

सर्वं च पापात्मकमर्कजाह्नि कार्पासवप्रव्रजितानि चेष्टम् ।

– बृ.सं. टी.१०४.६३

४ **बृहज्जातकस्य भट्टोत्पलटीकायां यवनः-**

यद्यद्विधानं नियतं प्रजानां ग्रहर्क्षयोगप्रभवं प्रसूतौ ।

भाग्यानि तानीत्यभिशब्दयन्ति वार्तानियोगेति दशा नराणाम्।।

तदप्यभिक्षैर्द्विविधं निरुक्तं स्थिराख्यमौत्पातिकसंज्ञितं च।

कालक्रमाज्जातकनिश्चितं यत्क्रमोपसर्पि स्थिरमुच्यते तत्।

सप्तग्रहाणां प्रथितानि यानि स्थानानि जन्मप्रभावानि सद्भिः।

तेभ्यः फलं चारग्रहक्रमस्था दद्युर्यदोत्पादकसंक्षितं तत्। बृ.जा.टी १.३

द्वे द्वे सपादे भवनं गते । बृ.जा.टी १.४

मत्स्यौ घटी नृमिथुनं सगदं सवीणं

चापी नरोऽश्वजघनो मकरो मृगास्यः ।

तौली ससस्यदहना प्लवगा च कन्या

शेषा स्वनाम सदृशा खचराश्च सर्वे ।। – बृ.जा. १.५

आद्यः स्मृतो मेषसमानमूर्तिः कालस्य मूर्द्धा गदितः पुराणैः ।

सोऽजाविका सञ्चरकन्दराद्रिस्तेनग्निधात्वाकररत्नभूमिः ।। १ ।।

वृषाकृतिस्तु प्रथितो द्वितीयः स वक्त्रकण्ठायतनं विधातुः ।

वनाद्रिसानुद्विपगोकुलानां कृषीवलानामधिवासभूमिः ।। २ ।।

वीणागदाभृन्मिथुनं तृतीयः प्रजापतेः स्कन्धभुजासदेशे ।

प्रनर्तको गायनशिल्पस्त्रीक्रीडारतिर्द्यूतविहारभूमिः ।। ३ ।।

कर्की कलिराकृतरम्बुसंस्थो वक्षःप्रदेशे विहितश्च धातुः ।

केदारवापीपुलिनानि तस्य देवाङ्गनारम्यविहारभूमिः ।। ४ ।।

सिंहश्च शैले हृदयप्रदेशे प्रजापतेः पञ्चममाहुराद्याः ।

तस्याटवीदुर्गगुहावनाद्रिव्याधावनीदुर्गवनप्रदेशाः ।। ५।।

प्रदीपिकां गृह्य करेण कन्या नौस्था जले षष्ठमिति ब्रुवन्ति ।

कालार्थधीरं जठरं विधातुः सशाङ्वला स्त्री रतिशिल्पभूमिः ।। ६ ।।

वीथ्यां तुला पण्यधरो मनुष्यः स्थितः स नाभीकटिबस्तिदेशेः ।

शुक्लार्थवीत्यापणपट्टनाध्वसार्थाधिवासोन्नतसस्यभूमिः ।। ७ ।।

श्वभ्रोऽष्टमो वृश्चिकविग्रहस्तु प्रोक्तः प्रभोर्मेढ्रगुदप्रदेशे ।

गुहाविलश्वभ्रविषाश्मगुप्तिर्वल्मीककीटाजगराहिभूमिः ।। ८ ।।

धन्वी मनुष्यो हयपश्चिमार्धस्तमाहुरुरूभुवनप्रणेतुः ।

समस्थितव्यस्तसमस्तवाजिसुरास्त्रभृद्यज्ञरथाश्वभूमिः ।। ९ ।।

मृगार्द्धपूर्वो मकरोऽम्बुगार्धो जानुप्रदेशे तनुशन्ति धातुः ।

नदीवनारण्यसरोद्र्यमूपश्वभ्राधिवासो दशमः प्रदिष्टः ।। १० ।।

स्कन्धे तु रिक्तः पुरुषस्य कुम्भो जङ्घे तमेकादशमाहुरार्याः ।

शुष्कोदकाधारकुशस्य पक्षी स्त्रीशौण्डिको द्यूतनिवासभूमिः ।। ११ ।।

जले तु मीनद्वयमन्त्यराशिः कालस्य वादौ विहितौ वरिष्ठौ ।

स पुण्यदेवद्विजतीर्थभूमिर्नदीसमुद्राम्बुचयाधिवासः ।। १२ ।।

–बृ.जा.टी १.५(१–१२)

आद्या तु होरा भवनस्य पत्युरेकादशक्षेत्रपतेर्द्वितीया।

स्वद्वादशैकादशराशिपानां द्रेष्क्राणसंज्ञाः क्रमशस्त्रयोऽत्र।

– बृ.जा.टी. १.१२

स्वोच्चेषु सर्वान्परिगृह्य भागांस्तिष्ठत्सु सर्वेषु बलाधिकेषु।

लग्ने शुभे पूर्णवपुष्मतान्दौ त्रैलोक्यराज्याधिपतिः प्रसूते।।

– बृ.जा.टी. १.१३

सूर्यस्य भागे दशमे तृतीये चन्द्रस्य जीवस्य तु पञ्चमेंऽशे।

सौरस्य विंशे त्वधिसप्तके तु विद्याद्भृगोः पञ्चदशे बुधस्य ।

भौमस्य विंशेऽष्टयुते परोच्चं विंशल्लवे सूर्यसुतस्य तूच्चम्।।

– बृ.जा.टी. १.१३

स्वोच्चात्तु जामित्रमुशन्ति नीचं त्रिंशल्लवो यच्च समानसंख्या।।

– बृ.जा.टी. १.१३

स्वे स्वे गृहेषु स्वगृहांशका ये वर्गोत्तमास्ते यवनैर्निरुक्ताः।

– बृ.जा.टी. १.१४

षष्ठं द्वितीयं दशमं च राशिमेकादशं चोपचयर्क्षमाहुः।

होरागृहस्थानशशाङ्कभेभ्यः शेषाणि चैभ्योऽपचयात्मकानि।

– बृ.जा.टी १.१५

आद्यन्तराशेरुदयप्रमाणं द्वौ द्वौ मुहूर्तौ नियतं प्रदिष्टौ ।

क्रमोत्क्रमाभ्यामधिपञ्चमं स्याच्च क्रार्द्धयोविद्धयुदयप्रमाणं ।।

– बृ.जा.टी १.१९

सत्त्वाधिका भास्करभौमजीवा भृग्वात्मजो राजसिकः शशि च ।

शनैश्चरस्तामसिको बुधस्तु संयोगताऽस्माल्लभते विशेषान्।।

देवा ग्रहाणां जलवह्निविष्णुप्रजापतिस्कन्दमहेन्द्रदेवो।

चन्द्रार्कचान्द्र्यर्कजभौमजीवशुक्रांश्च यज्ञेषु यजेत शश्वत्।।

– बृ.जा.टी. २.५

मासे तु शुक्लप्रतिपत्प्रवृत्तेराद्ये शशी मध्यबलो दशाहे ।

श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान्सदैव ।।

– बृ.जा.टी. २.५

क्रूरग्रहोऽर्कः कुजसूर्यजौ च पापौ शुभाः शुक्रशशाङ्कजीवाः।

सौम्यस्तु सौम्यो व्यतिमिश्रितोऽन्यैर्वर्गैस्तु तुल्यप्रकृतित्वमेति।।

– बृ.जा.टी. २.५

पूर्वापरभागगतैः शुभाशुभैरलिनि कर्कटे लग्ने ।

जातस्य शिशोर्मरणं सद्यः कथयन्ति यवनेन्द्राः।। – बृ.जा.टी २.७

द्वौ पश्चिमौ षष्ठमथ द्वितीयं संस्थानराशेः परिहृत्य राशिन्।

शेषान्ग्रहः पश्यति सर्वकालमिष्टेषु चैषां विहिता दृगिष्टा।।

– बृ.जा.टी २.१३

रवेर्गुरुर्मित्रमतोऽथान्ये गुरोस्तु भौमं परिहृत्य सर्वे।

चान्द्रेरनर्का भृगुनन्दनस्य त्वर्केन्दुवर्जं सुहृदः प्रदिष्टाः।।

भौमस्य शुक्रः शशिजश्च मित्रे इन्दोर्बुधं देवगुरुं च विद्यात्।

सौरस्य मित्राण्यकुजेन्दुसूर्याः शेषान्रिपून्विद्धि नृणां च तद्वत्।।

– बृ.जा.टी. २.१५

मूलत्रिकोणाद्धनधर्मबन्धुपुत्रव्ययस्थानगता ग्रहेन्द्राः।

तत्कालमेते सुहृदो भवन्ति स्वोच्चे च यो यस्य विकृष्टवीर्यः।।

– बृ.जा.टी २.१८

मासे तु शुक्ले प्रतिपत्प्रवृत्ते: पूर्वे शशी मध्यबलो दशाहे ।

श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान्सदैव ।

– बृ.जा.टी. २.२१

मासे तु शुक्लप्रतिपत्प्रवृत्ते: पूर्वे शशी मध्यबलो दशाहे ।

श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्येस्तु दृष्टोबलवान्सदैव ।।

– बृ.जा.टी. २.२१

आजीवभागेऽप्यनवीक्षिते वा जीवेन चन्द्रेऽथ विलग्नभे वा ।

जातं परोद्भूतमिति ब्रुवन्ति वाच्यो जनेनाथ बलावलोकात्।।

– बृ.जा.टी ५.६

सौरांशकस्थे शशिनि प्रलग्ने जले जलाख्यांशकमाश्रिते।

स्वांशस्थिते केन्द्रगतेऽर्कजे वा जातस्तमिस्रे यदि नार्कदृष्ट:।

– बृ.जा.टी ५.१७

संवर्धता चन्द्रमसोपलिप्तम्।। – बृ.जा.टी ५.१९

लग्नाच्छसिनैधनज्ञेऽशुभर्क्षे षष्ठोऽथवा पापनिरीक्षितश्च।

सर्वायुराहन्ति शुभैर्विमिश्रैस्तदीक्षितोऽब्दाष्टकमर्धकं वा ।। – बृ.जा.६.६

षड्राजराजर्द्धिबलोपकर्षप्रदानमानेष्वभिजातशक्ति:। – बृ.जा.टी ७.८

षष्ठाष्टमस्थोऽशुभदस्त्वरौद्र: पापै: सुहृत्स्थानगतश्च दृष्ट:।

स्वान्तर्दशायां प्रकरोति मृत्युं पाशाध्वबन्धादिपरिक्षयाद्वा।।

– बृ.जा.टी ७.८

मूर्तिञ्च होरां शशिनं च विद्यात्।। – बृ.जा.टी ७.८

आयूंषि राश्यंशकराशियोगात्।। – बृ.जा.टी ७.९

स्तन्योपभोगः शशिनो वयः स्वं भौमस्य विद्याद्दशनानुजन्म।
बौधं तु शिक्षाप्रदकालमाहुरामैथुनेच्छाकुलितप्रवृत्ति।।
शौक्रं युवत्वं विधिपूर्वदृष्टमामध्यमाद्देवगुरोर्वदन्ति।
रवेर्वयोऽर्द्धात्परमन्यदस्मात्सौरेर्जरा दुर्भगकालमाहुः।। –बृ.जा.टी.८.९

श्रेष्ठा दशा स्वे वयसि ग्रहस्य ।। – बृ.जा.टी ८.९

फलाष्टवर्गे शुभपापलक्षे समानकल्पावफलौ प्रदिष्टौ ।
ज्यायांस्तु यस्तस्य फलं विचार्य यात्राविधाने च समुद्भवे च ।।

– बृ.जा.टी ९.८

स्वनीचारिगृहोपगोऽन्यर्जितोऽरिदृष्टोऽल्पतनुर्विवर्णः।
सुतावभुज्जन्मपतौ बलस्थे स जन्मगो वन्ध्यफलो निरुक्तः।।
ईषत्सुहृत्स्वोच्चभृदिष्टो मित्रर्क्षजन्मोपचये बलीयान्।
यो जातकोऽभूत्स तु जन्मसंस्थो दद्याच्छुभं न त्वशुभोऽप्यनिष्टम्।।

– बृ.जा.टी ९.८

स्ववर्गसंस्था बलिनो विशेषाद्ग्रहा यथोद्दिष्टफलप्रदाः स्युः।
नीचे जिताश्चारिगृहेऽल्पवीर्यास्ते घ्नन्त्यनिष्टेष्टफलप्रवृत्तिम्।।

– बृ.जा.टी ९.८

मूर्खान्दरिद्रांश्चपलान् विशीलांश्चन्द्रः प्रसूतेऽर्कचतुष्टयस्थः।।

– बृ.जा.टी १३.१

कुर्याद्द्वितीये धनिनां प्रसूतिमापोक्लिमस्थे कुलजाग्रजानाम्।।

– बृ.जा.टी १३.१

स्वांशे शशी भार्गवदृष्टमूर्तिर्निशीश्वरोत्पत्तिकरः प्रदिष्टः।
तदुत्तमोद्भूतिकरः स तु स्याद्दृष्टो दिवा देवपुरोहितेन।।

– बृ.जा.टी १३.१

जन्माधिपो लग्नपतिश्च येषां  चतुष्टये स्याद्बलवान् गुरुर्वा।

चतुर्षु होरादिषु सङ्गतः स्याच्चतुर्वयःकालफलप्रदः स्यात्।।

– बृ.जा.टी २२.५

मीनांशके मेषमृगांशके वा चन्द्रस्थितोऽत्रैव हि पापदृष्टः ।

किलासकुष्ठादिविनष्टदेहमिष्टेक्षितः कण्डूविकरिणं च ।।

– बृ.जा.टी. २३.९

द्रेष्काणलग्नक्रमतस्तु राशौ गुरुर्विलग्नादित्रिकोणगोऽभूत्।

समुद्गते तद्भवनक्रमेण स्वाचारभादब्दगतिं प्रगण्यात्।।– बृ.जा.टी २६.२

**राजमार्तण्डे यवनः-**

उत्तरवर्त्मनि सवितुश्चूडाकरणं जगुः शुभं यवनाः।

काणे- धर्मशास्त्रेतिहासः-खं.५ भा.१,पृ. ६०६ तथा संदर्भः ९११

**सारावल्यां यवनः-**

भवनाधिपदिङ्नाम प्लव इति यवनैः प्रयत्नतः कथितः ।

तत्प्लवगो विनिहन्यादचिरेण महीपतिः शत्रून् ।। सारावली ३.३९

शुक्लप्रतिपद्दशके मध्यबलः  कीर्त्यते यवनवृद्धैः।

श्रेष्ठो द्वितीयदशके स्वल्पबलश्चन्द्रमास्तृतीये च ।। सारावली ५.१६

दिवसे मातापितरौ  शुक्ररवी शशिशनी निशायां च ।

मातृभगिनीपितृव्यौ विपर्ययात् कीर्तितौ यवनैः ।। सारावली ८.२७

वृश्चिककुलीरलग्ने सौरे चन्द्रेक्षिते त्ववटे ।

भवति प्रसवः स्त्रीणां वदन्ति यवनाः सह मणित्थैः ।। सारावली ९.८

तीव्रफलराजयोगा यवनाद्यैर्ये विनिर्मितास्तेषु ।

जायन्ते खलु कुलजा रिष्टं तेषु प्रसूतानाम् ।। सारावली १०.११

यवनाचार्यैर्वृद्धैर्द्विग्रहयोगेषु यत्फलं प्रोक्तम् ।

तदहमपहाय मत्सरमधुना वक्ष्ये विशेषेण ।। सारावली १५.१

यवनाद्यैर्विस्तरतः कथिता योगास्तु नाभसा नाम्ना ।

अष्टादशशतगुणितास्तेषां द्वात्रिंशदिह वक्ष्ये ।। सारावली २१.१

यवनेन्द्रदर्शनाद्यैः कथितं तदिहात्र सर्वमेव मया ।

किन्तु स्फुटं न सर्वं स्पष्टं सारस्वतं चिन्त्यम् ।। सारावली ५१.१६

**अद्भुतसागरः-**

नृपाटवीशैलसुवर्णताम्रसिंहानलव्यालविषौर्णिकानाम्।

हिंसोग्रवाग्द्रव्यवदुष्णरूक्षद्रव्याकराणां प्रभुरुच्यतेऽर्कः।। अ.सा. पृ.१९

स्त्रीचित्तनिद्रारतिभक्ष्यपेयःशीतद्रवस्वादुरसौषधीनाम्।

स्रग्वस्त्रभूषामणिमौक्तिकानां प्रभुः शशाङ्को लवणाम्बुजानाम्।।

अ.सा. पृ. ५२

चमूनृपस्तेन हुताशवृत्तिविषाग्निशस्त्रक्षतजक्षितीनाम्।

प्रवालधात्वाकरपुष्पजातिचामीकराणां क्षितिसूनुरीशः।। अ.सा. पृ. १६२

नानागुणद्रव्यविकल्पयुक्तिनैपुण्यशिल्पश्रुतिवेसराणाम्।

माहात्म्यमन्त्रार्थविदाब्दिकानां प्रभुर्बुधश्चैत्यवनस्पतीनाम्।।

अ.सा. पृ. १७५

माङ्गल्यधर्मद्विजवेदयज्ञधान्याकरस्थानगुणात्मजानाम्।

सुवर्णयानासनपौष्टिकानां प्रभुर्गुरुर्मन्त्रिमहत्तराणाम्।। अ.सा. पृ. १८७

वज्रादिरत्नाकरगोसुतस्त्रीविवादगन्धाम्बरभूषणानाम्।

सौभाग्यसौख्यश्रुतिसञ्चयानां प्रभुर्निधीनां धनिनां च शुक्रः।।

अ.सा. पृ. २१४

आनर्त्तवाहाहतवृद्धनीचपुंस्त्वोनसत्त्वालसदीक्षितानाम्।

विद्धान्नदासाञ्जनसीसलौहकाष्ठायसानां प्रभुरर्कसूनुः।। अ.सा. पृ. २३६

दिवाकराब्दे रणविग्रहोग्रपृथ्वीश्वरस्तीव्रविषज्वराग्निः।

अवर्षशुष्कक्षयशस्यसङ्घः प्रचण्डवह्न्युग्रशिरोऽक्षिरोगाः।।

अ.सा. पृ. ३७६

सम्पन्नशस्याक्षुपशस्यशालिप्ररूढगुल्मो बहुवर्षवारिः।

रसौषधिस्नेहपटुप्रसेकश्चान्द्रो रतिस्त्रीबलवर्धनोऽब्दः।। अ.सा. पृ. ३७७

रणप्रचण्डः क्षितरल्पशस्या विशुष्कवारिद्रुमशस्यवीरुत्।

अङ्गारकाब्दः प्रचुरोरगाग्निरातङ्कचौर्यक्षुदवृष्टिदृष्टः।। अ.सा. पृ. ३७८

सन्धानदानप्रयतः क्षितीशः स्वाध्यायतीर्थानुरतिर्द्विजौघः।

निराधिरुत्पादितशस्यवर्षो बौधः सुहृत्स्नेहविवर्धनोऽब्दः।।

अ.सा. पृ. ३७९

सुवर्षयज्ञोत्सवसम्प्रदानो नीरुग्व्यथो धर्मपरोऽवनीशः।

स्फीतानुपानैर्बहुशस्यकर्ता गुरोश्च धर्मप्रयतप्रजोऽब्दः।। अ.सा. पृ. ३८१

पर्याप्तशस्यस्फुटकृष्णमेघाः प्ररूढवल्लीनवशस्यपुष्पाः।

कामः प्रकामः क्षितिपैरथाढ्यः शौक्रोऽङ्गनाहर्षवसुप्रदोऽब्दः।।

अ.सा. पृ. ३८२

दुष्टाल्पवर्षः प्रबलानिलोऽपि विपन्नशस्यश्चलितक्षितीशः।

मृत्युक्षुधातङ्कभयोपसृष्टः शनैश्चराब्दः पशुशूद्रगोघ्नः।।अ.सा. पृ. ३८३

अब्दाश्रयं लक्षणमीरितं यद्ग्रहस्वभावप्रभवं जनानाम्।

तदेव तन्मासदिनर्त्तुयुक्तं तदीश्वरस्थानविकल्पितं च।। अ.सा. पृ. ३८४

भूमेः कृषेः शस्यसुवर्णताम्रधात्वग्निजन्याहवसम्भ्रमाणाम्।

गजाश्वबालव्यजनातपत्रशक्तिध्वजस्तेनचमूपतीनाम्।। अ.सा. पृ. ४५२

अजाविकातीक्ष्णकरद्रुमादित्वक्पत्रदग्धप्रहतक्षतानाम्।

मनःशिलागैरिकरक्तयुक्तिद्रव्याधिकारो विहितोऽजराशिः।।

अ.सा. पृ. ४५२

क्रीडाविहारस्रगपत्यनारीविद्यारतोद्यानसभाप्रपानाम्।

सर्पिर्दधिक्षीररसस्य पुष्पमन्थानगोलाङ्गुलकर्षकाणाम्।। अ.सा. पृ. ४५३

युगाक्षशय्याशकटाक्षचक्रगन्धक्षताम्भोमहिषर्षभाणाम्।

सौभाग्यरत्नाम्बरदण्डकानां प्रभुर्वृषः कोषगृहाश्रमाणाम्।।

अ.सा. पृ. ४५३

पुंस्त्रीरतिद्यूतविहारशिल्पगन्धर्वगीतस्मितवादितानि।

व्यायामचित्रायुधलेख्यपांशुसंवादसम्मन्त्रितपुस्तकानि।। अ.सा. पृ. ४५३

द्वन्द्वार्थयोगो मिथुनौषधादिज्ञानोपदेशव्यवहाराधीराः।

नैपुण्यवैकारिकदम्भजीवा राशेस्तृतीयस्य नटाः सधूर्ताः।।

अ.सा. पृ. ४५३

नारीतरस्विश्रुतवृद्धिविप्राः सरांसि वाप्यः कुमुदोत्पलानि।

द्रव्यानि शीतानि मृदुद्रवाणि स्वादूनि सञ्जीवनहर्षणानि। अ.सा. पृ. ४५४

नक्राः समण्डूककुलीरकूर्माः शाकानि पुष्पाणि च वारिजानि ।

फेनाः सकुन्ताः जलजीविनश्च राशेश्चतुर्थस्य परिग्रहाः स्युः।।

अ.सा. पृ. ४५४

शैलाटवीशृङ्गविषास्थिकाष्ठत्वङ्मांसरोमाजिनतान्तवानाम्।

आरण्यजानां नखदन्तिशृङ्गिकुरङ्गरूक्षोक्षुरसौषधीनाम्।। अ.सा. पृ. ४५५

व्याधेष्टकृद्विप्रनृमुख्यभूभृन्मूर्च्छाग्निशस्त्रौर्णिककाञ्चनानाम्।

ऋत्विग्भिषङ्मन्त्रभृदुद्धतानां सिंहो निरुक्तो विभुरोजसां च ।

अ.सा. पृ. ४५५

कन्यारतिप्रायिकसङ्गताग्निवनप्रलम्बिद्रवभूमिभूपाः।

मुखेषु रागाञ्जनगात्रभूषाः स्त्रीक्रीडनादर्शसमुद्भवानि।। अ.सा. पृ. ४५५

प्रदीपिकानौगिरिकोत्तरीयस्त्रीशिल्पकाव्यश्रुतिपार्थलेखाः।

विरागवासोमणिगन्धधूपाः संस्थानगीतादिकलाश्च षष्ठे।। अ.सा. पृ. ४५५

तुलादिमानापणपाथवीथीहिरण्यरत्नाम्बरमौक्तिकानाम्।

उद्घोषकोद्देशिकसार्थमुख्यहारादिनैर्याणिकसूतिकानाम्।। अ.सा. पृ.४५६

विवादधूर्त्तानृतदम्भजीवपौण्याध्वकर्त्तृश्रुतिपण्डितानाम्।

षाड्गुण्यसेवादिकचातुराणां तुलाधरः सम्पठितोऽधिकारे।।

अ.सा. पृ.४५६

श्वित्राग्निवल्मीकविषाग्निशस्त्रप्रणष्टदष्टक्षतजाहतानि।

शरीसृपावृश्चिकचक्रगोधासर्पादयो नक्तविहारिणोऽन्ये।। अ.सा. पृ. ४५६

विहारिपापौहतप्रदुष्टदीनार्त्तभग्नास्त्रविगर्हितानि।

मांसोत्करावस्थितगुह्यभाण्डसाङ्गायुधास्त्रादि च वृश्चिके तु।।

अ.सा. पृ.४५७

हयद्विपाः शाकुनचक्रवाकवर्मास्त्रयोधायुधयन्त्रशाणाः।

वेदाङ्गमन्त्रक्रतुहव्यभाण्डवेदान्तिकाचार्यमुनिक्रियाश्च।। अ.सा. पृ. ४५७

ज्ञानोपदेशागमवाग्वरिष्ठकाव्यस्मृतिव्याकृतिमङ्गलार्थाः।

राष्ट्राण्यमात्यापुरमन्त्रिपौराः सुगन्धिनो यच्च सुगन्धि सत्त्वम्।।

अ.सा. पृ. ४५७

वन्या मृगा मन्त्रबलेक्षुपादानलद्विजाश्च  क्रिमिशैवलाद्याः।

दंष्ट्राविशिष्टा मकरादयोऽन्ये ससीसलोहायसधातुधान्याः।।

अ.सा. पृ. ४५८

कुशस्यधान्यानि सकाञ्चनानि वल्लीद्रुमादीनि च सेकजानि।

वैराणि जीवा मृगपक्षिनिम्ना मृगाश्रये यच्च जलाधिवासे।।

अ.सा. पृ.४५८

तडागकूपप्रतिरोधबन्धसम्प्रेक्ष्यचीनश्लथलोहिताङ्गाः।

कुशस्यलोहायसकृष्णमांसश्वपाकचौरान्तरबद्धवृद्धाः।।  अ.सा. पृ. ४५८

नपुंसकानौकाकृतिका जलोत्था विचित्रपुष्पाणि फलानि हंसाः।

सुरासवाद्यम्बुचरा बकाद्या वटादयः कुम्भभृदाश्रयाः स्युः ।।

अ.सा. पृ. ४५८

गम्भीरतोयोदधितीर्थतीरनौपोतवाहास्तिमिमीनशङ्खाः।

नारी सरोगा जलजोपजीवी  स्नानाम्बरस्नेहसदर्पणानि।।अ.सा. पृ. ४५९

यज्ञा  द्विजेष्टा मणिशुक्तिरत्नप्रवालहेमादिविभूषणानि।

पुराणवेदव्रतनीतिधर्मद्रव्याणि मीनद्वयसंश्रयाणि।।       अ.सा. पृ. ४५९

द्रव्याण्यनेकाकृतिलक्षणानि ग्राह्याणि राशिप्रभवैर्विकारैः।।

अ.सा. पृ. ४५९

# चतुर्थं परिशिष्टम्

# ग्रन्थोक्तपारिभाषिकशब्दानां सूचिः

# चतुर्थं परिशिष्टम्

## पारिभाषिकशब्दानां सूचिः

(अ) **द्वादशभावानां** स्थान-भवन-गेह-गृह-होरा- इत्यादीनि नामानि। तथैव **प्रत्येकभावार्थं** विविधसंज्ञानां प्रयोगो भवति-यथा-

१ **प्रथमस्थानम्**-कल्पम्-शक्तिः-विलग्नम्-आद्यम्-मूर्तिः-अङ्गम्-तनुः-उदयः-वपु- लग्नम्-देहः- स्वस्थानम्।

२ **द्वितीयस्थानम्**- कोशः-अर्थम्-कुटुम्बम्-धनम् - स्वम्।

३ **तृतीयस्थानम्**-पराक्रमः,सहजम्- भ्रातृस्थानम्-दुश्चिक्यम् -सहोत्थम्-विक्रमः-पौरुषम्।

४ **चतुर्थम्**-पातालः-तुरीयं-हिबुकं-अम्बा--यानम्-गृहम्-सुहृद्वाहनम्-बन्धुः-वेश्म-सुखम्-चतुरस्त्रम्-अम्बु-जलम्-नीरम्।

५ **पञ्चमम्**-तनयम्-बुद्धिः-विद्या-आत्मजम्-वाक्स्थानम्-तनुजम्-सुतम्-धीः-पुत्रः-प्रतिभा-त्रिकोणम्।

६ **षष्ठम्**- अरिः- रिपुः-क्षतम्-व्रणम्-द्वेषः-वैरी।

७ **सप्तमम्**- जाया- जामित्रम्-द्यूनम्- द्यूतम्- पत्नी-स्त्री-चित्तत्थम्-कामः-अस्तम्-स्मरः-मदनः-मदः।

८ **अष्टमम्**- रन्ध्रम्-आयुः-छिद्रम्-निधनम् -याम्यम्-लयः-मृत्युः-मरणम्-विनाशः-चतुरस्त्रम्-विवरम्-गुप्तम्।

९ **नवमम्** - शुभम्- गुरुः- धर्मः-पुण्यम्-त्रित्रिकोणम् - त्रिकोणम्-तपः- मार्गः-यात्रा-भाग्यम्-तत्त्वचिन्तनम्।

१० **दशमम्**- आस्पदम्-मानम्-कर्म-पिता-मेषूरणम्-आज्ञम्-खं-गगनम् तातः-व्यापारः-नभः-व्योम-आकाशः-मध्यम्।

११ **एकादशम्** - आयः- भवः-लाभः-मित्रम्-आगमः- प्राप्तिः -

१२ **द्वादशम्** - प्रान्त्यम्-अन्तिमम्-रिफ्फम्-व्ययः-बन्धनम्-मोक्षःकेन्द्रम्-१,४,७,१० - पणफरः -२,५,८,११ - आपोक्लिमः -३,६,९,१ बृ.जा. १.१५-१९ लघुजातक १.१५-१९,सारावली ३.२६-३३ लघुपाराशरी

**(ब) द्वादशराशीणां विविधसंज्ञाः।**

१ **मेषः**-अजः-छागः-क्रिया

२ **वृषभः**- उक्षः-वृषः-गोः-गोपतिः-तावुरिः-तवुरुः

३ **मिथुनः** - युग्मम् - नृयुगम्-जितुमः-जुतुमः-जित्मः

४ **कर्कः**- कर्किः-कर्कटः-कुलीरः

५ **सिंहः** - हरिः- मृगेन्द्रः-लेयः

५ **कन्या** - अङ्गना-युवतिः-कुमारी-प्रमदा-पाथोनः-पाथेनः

७ **तुला** - तौलिः-धटः-वणिक्-तुलाधरः- जूकः

८ **वृश्चिकः** - अलिः-कीटः-कौर्प्यः-कौर्पिः

९ **धनुः**- चापः- कार्मुकः-धन्वी-हयाङ्गम्-तौष्किकः- तौष्कः

१० **मकरः** - मृगास्यः- मृगः- आकोकेरः

११ **कुम्भः** - घटः- कुम्भधरः- हृद्रोगः

१२ **मीनः** - मत्स्यः- झषः- अनिमिषः-ईत्थः-चेत्थः

**(क) नवग्रहाणां विविधसंज्ञाः-**

बृ.जा. २.२-३

**सूर्यः**- हेलिः दिवाकरः-दिनमणिः- तीक्ष्णाशुः-भास्वान्-तीक्ष्णरश्मिः-भानुःविवस्वान्,रविः,इनः,आदित्यः,सविता,भास्करः,अर्कः,तिग्मांशुः,तपनः,सहस्रांशुः.प्रभाकरः,उष्ण-करः,उष्णगुः,मार्तण्डः, दिनकृत् ।

**चन्द्रः**-विधुः,इन्दुः,चन्द्रमाः,सोमः,शीतांशुः,शीतरश्मिः-शशांकः शीतभानुः-तुहिनद्युतिः तुहिनगुः -मृगाङ्कः-शशी-निशाकरः,निशानाथः, रोहिणी-प्रियः- नक्षत्रपतिः-हिमगुः,शीतगुः ।

**भौमः**-अङ्गारकः,भौमः,आरः,वक्रः,क्रूरः,अवनिभूः-आवनेयः-भूमिजः,महीसुतः,भूमिपुत्रः-भूमितनूजः-कुजः-लोहितः,लोहोताङ्गः क्ष्मातनयः, क्षितिसुतः,क्रूराक्षः,माहेयः,रुधिरः ।

**बुधः**-हिम्नः-विद्-ज्ञः-बोधनः,विबुधः,कुमारः,राजपुत्रः,-चन्द्रपुत्रः-रौहिणेयः-सौम्यः-चान्द्रिः-मृगाङ्कतनयः-इन्दुजः,तारापुत्रः,हिमरश्मिजः

**गुरुः**-जीवः-वागीशः-बृहस्पतिः-वाक्पतिः-अङ्गिराः-देवगुरुः सुरगुरुः-इज्यः-ईड्यः-सुरपतिः-सूरिः-सुरेज्यः-देवपुरोहितः इन्द्रमन्त्री,सुरमन्त्री, सुराचार्यः,गिरीशः,धिषणः ।

**शुक्रः**-भार्गवः-कविः-असुरगुरुः-भृगुसुतः-सितः-आस्फुजित् उसनाः -दैत्येज्यः-दैत्यगुरुः-दैत्यर्त्विग्, भृगुः,दैत्यमंत्री, दानवपूजितः,काव्यः ।

**शनिः**-मन्दः-सूर्यपुत्रः-सूर्यजः-दिवाकरजः-सौरः-कोणः-असितः-दिनकरतनयः - रविजः - पाताङ्गिः - छायासुतः, शनैश्चरः, सौरिः, अर्कनन्दनः,आर्किःभास्करिः, दिनेशात्मजः,सहस्रांशुजः, पातङ्गिः,यमः।

**राहुः**-सिंहिकापुत्रः -स्वर्भानुः - तमः - अगुः-सैंहिकेयः-अमृतचौरः-विधुन्तुदः-कुमुदपतिरिपुः, असुरः, दानवः,सुरारिः,भुजङ्गमः,उपप्लवः।

**केतुः**-शिखी-तमसी, ब्रह्मसुतः,धूम्रवर्णः ।

# पञ्चमं परिशिष्टम्

# अध्ययनोपयुक्तानां ग्रन्थानां सूचिः

## पञ्चमं परिशिष्टम्

## अध्ययनोपयुक्तानां ग्रन्थानां सूचिः


१. अद्भुतसागरः – वल्लालसेनदेवप्रणीतः, भाषाटीकासहित, टीकाकार डॉ. शिवकान्त झा।

२. अर्धप्रकाशज्योतिषम् – पं. रविदत्त विरचितं , गुजरातीटीकासहित , टीकाकार पं. चन्दुलाल, महादेव रामचन्द्र जागुष्टे, अमदावाद,प्रथम आवृत्ति १९३७ ।

३. उत्तरकालामृतम् – कालिदासविरचितं, व्याख्याकारः जगन्नाथ भसीनः, रंजन पब्लिकेशन्स, १६ अन्सारी रोड दरियागंज, नई दिल्ली।

४. ऋग्वेदसंहिता – सं.श्रीपाद दामोदर सातवळेकर, स्वाध्याय मंडळ पारडी, बलसाड, गुजरात।

५. केशवीजातकम् – द्विवेदी कानजी मयाशंकर दैवज्ञकृत गुजराती भाषांतर तथा उदाहरणसहित निर्णयसागर प्रेस मुम्बई प्रथमावृत्ति १९०९।

६. केशवीजातकम् – द्विवेदी कानजी मयाशंकर दैवज्ञकृतम्, मुंबई, प्रथम – आवृत्तिः १९०९

७. केशवीयजातकपद्धतिः – प्रौढमनोरमा संस्कृत एवं हिन्दीटीकासहित टीकाकार – डॉ. सुरकान्त झा।

८. खेटकौतुकम् – लेखकः – नव्वाब खानखाना, भाषाटीका रामेश्वरदत्त, बनारस ।

९. गौरीजातकम् – भाषान्तरकर्ता वैद्य पं. जगन्नाथ रविशंकर त्रिवेदी, प्रकाशक– पं. नारायण मूलजी, मुम्बई, प्रथमावृत्ति, ई..स.१९३६।

१०. ग्रहगोचर–ज्योतिषम् – श्रीवृन्दावन शर्माविरचितं , गुर्जरटीका सहित, प्रकाशक– महादेव रामचन्द्र जागुष्टे अमदावाद, षष्ठावृत्ति, ई.स.१९४६।

११. ग्रहलाघवम् – श्रीगणेशदैवज्ञविरचितं, व्याख्याकार:– श्रीकपिलेश्वरशास्त्री, प्रकाशक– चौखम्बा संस्कृत सीरिज ओफिस, बनारस, ई.स.१९४६।

१२. चमत्कारचिंतामणि: – नारायणभट्टविरचितं, टीकाकार: वन्द्रीप्रसाद, मथुरा १९५० ।

१३. जन्मपत्रदीपक: – श्रीविन्ध्येश्वरीप्रसादद्विवेदिना विरचित:, प्रकाशक – चौखम्बा संस्कृत सीरिज, बनारस, हिन्दीटीकासहित, तृतीयावृत्ति, ई.स.१९५३।

१४. जन्मपत्रिकानिबन्ध: – लेखक:– बालगोविन्दहरनारायणदवे, प्रकाशक – हरिभाई पटेल:, शाहापुर, अमदावाद, तृतीयावृत्ति, ई.स. १९८५।

१५. जातकचन्द्रिका – श्री याज्ञिकनाथविरचित: गुजरातीभाषांतरकर्ता तथा प्रकाशक गौरीशंकर मंछाशंकर रैक्व, सुरत तृतीयावृत्ति, १९२४।

१६. जातकपारिजात:– श्रीवैद्यनाथविरचित:, सुधाशालिनी संस्कृतटीकासहित:, तथा विमलाहिन्दीटीकासमेत:, चौखंबा संस्कृत संस्थान, वाराणसी, २००४

१७. जातकफलादर्श: – लेखक: – हरिवल्लभ व्यास, मुंबई ।

१८. जातकालंकार: – गणेशदैचज्ञप्रणीत: हिम्मतराम जानी गुजराती टीका सहित प्रकाशक महादेव रामचन्द्र जागुष्टे अमदावाद प्रथम आवृत्ति १९४१।

१९. जातकालंकार: – गणेशदैवज्ञविरचित:, कपिलेश्वरशास्त्रिणा विरचितसंस्कृतटीकया दीनानाथशास्त्रिकृतहिन्दीटीकया च समेत:, जयकृष्णदास हरिदास गुप्तप्रकाशित:,चौखम्बासंस्कृतसीरिज, वाराणसी १९४५।

२०. जैमिनिसूत्रम् - रामरत्न ओझा कृत संस्कृत-हिन्दी टीका सहित,प्रकाशक बाबू काशीप्रसाद भार्गव, बनारस १९२५

२१. जैमिनीयसूत्राणि(ज्योतिषम्), काशिरामविरचितभाषाटीकासहितानि, खेमराज श्रीकृष्णदास, श्रीवेंकटेशस्टीम प्रेस, मुंबई, १९३७

२२. ताजिकनीलकण्ठी – श्री नीलकण्ठदैवज्ञविरचित:, व्याख्याकार:- श्रीकेदारदत्तजोशी, प्रकाशक- मोतीलाल बनारसीदास, वाराणसी, चतुर्थावृत्ति, ई.स.१९९८।

२३. ताजिकभूषणम् – श्रीगणेशदेवज्ञविरचितं , पं सीतारामशास्त्रीकृतभाषाटीकासहित, श्रीवेङ्कटेश्वर स्टीम-प्रेस, मुम्बई, द्वितीयावृत्ति, सं.१९८९।

२४. तैत्तिरीयसंहिता - सं.श्रीपाद दामोदर सातवळेकर, स्वाध्याय मंडळ पारडी, बलसाड, गुजरात, ई.स. १९५७।

२५. दशाफलदर्पण: - श्रीनिवासपाठकप्रणीत:, सुबोधिनी हिन्दीव्याख्यासहित , व्याख्याकार- डॉ. हरिशङ्कर पाठक।

२६. नक्षत्रचिकित्साज्योतिषम् – व्याख्याकार महर्षि अभय कात्यायन, प्रकाशक- चौखम्बा सुरभारती प्रकाशन, वाराणसी, प्रथमावृत्ति, ई.स.२००६।

२७. नक्षत्रफलदर्पण: - लेखक- डॉ.गौरीशङ्कर कपूर:, हिन्दीटीकासहित, रंजन पब्लिकेशन्स, १६ अन्सारी रोड दरियागंज, नई दिल्ली, प्रथमावृत्ति, ई.स.२००४।

२८. नारदसंहिता - नारदमहामुनिप्रणीत:, सान्वयविमला हिन्दीटीकासहिता, व्याख्याकार- आचार्य रामजन्म मिश्र, चौखम्भा संस्कृत संस्थान, वाराणसी, चतुर्थावृत्ति:, सं.२०५८।

२९. पाणिनिशिक्षा – भट्टोजिदीक्षितप्रणीता सिद्धान्तकौमुदी, तत्त्वबोधिनीसुबोधिनी–व्याख्याविभूषिता , सं. भार्गव भिकाजी जोशी, निर्णयसागर, मुम्बई, अष्टमावृत्तिः, ई.स.१९४२।

३०. प्रश्नचण्डेश्वरः – लेखकः– श्रीरामकृष्ण दैवज्ञविरचितः, संस्कृतटीकाकारः विष्णुदत्त शर्मा ई.स.१९४८, हिन्दी टीकाकार अभय कात्यायन सं.२०६२, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

३१. फलदीपिका भावार्थबोधिनीसहिता, गोपेश कुमार ओझा, मोतिलाल बनारसीदास, दिल्ही,२००४

३२. फलित–मार्तण्डः – पं. मुकुन्द वल्लभ मिश्रेण प्रणीतः, भावार्थ टीकासहित, मोतीलाल बनारसीदास, वाराणसी, प्रथमावृत्ति, ई.स.१९६८।

३३. बालबोधज्योतिषसारसमुच्चयः – प्रयोजकः–शास्त्री यज्ञदत्त दुर्गाशंकर ठाकर, प्रकाशक– अरुण यज्ञदत्त शास्त्री, वालुकेश्वरसंस्कृतपाठशाला, मुम्बई, पञ्चमावृत्ति, ई.स.२००९।

३४. बीजगणितम् – भास्कराचार्यविरचितं, व्याख्याकारः– श्रीजीवनाथझा, चौखम्बा संस्कृत सीरिज ओफिस, बनारस, , ई.स. १९४९।

३५. बृहज्जातकम– वराहमिहिरविरचितम्, भट्टोत्पलस्य संस्कृतव्याख्यया तथा केदारदत्तकृतहिन्दीव्याख्यया समेतः, केदारदत्त जोशी, मोतिलाल बनारसीदास, दिल्ही, २००७

३६. बृहत्पाराशरहोराशास्त्रम्– पराशरविरचितं, सुधाव्याख्यासहितं, संपादको व्याख्याकारश्च पं. देवचन्द्र झा , चौखंबा प्रकाशन, वाराणसी, दशमसंस्कणम्, सं. २००८

३७. बृहत्संहिता - वराहमिहिरविरचित, भट्टोत्पलविवृतिसमन्वित विमलाहिन्दी-व्याख्यासहित, सं.अच्युतानन्द झा, चौखम्बा विद्याभवन, वाराणसी, भाग-१-२, ई.स.२००५।

३८. बृहत्संहिता - वराहमिहिरविरचितः, विमला हिन्दीटीका, टीकाकार- पं. श्रीअच्युतानन्द झा शर्मणा, चौखम्बा विद्याभवन, वाराणसी, संस्करण-१९९३, ई.स.१९८३।

३९. भावकुतूहलजातकम् – लेखकः – जीवनाथः – हिन्दी पं. वनमाली चतुर्वेदी, मथुरा ।

४०. भावप्रकाशः - श्रीजीवनाथदैवज्ञविरचितः, प्रयोजक एवं प्रकाशक प्रभाकरदैवज्ञ गुजराती टीकासहित, अमदावाद, प्रथमावृत्ति ई.स.१९३७।

४१. भावफलाध्यायः - लोमेशसंहितान्तर्गतभावफलाध्यायः, भाषांतरकर्ता वैद्य पं. जगन्नाथ रविशंकर त्रिवेदी, मुंबई, प्रथम आवृत्ति, १९३७

४२. मनुस्मृतिः - श्रीमनुप्रणीतः, श्रीकुल्लूकप्रणीत मन्वर्थमुक्तावली टीकासहित मणिप्रभा हिन्दीव्याख्योपेता, हिन्दीव्याख्याकारः पं. हरगोविन्दशास्त्री, सप्तमावृत्ति, सं.२०६०।

४३. **महाभारतम्** - अनुवादकः-स्वामी जगदीश्वरानन्द सरस्वती, खैस्ताब्दः-२००८, प्रकाशकः-विजयकुमार गोविदराम हासानन्द, ४४०८, नई सडक दिल्ली-

४४. मानसागरी - श्रीअनूपमिश्रसंशोधिता, काशीस्थभार्गवपुस्तकालयाध्यक्षेण पं. श्री कैलासनाथभार्गवेण प्रकाशिता, काशी, १९४८।

४५. मुहूर्तमार्तण्डः – नारायणदैवज्ञविरचितं, व्याख्याकार–पं.सीतारामझा, चोखम्बा विद्याभवन, वाराणसी, चतुर्थावृत्ति, ई.स.१९९२।

४६. यजुर्वेदसंहिता – सं.श्रीपाद दामोदर सातवळेकर, स्वाध्याय मंडळ पारडी, बलसाड, गुजरात, ई.स. १९५७.

४७. रेखागणित (षष्ठाध्यायः) – पं.सीतारामझाविरचितं, प्रकाशक– मास्टर खेलाडिलाल एण्ड सन्स, बनारस, प्रथमावृत्ति, सं.१९९५।

४८. लघुजातकम्– दैवज्ञवराहमिहिरविरचितं, भट्टोत्पलटीका, हिन्दीव्याख्या डॉ. कमलकान्त पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करण २००५

४९. लघुपारशरी– मध्यपाराशरीसहिता, संपादकः डॉ. सूर्यकन्त झा, चौखंबा सुरभारती प्रकाशन, वाराणसी, २००७

५०. वर्षयोगसमूहः – लेखकः – पं. नारायणदासः, भाषाटीका ज्वालाप्रसाद मिश्र, मुंबई शके १९५५ ।

५१. विष्णुपुराणम् – संपादकः मधुसूदनःपाठकः, प्राच्यविद्यामन्दिरं, वडोदरा, द्वितीयो भागः, ई.स.१९९९।

५२. वृद्धयवनजातकम्–आचार्यमीनराजविरचितम्–प्रणवाख्याहिन्दीव्याख्यासहितम्, व्याख्याकारः – डॉ. सुरेशचन्द्र मिश्र, भागः २, प्रकाशकः– रंजन पब्लिकेशन्स, नवदिल्ही, प्रथमं संस्करणम् १९९४

53. वृद्धयवनजातकम्–आचार्यमीनराजविरचितम्–प्रणवाख्याहिन्दीव्याख्यासहितम्, व्याख्याकारः – डॉ. सुरेशचन्द्र मिश्र, भागः १, प्रकाशकः– रंजन पब्लिकेशन्स, नवदिल्ही, प्रथमं संस्करणम् १९९४

५४. वेदाङ्गज्योतिषम् –सं. शमा शास्त्री, आङ्ग्लभाषानुवादेन संस्कृतटीकया च सहितं, मैसुर, ई.स.१९३६।

५५. शतपथब्राह्मणम् – सं जितराम भट्टः, ईस्टर्न बुक लिंकर्स, दिल्ली, प्रथमावृत्तिः,ई.स.२००९।

५६. श्रीमद्भागवत महापुराण – भाग १,२. हिन्दी व्याख्यासहित गीताप्रेस गोरखपुर, सं.२०६८।

५७. सरलत्रिकोणमितिः – महामहोपाध्यायपण्डितबापूदेवशास्त्रीसंकलिता, व्याख्याकार– पं.श्रीमुरलीधरशर्मा, प्रकाशक– श्रीलक्ष्मीनारायण प्रेस, बनारस, प्रथमावृत्ति, ई.स.१९१६।

५८. सर्वार्थचिन्तामणिः – पं. व्यङ्कशर्मविरचितः, पं. महीधरशर्मकृत भाषाटीकासहित, लक्ष्मीवेङ्कटेश्वर प्रेस, कल्याण मुम्बई, सं.२०१२

५९. सारावली– कल्याणवर्मविरचित। सुबोधिनीहिन्दीव्याख्यासहिता, व्याख्याकारः, सोमेश्वरनाथ झा, भारतीय बुक कॉर्पोरेशन, दिल्ही, प्रथमसंस्करणम् २००८

६०. सिद्धान्ततत्त्वविवेकः – कमलाकरविरचितं, टीकाकार–श्रीगङ्गाधरमिश्र, प्रकाशक– बाबूश्रीकपिलेश्वरप्रसाददत्त, भांगलपुर, प्रथमावृत्ति, ई.स.१९३५।

६१. सुलभजातकः – ज्योतिर्वाङ्मयपुस्तकावलिः क्र. ४, संपादकः विष्णु गोपाल नवाथे, मुंबई, प्रथम –आवृत्तिः, १९३४ ।

६२. सूर्यसिद्धान्तः – सूर्यमयासुरप्रणीतः, व्याख्याकार–कपिलेश्वर शास्त्री, प्रकाशक – चौखम्बा संस्कृत सीरिज, बनारस, प्रथमावृत्ति, ई.स.१९४६।

६३. हस्तसञ्जीवनम् – सम्पादक– हरिशङ्कर पाठक, प्रकाशक– भारतीय विद्या संस्थान, वाराणसी, द्वितीयावृत्ति, ई.स.१९९२।

६४. हस्तसञ्जीवनम् -श्रीमेघविजयगणिविरचितः, टीकाकार–सुरकान्त झा, प्रकाशक– चौखम्बा सुरभारती प्रकाशन, वाराणसी, प्रथमावृत्ति, ई.स.२००७

**हिन्दी–गुजराती–मराठीभाषाग्रन्थाः–**

६५. अथ सोने की चिडिया – पं. शुजानसिंहजी शास्त्री, प्रकाशक पं. शिवभरोसे गंगाशरण, श्री ज्ञानसागर प्रेस, मेरठ, प्रथम आवृत्ति ।

६६. गाथा ग्रहांची, लेखक– शांडिल्य–पद्माकर जोशी,रामटेक, नागपुर, १९६५(मराठी)

६७. ग्रह–नक्षत्र–योग – पं. चाँदनारायण पारीक, प्रकाशक– हंसा प्रकाशन, जयपुर, प्रथमावृत्ति, ई.स.२००६।

६८. जातककल्पतरु – लेखक – चन्द्रशेखर गोपालजी ठक्कुर, संपादक आरोग्यसिन्धु, प्रकाशक मेघराज जैन पुस्तक भंडार, मुंबई , प्रथम आवृत्ति, सं. २००८ ।

६९. ज्योतिर्विद्भूषणः – करुणाशंकर वि. घणेशजी रावलविरचितं गुजराती भाषांतर टीका सहित, युनाटेड प्रिन्टिंग एवं जनरल एजन्सी कंपनी, प्रथम आवृत्ति ई. स. १८८५ ।

७०. ज्योतिर्विवेकरत्नाकर – रचयिता पं. श्रीलक्ष्मीप्रसाद पाठक, प्रकाशक विक्रम विजय कार्यालय, जबलपुर , द्वितीय आवृत्ति, सन १९५० ।

७१. ज्योतिषनी दृष्टिअे ग्रहविचार अने भविष्यकथन– लेखक–नटवरलाल सरैया, गुजराती, प्रकाशक – लकी प्रिन्टर्स, अमदावाद, प्रथमावृत्ति, ई.स. १९९०।

७२. ज्योतिष नु सरळ अध्ययन – लेखक– चन्द्रकान्त भट्ट, प्रकाशक– रमणलाल सोनी, मोडासा, ई.स.१९४८।

७३. ज्योतिषपरिचय – लेखक – डॉ. चन्द्रशेखर ठक्कुर, संपादक – आरोग्य सिंधु, प्रकाशक – महादेव रामचन्द्र जागुष्टे, अमदावाद, द्वितीय आवृत्ति – १९५६ ।

७४. ज्योतिषप्रवेशिका – संपादक – मदनचन्द्रत्रिवेदी, प्रकाशक –नवभारत साहित्य मंदिर, मुंबई ।

७५. ज्योतिषप्रश्नोत्तरी – लेखक – पं. भोजराजद्विवेदी, प्रकाशक – डायमंड पोकेट बुक्स प्रा. ली., नई दिल्ली, संस्करण २००० ।

७६. ज्योतिषमार्गदर्शन – लेखक – शांतिलाल हरिलाल शाह, अमदावाद, प्रथम आवृत्ति ।

७७. ज्योतिषविज्ञान – लेखक – डॉ. चन्द्रशेखर ठक्कुर, संपादक – आरोग्य सिंधु, प्रकाशक – मेघराज जैन पस्तक भंडार मुम्बई, प्रथमावृत्ति – १९५२।

७८. ज्योतिषरहस्य – लेखक– नटवरलाल पटेल , प्रकाशक – महादेव रामचन्द्र जागुष्टे, अमदावाद, प्रथमावृत्ति, ई.स.१९९३।

७९. ज्योतिषशास्त्र ना तारणो- लेखक- मोहन, प्रकाशक- सुमनबुकसेन्टर- मुम्बई, प्रथमावृत्ति, ई..स.२००६।

८०. तांत्रिक वनस्पति ना सिद्ध प्रयोगो – लेखक- नलिन पंड्या, प्रकाशक- गूढविद्या अनुसंधान केन्द्र, अमदावाद, प्रथमावृत्ति- ई.स.-२००२।

८१. तेजीमंदीविचार – लेखक – पं. श्रीनिवास महादेवजी पाठक, प्रकाशक श्रीभुवनेश्वरी प्रिन्टिग प्रेस, रतलाम, द्वितीय आवृत्ति, १९४६ ।

८२. नक्षत्ररहस्य - लेखक-श्रीहसमुख झवेरी, प्रकाशक- श्रीहरिहर पुस्तकालय, सुरत, प्रथमावृत्ति।

८३. नवमांशसंहिता - श्री मणिलाल भगवानदास शाह मुम्बई १९८१। (गुजराती)

८४. प्राचीनचरित्रकोष - लेखक- सिद्धेश्वर शास्त्री चित्राव, भारतवर्षीय चरित्रकोष मंडळ,पुणे, हिन्दी संस्करण।

८५. भारतीयकुण्डलीविज्ञान - लेखक- मीठालाल हिंमतराम ओझा, प्रकाशक- वसंत मीठालाल ओझा, मीरघाट, वाराणसी, द्वितीयावृत्ति, सं. २०२८।

८६. भाग्यपरीक्षा -लेखक पं. बृजमोहनलाल मिश्र, प्रकाशक – गुलजार कम्पनी, अलीगढ , सं. १९८८ ।

८७. भाग्यरेखा - लेखक- शंकर करंदीकारः, गुजराती, प्रकाशक- शंकर कंरदीकारः, मुम्बई , प्रथमावृत्ति, ई.स.१९४४।

८८. भारतीय गणित ज्योतिष – लेखक- पं.केवल आनन्द जोशी, मनोज पब्लिकेशन्स, दिल्ली, प्रथमावृत्ति, ई.स.२००१।

८९. भारतीय ज्योतिष - नेमिचन्द्र शास्त्री, भारतीय ज्ञानपीठ, नवदिल्ही, ४१ संस्करणम्, २००६

९०. भारतीय ज्योतिष का इतिहास - गोरख प्रसाद, प्रकाशन ब्यूरो, उद्रारप्रदेश सरकार, लखनउ, प्रथम संस्करण, १९५६

९१. भारतीय ज्योतिषशास्त्र - शंकर बाळकृष्ण दीक्षित (मराठी),वरदा बुकस्, पुणे, चतुर्थ–आवृत्तिः, १९९९

९२. भारतीय ज्योतिषशास्त्र - भारतीय ज्योतिष–हिन्दी

९३. भावीना गगनमां – लेखक - यशोधर महेता, अमदावाद, प्रथम आवृत्ति, १९६६ ।

९४. भावीना भेद – लेखक - यशोधर महेता, प्रकाशक – महादेव रामचन्द्र जागुष्टे, अमदावाद, प्रथम आवृत्ति – १९५४ ।

९५. भाविनी अगम्य लीला - यशोधर महेताप्रणीत , गुजराती, प्रकाशक साराभाइ बरकतराम एन्ड सन्स, अमदावाद, द्वितीय आवृत्ति १९७७ ।

९६. लघुसायनग्रहसाधन - लेखक–कानजीमयाशङ्करद्विवेदी, प्रकाशक– पं.ज्यष्ठराम मुकुन्दजी पुस्तकालय, मुम्बई, प्रथमावृत्ति, ई.स.१८९९।

९७. वैदिक नक्षत्र ज्योतिष – लेखक – सुरेशचन्द्र मिश्र, प्रकाशक- रंजन पब्लिकेशन्स, १६,अन्सारी रोड, दरियागंज, नई दिल्ली, प्रथमावृत्ति २००६।

९८. शनि, राहु इ.ग्रहोनी जीवन पर असरो – ज्योतिर्विद मणिलाल भगवानदास शाहप्रणीतः गुजराती टीका सहित प्रकाशक समुन्नति ट्रस्ट गोलवाड नाका शाहपुर अमदावाद प्रथम आवृत्ति १९७७।

९९. सम्पूर्ण ज्योतिषशास्त्र – लेखक – महेश रावल, प्रकाशक– रावल पब्लिकेशन्स, अमदावाद, तृतीयावृत्ति, ई.स.१९९७।

१००. सरलज्योतिष – लेखक – चन्द्रकान्त रत्नेश्वर भट्ट, श्रीलक्ष्मी पुस्तक भंडार, अमदावाद, प्रथम आवृत्ति , १९५४ ।

१०१. सरल ज्योतिष संग्रह – संकलन – श्री हेमंतकुमार शाह, प्रकाशक– महादेव रामचन्द्र जागुष्टे अमदावाद, द्वितीयावृत्ति, ई.स.२००२।

१०२. सुलभ ज्योतिषशास्त्र, लेखक–कृष्णाजी विठ्ठल सोमणशास्त्री,प्रकाशक– केशव भिकाजी ढवळे, गिरगांव, मुंबई, तृतीय–आवृत्ति, शके १८९२(मराठी)

१०३. हर्शल अथवा प्रजापति – लेखक व प्रकाशक – श्रीनिवासमहादेवपाठकः, भुवनेश्वरी प्रिंटिंग प्रेस, रतलाम, प्रथमावृत्ति, ई.स.१९५१।

**आङ्ग्लभाषाग्रन्थाः–**

104. History of Dharmashastra - P.V. Kane, Bhandarkar Oriental Research Institute, Second edition, Volume V part I(1974) and part II, 1977

105. Journal of the Bombay Branch of the Royal Asiatic Society - ed. P.V.Kane, A.A.A. Fyzee, N.K. Bhagawat, Vol. 24-25, 1948-1949-Article by P.V. Kane : Varahamihira and Utpala: their works and predecessors, pp. 1-31

106. New Catalogus Catalogorum - Kunjunni Raja, University of Madras, Volume 7, Madras , 1973

107. New Catalogus Catalogorum - Kunjunni Raja, University of Madras, Volume 8, Madras , 1974

108. New Catalogus Catalogorum - Siniruddha Dash, University of Madras, Volume 18, Chennai , 2007

109. The Practical Sanskrit-English Dictionary - V.S.Apte, Third edition, Gopal Narayan & Co., Bombay, 1924

११०. Works of Kalidasa - C.R.Devadhar, Vol.1, Dramas, Motilal Banarsidas, Delhi, 1986 Reprint.

१११. Works of Kalidasa - C.R. Devadhar, Vol.2 Poetry, Motilal Banarsidas, Delhi, 1984 1st Edition.